
S.V. Vedic University Series No :24

Research & Publication (Special Drive)

कारणागमः

पूर्वभागे प्रथमसम्पुटम्





प्रधानसम्पादकः

वेदाचार्य श्री सन्निधानं सुदर्शन शर्मा

कुलपतिः



श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः

तिरुपति

२००९

S.V. Vedic University Series No : 24
Research & Publications (Special Drive)

कारणागमः

पूर्वभागे प्रथमसम्पुटम्

सम्पादकः
डा. मुल्लपूडि सीताराम शास्त्री

प्रधानसम्पादकः
वेदाचार्य सन्निधानं सुदर्शन शर्मा
कुलपतिः



श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपति
२००९

Kāraṇāgamaḥ

Pūrvabhāgē Prathamasampuṭam

First impression : **2009**

Copies : **500**

Price :

Chief Editor :

Prof. S.Sudarsana Sarma
Vice-Chancellor

Editor :

Dr. M Sitarama Sastry

Published by :

Sri Venkateswara Vedic University
Research & Publications (Special Drive)
Tirupati - 517 501. (A.P.)

प्रस्तावना

श्रीवेङ्कटाद्रिनिलयं वेदविज्ञानभासुरम् ।
सङ्कल्पितार्थविजयप्रदं सुरतरुं नुमः ॥

परो हि प्रमोदकारकः प्रसरः, यतः श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः स्वीय 'परिशोधना-प्रकाशनविभागेन' (Research and Publication wing) महर्षि-मनीषासमुन्मिषितं, चिरत्नसम्प्रदायभासकं ग्रन्थजातं छात्र-पाठकोपकाराय प्रकाशयितुम् उद्युयुक्षमाणः, बहुलं वैदिक-आगम ग्रन्थकदम्बमाविष्करोति।

अष्टविंशतिशैवागमग्रन्थजाते अन्यतमो मान्यतमश्च कारणागमः । पूर्वोत्तरभागकालितेऽस्मिन् विपुलग्रन्थे इदानीं पूर्वकारणात् प्रथमा सम्पुटिः केवला प्रकाश्यते । द्वितीय-तृतीय सम्पुटिद्वयं नातिचिरमेव नेत्रविषयीभावं भजिता-इति सम्भाव्यते ।

ग्रन्थारम्भे तन्त्रावतारपटले सदाशिवस्य सद्योजातादि पञ्चमुखोत्पादिता सकलाऽऽगमिकविद्या प्रपञ्चिता आसीत् । प्राकारनिर्माण, आलय-मुखमण्डप-गर्भमण्डप-अर्चनापरिकरनिर्माणादिकं विविच्य,नित्यार्चनाविधानम्, स्वामिनः बहुविधस्नपनविधींश्च वास्तुहोमादिकं च सुविपुलमुपवर्णयति एष भागः कारणागमे ।

भारतीयसंस्कृत्याः सम्प्रदायस्य च परिरक्षकत्वेन प्रोच्यमाने मन्त्रतन्त्र-विज्ञानकदम्बे एकदेशस्य प्रतिबिम्बकमणिदर्पणोऽयं कारणागमः इति शैवागम विविदिषूणां प्रविविक्षूणां जिज्ञासूनां च विदितचरमेव ।

आन्ध्रलिपिप्रतिं ग्रन्थलिपिप्रतिं च आकरीकृत्यैषा कृतिर्निरमाय्यद्य। गहने गभीरे च शैवतन्त्रे उपक्रान्तस्यास्याल्पज्ञस्य मे सि.कार्तिकेयन् प्रभृति शिवागमसङ्ख्यावदुत्तमानां करावलम्बनं स्थैर्यासञ्जकमभूत् । महाभागेभ्यः उपकृतिज्ञतावेदको नमत्युत्तमावयवः । प्रकृते अवधेयः कश्चन मुख्योंऽशो वर्तते।

विषयानुक्रमणिका

ॐ

श्री शिवमयम्

कारणागमः

अथ तन्त्रावतारपटलप्रारम्भः

कल्याणं कुरुतां कश्चित्करुणावरुणालयः।
मयूरनगराधीशो मम नृत्तविनायकः।। १ ।।
भूधरस्योर्ध्वशृङ्गेषु रत्नश्रृङ्गनिकेतने।
तत्रासीनं महादेवं श्रीकण्ठं सुरवन्दितम्।। २ ।।
योगपीठस्थितं तस्य वामे गौरीसमायुतम्।
सर्वदेवावृतं सिद्धं मुनिगन्धर्वसेवितम् ।। ३ ।।
आद्यन्तकारणं पूज्यमपृच्छच्छर्व रुद्रकम् ।
प्रणम्य चरणौ तस्य प्रजापतिरथाब्रवीत् ।। ४ ।।

प्रजापतिरुवाच

देवदेव महेशान स्थित्युत्पत्तिलयेशक।
जगतामपि प्रीत्यर्थं योगिनां मुक्तिहेतुकम् ।। ५ ।।
शिवज्ञानं परं गुह्यं वद मे शर्वरुद्रकम् ।

ईश्वर उवाच

त्वया पृष्टमिदं सर्वं वक्ष्येऽहं सुखसाधनम्।। ६ ।।
कारणाख्यं महातन्त्रं प्रतिष्ठातन्त्रमुत्तमम् ।
कोट्येकग्रन्थ सम्युक्तं कर्षणाद्यर्चनान्तकम् ।। ७ ।।
सङ्क्षेपेणाधुना विप्र श्रुणु वक्ष्ये समासतः।
तस्यादौ तन्त्रसद्भावं मूलभेदोपभेदयुक् ।। ८ ।।
कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रखेदकम् ।। ९ ।।

विजयं चैव निश्वासं स्वायम्भुवमथानलम् ।
वीरं च रौरवं चैव मकुटं विमलं तथा ॥ १० ॥
चन्द्रज्ञानं च बिम्बश्च प्रोद्गीतं ललितं ततः ।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च ॥ ११ ॥
किरणं वातुलं चैव अष्टाविंशति सङ्ख्यया ।
विपुलार्थं तमोघ्नीति तत्त्वमन्त्रार्थदर्शनम् ॥ १२ ॥
तन्त्रदेहसमाख्यातं तन्त्रसंज्ञा च संहिता ।
तेषु पूर्वे दश प्रोक्ताश्शिवभेदेति संज्ञिकम् ॥ १३ ॥
तथाऽपराष्टदशकं रुद्रभेदमिति स्मृतम् ।
महेशाच्छिवभेदानां श्रोतारस्तु त्रयस्त्रयः ॥ १४ ॥
रुद्रभेदो महेशाच्च श्रोतारौ द्विद्विकौ मतौ ।
महेशात्प्रणवःप्राप्तः प्रणवात्त्रिकलस्थितः ॥ १५ ॥
त्रिकलाच्च हरः प्राप्तः श्रोतारः कामिकस्य तु ।
सादाख्याद्भस्म सम्प्राप्तं ततः प्राप्तो विभुस्तथा ॥ १६ ॥
योगतन्त्रस्य विख्यातात्सुदीप्ताद्गोपतिस्मृतः ।
गोपतेरम्बिका ख्याता चिन्त्याख्यस्य प्रकीर्तिताः ॥ १७ ॥
कारणाच्छर्वरुद्रस्तु शर्वरुद्रात्प्रजापतिः ।
कारणस्य तु विख्यातः सूक्ष्माद्वैश्रवणस्तथा ॥ १८ ॥
प्रभञ्जनो धनेशाच्च सूक्ष्मतन्त्रस्य कीर्तितः ।
कालाद्भीमस्ततः प्राप्तो विमलं वीरभद्रकः ॥ १९ ॥
चन्द्रज्ञानमनन्तं च सम्प्राप्तस्तु बृहस्पतिः ।
मुखबिम्बं प्रशान्ताच्च सम्प्राप्तो दधिचिस्मृतः ॥ २० ॥
प्रोद्गीतं शूलिना प्राप्तः त्वचाख्योमुनिसत्तमः ।
शूलया ललितं प्रोक्तं रुद्रभैरव एव च ॥ २१ ॥

बिन्दोश्चण्डेश्वरः प्राप्तस्सादाख्यं तन्त्रकस्य तु ।
सन्तानं शिवनिष्ठाश्च सम्प्राप्तश्शिवसाधने ।। २२ ।।
सर्वोक्तं सोमदेवाच्च नृसिंहं प्राप्तवांस्तथा ।
श्रीदेव्याश्चोशना प्राप्तः पारमेश्वरमेव च ।। २३ ।।
देवपुत्रात्तु सिद्धाच्च संवर्तः प्राप्तवांस्ततः ।
शिवात्प्राप्तो महाकालो वातुळं तन्त्रमुत्तमम् ।। २४ ।।
रुद्रभेदात्सुधीप्रोक्ता ग्रन्थसङ्ख्याश्शृणुष्वथ ।
परार्थ सङ्ख्यया ग्रन्थं प्रथमं प्ररिकीर्तितम् ।। २५ ।।
द्वितीयं लक्षसङ्ख्यं च तृतीयं तु सहस्रकम् ।
चतुर्थं कोटि सङ्ख्यं च पञ्चमं त्वयुतं स्मृतम् ।। २६ ।।
षष्ठस्य नियुतं प्रोक्तं सप्तमं पद्मसङ्ख्यया ।
अष्टमं शङ्खसङ्ख्यञ्च नवमं पञ्चलक्षकम् ।। २७ ।।
दशमं तु त्रिकोटी च एकादशं तथैव च ।
द्वादशं कोटिसङ्ख्यां च सार्धकोटित्रयोदश ।। २८ ।।
अयुतं चतुर्दशं प्रोक्तं नियुतं पञ्चदशं स्मृतम् ।
षोडशञ्चार्बुदं चाष्ट शतसाहस्र माकुटम् ।। २९ ।।
त्रिलक्षं विमलं प्रोक्तं चन्द्रज्ञानं त्रिकोटिकम् ।
मुखबिम्बं सहस्रं च प्रोद्गीतं तु त्रिलक्षकम् ।। ३० ।।
ललितं चाष्टसाहस्रं सिद्धं चैवार्धकोटिकम् ।
सन्तानं षट्सहस्रं च शिवोक्तं तु द्विलक्षकम् ।। ३१ ।।
पारमेश्वरतन्त्रस्य लक्षद्वादशमुच्यते ।
किरणं पञ्चकोटिस्स्याच्छतसहस्रं तु वातुलम् ।। ३२ ।।
तन्त्राणां कामिकादीनां ग्रन्थसङ्ख्याः प्रकीर्तिताः ।
नारसिंहं च वक्तारं भैरवोत्तरमेव च ।। ३३ ।।

कामिकस्य त्रयो भेदाः, सुदासन्तादि कारकौ ।
वीणा शिखोत्तरं चैव आत्मयोगं तथैव च ।। ३४ ।।
योगजस्य तु भेदानि पञ्चधा कीर्तिनि वै ।
पापनाशं परोद्भूतं सुचिन्त्यममृतान्वितम् ।। ३५ ।।
सुभगं वामसंज्ञं च चिन्त्यभेदस्तु षड्विधः ।
माहेन्द्रं कारणं दौर्गं पावनं भीमसहिता ।। ३६ ।।
विद्वेषं मारणं चैव सप्तधा कारणस्य तु ।
पार्वती च परोभूतं प्रभूतं पद्मसहिता ।। ३७ ।।
अजितस्य चतुर्भेदा अमेयाख्यमतः परम् ।
असङ्ख्यमद्भमाच्छाद्यमानन्दममितौजसम् ।। ३८ ।।
अद्भुतं माधवोद्भूतम् अक्षयं दीप्तिकेति वै ।
सूक्ष्मस्य सूक्ष्ममेकं तु अतीतं मण्डलं तथा ।। ३९ ।।
जातिभागोऽप्रमेयश्च प्रभूत्थविबुधं तथा ।
हस्तं शु॒ लङ्कारं सुबोधं सहस्रके दश ।। ४० ।।
काश्यपं वासवं नीललोहितं भूततन्त्रकम् ।
विद्यापुराणमैन्द्रश्च आत्मालङ्कारमेव च ।। ४१ ।।
वासिष्ठं गौतमं ब्राह्मम् ईशानोत्तरमेव च ।
प्रकारणं तथांशुमान्प्रोक्तं द्वादशभेदकम् ।। ४२ ।।
अभेदं सुप्रभेदस्तु भवं सौम्यमथोद्भवम् ।
मृत्युनाशमघोरश्च महाघोरं ततः परम् ।। ४३ ।।
परमेश्वरं च विजयं विजयस्याष्टभेदकाः ।
निश्वासोत्तरतन्त्रं च यमं निश्वासमेव च ।। ४४ ।।
निश्वासाख्यं महातन्त्रं निश्वासोर्ध्वमुखोदयम् ।
निश्वासनयनं चैव मन्त्रनिस्वासमेव च ।। ४५ ।।

निश्वासकारिकाचैव निश्वासाघोरमेव च ।
निश्वासश्चाष्टधा प्रोक्तं प्रजापतिमतं तथा ।। ४६ ।।
पद्मंश्च द्विविधं विद्यात् स्वायम्भुवविशेषतः ।
आग्नेयं व्योमतन्त्रं तु आग्नेयस्य द्विधा मतम् ।। ४७ ।।
प्रस्तारं फुल्लनयनं प्रबोधं बोधबोधकौ ।
शाकटं मोहसमयं प्रमोहं शकटादिकम् ।। ४८ ।।
विलेखनं हलं भद्रं वीरं वीरत्रयोदश ।
कालाख्यं कालदहनं रौरवं रौरवोत्तरम् ।। ४९ ।।
महाकालमतं चैन्द्रं रौरवे षड्विधं स्मृतम् ।
मकुटोत्तरश्च मकुटं मकुटस्य द्विधा स्मृतम् ।। ५० ।।
वृषगुह्य मदाक्रान्तं वृषभं वृषभोत्तमम् ।
सुदन्तमथ भूतं च रौद्रं भोगं तथैव च ।। ५१ ।।
आरेवतं सुभद्रश्च अतिक्रान्तमलङ्कृतम् ।
अर्चितं चाट्टहासश्च अनन्तं तारणं तथा ।। ५२ ।।
भेदो विमलतन्त्रस्य षोडशैव प्रकीर्तिताः ।
एकपादपुराणं च स्थाण्वाख्यं नन्दिकेश्वरम् ।। ५३ ।।
स्थिराख्यं शङ्करप्रोक्तं श्रीमुखं शिवभद्रकम् ।
कल्पभेदमिति प्रोक्तं शिवशासनमेव च ।। ५४ ।।
देवीमताख्यतन्त्रश्च शिवशेखरमेव च ।
वारुणं चैव वायव्यं चन्द्रज्ञानं चतुर्दश ।। ५५ ।।
चतुर्वक्त्रश्च संस्तोभं प्रतिबिम्बमयोगजम् ।
आत्मालङ्कारवायव्यं तुडिनीरं तु तौटिकम् ।। ५६ ।।
कुट्टिमाख्यं तुलायोगं कुलाप्रत्ययमेव च ।
पट्टशेखरमेवश्च महाविद्यामहासुरम् ।। ५७ ।।

निश्चित्य तिथिविख्यातं मुखबिम्बस्य भेदकाः ।
दण्डाधारं पाशबन्धं पिङ्गळंमतमेव च ॥ ५८ ॥
पराहाङ्कुशकवचं शिवज्ञानं धनुर्धरम् ।
कालज्ञानञ्च विज्ञानमायुर्वेदं च गीतकम् ॥ ५९ ॥
भरतं च धनुर्वेदमातोद्यं सर्पदंष्ट्रकम् ।
प्रोद्गीताख्यस्य तन्त्रस्य भेदाषोडश एव च ॥ ६० ॥
ललितोत्तरञ्च कौमारं ललिताख्यमतः परम् ।
ललितस्य त्रयोभेदा कालाख्यं शशिखण्डकम् ॥ ६१ ॥
सारोत्तरञ्च त्वीशानं सिद्धतन्त्रं चतुर्विधम् ।
अमरेशं सुराध्यक्षं लिङ्गाध्यक्षमसङ्ख्यकम् ॥ ६२ ॥
अनिलं शङ्करद्वन्द्वे सन्ताने सप्तभेदकाः ।
ईशानं शिवधर्मञ्च शिवधर्मोत्तरं तथा ॥ ६३ ॥
दिव्यप्रोक्तं कुबेराख्यं सर्वोक्तस्येह पञ्चकम् ।
हंसं पद्मञ्च तङ्गं सामान्यं यक्षिणी तथा ॥ ६४ ॥
पुष्करं सुप्रयोगञ्च सप्तथा परमेश्वरे ।
गारडं नैर्ऋतं नीलं रूक्षं भानुकमेव च ॥ ६५ ॥
प्रबुद्धं धेनुकं बुद्धं कालाख्यं किरणे नव ।
वातुलोत्तरतन्त्रञ्च कालज्ञानं पुरोहितम् ॥ ६६ ॥
श्रेष्ठं धर्मात्मकं सर्वं शुद्धं नित्यं महाननम् ।
विश्वं विश्वात्मकं तन्त्रं वातुले द्वादश स्मृताः ॥ ६७ ॥
मूलभेदोपभेदाश्च समासात्परिकीर्तिताः ।
सदाशिवमुखाब्जेषु महेशेन पुराश्रितः ॥ ६८ ॥
कामिकाद्यजितान्तञ्च सद्योजातमुखोद्भवम् ।
दीप्तादि सुप्रभेदान्तं वामदेवमुखोद्भवम् ॥ ६९ ॥

विजयारभ्य वीरान्तं पञ्चैतेऽघोरवक्त्रजाः ।
रौरवामुखबिम्बान्तं पुरुषाख्याननोद्भवम् ।। ७० ।।
प्रोद्गीताद्यष्टतन्त्रश्च ईशानवदनोद्भवम् ।
येन वक्त्रोक्ततन्त्रेण दीक्षायां कुरुते तथा ।। ७१ ।।
तन्त्रेणैव शिवस्यैतत् कर्षणाद्यर्चनान्तकम् ।
कुर्यात्सर्वसमुद्दिष्टमनुक्तं चेत्तथान्यके ।। ७२ ।।
तन्त्रे सङ्ग्राह्य तन्त्रांश्च क्रियाः कुर्याच्छिवस्य च ।
प्रागुक्तानि च तन्त्राणि सिद्धान्तानि विदुर्बुधाः ।। ७३ ।।
शैवतन्त्रा इमे प्रोक्ता शैवं पाशुपतं तथा ।
सोमसिद्धान्तकं चैव वातुलं तु चतुर्विधम् ।। ७४ ।।
एतेषां सङ्करे दोषः, सङ्करे कर्तृनाशनम् ।
तस्मिन्प्रक्तेन कर्तव्यं, सङ्करं न तु दोषकम् ।। ७५ ।।
येन सिद्धाख्यतन्त्रेण दीक्षितस्त्वादिशैवकः ।
आदि शैवास्त्रिशैलेषु, तथा पाशुपतादिषु ।। ७६ ।।
स्थापनं यजनं कुर्यात्सिद्धान्तोक्तविधानतः ।
तत्सौम्यफलतन्त्राच्च सन्तरन्नेतिकीर्तितम् ।। ७७ ।।
स्थापितं शुद्धशैवेन नहि पाशुपतादिषु ।
ते रौद्रफलकं दत्वा न कुर्यादर्चनादिकम् ।। ७८ ।।
इमे रौद्रं तथा न्तश्च शैवसौम्यमिति स्मृतम् ।
रौद्रे सौम्येन धर्माणि सोम्ये रौद्रेण वर्जयेत् ।। ७९ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे तन्त्रावतारपटलः प्रथमः समाप्तः

अथ मन्त्रावतारपटलप्रारम्भः

अस्मिन् तन्त्रे समासेन मन्त्रोच्चारं शृणुष्व तत् ।
तन्त्रं विना क्रिया नास्ति कर्षणाद्यर्चनान्तकम् ।। १ ।।
शिवस्सदाशिवश्चैव महेशो वा तथा त्रयः ।
वाच्यवाचकराहित्यो वाङ्मनोऽतीत गोचरः ।। २ ।।
सर्वज्ञानगुणोपेतस्सर्वतत्त्वामलप्रभुः ।
इत्थंभूतशिवः प्रोक्तो निष्कळश्चेति कीर्तितः ।। ३ ।।
सकलो निष्कलोपेतस्त्वष्टत्रिंशत्कलात्मकः ।
सकलोक्तो सम्पूर्णो भुवनाध्वोत्तरोमहान् ।। ४ ।।
वर्णाविवध्वजोपेतो मन्त्रत्वारुद्र आत्मकः ।
पदाथ्वाद्धस्तिरोमांसः शुक्लमज्जाऽस्थिततत्वधृत् ।। ५ ।।
सदाशिवषडध्वात्मा तस्य प्राणी शिवस्स्मृतः ।
हृदयाद्यङ्गसम्पूर्णोऽध्यासे सकलरूपधृक् ।। ६ ।।
निष्कळस्तदभावेन तस्मात्सकल निष्कलः ।
सदाशिवगुणोपेतो तस्य वामे मनोन्मनी ।। ७ ।।
महेशस्सकळः प्रोक्तो नानारूपधरो हरः ।
वह्निवाहनचिह्नाद्यैः लयाभोगाधिकारवान् ।। ८ ।।
भवानीसहितो देवस्सर्वाकारेषु वामके ।
तस्मात्क्रियाणां मूर्तीनां मन्त्राणां शृणु वर्त्म ते ।। ९ ।।
नादं नादादिकं कूटं कलाण्डं पार्थिवान्वितम् ।
वारुणं वह्निसंयुक्तं मरुत् षष्ठस्वरान्वितम् ।। १० ।।
स्वरान्तबिन्दुदार्ढ्यं नवर्णात्मानं शिवं विदुः ।
नादो हुङ्कारमित्युक्तं नादाद्यं तु सकारकम् ।। ११ ।।
कूटाक्षरो क्षकारं स्यात्कालार्णन्तु मकारकम् ।
पृथ्वी बीजं लकारस्स्याद्, वरौ वरुणवह्नयोः ।। १२ ।।

यकारं मरुतो बीजं, षष्ठस्वरसमन्वितम् ।
मन्त्रः प्रोक्तश्शिवस्येह जगत्सृष्टिलयात्मकः ।। २३ ।।
नादार्णन्तु समुद्धृत्य अर्चतुर्दश संयुतम् ।।
बिन्दुनादसमायुक्तं नादाद्यं प्रथमान्वितम् ।। १४ ।।
अष्टवर्गादिमं चैव तृतीयस्वरसंयुतम् ।
सप्तवर्गान्तमुद्धृत्य प्रथमस्वरमण्डनम् ।। १५ ।।
पञ्चाक्षरमिदं ह्येवं मन्त्रं सदाशिवस्य तु ।
नादं कालसमोपेतं वह्निमारुतसंयुतम् ।। १६ ।।
षष्ठस्वरसमायुक्तं बिन्दुनादसमन्वितम् ।
एतत् महेशमन्त्रं तु सर्वसिद्धिकरं परम् ।। १७ ।।
पुनस्सान्तं समुद्धृत्य वह्निमायासमन्वितम् ।
बिन्दुनादसमायुक्तं मनोन्मन्यास्तु मन्त्रकम् ।। १८ ।।
द्वितीयस्य तृतीयन्तु मायानलसमन्वितम् ।
बिन्दुनादसमायुक्तं गौरीबीजमिदं परम् ।। १९ ।।
षोडशस्वरसङ्घं तु नपुम्सकविवर्जितम् ।
द्वादशस्वरसङ्घोषं नादाख्यार्णसमन्वितम् ।। २० ।।
शन्तमीशानमित्युक्तमन्ये रौद्रा इतिं स्मृताः ।
शुक्लपीतारुणं चैव रक्तं वामञ्च कृष्णकम् ।। २१ ।।
वर्णानीव षडङ्गानि त्रिनेत्राश्च चतुर्भुजाः ।
शूलं कपालहस्ताश्च अभयं वरदान्वितम् ।। २२ ।।
हस्तनेत्रौ तु रौद्रौतु शेषसौम्य इति स्मृताः ।
सदाशिवस्य रूपं तु वक्ष्येऽहं द्विजसत्तमाः ।। २३ ।।
कन्देन्दुस्फटिकाभासा जटामकुटमन्डितम् ।
पञ्चवक्त्रयुतं तेषु प्रतिवक्त्रत्रिलोचनम् ।। २४ ।।

सर्वाभरणसम्युक्तं दशदोर्भिस्समन्वितम् ।
शूलं परशुखड्गश्च वक्त्राभयौ च दक्षिणे ॥ २५ ॥
पाशंनागाङ्कुशश्चैव घण्टां वह्निं च वामके ।
दिव्याम्बरधरं देवं दिव्यपुष्पैरलङ्कृतम् ॥ २६ ॥
दिव्यगन्धानुलिप्ताङ्गं शान्तरूपं स्मिताननम् ।
मन्त्रोच्चारे स्मरेन्मन्त्री चतुर्दोर्भिस्समन्वितम् ॥ २७ ॥
रक्तवर्णोज्वलां शुक्लवस्त्रेणैव विभूषिताम् ।
सर्वाभरणसम्पूर्णपीनोरुजघनस्तनाम् ॥ २८ ॥
त्रिनेत्रां गन्धपुष्पाढ्यां केशालकविभूषिताम् ।
पद्मोत्पलधरां देवीं वरदाभयपाणिनीम् ॥ २९ ॥
देवस्य वामभागे तु दिव्यरूपां मनोन्मनीम् ।
चतुर्भुजो महेशस्तु जटामकुटमण्डितः ॥ ३० ॥
करण्डमकुटोपेतां नेत्रत्रयसमन्विताम् ।
इत्थम्भूतां परां गौरीं भावयेत्तु विचक्षणः ॥ ३१ ॥
पृथिव्यादीनि बीजानि लवरयहकारकः ।
प्रणवः प्रथमं प्रोक्तं आईऊ तदनन्तरम् ॥ ३२ ॥
व्योमव्यापिन् चतुर्थश्च तदूर्ध्वं प्रणवं भवेत् ।
अस्मिन् तन्त्रे विशेषेण दशाक्षरमिति स्मृतम् ॥ ३३ ॥
हुम्फट्कारविसर्गान्तं मन्त्रं पाशुपतं स्मृतम् ।
चीच्च चीच्च्यक्षरं गृह्य बिन्दुकृद्वर्ण सम्युता ॥ ३४ ॥
क्षुरिकाद्यष्टवर्णं तु सर्वकार्येषु पूजितम् ।
भृं सृं क्षृं बीजमुख्यास्तु विद्याङ्गनि ततश्शृणु ॥ ३५ ॥
प्रशान्ता येति हृदयं प्रणवात्मने नमश्शिवः ।
शिवाय हृं शिखा ज्ञेयं हुङ्कारस्तु पुरुष्टुतः ॥ ३६ ॥

फट्कारममृतश्चास्त्रमोजुम्पो नेत्रमुच्यते ।
विद्याङ्गस्त्विति विख्याता वषट्कारसमन्वितः ॥ ३७ ॥
अनन्तेशस्तथा सूक्ष्मशिवोत्तम्येकनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीखण्डशशिखण्डिकः ॥ ३८ ॥
अष्टविद्येश्वरा ह्येते त्रिनेत्राश्च चतुर्भुजाः ।
सव्ये अभयवज्रौतु वामे तु वरदाङ्कुशौ ॥ ३९ ॥
अङ्गसव्यसदो भेरीटङ्कुशूलसमन्वितः ।
रक्तश्वेतं तथा नीलं पीतकृष्णश्च कुङ्कुमम् ॥ ४० ॥
अरुणम् अञ्जनं पूर्णक्रमाद्विद्वेशवर्णकम् ।
गौरीचण्डेशनन्दीशौ महाकालो वृषस्तथा ॥ ४१ ॥
गणेशश्चैव भृङ्गीशो महासेनो गणेश्वरः ।
द्विनेत्रा द्विभुजा श्यामा गौरी दक्षकरोत्पला ॥ ४२ ॥
द्विनेत्रो द्विभुजश्चण्डश्शम्भः, वैटङ्कहस्तकः ।
चतुर्भुजः त्रिनेत्रस्तु कृष्णवर्णः चतुर्भुजः ॥ ४३ ॥
अभयं वरदोपेतो सूरस्तोमरशूलधृक् ।
वृषभश्वेतवर्णस्तु तीक्ष्णग्राहू महाबलः ॥ ४४ ॥
गजाननस्त्रिनेत्रस्तु कुङ्कुमाभं चतुर्भुजम् ।
पाशदन्तौ तु सव्ये तु वामेत्वङ्कुशलड्डुकौ ॥ ४५ ॥
नागयज्ञोपवीतश्च लम्बोष्टस्तु गणाधिपम् ।
चतुर्भुजस्त्रिनेत्रस्तु भृङ्गीशः पिङ्गळः प्रभुः ॥ ४६ ॥
दक्षिणेऽभयटङ्कौ तु वामे वरदशूलधृक् ।
रक्तवर्णो महासेनो द्विनेत्रश्च चतुर्भुजः ॥ ४७ ॥
पुरन्दरोऽथ वह्निश्च यमो वै राक्षसेश्वरः ।
वरुणो वायुकुबेरौ ईशानोऽनन्तपद्मजः ॥ ४८ ॥

श्यामं रक्तं तथाकृष्णं नीलञ्चानन्तनीलकम् ।
शङ्खधूम्रश्च शुक्लश्च स्फटिकाभश्च वर्णकम् ।। ४९ ।।
अतसीपुष्पसङ्काशं दिक्पालानां निभानि वै ।
वज्रादिपद्मपर्यन्तं लोकपालायुधाः स्मृताः ।। ५० ।।
कुलिशश्शक्तिदण्डौ च खड्गपाशाङ्कुशास्तथा ।
गदा त्रिशूलं छत्रञ्च पद्मश्चेति दशायुधाः ।। ५१ ।।
नानावर्णमहाविद्युन्नीलजीमूतनीलगे ।
पावकं पद्मरागञ्च तुषारं चेन्द्रनीलकम् ।। ५२ ।।
शारदाभ्रञ्च मुक्तञ्च वज्रादीनां तु वर्णकम् ।
यक्षराक्षसपैशाचगन्धर्वाणां तथैव च ।। ५३ ।।
सिद्धानां किन्नराणाञ्च ऋषीणां भैरवैरपि ।
अन्येषां देवतानाञ्च स्वनामाद्यक्षरेण तु ।।
बिन्दुनादसमायुक्तं तेषां मन्त्रं प्रयोजयेत् ।। ५४ ।।

इति पूर्वकारणागमे प्रतिष्टातन्त्रे मन्त्रावतारपटलो द्वितीयः समाप्तः

अथ वास्तुविन्यासपटलप्रारम्भः

अतः परं प्रवक्ष्यामि वास्तुविन्यासमुत्तमम् ।
वास्तुविन्यासमूलं हि प्रजानास्पदास्सदम् ।। १ ।।
निर्मितं जयति द्रव्यम् इह पुत्रफलप्रदम् ।
वास्तूक्तदेवतानां तु यजनार्थं विशेषतः ।। २ ।।
अग्रहारस्तथा ग्रामो नगरं राजधानिकम् ।
पत्तनं कुट्टिमश्चैवाविकं सेनामुखं त्विति ।। ३ ।।
नृपवासप्रधानं तु महर्षी बालभूभूजाम् ।
आरामोपवनानाञ्च नारीणां वणिजामपि ।। ४ ।।
नृत्तगेयनियुक्तानां सद्भटानां निवासभूः ।
चण्डालानामथान्येषां राजधानीति कीर्तिता ।। ५ ।।
द्वीपान्तरगतद्रव्यक्रयविक्रयहेतुकम् ।
अभूमिरेवं वणिजामापादपत्तनं स्मृतः ।। ६ ।।
केवलं भद्रजातीनां, तेषां कृत्याधिकारिणाम् ।
निवेशः कुटिकः प्रोक्तो राजवेश्मसमायुतम् ।। ७ ।।
राजसेनासमायुक्तं वित्तद्वितयसंज्ञकम् ।
सर्ववि(जि)द्भिस्समायुक्तं मंत्रिभिस्सचिवैर्युतम् ।। ८ ।।
सेनामुखमितिज्ञातम् प्रोच्यतेऽष्टविधास्तु ते ।
ज्येष्ठमध्यकनिष्ठोयमग्रहार स्त्रिधास्मृतः ।। ९ ।।
तथैकैकं तु नवधा विंशत्सप्ताधिका स्मृता ।
वेदवेदाङ्गतत्त्वज्ञान् श्रोत्रियान् सात्विकान्वितान् ।। १० ।।
पत्नीसन्तानसहितान् वेदध्ययनतत्परान् ।
देवाग्निगुरुभक्तांश्च दारिद्र्ये दोषवर्जितान् ।। ११ ।।
उक्तषट्कर्मनिरतान् अनुष्ठानपरायणान् ।
विप्रानाहूय सम्पूज्य निश्चित्य वसुधाक्रियाः ।। १२ ।।

दद्यात्पूर्व तु गृहान् गृहोपकरणानि च ।
स्त्रीणामाभरणं, धान्यं, वस्त्रं, गां, च पयस्विनीम् ।। १३ ।।
दासीदासांश्च विप्रेभ्यो दद्यात् ज्ञानान्वितो नृपः ।
नास्तिकान् पिशुनान् क्रूरान् वेदाग्निगुरुनिन्दकान् ।। १४ ।।
ब्रह्मघ्नांश्च खलानज्ञान् तत्त्ववेत्तुस्स्वहारकान् ।
स्वधर्माचररहितान् दानकर्मविवर्जितान् ।। १५ ।।
लोभान्वितानप्यशुचीन् प्राक्(ङ्)नृपद्रोहसम्युतान् ।
वर्जयेदनिशं विप्रान् नृपस्तान् दानकर्मणि ।। १६ ।।
चतुर्दशसहस्राणां विप्राणामग्रहारकम् ।
उत्तमे नवके ज्येष्ठं सहस्रार्धक्षयं ततः ।। १७ ।।
अर्धाधिक सहस्रान्तं मध्यमं नवकं स्मृतम् ।
सहस्रभूसुराणां तु निवसस्त्वग्रहारकः ।। १८ ।।
कन्यसे नवकं ज्येष्ठं सहस्रं तदि्द्वजान्तकम् ।
शतसङ्ख्याक्षयेणैव कव्यसं नवकं स्मृतम् ।। १९ ।।
दशोनद्विदाशाप्राग्वत् शतं द्विशतमुत्तमम् ।
दशहीनक्रमेणैव क्षुद्रेषु विष्ट उच्यते ।। २० ।।
शतमारभ्य विष्टान्तं पञ्च पञ्च क्षयेण तु ।
षष्ठकं मध्यमं प्रोक्तं नवकं तु समासतः ।। २१ ।।
पञ्चपञ्चदशारभ्य यावत्पञ्चदशं पुनः ।
दशार्धेन क्रमेणैव क्षुद्रेषु च कनीयसम् ।। २२ ।।
प्रागुक्तगुणसम्पन्नान् ज्ञानाकृष्टान् तपोऽधिकान् ।
दशारभ्य द्विपर्यन्तमेषामेकैकहीनकम् ।। २३ ।।
वेदार्थं भूमिदां यद्वा तद्वदारभमुच्यते ।
प्रागुक्तगुणयुक्ताय वेदार्थनिपुणाय च ।। २४ ।।
कुर्यात्तत् ज्ञाननिधये दत्तं स्यादुत्तमोत्तमम् ।
एकभोगमिति ख्यातं प्रशस्तमतिदुर्लभम् ।। २५ ।।

तथा विविधमारभ्य तत्राऽढ्यावर्ध्वयेत्क्रमात् ।
अयुतैकसहस्रं तु षट् शतं च ततः परम् ।। २६ ।।
चतुष्षष्टि ततो यावदग्रहारस्समासतः ।
अष्टोत्तरशतं प्रोक्तं श्रद्धापूर्वविधानतः ।। २७ ।।
कुर्यादेकमितं तेषु न्यूनान्यूनफलं स्मृतम् ।
अधिके तत्फलाधिक्यं तस्माद्धीनं न कारयेत् ।। २८ ।।
कालं भूमिं परिक्ष्यादौ, कर्षणात्तदनन्तरम् ।
द्वितीयं यत्र विन्यासं तदन्ते वास्तुपूजनम् ।। २९ ।।
पञ्चमं गृहनिर्माणं देवानां स्थापनं ततः ।
सप्तमं गतविन्यासमष्टमं च तथैव च ।। ३० ।।
प्रायशः परिखारामे जलमार्गे विधानकम् ।
नवमं भूमिभागन्तु दशमन्तु प्रकीर्तितम् ।। ३१ ।।
क्रमेण तानि सर्वाणि अष्टावावर्ज्य तत्सरः ।
आयनं चोत्तरं श्रेष्ठं देवचत्वावरान्विते ।। ३२ ।।
मार्गशीर्षकमाघौ द्वौ वर्जयेत्तु प्रयत्नतः ।
शेषेष्वपि च कर्तव्यं त्वरिते तु प्रकाम्यते ।। ३३ ।।
कर्षणोक्तविधानेन क्षेत्राधिक्यफलं क्षयेत् ।
श्वेताभा पितृभूमिस्स्याद्भवत्यारुणसन्निभा ।। ३४ ।।
पीताभा वैश्यजातेस्तु कृष्णा शूद्रस्य कीर्तिता ।
मधूद्रक्ता मृत्तिका तु वर्णानामपि च क्रमात् ।। ३५ ।।
प्रदक्षिणैकपत्नी च शस्तार्कं दाहवर्जिताः ।
औषरी तु मभिज्युष्टा वल्मीकाद्यैश्च वर्जिताः ।। ३६ ।।
हस्तप्रमाणतश्चैवं खात्वा सम्पूरयेन्मृदा ।
अधिका चेत् विफलदा समा समफलप्रदा ।। ३७ ।।
न्यूना चेदिति विज्ञेया, ह्येवं भूमिपरीक्षणम् ।
ततस्तु कर्षणार्थं तु तत्तज्जात्यार्हकौ वृषौ ।। ३८ ।।

शुभौ नासालवृत्तौ च तरुणौ प्रियदर्शनौ ।
नागहीनौ बलोपेतौ भूरिस्वर्णान्वितौ वृषौ ।। ३९ ।।
गुणवन्तौ सहस्रेभ्यः, हेमशृङ्गखुरान्वितौ ।
वस्त्रैर्नानाविधैश्शृङ्गमलङ्कृत्य विधानतः ।। ४० ।।
आर्द्रादूर्वातृणं दत्वा क्षीरवृक्षमथ दृढम् ।
युगं कृत्वा तथा चैव सफलं फलमेव वा ।। ५१ ।।
भजेत पल्लवोद्धृतपाशेनैवाथ पत्रयेत् ।
पुण्याहं तत्र कुर्वीत, दद्यात्पुण्याहदक्षिणाम् ।। ५२ ।।
वस्त्रहेमाङ्गुलीयाद्यैस्तदा सन्तोषयेद्गुरुम् ।
प्राङ्मुखः प्रथमं कृत्वा ततस्तत्र उदङ्मुखः ।। ५३ ।।
वास्तुविन्यासभूमोस्तु कथयेदखिलं तथा ।
सूक्ष्मपूर्ण घृतायान्तु मुद्गमाषतिलास्तथा ।। ५४ ।।
सिद्धार्थयवधान्यानि वापयेत्क्रमशो मृदि ।
देशिकस्य वृषौ दद्यात् हलं चापि युगं तथा ।। ५५ ।।
वरभूम्यादिसस्यानि ब्राह्मणानां तु दापयेत् ।
बधानव्या शुभेनैव सौहारैरघमर्षणैः ।। ५६ ।।
उर्वी चार्द्री कृता यावत्तावद्गास्सन्निवासयेत् ।
गोभिर्निवासिता भूमिस्सर्वदोषाणि नाशयेत् ।। ४७ ।।
कर्षणं त्वेवमाख्यातं भूमानमधुना शृणु ।
परमाण्वादिरज्ज्वन्तं मानं साधनमुच्यते ।। ४८ ।।
रेणुर्वालाग्रविख्याति लयवकरजा रेणुभिश्चाष्ट वृध्या-
भ्यांङ्गुल्यन्तदस्मिदिनकारकरवेदाष्ट वृत्तिक्रमेण ।
तालोभस्तश्च दण्डं भवति सहिरणमेवमल्पं ⌑ ग्रामोद्यादिनि-
मेयान्यत धनुशमृतः प्रोच्यते भूमि भागः ।। ४९ ।।

⌑ श्लोके प्राचीनभूमानविवरणमस्ति, किन्तुवर्णदोषबाहुलयात् अर्थसमन्बयः नैव सुखकरः। अपि च ग्रन्थ पातश्च वर्तते ।

दण्डपञ्चशतेनैव क्रोशं तद्विगुणं भवेत् ।। ५० ।।
गोरुतार्ध मिति ख्यातं, तद्द्वयं गोरुतं मतम् ।
योजिनौ कृष्णं स्यादेव विनक्रमंभवेत् ।। ५१ ।।
चतुरश्रं तनुर्वृत्तं त्रिकोणं चतुराकृतिः ।
ओजे युग्मपदे वर्त्म विवरं योगमेव तु ।। ५२ ।।
द्विगुणेतां सवर्गोर्वेति षट्सप्रमाणतः ।
शेषं नक्षत्र माख्यातमष्टभिर्गुणिते ततः ।। ५३ ।।
त्रिंशद्भाजिमशेषस्तु स्थितिरित्यभिधीयते ।
नक्षत्रशेषमाख्यातं स्थिताय करणे पुनः ।। ५४ ।।
रन्ध्रेहन्ते सान्तमेव निर्गुणितं तु यत् ।
मुनिभिर्भाजिते शेषो वरीत्युपरि दृश्यते ।। ५५ ।।
आयाधिक्यं व्ययाकीर्णमत्रेदं सर्वभूमिदम् ।
अशुभं विपरीतं चेत्, ध्वजो धूमश्च केसरी ।। ५६ ।।
श्वावृषो गर्धभश्चैव गजःकाकोष्ट्रयोनिषु ।
गजसिंहौ च नागश्च शुभाः; श्शेषा विपत्कराः ।। ५७ ।।
कर्तृनामाक्षरा माला द्विचतुर्थं द्विषड्वाथ ।
सुनामानिस्युःश्शुभदाः शेषास्त्वशुभदाःस्मृताः ।।५८।।
सवायुबर्हळीशस्तमप्रशस्तमथेरितम् ।
द्वितीया च तृतीया च पञ्चमी शततः परम् ।। ५९ ।।
षष्टीचैव विशेषेण सप्तमी तु तथैव च ।
दशम्येकादशी चैव शुक्लपक्षे त्रयोदशी ।। ६० ।।
अपरे प्रतिपच्चैव वास्तुकर्मणि संस्मृताः ।
कृष्णे प्रागुक्ततिथियस्तथा मध्यफलप्रदाः ।। ६१ ।।
तस्करो भुक्तिशक्तिश्च धन्योऽपूपोनपुम्सकः ।
निर्भयोऽथ दरिद्रस्तु प्रेष्योंश नवमःस्मृताः ।। ६२ ।।

शुभनाम्नि शुभं, तेषु दुर्नामाप्यशुभं भवेत् ।
त्याज्यास्सौरारसूर्याश्च शेषाश्शुभफलप्रदाः ।। ६३ ।।
मुखं सर्वानुकूलं चेद्दत्ताधिक्यं तु मध्यमम् ।
समयं चेदथ स्यात्तु दोषाख्यं तु विवर्जयेत् ।। ६४ ।।
दण्डं दण्डेन वर्धन्ते हस्तं हस्तेन रोपयेत् ।
अङ्गलं चाङ्गुलेनैव सूत्रपातस्त्वनन्तरम् ।। ६५ ।।
दिग्भ्रान्तिनाशनार्थाय शङ्कुच्छायावशेन तु ।
प्राचीमुदीचीं विज्ञाय सूत्रपात समारभेत् ।। ६६ ।।
पलाशं ब्राह्मणस्योक्तमश्वत्थं स्यान्नृपस्य तु ।
खादिरं वैश्यजातेस्तु कृष्णस्य तु मधूकजः ।। ६७ ।।
षडङ्गुलपरिणाहं तच्चि द्विगुणमायतम् ।
सुवृत्तमरुणं शङ्कु कलितस्तम्भमेव वा ।। ६८ ।।
मूलादष्टांशहीनाग्रं शिरस्स्यादकलङ्ककम् ।
शङ्क्वग्रदारसदृशं वेशं तद्वेदभागतः ।। ६९ ।।
कर्णौ भुजौ च कोटी च समकण्ठ फलाकृति ।
कण्ठवर्गो भवेत्कोटि भुजवर्गसमानतः ।। ७० ।।
शस्तस्य दशमूलं स्याद्देवमूलक्रमो भवेत् ।
संवर्गे तु भुजाकोटि तदर्थं तु भुजाफलम् ।। ७१ ।।
त्रिवर्गं घनमाख्यातं द्वादशं च षडश्रकः ।
परिधिर्वित्तविष्कम्भस्त्रिगुणं च स्वरांशयुक् ।। ७२ ।।
नाहं विष्कम्भपादघ्नं फलमूलं हतं घनम् ।
धनुषो बाणसंवर्गान्यावर्गान्तमुदीरितम् ।। ७३ ।।
मण्टपेन तु सादृश्यं षड्भागं तु षडश्रभाक् ।
भुजापिण्डदभूतश्च चतुर्धावप्यतन्त्र तु ।। ७४ ।।

बाह्यस्योक्त्वा क्रमेणैव फलवर्गसवर्गजः ।
पातरेखामनेनैव क्रमेण च समानयेत् ।। ७५ ।।
इच्छया फलमाहृत्य प्रथमाप्तफलं तु यत् ।
तत्पलं सर्वमानीय, प्रत्युपन्नेनमेव च ।। ७ ६ ।।
श्रेयस्सङ्किलनादीनि चानेयानि दिशानया ।
एवं संक्षेपतः प्रोक्तं, भूमानं दण्डमुच्यते ।। ७७ ।।
निधिर्धण्डविवृत्यर्थम् एवं संवर्धयेद्बुधः ।
एकोनत्रिसहस्रान्तं तदूर्ध्वं नेष्यतेऽत्र तु ।। ७८ ।।
सङ्ख्यायैकोनपञ्चाशत् द्विशतं हीनमुच्यते ।
तदूर्ध्वं मध्यमं प्रोक्तं तत्समञ्चोत्तमं भवेत् ।। ७९ ।।
मानं सप्तदशं ज्ञेयं चत्वारिंशत्स्वरोत्तरम् ।
एवं विस्तारमाख्यातं ग्रामादीनां विशेषतः ।। ८० ।।
कुर्यादिकमतं तेषु आनुकूल्यं सहैव तु ।
भूमानमिति विज्ञेयम् आयादीन् लक्षयेत्क्रमात् ।। ८१ ।।
धनर्णौ योनिनक्षत्रौ वस्वायुश्चांशु(श)कं तथा ।
वारोष्टैतानि संशोध्य गृहवास्तु समारभेत् ।। ८२ ।।
विस्तरेणाभ्यदे दैर्घ्यं तद्राजियुधवा पुनः ।
विस्तारायाम संयुक्ता राशी वाथ निरीक्षयेत् ।। ८३ ।।
वसुभिर्गुणिते भानु भूते शेषो यव स्मृतः ।
सगुण्यवह्निभिस्सूत्रैर्भक्तशेषोव्ययस्तथा ।। ८४ ।।
रामघ्नेष्टभृते योनिरष्टभिर्विदिते पुनः ।
सप्तविंशति भक्तैवस्वायुषस्तत्फलं स्मृतम् ।। ८५ ।।
कृत्वैवं वास्तुभूमेऽस्तु मध्येऽनिलदिगाश्रितम् ।
मण्डलं दण्डमानेन षडङ्गुलसमन्वितम् ।। ८६ ।।

जलेन समतां नीत्वा दर्पणोदरवत्समम् ।
कृत्वा तु तस्य मध्यं तु द्विमयेच्छङ्कुमानतः ॥ ८७ ॥
शङ्कुद्विगुणमानेन वृत्तस्सम्भ्रामयेद्बहिः ।
तद्बहिःग्रामशङ्कुश्च त्रिगुणेनैव मध्यतः ॥ ८८ ॥
शङ्कुस्थापनकात्पूर्वरात्र्यामेवाधिवासयेत् ।
प्रोक्षयेत्पञ्चगव्यैस्तु शुभैश्च शुद्धमृज्जलैः ॥ ८९ ॥
नवाम्बरैःरसैर्वेददर्भैस्सृग्भिर्मनोरमैः ।
शालिभिस्थण्डिलं कृत्वा मण्डले तिलतण्डुलैः ॥ ९० ॥
वस्त्रेणास्तीर्य दर्भैस्तु सम्प्रोक्ष्य प्रणवेन तु ।
स्थण्डिलेशाययेच्छङ्कुं प्राक्छिरस्कं सदर्भकम् ॥ ९१ ॥
अपरे दिवसे भानोरुदये तु शुभे तथा।
पुण्याहं वाच्य तत्रैव शङ्खकूजद्विनिस्वनैः ॥ ९२ ॥
शयनाच्छङ्कुमादाय शङ्कुमण्डल मध्यमे ।
स्थापयेत् प्राङ्मुखो धीमानाचार्यशिल्पभिस्सह ॥ ९३ ॥
गुरुं सम्पूजयेत्पश्चात् शिल्पिनं पूजयेत्तदा ।
वस्त्रहेमाङ्गुलीयाद्यैर्गन्धपुष्पादिभिस्तथा ॥ ९४ ॥
पूर्वाह्नसमयेच्छायाप्रवेशे निर्गमेऽपि वा ।
सूत्रत्रयेण तत्प्राचीं निश्चत्य दृढमानसः ॥ ९५ ॥
इष्टमासे तु तद्व्यक्तत्रयो लाञ्छनबीजकान् ।
सङ्ख्यादिकामनायै वा न्यूने रोप्यधिके ह्रसेत् ॥ ९६ ॥
शुद्धा प्राचीति विज्ञेया सर्वशास्त्रञ्च संश्रितम् ।
मध्याह्ने धन सर्वैश्च भाचैवं विधयेत्सुधीः ॥ ९७ ॥
प्राचीसूत्रप्रमाणेन कृत्वा मध्यद्वयं ततः ।
सफलान्तस्थसूत्रेण याम्ये सौम्ये विनिर्दिशेत् ॥ ९८ ॥

द्रोणेषूत्पलकं कुर्यात् विन्यसेच्चापरं क्रमात् ।
तद्वत्सूत्रत्रयं कृत्वा प्राचीसूत्रस्य पार्श्वयोः ॥ ९९ ॥
तथोदीचीनसूत्रस्य सूत्रं याम्येत्तरे द्वयम् ।
लेखयेत्तु चतुष्कोष्ठं चतुरस्रं भवेदिह ॥ १०० ॥
सूत्राणि विसृजेत्तस्मात् तत्तद्दिक्षु प्रमाणतः ।
विप्राणां समकुर्याश्रं प्रशस्तमथवा पुनः ॥ १०१ ॥
चतुरस्रार्धभागं वा चतुर्भागमथार्थकम् ।
त्रिपादं वा त्रिभागं वा द्व्यंशे च द्व्यंशकं भवेत् ॥ १०२॥
आरोप्य समकुर्याश्रं यथापूर्वपराधिकम् ।
कल्पयेत्तु तदाद्यस्कौ दीर्घं तुर्याश्रमावहेत् ॥ १०३ ॥
अशुभं युग्मदण्डश्च दशयुग्मभवं भवेत् ।
दण्डच्छेदनकार्यं स्याद्बहग्रामे तु यत्नतः ॥ १०४ ॥
ग्रामं तु पञ्चधा कृत्वा भागमेकं बहिर्न्यसेत् ।
तत्पैशाचमिति ज्ञेयं तत्र देवालयं भवेत् ॥ १०५ ॥
कतितस्मिन्विशेषोऽस्ति तं विशेषं शृणु द्विजाः ।
वास्तुपैशाचिके स्थित्वा ईशो विष्णुश्च मातृभिः ॥ १०६ ॥
अन्येषां वास्तुदेवानां पदे पैशाचिकेऽथवा ।
चतुष्षष्ट्येकाशीतिर्वा वास्तुभूम्याखिलं ततः ॥ १०७ ॥
चतुष्षष्टिविभेगे तु प्राचीनान्यत्तदेवहि ।
सूत्राणि कल्पयेत्तद्वदुदीचीनानि वास्तुवित् ॥ १०८ ॥
ब्रह्मविद्याच्चतुष्षष्टि पदेष्वन्तश्चतुष्पदम् ।
तद्बहिर्द्वादशपदं परितो दैविकं विदुः ॥ १०९ ॥
दैविकं विहितो विंशत्पदं मानुषमुच्यते ।
पैशाचान्तं बहिःप्रोक्तम् अष्टाविंशत्पदं तथा ॥ ११० ॥

एकाशीतौ तु षष्ट्यादि स्थानानि न च वर्जयेत् ।
युग्मकोष्ठे सूक्ष्मसूत्रयुग्मकेषु पदस्थितान् ।। १११ ।।
देवानभ्यर्चयेत्तत्र पूर्वाद्यैःस्वस्वनामभिः ।
ब्रह्माणं सम्यजेत्तेषां मध्ये कोष्ठे चतुष्ककेे ।। ११२ ।।
मरीचश्च विवस्वांश्च मित्राक्षोदर एवच ।
ब्रह्माणस्तु चुतुर्दिक्षु द्विपदार्थद्वयानुगाः ।। ११३ ।।
महेन्द्रादित्य सत्याश्च कृशो गृहक्षतोधसः ।
गन्धर्व भृङ्गराजस्तु पुष्पदन्तो जलेश्वरः ।। ११४ ।।
असुरश्शोषभल्लाटौ सोमोरुश्चोदितस्तथा ।
वामपार्श्वे धरित्रीन्द्रे सव्यपार्श्वे विवस्वती ।। ११५ ।।
इन्द्रे चेन्द्रजये तस्य दक्षिणं पादमुच्यते ।
रुद्रे रुद्रजये तस्य वामपादः प्रकीर्तितः ।। ११६ ।।
मित्रे गुह्यप्रदेशस्तु हृन्नाभिश्चाम्बुजासने ।
एवञ्च यो मुखं वास्तुपुरुषं प्रबलं विदुः ।। ११७ ।।
एकाशीति पदान्यत्र लभन्ते तेषु मध्यमे ।
देवतायजनाद्वास्तुनर आप्तो भवेत्ततः ।।
दश पाङ्गुखसूत्राणि दशैवोदङ्गुखानि तु ।
एकाशीति पदान्यत्र लभन्ते तेषु मध्यमे ।।
ब्राह्मे नवपदं विद्यात्तद्बाह्येकावृते तथा ।
षोडशानि सदानीह विद्यते देशिकं त्विति ।। ११८ ।।
बाह्य एकावृते चैव चतुर्विंशतिमानुषम् ।
बहिरावरणे चैव द्वात्रिंशत्पदके तथा ।। ११९ ।।
पैशाचमिति विख्यातं तदेवाचान्तरे स्थितः ।
नव पञ्च तथा बाह्ये तुर्यश्रं शूलकं तथा ।। १२० ।।

चत्वारिंशन्नवैतानि संयजेदात्मभूतये ।
वसुन्धरां धरां देवीं सर्वभूताश्रयां वराम् ॥ १२१ ॥
वराहात्महरेर्वक्त्रदंष्ट्रादुद्धृतमेदिनीम् ।
सरित्समुद्रवसनां ध्यात्वा तन्नाम मन्त्रतः ॥ १२२ ॥
समर्च्य गन्धपुष्पैश्च वास्तुभूमेस्तु मध्यमे ।
शालिभिस्स्थण्डिलं कृत्वा तण्डुलैश्च तिलैस्सह ॥ १२३ ॥
तस्मिन्नेकोनपञ्चाशत्पदान्यालिख्य तेषु वै ।
शालितण्डुल संसिद्धां चत्वारिंशन्नवाधिकाम् ॥ १२४ ॥
चरुं विन्यस्य तेष्वेव घृतेनैवाभिघार्य च ।
सम्प्रोक्ष्य प्रणवेनैव वस्त्रैराच्छाद्य सत्कुशैः ॥ १२५ ॥
द्वादशसमसम्पूर्णां विप्रजातिसमुद्भवाम् ।
सर्वलक्षणसम्पूर्णां स्नातामाभरणैर्वृताम् ॥ १२६ ॥
शुक्लाम्बरधरां शुक्लां गन्धपुष्पैरलङ्कृताम् ।
शुक्लाम्बरोत्तरीयां तां सम्भोज्यात्र यथेप्सितम् ॥ १२७ ॥
ततस्तस्यैवदत्तं तत् ताम्बूलं च चरुं तथा ।
वास्तुदेवपदेष्वेव पीठे हस्तप्रमाणतः ॥ १२८ ॥
त्रिमेखल समायुक्तो गोमयालेपिते पदे ।
देशिकस्तु बलिं दद्यात्तदीयान्तु समाहितः ॥ १२९ ॥
तदन्ते बलिदातारं पूजयेत्तु विशेषतः ।
वस्त्रहेमाङ्गुलीयाद्यैर्धान्यगोभूमिकाञ्चनैः ॥ १३० ॥
उच्चार्यप्रणवञ्चदौ मध्यमे तु त्स्वनाम च ।
सन्मुच्चरन् नमोन्ते तु दत्वा पुष्पोदकेषु च ॥ १३१ ॥
तन्मन्त्रेण बलिं दद्याद्दध्यन्नगुडसंयुतम् ।
ब्रह्मणे ब्रह्मगोष्ठेषु बलिं दत्वा विशेषतः ॥ १३२ ॥

मरीचिश्च विवस्वांश्च मित्रश्च पृथिवीधरः ।
अब्जोद्भवश्चतुर्दिक्षु दिक्षु प्रागादि दिक्स्थिताः ॥ १३३ ॥
षट् षट् पदेषु तान्यष्ट्वा पायसं सरळं तथा ।
हरिद्रान्नं गुडान्नं च तेभ्यो दद्यात्क्रमेण तु ॥ १३४ ॥
आपश्चैवास वत्सश्च पद्मेशो जानुमध्यतः ।
सविता चैव सावित्रौ ब्रह्माग्नी मध्यमे स्थितौ ॥ १३५ ॥
इन्द्र इन्द्रजयश्चैव वीरश्च निलमध्यमे ।
तद्वत्तद्विपदे इष्ट्वा कर्णमार्गप्रदानुगात् ॥ १३६ ॥
प्रियङ्गून्नं च मुद्गान्नं माषान्नं वैणवान्नकम् ।
गोधूमान्नं यवान्नं च कुळत्थान्नं तृणान्नकम् ॥ १३७॥
आपादीनामधाष्टान्नं बलिं दद्यात्क्रमैण तु ।
ईशानस्त्वथ पर्जन्यो जयन्तश्च महेन्द्रकः ॥ १३८ ॥
भास्करस्सत्यकभ्राजान्तरिक्षश्च पूर्वगाः ।
तान्यष्ट्वा गन्धपुष्पाद्यैः स्वस्वमन्त्रैर्यथाक्रमम् ॥ १३९ ॥
पद्मकन्दसमायुक्तं लाजापूपसमायुतम् ।
क्रमेणैव चरुन्दत्वा एकैकश्च पृथक्पृथक् ॥ १४० ॥
वह्निपुष्पां च वितधो ग्रहक्षतयमौ तथा ।
गन्धर्वो भृङ्गराजश्च मृगौ दक्षिणतस्थितः ॥ १४१ ॥
पूजयित्वा तु तान् सर्वान् गन्धपुष्पाक्षतैः क्रमात् ।
कदळीफलसंयुक्तं सितसिद्धार्थसंयुतम् ॥ १४२ ॥
श्याल्यन्नं तु यदा दद्यात्तेष्वन्नं फलमिश्रितम् ।
पाशकृच्चासुरश्चैव पापयक्ष्मा तथैव च ॥ १४३ ॥
पश्चिमे संस्थितान् देवान्यष्ट्वा तु विधिपूर्वकम् ।
सतिलं पुष्पकोपेतं पनसस्य फलान्वितम् ॥ १४४ ॥

गुडान्नं च बलिं तेषां क्रमेणैव तु दापयेत् ।
पवनौ नागमुख्यौ च भल्लाटो अर्भकस्तथा ।। १४५ ।।
अदितिश्च दितिश्चैवासौदिक्सख्यं व्यवस्थितिः ।
तान्यष्ट्वा गन्धपष्पाद्यैर्नारिकेळफलान्वितम् ।। १४६ ।।
तथाचोत्पलकन्दं च चारु चाम्रफलान्वितम् ।
बलिक्रमेण वरुणं दद्यान्नाम्ना तथा बुधः ।। १४७ ।।
सर्वेषामथशुद्धान्नं बलिं वा दापयेत्पृथक् ।
वास्तुपूजाविहीनं चेत् स्वच्छं ग्रामो विनश्यति ।। १४८ ।।
बलिदानं ततः कृत्वा गृहनिर्माणमारभेत् ।
अथवा गृहनिर्माणं कृत्वा दद्याद्बलिं ततः ।। १४९ ।।
कृत्वा तु गृहनिर्माणं कृत्वा ग्रामप्रवेशनम् ।
तदन्ते तु बलिं दद्यादुत्तमो मध्यमोऽधमः ।। १५० ।।
दण्डकं प्रथमं प्रोक्तं द्वितीयं भद्रमुच्यते ।
श्रीवत्सं तु तृतीयं स्यान्नाभियुग्मं चतुर्थकम् ।। १५१ ।।
पञ्चमं पार्श्वयुक्तं तु षष्ठं चैव प्रकीर्णकम् ।
सप्तमं स्वस्तिकं प्रोक्तं अष्टमं पार्श्वसंयुतम् ।। १५२ ।।
दण्डाकारक्रमेणैव तेषां लक्षणमुच्यते ।
यथेष्टमायतं कार्यं द्वारद्वयसमन्वितम् ।। १५३ ।।
सदण्डकमिति प्रोक्तं गृहारम्भादि नामतः ।
पूर्वाग्रमुत्तराग्रं च कृत्वा वीथिद्वयं पुनः ।। १५४ ।।
शस्तरध्या तु परितो भद्रमेतत्प्रकीर्तितम् ।
सर्वेषां परितः कुर्यान्महामङ्गळवीथिकाम् ।। १५५ ।।
पञ्चवीथि समारभ्य नवत्रिंशतिकाऽवधिः ।
उदङ्मुखास्थसुग्माश्च वीधयस्समुदाहृताः ।। १५६ ।।

प्राङ्मुखा वीथयस्त्रिस्रस्त्वविच्छिन्नास्तथैव च ।
अष्टादशवीथ्य एवं श्रीवत्समिह भाषितम् ।। १५७ ।।
श्रीवत्सं पूर्ववत्कृत्वा देव्याकारं समाप्य तम् ।
नाभिवीथिं ततः कुर्याच्चतुरश्रं समन्ततः ।। १५८ ।।
श्रीवत्सं पार्श्वयुक्तं चेदात्मसौम्ये त्रयंशके ।
मध्यवीथ्या तु पूर्वाभ्यां वीथिं च मध्यवीथिवत् ।। १५९ ।।
पूर्वापरे समाख्याते शेषं श्रीवत्सवच्चरेत् ।
विस्तारास्युर्महावीथ्यस्सप्त षट् पञ्च दण्डकम् ।। १६० ।।
क्षुद्रवीर्यास्तु विस्तारं चतुस्त्रिद्वैक दण्डकैः ।
षट् वीर्याश्चैव पूर्वाग्राश्चोत्तराग्रास्तथैव हि ।। १६१ ।।
पञ्चविंशत्पदाकारपदेष्वन्तः पृथक्पृथक् ।
प्राङ्मुखोदङ्मुखाः क्षुद्रवीथयस्तिस्र एव च ।। १६२ ।।
प्राङ्मुखोदङ्मुखास्तस्माद्वीधयस्त्वेकविंशतिः ।
एवं प्रकीर्णकं प्रोक्त स्वस्तिकं त्वधुनोच्यते ।। १६३ ।।
प्राङ्मुखा वीधयस्तिस्रस्तथैवोदङ्मुखास्मृताः ।
वास्तुमध्ये तु त्रिंशत्तु वीथयः परिकीर्तिताः ।। १६४ ।।
दक्षिणाभिमुखाश्चैव पूर्ववीथिं नयेत्तदा ।
पश्चिमाभिमुखाश्चैव याम्यवीथिं नयेत्तदा ।। १६५ ।।
नयेत्पश्चश्चिवीधीं स्तु उत्तराभिमुखं ततः ।
तथैवोत्तरवीधींश्च प्रागग्रं तु विनिर्णयेत् ।। १६६ ।।
चतुष्कोणान्तराळेषु क्षुद्रवीथिचतुष्टयम् ।
सङ्कल्प्य परितः कुर्यान्महामङ्गल वीधिकाम् ।। १६७ ।।
तन्मध्ये कल्पयेत्कर्मप्रधानां जनपञ्जरम् ।
आग्नेयादिषु कोणेषु जनानां निर्गमं कुरु ।। १६८ ।।
त्रिदण्डं ग्रहविस्तारं तथैव सप्तदण्डकम् ।
नवदण्डं तथाऽऽयामं मध्यमं समुदाहृतम् ।। १६९ ।।

दैर्घमेकादशो दण्डो विस्तारं सप्तदण्डकम् ।
ग्रहं तदुत्तमं विद्याद्देव्यभीष्टं तु कारयेत् ।। १७० ।।
तत्रैव हस्तमानेन गेहं कुर्याद्विशेषतः ।
दण्डाभावगमेगावा त्रिचतुर्ज्वालया युतम् ।। १७१ ।।
एकद्वित्रिकविन्यासो वास्तुकं च न दोषभाक् ।
गृहश्श्रेणीं विनिश्चित्य समं शङ्कुं निदापयेत् ।। १७२ ।।
ग्राममध्यंश्च शङ्कुश्च वास्तुसीमाऽष्टदिक्षु च ।
शैवान् संस्थापयेच्चक्रनद्यर्थं दण्डमानकान् ।। १७३ ।।
ब्रह्माङ्गन्तु चतुर्भागं कृत्वा वायव्यभागतः ।
पञ्चमूर्ति क्रमेणैव विष्णुं संस्थाप्य पूजयेत् ।। १७४ ।।
हरिदष्टौ तु सर्वेषां हरभ्रष्टश्शुभस्मृतः ।
सङ्करे तु सभास्थानं कुर्यात्पञ्च जलाशयम् ।। १७५ ।।
आग्नेय्यां चैव गोवासं चतुर्वर्तिसमायुतम् ।
क्रयविक्रयकर्मार्थं नैर्ऋत्यां वारुणं तथा ।। १७६ ।।
देवानामालयं चैव कार्यमुत्तममार्गतः ।
भास्करे तु यमेन्द्रे तु महाकोट्यास्तु पापके ।। १७७ ।।
षण्मुखस्यैव याम्ये तु शास्तुनाह्लादि गोचरे ।
विष्णुस्तु वारुणे भागे दुर्गायां वायुदेशतः ।। १७८ ।।
मातॄणां तु तथा सौम्ये शाङ्करे शङ्करस्य तु ।
ऐन्द्रेशानान्तरे मुख्यं सौम्येशानान्तरेऽथवा ।। १७९ ।।
तटाकतीरे ज्येष्ठाया कारयेदालयन्तु वा ।
वास्तूक्तदेवतानां तु बालस्थान पुरस्सरम् ।। १८० ।।
विमानं विधिनादायस्थापयेद्वीधिना ततः ।
प्रतिष्ठायास्तु ये देवा पूर्वमत्र व्यवस्तिताः ।। १८१ ।।
उक्तदेशेऽन्यदेशे वा न देवे स्वङ्गभाजिता
शिवस्याराधनं नित्यं भुक्तिमुक्तिप्रदं भवेत् ।
अन्येषां पूजयेन्नित्यं ग्रामवृद्धिकरं परम्
देवस्थानं विना यत्र एककालं निवासयेत् ।। १८२ ।।

नित्यपूजा विहीने तु श्रद्धाःकुर्वन् तदुत्थितम् ।
तस्मात्सर्वप्रयत्नेन नित्यपूजां समारभेत् ॥ १८३ ॥
बालालयश्च देवानां कृत्वा संस्थाप्य पूर्ववत् ।
बालस्थानं विना यत्र मूलस्थानं न कारयेत् ॥ १८४ ॥
पदे पैशाचिके बाधमहापैशाचिकाद्बहिः ।
कारयेत्परिखां तत्र प्राकारं सदृढं यथा ॥ १८५ ॥
चतुर्द्वारसमायुक्तं स्ववामे जलमार्गयुक् ।
तटाकान् कल्पयेद्धीमान् चतुर्दिक्ष्वष्टदिक्षु च ॥ १८६ ॥
भूसुराणां प्रवेशार्थं स्थिरराश्युदये शुभे ।
जीवशुक्रालये लग्ने शुभग्रहनिरीक्षणे ॥ १८७ ॥
ततः प्राक्पञ्च सप्ताहे नवाहे चाङ्कुरार्पणम् ।
दैविक मानुषांऽगेऽथ दश द्वादश षोदश ॥ १८८ ॥
गृहाणि कृत्वा विप्राणां गृहोपकरणानि च ।
भूषणाच्छादनादीनि श्रीवत्साङ्गं तथैव च ॥ १८९ ॥
ग्राममानं तु पञ्चांशात् षोडशं सप्तमांशकम् ।
कृत्वा तेष्वेव मानं वै परितः पैशाचिकस्य वै ॥ १९० ॥
पैशाचेन समारोप्य तस्मात्कामोपजीविनाम् ।
आवासञ्च यथास्थानं परितः कल्पयेत्ततः ॥ १९१ ॥
वाद्यकानां कुलालानामावासं चैन्द्रदेशतः ।
तद्द्वये दक्षिणे भागे नापितानां निवासभूः ॥ १९२ ॥
वैश्यानां तन्तुवायानामावासो दक्षिणे तथा ।
तैलविक्रयवृत्तीनां सच्छूद्राणां तु वारुणे ॥ १९३ ॥
पुष्पोपजीविनां चैव मत्स्यमांसोपजीविनाम् ।
सच्छूद्रादन्य शूद्राणां काकुणमप्यधोत्तरे ॥ १९४ ॥

तद्बाह्ये कर्मकाराणामावासस्स्याद्यदृच्छया ।
रजकाणां तु तद्बाह्ये चण्डालानां ततो बहिः ॥ १९५ ॥
ग्रामस्य चोत्तरे दूरे नद्यास्तीरेऽथवा पुनः ।
श्मशानं कल्पयेत्तत्र विस्तारायामसंयुतम् ॥ १९६ ॥
तद्बाह्ये त्रिंशद्दण्डे तु वसेच्चण्डालकर्मकाः ।
एवं प्रोक्तं वास्तुविन्यासमार्गं
भूमेर्मानं चालयो देवतानाम् ।
ग्रामादीनां चोक्तसामान्यमेतत्
सालङ्कारं कारणाख्ये च तन्त्रे ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे वास्तुविन्यासपटलस्तृतीयः समाप्तः

अथ आद्येष्टकाविधिपटलप्रारम्भः

आद्येष्टकाविधिं वक्ष्ये धराकर्षणपर्वकम् ।
पुष्यमासे तु षण्मासं प्रशस्तं चोत्तरायणम् ।। १ ।।
आषाढादि च षण्मासमशस्तं दक्षिणायनम् ।
देवानां तदहः प्रोक्तमयनं चोत्तरं त्विह ।। २ ।।
रात्रियुक्तन्तु देवानां दक्षिणायनमत्र वै ।
उत्तरायणकाले तु शुक्लपक्षे विशेषतः ।। ३ ।।
पौष्णादित्यमखास्वातित्वाष्ट्र सावित्रपैतृकम् ।
प्राजापत्यं तथा विष्णुतिष्यस्वायुक्त्रिरुत्तरः ।। ४ ।।
षष्ठी च सप्तमी वापि प्रतिपत्पौर्णमास्यपि ।
द्वितीया पञ्चमी चैव तृतीया च त्रयोदशी ।। ५ ।।
सितसोमौ च सौम्यार्यौ वाराश्च श्रेष्ठकाःस्मृताः ।
होरा दशनवांशाश्च येषां द्रेक्काणपाश्शुभाः ।। ६ ।।
उदयं शस्तमेतेषां, तत्र शन्युदयं विना ।
नक्षत्रं क्रूरकैर्जुष्टं रोगपीडां करोति हि ।। ७ ।।
मेषकर्कटकस्तौली मकरं चैव वर्जयेत् ।
अन्ये च शुभदा प्रोक्तास्तेषु चापं विवर्जयेत् ।। ८ ।।
एवं परीक्ष्य कर्तव्यं यदिच्छेत् श्रेय आत्मनः ।
यद्देशे सद्म कर्तव्यं तद्देशे कर्षणं कुरु ।। ९ ।।
विप्रक्षत्रियविट्छूद्रास्त्वनुलोमास्सदैव हि ।
सद्म निर्मापितव्यं हि सर्वप्राणिहिताय वै ।। १० ।।
श्वेता च लोहिता पीता कृष्णा चेति मही क्रमात् ।
चतुर्णां भूसुरादीनां सज्ञाह्यावसुधाद्विजैः ।। ११ ।।
क्षेत्रस्थमृद्वशादुर्वी कथिता त्वनुलोमिनाम् ।
मधुरा च कषाया च कटुकाख्या च वर्णिनाम् ।। १२ ।।

क्रिमिजुष्टा तु दुष्टा स्याद्वल्मीकाढ्या तु वर्जयेत् ।
हस्तमात्रावटं खात्वा पूरयेत्तन्मृदा पुनः ॥ १३ ॥
श्रेष्ठा च अवटाधिक्या, मध्यमा समता मता ।
न्यूने तु कन्यसा प्रोक्ता यादृशी तादृशी फला ॥ १४ ॥
तरुभिर्याज्ञिकैः कार्यं फालयक्तं हलं युगम् ।
कपिलौ श्वेतरक्तौ वा नाङ्गहीनौ वृषौ तथा ॥ १५ ॥
हेमशृङ्गखुरैर्युक्तौ तरुणौ बलसंयुतौ ।
बध्वा हलं युगेनैव गोचर्मकृतरज्जुना ॥ १६ ॥
देशिकस्तु शुचिर्भूत्वा सरळीकृतविग्रहः ।
नवाम्बरः धृतोष्णीषःसितवस्त्रोत्तरीयकः ॥ १७ ॥
हेमाङ्गुळीयो यज्ञोदैः ¤ भूषितस्त्वादिशैवकः ।
पुण्याहं वाचयित्वा तु कर्षयेच्छिवमन्त्रतः ॥ १८ ॥
विशेषेण शिवं ध्यात्वा प्रागुदक्प्रणयेन्महीम् ।
देशिकं पूजयित्वा तु दद्यात्तु सहलौ वृषौ ॥ १९ ॥
वापयेन्नेत्रमन्त्रेण तिलसर्षप मुद्गकान् ।
त्रिरात्रेऽङ्कुरिता भूमिरुत्तमेति प्रशस्यते ॥ २० ॥
भूताहेऽङ्कुरिता मध्या, सप्ताहेऽङ्कुरिताऽधमा ।
मध्यपक्षे तु सस्याच्च गोगणान् सन्निवेशयेत् ॥ २१ ॥
निश्चित्योर्वीन्तु हर्म्यार्थं तस्यैन्द्रे चोत्तरेऽथवा ।
शाङ्करे बालहर्म्यं तु कृत्वा वै बाललिङ्गकम् ॥ २२ ॥
संस्थाप्याभ्यर्चयेत्तत्र पश्चान्मूलं तु कारयेत् ।
मूलस्थानस्य नैर्ऋत्यां दण्डमात्रेण भूतलम् ॥ २३ ॥
जलेन समातां नीत्वा कुट्टिमोच्चं गुणाङ्गुलम्
आसनं खदिरं वापि शमी वैकङ्कतं तु वा ।
ब्राह्मणादिक्रमेणैव शङ्क्वर्थं दारुमाहरेत्
द्वादशाङ्गुलमायामं नाहं विद्यात् षडङ्गुलम् ॥ २४ ॥

¤ उपवीताङ्गुलीयाद्यैः – इत्यपि पाठः ।

सुसमन्निघृणं कृत्वा, न च निम्नोन्नतं ऋजुम् ।
देशिकं चैव सम्पूज्य शिल्पिनं पूजयेत्ततः ॥ २५ ॥
अतः परं विशेषेण हरकेशवयोः पुनः ।
केशवस्थापनार्हाय वक्ष्ये सर्वसुखावहम् ॥ २६ ॥
प्रासादं मण्डलं चैव प्राकारं परिवारकम् ।
गोपुरं च विना यत्र स्थापितं मूलमम्बिकम् ॥ २७ ॥
तत्केवलमिदं प्रोक्तं तस्य स्थानं विधीयते ।
शैवे च वैष्णवे वापि गर्भे स्कन्धे च धामनि ॥ २८ ॥
मातृणामालये वापि भास्करस्यालयेऽपि वा ।
मधोस्वज्ञालयावापि यमानेश्च यथापि वा ॥ २९ ॥
प्रासादे मण्टपे चैव प्राकारावृतहर्म्यके ।
वैष्णवे धाम्नि शैवं तु स्थापनं यदि सम्भवेत् ॥ ३० ॥
सकळं निष्कळं वापि तथा सकलनिष्कळम् ।
स्थापनं शैवतन्त्रेण पूर्वोक्तविधिना ततः ॥ ३१ ॥
कृत्वा तु विधिवत्सम्यक् नित्यपूजां समाचरेत् ।
नित्योत्सवं तु कुर्वीत कुर्याद्धातुकमर्चयेत् ॥ ३२ ॥
नैमित्तिकेन स्नपनं पूर्ववद्विषयान्ततः ।
पवित्रारोहणं चैव सर्वं कुर्याद्विधानतः ॥ ३३ ॥
उत्सवं तु न कुर्वीत सङ्करात् स्थानसङ्करात् ।
अन्येषु हेतवो नैका वक्ष्यन्ते तु भविष्यति ॥ ३४ ॥
शैवे विष्णुप्रतिष्ठा चेत् स्थानकं वासनं तु वा ।
शयनं वाथ संस्थाप्य तन्त्रे शैवविधानतः ॥ ३५ ॥
पाञ्चरात्रेण विधिनाऽन्येन संस्थाप्य पूजयेत् ।
नित्यकर्माणि सर्वाणि कुर्यान्नित्योत्सवं विना ॥ ३६ ॥

बलिदानं तु कुर्वीत बलिपीठाद्यसम्भवान् ।
सर्वधा नोत्सवं कुर्यात्केवलस्य प्रजापतेः ।। ३७ ।।
यदि मोहेन कृत्वा तु राजा राष्ट्रं विनश्यति ।
एवं पूर्वोक्तदेवानामालये चान्यधामसु ।। ३८ ।।
प्रोक्तो यस्य विमानस्य यद्देवे भवति ध्रुवम् ।
तस्यैवोत्सव उक्तःस्यादाश्रितस्य न चोदितः ।। ३९ ।।
एवं शैवोऽपि शम्भोस्तु नोत्सवं तु विधीयते ।
वैष्णवो धाम्नि विष्णोस्तु नैवमुत्सवमाचरेत् ।। ४० ।।
अन्यानि नित्यकर्माणि नित्यं कुर्याद्विधानतः ।
एवमुक्तं यथायुक्तं हरकेशवयोस्ततः ।। ४१ ।।
केवलस्थापनायां तु सम्क्षेपः, न तु विस्तरः ।
आद्यं वै शङ्कुमानेन द्विगुणेन द्वितीयकम् ।। ४२ ।।
त्रिगुणेन तृतीयन्तु वर्तयेन्मण्डपत्रयम् ।
देशिकस्य नियोगेन शङ्कुं सङ्गाह्य तक्षतः ।। ४३ ।।
भानुबिम्बोदये तस्य मण्डले सादिसम्भवे ।
मण्डलस्य च मध्ये तु शङ्कुं संस्थाप्य निश्चलम् ।। ४४ ।।
पूर्वापराह्णयोश्छायां बिन्दुवृत्तेषु शाङ्करे ।
शङ्कुं विमृज्य बिन्द्वान्तच्छायासूत्रत्रयं लिखेत् ।। ४५ ।।
अवच्छाया विना मासे प्राचीसूत्रं विनिश्चितम् ।
अवच्छायान्विते मासे ह्रासयेदधिकार्थकम् ।। ४६ ।।
तन्मानं वर्धयेत् न्यूनं शुद्धप्राचीं तु निर्णयेत् ।
प्राची सूत्रप्रमाणेन मत्स्यषट्कं तु कारयेत् ।। ४७ ।।
एवं याम्येत्तरं बध्वा साधयेच्चतुरश्रकम् ।
कृत्वा दण्डप्रमाणेन तदर्धेनाथवा पुनः ।। ४८ ।।

सुसमन्निघृणं कृत्वा, न च निम्नोन्नतं ऋजुम् ।
देशिकं चैव सम्पूज्य शिल्पिनं पूजयेत्ततः ॥ २५ ॥
अतः परं विशेषेण हरकेशवयोः पुनः ।
केशवस्थापनार्हाय वक्ष्ये सर्वसुखावहम् ॥ २६ ॥
प्रासादं मण्डलं चैव प्राकारं परिवारकम् ।
गोपुरं च विना यत्र स्थापितं मूलमम्बिकम् ॥ २७ ॥
तत्केवलमिदं प्रोक्तं तस्य स्थानं विधीयते ।
शैवे च वैष्णवे वापि गर्भे स्कन्धे च धामनि ॥ २८ ॥
मातृणामालये वापि भास्करस्यालयेऽपि वा ।
मधोस्वज्ञालयावापि यमानेश्च यथापि वा ॥ २९ ॥
प्रासादे मण्टपे चैव प्राकारावृतहर्म्यके ।
वैष्णवे धाम्नि शैवं तु स्थापनं यदि सम्भवेत् ॥ ३० ॥
सकळं निष्कळं वापि तथा सकलनिष्कळम् ।
स्थापनं शैवतन्त्रेण पूर्वोक्तविधिना ततः ॥ ३१ ॥
कृत्वा तु विधिवत्सम्यक् नित्यपूजां समाचरेत् ।
नित्योत्सवं तु कुर्वीत कुर्याद्धातुकमर्चयेत् ॥ ३२ ॥
नैमित्तिकेन स्नपनं पूर्ववद्विषयान्ततः ।
पवित्रारोहणं चैव सर्वं कुर्याद्विधानतः ॥ ३३ ॥
उत्सवं तु न कुर्वीत सङ्करात् स्थानसङ्करात् ।
अन्येषु हेतवो नैका वक्ष्यन्ते तु भविष्यति ॥ ३४ ॥
शैवे विष्णुप्रतिष्ठा चेत् स्थानकं वासनं तु वा ।
शयनं वाथ संस्थाप्य तन्त्रे शैवविधानतः ॥ ३५ ॥
पाञ्चरात्रेण विधिनाऽन्येन संस्थाप्य पूजयेत् ।
नित्यकर्माणि सर्वाणि कुर्यान्नित्योत्सवं विना ॥ ३६ ॥

बलिदानं तु कुर्वीत बलिपीठाद्यसम्भवान् ।
सर्वधा नोत्सवं कुर्यात्केवलस्य प्रजापतेः ।। ३७ ।।
यदि मोहेन कृत्वा तु राजा राष्ट्रं विनश्यति ।
एवं पूर्वोक्तदेवानामालये चान्यधामसु ।। ३८ ।।
प्रोक्तो यस्य विमानस्य यद्देवे भवति ध्रुवम् ।
तस्यैवोत्सव उक्तःस्यादाश्रितस्य न चोदितः ।। ३९ ।।
एवं शैवोऽपि शम्भोस्तु नोत्सवं तु विधीयते ।
वैष्णवो धाम्नि विष्णोस्तु नैवमुत्सवमाचरेत् ।। ४० ।।
अन्यानि नित्यकर्माणि नित्यं कुर्याद्विधानतः ।
एवमुक्तं यथायुक्तं हरकेशवयोस्ततः ।। ४१ ।।
केवलस्थापनायां तु सम्क्षेपः, न तु विस्तरः ।
आद्यं वै शङ्कुमानेन द्विगुणेन द्वितीयकम् ।। ४२ ।।
त्रिगुणेन तृतीयन्तु वर्तयेन्मण्डपत्रयम् ।
देशिकस्य नियोगेन शङ्कुं सङ्गाह्य तक्षतः ।। ४३ ।।
भानुबिम्बोदये तस्य मण्डले सादिसम्भवे ।
मण्डलस्य च मध्ये तु शङ्कुं संस्थाप्य निश्चलम् ।। ४४ ।।
पूर्वापराह्णयोश्छायां बिन्दुवृत्तेषु शाङ्करे ।
शङ्कुं विमृज्य बिन्द्वान्तच्छायासूत्रत्रयं लिखेत् ।। ४५ ।।
अवच्छाया विना मासे प्राचीसूत्रं विनिश्चितम् ।
अवच्छायान्विते मासे ह्रासयेदधिकार्थकम् ।। ४६ ।।
तन्मानं वर्धयेत् न्यूनं शुद्धप्राचीं तु निर्णयेत् ।
प्राची सूत्रप्रमाणेन मत्स्यषट्कं तु कारयेत् ।। ४७ ।।
एवं याम्येत्तरं बध्वा साधयेच्चतुरश्रकम् ।
कृत्वा दण्डप्रमाणेन तदर्धेनाथवा पुनः ।। ४८ ।।

तदधिष्ठानमानेन प्रासादसमविस्तृतम् ।
तन्मध्यगांस्तु देवांश्च पदस्थान् सम्यगर्चयेत् ।। ४९ ।।
एकादशीपदं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
पद्मजं नवकोष्टस्थान्मध्ये संयोजयेद्बुधः ।। ५० ।।
ब्रह्माणञ्च चतुर्दिक्षु षट् षट् पदगतास्त्विमे ।
समर्यं पूर्वभागे तु विवस्वान्दक्षिणे मतः ।। ५१ ।।
मित्रस्तु पाशभृद्देशे; उत्तरे भूधरस्तथा ।
ईशान्यामब्जमध्ये तु आपश्चैव पदद्वयम् ।। ५२ ।।
आपवत्सपदौ द्वौ च सावित्रस्य पदद्वयम् ।
निर्ऋते ब्रह्मणो मध्ये त्वष्टस्सैव पदद्वयम् ।। ५३ ।।
पदाविन्द्रजयस्योक्तं विरिञ्चस्यानिलान्तरे ।
रुद्रस्यैवपदौ द्वौ तु पदौ रुद्रजयस्य च ।। ५४ ।।
ईशस्यैव तु पर्जन्यो जयन्तश्च महेन्द्रकः ।
आदित्यस्सत्यकभ्रंश अन्तरिक्षश्च पूर्वगः ।। ५५ ।।
वह्निःपूषा च वितधो ग्रहक्षतयमस्तथा ।
गन्धर्वो भृङ्गराजश्च मृगश्चैव तु दक्षिणे ।। ५६ ।।
निर्ऋ(ति)द्वौवारिकश्चैव सुग्रीवः पुष्पदन्तकः ।
वरुणश्चासुरश्चैव शेषश्च पापयक्ष्मकः ।। ५७ ।।
रोगो नागस्तथा मुख्यो भल्लाटस्सोम एव च ।
इन्द्रश्चैव च पर्जन्यो जयेन्द्रश्च महेन्द्रकः ।। ५८ ।।
ऋगश्चैवदितिश्चैव दितिश्चैव तु चोत्तरे ।
एकैकपदभोक्तारो द्वात्रिंशद्वाह्यदेवताः ।। ५९ ।।
चरकी च विदारी च पूतना पापराक्षसी ।
ईशानादिषु कोणेषु शूलस्था पदवर्जिताः ।। ६० ।।

अधोमुखं भुवं प्राप्य शेते वास्तुनरस्मृतः ।
उग्रत्वान्भयकारित्वात् पूजितः स्यात्फलेप्सुभिः ॥ ६१ ॥
शिरश्चैशानकोष्ठस्थं निर्ऋतौ चरणौ स्थितौ ।
मध्ये ब्रह्मपदे नाभिरङ्गं सर्वपदानुगम् ॥ ६२ ॥
चतुर्भुजो जटामौळी कमण्डल्वक्षधारकः ।
वामहस्तं तु जानूर्ध्वे सव्यहस्ततले स्थितम् ॥ ६३ ॥
हेमाभरणमब्जं यद्गन्धाद्यैरुपचारकैः ।
दध्याज्यगुडसम्मिश्रं शुद्धान्नं च बलिं क्षिपेत् ॥ ६४ ॥
चतुर्भुजयुताश्शेषाः खड्गखेटकधारिणः ।
कृताञ्जलिपुटास्सर्वे ध्यात्वा स्वस्वपदस्थिताः ॥ ६५ ॥
तत्तत्स्वनाममन्त्रैश्च स्वाहान्तैः प्रणवादिकैः ।
उच्चार्य, गन्धपुष्पाद्यैस्सम्पूज्यान्तर्बलिं क्षिपेत् ॥ ६६ ॥
समर्यश्श्वेतवर्णं तु विवस्वान्रक्तवर्णकः ।
शातकुम्भनिभो मित्रः कृष्णवर्णस्तु भूधरः ॥ ६७ ॥
श्वेतवर्णं तथाऽऽपस्तु जपावत्स्वापवत्सकः ।
सविता नीलवर्णस्तु सावित्रो धूम्रवर्णकः ॥ ६८ ॥
इन्द्रस्त्वरुणवर्णश्च शुक्लस्त्विन्द्रजयस्तथा ।
प्रवाळाभस्ततो रुद्रः पीतो रुद्रयजस्तथा ॥ ६९ ॥
कीरवर्णस्तथैशानः पर्जन्यो जलदप्रभः ।
जयन्तः कृष्णवर्णस्तु महेन्द्रश्श्यामवर्णकः ॥ ७० ॥
आदित्यो रक्तवर्णस्तु सत्यकश्चित्रवर्णकः ।
भ्रंशो बन्धुरपुष्पाभो कुन्दाभस्त्वन्तरिक्षकः ॥ ७१ ॥
अग्निस्तद्वर्णकः प्रोक्तो, पूषा रक्ताब्जसन्निभः ।
वितथश्चेन्दुपुष्पाभो विद्युद्वर्णो ग्रहक्षतः ॥ ७२ ॥

यमः कृष्णाञ्जनाभस्तु गन्धर्वः पद्मरागवत् ।
भृङ्गराजस्तु भृङ्गाभो जीमूताभो मृगस्तथा ।। ७३ ।।
निर्ऋतिः पावकाभश्य दौवारिकसितस्तथा ।
सुग्रीवः शिखिकण्ठाभः चन्द्राभः पुष्पदन्तकः ।। ७४ ।।
श्वेताभो वरुणश्चैव कृष्णवर्णोऽसुरस्तथा ।
उत्पलाभस्तथा शोषः पापयक्ष्मेन्द्रनीलधृक् ।। ७५ ।।
अनिलो धूम्रवर्णाभो रोगो हारिद्रसन्निभः ।
शङ्खवर्णस्तथा नागो मुख्यो मौक्तिकसन्निभः ।। ७६ ।।
श्वेताब्जाभस्तु भल्लाटः कनकाभस्तु सोमकः ।
ऋगो रक्तोत्पलाभश्च कुमुदाभा दितिस्तथा ।। ७७ ।।
अदितिः कपिलाभाच चरकी शङ्खसन्निभा ।
पावकाभा विदारी स्यात् पूतना हेमसन्निभा ।। ७८ ।।
नीलजीमूतसदृशवर्णा वै पापराक्षसी ।
मरीच्यादिचतुर्णान्तु पायसं बलिरुच्यते ।। ७९ ।।
विदिक्ष्वापादिदेवानामष्टानां कृसरं बलिः ।
ईशानाद्यष्टदेवानां मुद्गान्नं बलिरुच्यते ।। ८० ।।
हुताशनादिदेवानां गुडान्नं बलिरुच्यते
निर्ऋतेःपश्चिमस्थानां घृतान्नं दापयेद्बलिम् ।। ८१ ।।
अनिलाद्युत्तरस्थानां दध्यन्नं दापयेद्बलिम् ।
चरक्यादिचतुर्णा तु मांसान्नं बलिमाहरेत् ।। ८२ ।।
पूर्वे वा चोत्तरे वाऽपि वास्तुहोमं तु कारयेत् ।
सर्वेषां वास्तुदेवानां स्वनामाद्येन होमयेत् ।। ८३ ।।
एकैकं पञ्चविंशच्च सङ्ख्या षोडश एव च ।
तिलतण्डुल संयुक्तं होमयेद्देशिकोत्तमः ।। ८४ ।।

द्रव्यान्ते व्याहृतिं हुत्वा स्विष्टान्नं हि समाचरेत् ।
वास्तुहोमं विना यत्र कृतं वास्तु विनश्यति ॥ ८५ ॥
होमान्ते यजमानेन देशिकश्शान्तिमुद्धरेत् ।
गुरुः कर्तारमन्वीक्ष्य वदेच्छाल्यांश्च तद्गुणैः ॥ ८६ ॥
यदङ्गस्पर्शने भर्तुर्वास्तु देहे तदङ्गके ।
शल्यं विनिर्दिशेत्प्राज्ञःशिरस्थं स्पर्शने यदि ॥ ८७ ॥
तत्राधस्त्वुष्टताले तु हेमशल्यं विनिश्चितम् ।
नासिकायास्तु संस्पर्शे चन्दनं सप्ततालके ॥ ८८ ॥
गळस्पर्शेऽस्थिशल्यं स्यात् षट्तालाधस्स्थितं त्विह ।
उरस्संस्पर्शने चैव राजतं पञ्चतालतः ॥ ८९ ॥
नाभिस्पर्शे चतुस्तालान् कांस्यशल्यं विनिर्दिशेत् ।
गुह्यसंस्पर्शने ताम्रं त्रितालाधस्थितं विदुः ॥ ९० ॥
ऊरुजान्वधसंस्पर्शे त्वायसं हस्तमात्रतः ।
यथा गुल्फे तु संस्पर्शे त्रपुशल्यं विनिर्दिशेत् ॥९१ ॥
बाहुसंस्पर्शने यत्र बाहुनागास्थिमादिशेत् ।
पार्श्वयोस्पर्शने यत्र अश्मशल्यं विनिर्दिशेत् ॥ ९२ ॥
विदित्वैवं व्यपोह्याथ प्रोक्षयेत्पञ्चगव्यकैः ।
सिकतोपरि मृद्भिस्तु सजलं सुदृढं कुरु ॥ ९३ ॥
अथो मुसलपातैश्च हस्तिपादस्य पातकैः ।
मुष्टिमृद्भिश्च पाषाणैःशर्करैरिभपातकैः ॥ ९४ ॥
पातयेत्तत्तलेहर्म्यसूत्रांश्च चभित्तिसूत्रकान् ।
हर्म्यसूत्रान् बहिः कल्प्य जन्मसूत्रं नयेत्क्रमात् ॥ ९५ ॥
तस्योत्तरे प्रपाङ्कृत्वा नवहस्तप्रमाणतः ।
वितानेनोर्ध्वमाच्छाद्य तरङ्गेणावृतं बहिः ॥ ९६ ॥

दर्भमाला समावृत्य दिग्ध्वजांश्च प्रलम्बयेत् ।
तन्मध्ये वेदिकाङ्कृत्वा त्रिहस्तं विस्तृतां शुभाम् ॥ ९७ ॥
मुष्टिमात्रोन्नतां ऋत्विक् निम्नोन्नतविवर्जिताम् ।
तस्याश्चैव चतुर्दिक्षु कुण्डानि करमानतः ॥ ९८ ॥
चतुरश्रं धनुर्वृत्तमब्जमिन्द्रादितः क्रमात् ।
लक्षणोक्तानि कुण्डानि कृत्वा गोमयवारिणा ॥ ९९ ॥
लेपयेत्पञ्चगव्यैश्च मुदा तु प्रोक्षयेत्ततः ।
शिलाभिश्चेष्टकाभिर्वा स्थापयेत्प्रथमेष्टकाम् ॥ १०० ॥
उपलां शैलजाञ्चैव इष्टिकां मृण्मयीं तथा ।
सम्मिश्रे ह्युपलश्चैव तरुजे पादपस्तथा ॥ १०१ ॥
आद्येष्टकां पुं शिलायां त्रिधा वै द्वारबन्धनम् ।
नपुंसकोपलेनैव आद्येष्टकां क्षिपेत्ततः ॥ १०२ ॥
विकाराङ्गुलमायाम वस्त्वङ्गुलसुविस्तृता ।
नीव्रायुगाङ्गुलाः प्रोक्तास्तालस्यैकस्य कीर्तिताः ॥ १०३ ॥
पक्षाङ्गुलविवृध्या तु अष्टत्रिंशाङ्गुलान्तकाः ।
तदर्धविस्तृतं तासां नीव्रं तस्यार्धमुच्यते ॥ १०४ ॥
तथा वै रविभूमीनान्तु प्रथमशिलास्मृताः ।
त्रयोदशाङ्गुलायामा मुन्यङ्गुलसुविस्तृताः ॥ १०५ ॥
निव्रन्तस्यार्थमित्युक्तं स्थापनीयेष्टकाः क्रमात् ।
तालं प्रत्यङ्गुलं वृद्धिश्चतुर्विंशति चान्तकम् ॥ १०६ ॥
ऋजुरेखा पुमांश्चैव श्रोतृरेखा नपुंसकाः ।
जाया च तिर्यग्रेखा च, ज्ञात्वा कर्म समारभेत् ॥ १०७ ॥
बिन्दुरूपयुतां कृष्णां कुञ्जराक्षयुतामपि ।
लूतपातसमायुक्तां वर्जयेदिष्टिकां बुधः ॥ १०८ ॥

किञ्चिन्निम्नं भवेदग्रं तन्मूलं किञ्चिदुन्नतम् ।
वदनं ह्युच्चभागं स्यात् गर्तं गन्तुश्च पृष्टकम् ।। १०९ ।।
कन्यकाश्च चतस्रस्तु अलङ्कृत्य शिलां ततः ।
ताभिस्संस्पर्शिता चाग्रास्तन्मूलास्त्वितराःस्मृताः ।। ११० ।।
आद्येष्टकां दिनात्पूर्वरात्रौ चैवाधिवासयेत् ।
आचार्यश्शिल्पशास्त्रज्ञः शिवदीक्षाभियुक्ततः ।। ११२ ।।
सर्वलक्षणसम्पन्नस्त्वादिशैवो दृढव्रतः ।
सुस्नातस्तु शुचिर्भूत्त्वा सकळं कङ्कणान्वितः ।। ११३ ।।
नवाम्बरधृतोष्णीषस्सोत्तरीयस्सुमालिकः ।
पञ्चाङ्गभूषणैर्युक्तस्सशिष्यपरिचारकः ।। ११४ ।।
इष्टकाः पञ्चगव्यैश्च क्षाळयेद्वर्मणा गुरुः ।
हैमक्षौमकसूत्रैर्वा कर्पासैर्वाथ बन्धयेत् ।। ११५ ।।
वेदिकोपरि कर्तव्यमष्टदोणौश्च शालिभिः ।
तदर्धं तन्डुलैर्युक्तं तन्डुलार्धतिलान्वितम् ।। ११६ ।।
लिखेदष्टदळं पद्मं कर्णिकाकेसरान्वितम् ।
स्थण्डिलं पञ्चगव्येन सम्प्रोक्ष्य हृदयेन तु ।। ११७ ।।
स्वस्वदिग्ज्ञापकार्थन्तु लेखयेदिष्टकान्तरे ।
पूर्वभागे त्वकारं तु यमे त्वाकारमेव हि ।। ११८ ।।
इकारं पश्चिमे देशे ईकारं सौम्यके तथा ।
प्रत्येकं वस्त्रयुग्मेन हृदावेष्ट्य सुपुप्पयुक् ।। ११९ ।।
स्थण्डिले तु कुशं स्थाप्य यथा पूर्वोत्तराग्रतः ।
ऋग्यजुस्सामाथर्वाणि अथिदेवान् च पूजयेत् ।। १२० ।।
तन्तुना चित्रितान् कुम्भान् गन्थाम्बुपरिपूरितान् ।
वितानाक्षतवस्त्राढ्यान् हेमयुक्तान् सकूर्चकान् ।। १२१ ।।

पुष्पाम्रपल्लवोपेतानिन्द्राद्यष्टदिशासु वै ।
लोकपालाधिपानष्ट संस्थाप्याभ्यर्चयेत्सुधीः ॥ १२२ ॥
ततो होमं प्रकुर्वीत अग्निकार्योक्तमार्गतः ।
पालाशोदुम्बराश्वत्थन्यग्रोधसंमिधः क्रमात् ॥ १२३ ॥
सद्येन समिधो हृत्वा, मूलेनाज्यं हुनेत्ततः ।
अघोरेण चरुं हुत्वा तिले तन्डुलमिश्रितम् ॥ १२४ ॥
नेत्रेण होमयेद्धीमान् प्रत्येकं शतसङ्ख्यया ।
तदर्थं वा तदर्धं वा अथवा दशसङ्ख्याया ॥ १२५ ॥
प्रभाते विधिना स्नात्वा देशिको मूर्तिपैस्सह ।
जयादिरभ्याधानञ्च जुहुयात्तु विशेषतः ॥ १२६ ॥
ततः पूर्णाहुतिं हुत्वा स्विष्टमग्नेति मन्त्रतः ।
स्थापकः स्थपतिश्चैव सम्प्राप्ते तु शुभोदये ॥ १२७ ॥
वस्त्रहेमाङ्गुळीयैश्च पूजयेत्तु विशेषतः ।
मन्दिरे मण्टपे चैव प्राकारे गोपुरे तथा ॥ १२८ ॥
परिवारालयेचैव विधिनैतेन विन्यसेत् ।
मुहूर्ते समनुप्राप्ते द्वारं निश्चित्य बुद्धिमान् ॥ १२९ ॥
द्वारस्य दक्षिणे चाङ्घ्रिमूले भित्यन्तरालके ।
शिलाश्चैवेष्टका वापि स्थापयेत् स्थापकोत्तमः ॥ १३० ॥
ईशानादिशुभैर्मंत्रैः प्रक्षिप्येन्द्रादितः क्रमात् ।
अग्रमग्रन्तु चैशान्ये पृष्टपृष्टञ्च नैर्ऋते ॥ १३१ ॥
पृष्टाग्रे त्वनलौ वायौ ज्ञात्वा कर्म समारभेत् ।
तन्मध्ये विन्यसेत् वित्तं पञ्चमृद्भिस्तु लेपयेत् ॥ १३२ ॥
श्वभ्रमध्ये मृदाकम्भं तोयैश्चैव प्रपूरयेत् ।
शुभन्तु दक्षिणावर्तं, वामावर्तमशोभनम् ॥ १३३ ॥
वामावर्ते सति प्राज्ञश्शान्तिहोमं समाचरेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे आद्येष्टकाविधि पटलश्चतुर्थः समाप्तः

अथ अधिष्ठानविधिपटलप्रारम्भः

अधिष्ठानविधिं वक्ष्ये उपपीठिकपूर्वकम् ।
आदौ चैव प्रकृत्यूर्ध्वे प्रथमं फलकां कुरु ॥ १ ॥
पादान्तरं तदुत्सेधं तदूर्ध्वे मुखपीठकम् ।
तन्मध्ये तस्य बाह्ये तु तस्योच्चार्थं तु नीव्रकम् ॥ २ ॥
वस्त्वाधारसमायामं समं वा पादहीनकम् ।
अर्धं वोच्चकमेवं तु, उपपीठस्य कीर्तितम् ॥ ३ ॥
अङ्घ्रिकाद्विगुणं वाऽपि पादोनद्विगुणं तु वा ।
द्विगुणार्थं तु वा बाह्ये उपपीठस्य विस्तरम् ॥ ४ ॥
उपपीठस्य चोत्सेधं भवेद्विंशतिभागतः ।
उपादानात्पञ्च भागान्तमर्थेनार्थेन वर्धयेत् ॥ ५ ॥
तस्योर्ध्वे चोपपीठं तु कारयेल्लक्षणान्वितम् ।
श्रीकरं ललितं भद्रमुपपीठं त्रिधा मतम् ॥ ६ ॥
कलांशं विभजेदाऽऽयः पक्षांशं जन्म उच्यते ।
द्विभागे पञ्चकञ्चैव पट्टिकांशेन कीर्तितम् ॥ ७ ॥
कौशिकांशेन कर्णं तु व्योमांशेनोर्ध्वपट्टिका ।
पक्षांशेनोर्ध्वपद्मं स्यान्महापट्टी तथैव च ॥ ८ ॥
तत्कर्णस्यैव वा बाह्ये मसूरं जगती समम् ।
पादताराष्टभागैकहीनं कर्णप्रतारकम् ॥ ९ ॥
एवं श्रीकरमाख्यातम् आयामं पूर्ववद् भजेत् ।
अश्विन्यंशेन जन्मं तु कम्पमेकेन कारयेत् ॥ १० ॥
अधः पद्मं द्विभागेन कम्पमेकेन कारयेत् ।
भूतांशं कन्धरं प्रोक्तमेकांशं वेत्रमुच्यते ॥ ११ ॥
ऊर्ध्वपद्मं द्विभागेन महापट्टी तथैव च ।
ललितं ख्यातम् एवं तु आयामं त्वष्टधा भवेत् ॥ १२ ॥

अंशेन पादुकां कुर्यादर्द्धांशं कम्पमुच्यते ।
युगांशं गळमित्युक्तमर्थांशं वेत्रमुच्यते ॥ १३ ॥
महापट्टिद्विभागेन भद्रमेवं प्रकीर्तितम् ।
सिंहव्याळ गजैर्वापि भूतकैस्संयुतानि वै ॥ १४ ॥
उपपीठं समाख्यातमधिष्ठानमथोच्यते ।
प्रथमं फलकेऽर्थे वा उपपीठे ध्वजेऽपि वा ॥ १५ ॥
उपानोर्ध्वे त्वधिष्ठानं कल्पयेदुभयेऽपि वा ।
प्राग्बाह्ये जन्मनिर्यूहं मूले पादद्वयं भवेत् ॥ १६ ॥
निर्यूहन्त्रिविधं कृत्वा बाह्यैकांशं व्यपोह्य च ।
पक्षांशेन समायुक्तं कारयेज्जगतीं पुनः ॥ १७ ॥
मसूरकमधिष्ठानं वस्वाधारं धृतालकम् ।
चत्वार्येतानि नामानि पर्यायवचनानि च ॥ १८ ॥
प्रथमं पादबन्धं च द्वितीयं प्रतिबन्धकम् ।
एकैकन्तु चतुर्भेदं पद्मकं पद्मपुष्कलम् ॥ १९ ॥
पद्मासनं तु भेदानि पादबन्धस्य सुव्रत ।
प्रतिक्रमं प्रकीर्णञ्च प्रतिसुन्दरमेव च ॥ २० ॥
प्रतिबन्धस्य भेदानि कारयेल्लक्षणान्वितम् ।
एकेन सङ्करं कुर्यादेकेनैकत्र वा पुनः ॥ २१ ॥
यदधिष्ठानमासं तु त्रयोविंशति भागभाक् ।
शतांशं तु जगत्युच्चमब्ध्यंशं कुमुदोन्नतम् ॥ २२ ॥
वस्वंशं कुमुदं ज्ञेयमेकांशेनोर्ध्वपट्टिका ।
कन्धरं तु गुणांशेन व्योमांशेनोर्ध्वपट्टिका ॥ २३ ॥
महापट्टि गुणंशेन एकं स्यात्पादबन्धनम् ।
धराधरोच्चं विभजेदेकविंशति भागतः ॥ २४ ॥
अधः पद्मद्विभागेन कम्पेमेकेन कारयेत् ।
जगत्युच्चं शरांशेन युगांशं कुमुदं भवेत् ॥ २५ ॥

अष्टांशं कुमुदं प्रोक्तं कम्पमेकेन कारयेत् ।
गुणांशं कन्धरं प्रोक्तं व्योमांशं नेत्रमुच्चते ।। २६ ।।
कम्पमेकेन कर्तव्यं महापट्टि गुणांशकम् ।
पद्मकं चैवमाख्यातमायामं पूर्ववद्व्रजेत् ।।
कम्पमेकेन कर्तव्यं रसांशं पद्मतुण्डकम् ।
अंशेन कम्पमित्युक्तमंशे चोर्ध्वसरोरुहम् ।। २७ ।।
वेदांशं कुमुदं प्रोक्तमंशेनाधस्सरोरुहम् ।
अंशेन कम्पमित्युक्तं पक्षांशं खण्डमुच्यते ।। २८ ।।
वेत्रमंशेन कर्तव्यम् अंशेनोर्ध्वसरोरुहम् ।
महापट्टि द्विभागेन कारयेत्तु विचक्षणः ।। २९ ।।
पद्मपुष्करमेवं स्यादायामं पूर्ववद्भवेत् ।
पक्षभागमभौब्जं तु व्योमांशं वेत्रमुच्यते ।। ३० ।।
भूतांशं जगती प्रोक्तं अंशेनाथ सरोरुहः ।
अर्थांशं कम्पमित्यक्तमूर्ध्वपद्मं तथैव च ।। ३१ ।।
कुमुदोच्चं चतुर्भागमर्धेनाध सरोरुहम् ।
अर्धांशैनैव कम्पं तु सार्धपक्षांशकं गळम् ।। ३२ ।।
अर्धांशैनैव पद्मं तु, ऊर्ध्वपद्मं तथाशकम् ।
महापट्टी द्विभागेन एतत्पद्मासनं स्मृतम् ।। ३३ ।।
पादबन्धकमप्येवं प्रतिबन्धमथ शृणु ।
तीर्थांशं विभजेदायं भूतांशं जगती भवेत् ।। ३४ ।।
तथा वै कुमुदोत्सेधं कम्पमेकेन कारयेत् ।
एकेनान्तरितं प्रोक्तं प्रातिमुख्यं तु द्व्यंशकम् ।। ३५ ।।
प्रतिमुखं कर्करीभूतं नागवक्त्रमथाऽपि वा ।
प्रतिवाजनमंशेन एतत् स्यात्प्रतिबन्धनम् ।। ३६ ।।

मसूरकोच्चं विभजेत् षड्विंशद्भागतस्ततः ।
जगत्युच्चं रसांशं स्यात् सारांशं वप्रमुच्यते ।। ३७ ।।
व्योमांशं कम्पमित्युक्तं गुणांशेन गळं भवेत् ।
कम्पमेकेन कर्तव्यमेकेनोर्ध्व सरोरुहम् ।। ३८ ।।
कपोतं तु युगांशेन अंशेनालिङ्गमुच्यते ।
एकेनान्तरितं प्रोक्तं प्रातिमुख्यं द्वितीयकम् ।। ३९ ।।
प्रतिवाजनमेकेन कल्पयेत्कल्पवित्तमः ।
एतत्प्रतिक्रमं प्रोक्तमायामं पूर्ववद्भजेत् ।। ४० ।।
पद्मतुण्डं रसांशेन भूतांशं कुमुदो भवेत् ।
कम्पमेकेन कर्तव्यमेकैकोर्ध्वसरोरुहम् ।। ४१ ।।
कपोतं तु युगांशेन कम्पमेकेन कारयेत् ।
एकेनान्तरितं प्रोक्तं प्रतिमुख्यं तु द्व्यंशकम् ।। ४२ ।।
प्रतिवाजनमेकं तु एतत्प्रकीर्णकं स्मृतम् ।
त्रिंशदेशेन भागेन आयामं विभजेत्ततः ।। ४३ ।।
अधः पद्मद्विभागेन एकांशेनैव कम्पकम् ।
जगतीभूतभागं तु अध्यर्धेनोर्ध्वकम्पकम् ।। ४४ ।।
अर्धांशं कम्पमित्युक्तं अंशेनोर्ध्वसरोरुहम् ।
कुमुदोच्चं गुणांशेन पुंसेनार्धसरोरुहम् ।। ४५ ।।
अंशेन कम्पमित्युक्तं गुणांशं गळमुच्यते ।
अंशेनैकोर्ध्व कम्पं तु एकांशेनोर्ध्वपद्मकम् ।। ४६ ।।
कपोतोच्चं गुणांशेन अंशेनालिङ्गमुच्यते ।
अन्तरितं तथाङ्केन प्रातिमुख्यं तु द्व्यंशकम् ।। ४७ ।।
एकेन वाजनं प्रोक्तं मकरव्याळसिंहकैः ।
गजैश्च वल्लिपत्रैश्च नानालीलासमन्वितम् ।। ४८ ।।

मकरस्येव निक्रान्ता व्याळविद्याधरान्वितम् ।
एवमन्तरिते कुर्यात्कपोते नाशिकायुतम् ।। ४९ ।।
प्रतिसुन्दरमेतत् स्याद्देशनिर्गमनं शृणु ।
वेत्राणाञ्चैव सर्वेषां वेदभागैकनिर्गमम् ।। ५० ।।
यावज्जगति निर्यूहं तावद्वप्रस्यनिर्गमम् ।
पद्मानां चैव सर्वेषां नीव्रन्तं सममुच्यते ।। ५१ ।।
एषां पादं बहिर्नीव्रं तावत्प्रोक्तं तु वेशनम् ।
अथस्तात्तु महापट्ट्या नाळीनिर्गमनं कुरु ।। ५२ ।।
हस्तं वाऽथ त्रिपादं वा वितस्तिर्वा विशेषतः ।
व्रजेद्बाह्ये विवि(नि)क्रान्तां नाळीं शैवमर्यी तथा ।। ५३ ।।
गजोष्ठसदृशाकारा सकृत्रिममुखोत्तरा ।
भूतसिंहोपगूढा वा साधारा वाऽथ कारयेत् ।। ५४ ।।
द्विदण्डं वा त्रिदण्डं वा गर्भगेहे तु वेशनम् ।
लिङ्गतारत्रिपादं वा द्विगुणं वाऽर्थमेव वा ।। ५५ ।।
प्रणाळमूलविस्तारं त्रिभागैकाग्रविस्तरम् ।
व्यासत्रिभागभागोनं बहुलं तत् त्रिभागभाक् ।। ५६ ।।
वारिसञ्चारगम्भीरं तारं श्लक्ष्णं च झर्झरम् ।
अनिम्नोन्नतमाभित्तेस्तदत्यग्रात्क्रमोन्नतम् ।। ५७ ।।
सर्वाऽऽतोद्यसमायुक्तं ततो मङ्गलवाचकैः ।
शान्तिहोमं ततः कृत्वा, आचार्यं पूजयेत्ततः ।। ५८ ।।
शिल्पिनं पूजयेत्पश्चात्सुमुहूर्ते सुलग्नके ।
आचार्यस्सुप्रसन्नात्मा वारुणं सूक्तमुच्चरेत् ।। ५९ ।।
तक्षकः स्थापयेन्नाळीं सुस्निग्थां सदृढां क्रमात् ।
लिङ्गप्रासादगर्भस्य यावन्नालस्य चावधि ।। ६० ।।

धारां तु केवलं कुर्याद्भित्तेस्तालस्य सीमनि ।
श्रेष्ठमध्यमकानिष्ठं लिङ्गस्य स्थापनं त्रिधा ।। ६१ ।।
धारातलसमाप्ते तु स्थापनं चोत्तमं भवेत् ।
द्वारबन्धस्य पूर्वे तु स्थापनं मध्यमं भवेत् ।। ६२ ।।
मूर्धोपलस्य पूर्वे तु स्थापनं कन्यसं भवेत् ।
यः करोत्यन्यधा चैव आभिचाराय चैव हि ।। ६३ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे अधिष्ठानविधिपटलः पञ्चमः समाप्तः

अथ गर्भन्यासविधिपटलप्रारम्भः

गर्भन्यासविधिं वक्ष्ये ग्रामादीनां च सद्मनः ।
सगर्भे वर्धमानत्वम्; अगर्भे नाशनं ध्रुवम् ।। १ ।।
तस्मात्सर्वप्रयत्नेन गर्भं संस्थापयेत्सुधीः ।
देवतास्थापनात्पूर्वं स्थापनं चोत्तमं भवेत् ।। २ ।।
देवतास्थापनस्यान्ते स्थापनं मध्यमं भवेत् ।
ग्रामविन्यासमारभ्य एकाद्वादूर्ध्वकालके ।। ३ ।।
स्थापनं कन्यसं प्रोक्तं ग्रामादीनामिति स्मृतम् ।
उत्तरायणकाले तु माघमासविवर्जिते ।। ४ ।।
सुवारेषु तिथौ चैव शुक्लपक्षे शुभे दिने ।
स्थिरांशे स्थिरनक्षत्रे होराकरणयोस्तथा ।। ५ ।।
स्थिरद्रेक्काणके चैव स्थिरवारे स्थिरग्रहे ।
अखण्डर्क्षे स्थिरे लग्ने सुमुहूर्ते विशेषतः ।। ६ ।।
ग्रामादीनाञ्च तद्रात्रौ दिवाकाले तु सद्मनः ।
हैमराजतकांस्यं वा ताम्रेण फेळकां कुरु ।। ७ ।।
कौशिकाम्भोधिरन्ध्रार्कगायत्र्यङ्गुलकैस्तु वा ।
फेळायां चैव विस्तार उत्सेधं तत्समं भवेत् ।। ८ ।।
ग्रहीतोच्चङ्गुणांशे तु पक्षांशं भाजनोन्नतम् ।
एकांशं तत्पिधानोच्चं कोष्ठभित्युच्छ्रयं तथा ।। ९ ।।
यवत्रयघनावापि द्वियवेन घनान्विता ।
फेळायास्तु घनार्धन्तु कोष्ठभित्तेर्घनं भवेत् ।। १० ।।
त्र्यंशैकेनोर्ध्वभित्तेस्तु घनार्धं ह्रासयेद्बहिः ।
पिधानाभ्यन्तरे तद्वत् संयोगार्धं तु कारयेत् ।। ११ ।।
वृत्तं वा चतुरश्रं वा गर्भफेळाकृतिःस्मृता ।
पञ्चविंशतिकोष्ठानि फेळामध्ये प्रकल्पयेत् ।। १२ ।।

स्पृष्ट्वा, बहिर्मलं शोध्य, प्रक्षाळ्याम्लेन वारिणाम् ।
मङ्गळाङ्कुरकार्यन्तु विधिना कारयेद्बुधः ॥ १३ ॥
ब्रह्मस्थाने ग्रहे वापि ग्रामगर्भाधिवासनम् ।
विमानस्योत्तरे चैन्द्रे सद्मगर्भाधिवासनम् ॥ १४ ॥
दशरुन्ध्राब्धिहस्तेन विस्तृतं मण्टपङ्कुरु ।
तन्मध्ये वेदिकां कुर्यात् तत्त्रिभागैकभागतः ॥ १५ ॥
तालमात्रसमुत्सेधा तस्य दिक्षु चतुर्ष्वपि ।
चतुरश्रानि कुण्डानि प्रत्येकं हस्तमात्रतः ॥ १६ ॥
तयोरष्टानि कुण्डानि गोमयेनोपलेपयेत् ।
वितानध्वजसंयुक्तं दर्भमालाभिरावृतम् ॥ १७ ॥
पुष्पमालासमायुक्तं द्वारतोरणसंयुतम् ।
मङ्गळाङ्कुरसंयुक्तं तरङ्गेणैव वेष्टितम् ॥ १८ ॥
मण्टपं भूषयित्वा तु पुण्याहं वाचयेत्ततः ।
भूसुरान् भोजयेत्तत्र तद्दिनात्प्राग् दिनद्वये ॥ १९ ॥
वेदीं शालिदशद्रोणैस्थण्डिलं तिलतण्डुलैः ।
कृत्वा, लिख्याष्टदिक्पद्मं कर्णिकाकेसरैर्युतम् ॥ २० ॥
दर्भैश्चैव परिस्तीर्य स्थण्डिलं तु; यजेत्ततः ।
रम्भाम्रनाळिकेराणि नारङ्गनि फलानि च ॥ २१ ॥
लैकुचानि फलान्यत्र मातुलुङ्गफलानि च ।
प्रदक्षिणक्रमेणैव स्थण्डिलोपरि विन्यसेत् ॥ २२ ॥
वेद्याः पश्चिमभागे तु गोमयालेपिते शुभे ।
विचित्रे शालिपिष्टे च चतुरश्रे समेकतः ॥ २३ ॥
सप्तद्वीपसमायुक्तं सप्ताम्बोधिसमाकृतिम् ।
भूधरान् दिग्गजांश्चैव भूम्यधस्तात्तु पन्नगम् ॥ २४ ॥

आलिख्य सितचूर्णैश्च भुवनाध्वक्रमान्वितम् ।
फेळां प्रक्षाळ्य गव्यैश्च स्थाप्य चित्रे तु मण्डले ।। २५ ।।
देशिकस्तमलङ्कृत्य वस्त्रैः पञ्चाङ्गभूषणैः ।
सकळीकृतदेहस्तु गन्धपुष्पैर्विभूषितैः ।। २६ ।।
प्राङ्मुखः प्रस्थितो भूत्वा विन्यसेदक्षराणि तु ।
मध्यकोष्टेन्यसेत्कूष्टं बिन्दुनादसमन्वितम् ।। २७ ।।
तत्पुर्वाद्यष्ट कोष्टेषु यादि-हान्तानि विन्यसेत् ।
अकारादिविकाराणि प्राक्कोष्ठादिषु विन्यसेत् ।। २८ ।।
माणिक्यं वन्यसेत्कूटे, न्यंसेद्वज्रं यकारके ।
वैडूर्यन्तु रकारे तु, नीलञ्चैव लकारके ।। २९ ।।
मौक्तिकन्तु वकारे तु, शकारे पुष्यरागकम् ।
षकारे वै मरकतं, गोमेधन्तु सकांरके ।। ३० ।।
हकारे स्फटिकं न्यस्य, मूलमन्त्रमनुस्मरन् ।
गजङ्कृत्वा सुवर्णेन अकारे विन्यसेत्ततः ।। ३१ ।।
राजतेन कपालन्तु कृत्वाऽऽकारे तु विन्यसेत् ।
कूर्मं ताम्रेण कृत्वा तु इकारे चैव विन्यसेत् ।। ३२ ।।
खट्वाङ्गमारकूटेन कृत्वी(त्वे)कारे तु विन्यसेत् ।
भ्रामकेन पिनाकन्तु उकारे विन्यसेत्ततः ।। ३३ ।।
त्रिशूलं रजते नैव ऊकारे विन्यसेद् बुधः ।
कांस्येन हरिणं चैव ऋकारेण तु विन्यसेत् ।। ३४ ।।
परशुं ताम्रकेणैव ॠकारे विन्यसेत्ततः ।
दीपाधारं तु ताम्रेण ऌकारे चैव विन्यसेत् ।। ३५ ।।
अयसा गौळिकं कृत्वा ॡकारे चैव विन्यसेत् ।
कर्कटकन्तु ताम्रेण कृत्वैकारे तु विन्यसेत् ।। ३६ ।।

ऐकारे तु न्यसेल्लक्ष्मीं कृत्वा सौवर्णकेन तु ।
ओकारे तु न्यसेत्पूर्णकुम्भं ताम्रमयेन तु ॥ ३७ ॥
औकारे स्वस्तिकं कृत्वा राजतेन तु विन्यसेत् ।
अङ्कारे तु न्यसेच्छङ्खं कृत्वा सौवर्णकेन तु ॥ ३८ ॥
अःकारे तु न्यसेत्खट्वां कृत्वा वै राजतेन तु ।
यकारे गैरिकं न्यस्य रकारे श्यामकं न्यसेत् ॥ ३९ ॥
मनश्शिलां लकारे तु वकारे गन्धकं न्यसेत् ।
शकारे त्वञ्जनं न्यस्य सौराष्ट्रन्तु षकारके ॥ ४० ॥
सकारे हरितालन्तु गोरोचनां हकारके ।
हृदयं मन्त्रमुच्चार्य विन्यसेद्देशिकोत्तमः ॥ ४१ ॥
यकारे विन्यसेच्छालीं रकारे तु यवान् न्यसेत् ।
कोद्रबं च लकारे तु, वकारे माषकं न्यसेत् ॥ ४२ ॥
मुद्गं चैव शकारे तु कम्बूबीजं ष कारके ।
सकारे प्रियङ्गु न्यस्य हकारे तु कुळुत्थकम् ॥ ४३ ॥
ईशानेन तु मन्त्रेण सुन्यसेत्तु क्रमेण तु ।
सर्वकोष्ठानि सम्पूर्य हैमैर्वा, शालिभिस्तु वा ॥ ४४ ॥
ग्रामादीनां विमानस्य एतत्सामान्यमुच्यते ।
किञ्चिदस्ति विशेषोऽत्र ग्रामादीनाञ्च तं शृणु ॥ ४५ ॥
विप्राणां च हितार्थं तु यज्ञसूत्रं कमण्डलम् ।
सुवञ्च प्रणवाकारं सौवर्णं मध्यमे न्यसेत् ॥ ४६ ॥
रथं हयं गजञ्चैव शार्दूलं चापमेव च ।
क्षुरिकां हेमरूपाञ्च पत्तने राजधानिके ॥ ४७ ॥
तुलां च मानपात्रं च माहिषं गोघृतं तथा ।
सौवर्णं मध्यकोष्ठेषु विन्यसेन्नगरेऽपि च ॥ ४८ ॥

हलं फालं युगञ्चैव युग्ममत्स्यं तु शालिकम् ।
सौवर्णं मध्यकोष्ठेषु विन्यसेत्कटकादिषु ।। ४९ ।।
ईशानेन तु मन्त्रेण विधानेन विधाय च ।
वस्त्रेणैव कुशैश्चैव वेष्ट्य छन्दादिभिर्यजेत् ।। ५० ।।
फेळामुद्धृत्य हस्ताभ्यां विन्यसेत् स्थण्डिलोपरि ।
आचार्योमूर्तिपैस्सार्धं होमकर्म समारभेत् ।। ५१ ।।
देशिकोमूर्तिपाश्चैव होमं कृत्वा विचक्षणः ।
विधिनाग्निमुखं कृत्वा मूलेन समिधो हुनेत् ।। ५२ ।।
पलाशोदुम्बुराश्वत्थन्यग्रोधसमिधः क्रमात् ।
सर्पिषं हृदयेनैव शिखायां तु चरुं हुनेत् ।। ५३ ।।
लाजं कवचमन्त्रेण सिद्धार्थं नेत्र मन्त्रतः ।
यवं चास्त्रेण हुत्वा तु प्रत्येकं शतसङ्ख्यया ।। ५४ ।।
मूलब्रह्मषडङ्गैश्च क्षुरिकाबीजमुख्यकैः ।
सर्पिषा होमयेद्धीमान् प्रत्येकं पञ्चविंशतिः ।। ५५ ।।
वास्तुदेवं स्वबीजैश्च प्रत्येकं वसुसङ्ख्यया ।
आज्येन जुहुयाद्धीमान् कुण्डं प्रत्येकमाचरेत् ।। ५६ ।।
आत्मेन्द्वर्क वियद्वायु तेजोपञ्च स्वबीजकैः ।
पृथगष्टाहुतिं हुत्वा व्याहृतिं जुहुयात्ततः ।। ५७ ।।
सृवा पूर्णाहुतिं कुर्याच्छिरोमन्त्रेण देशिकः ।
धृताहुत्यास्तु मन्त्रांते सम्पाताहुतिमार्गतः ।। ५८ ।।
हुत्वाऽऽज्यं तु समानीय फेळायां चोपरि स्रवेत् ।
द्रव्यन्यासमथारभ्य गर्भसंस्थापनान्तकम् ।। ५९ ।।
ऋगाद्यध्ययनं कुर्यात्क्रमेणैव दशासु च ।
यावन्मुहूर्तं सम्प्राप्य तावन्मात्र ं कुरु ।। ६० ।।

ग्रामादीनामजस्थाने यमे वा वारुणेऽपि वा ।
द्विहस्तं चैकहस्तं वा तत्रावटं तु खातयेत् ।। ६१ ।।
ग्रामादीनां क्रमाद्गर्भं स्थापयेदप्रकाशतः ।
गर्भस्थानस्य याम्यायां फेळान्दर्भोपरि न्यसेत् ।। ६२ ।।
पञ्चगंव्येन सम्प्रोक्ष्य अवटस्य तु मध्यमे ।
आलेपयेत्तु तन्मध्ये सामुद्रकमृदा पुनः ।। ६३ ।।
शेषभोगोर्ध्वभूमिस्था, सप्तद्वीपोर्णवाः स्मृताः ।
दिग्गजान् भूसरांश्चैव सङ्कल्प्य क्रमशस्तथा ।। ६४ ।।
अद्रौ क्षेत्रे ह्रदे नद्यां, कुळीरावसके हले ।
वृषभस्य तु शृङ्गे तु गजदन्तेषु मृत्स्मृता ।। ६५ ।।
इन्द्राद्यैशानपर्यन्तमष्टदिक्षु क्रमान्न्यस्येत् ।
नागं कूर्मं धरां देवीं सौवर्णेनैव निक्षिपेत् ।। ६६ ।।
पुष्कस्य तु कन्दश्च, कन्दं नीलोत्पलस्य तु ।
कुमुदस्य तु कन्दन्तु रक्तपद्मस्य कन्दकम् ।। ६७ ।।
पूर्वादिक्रमयोगेन मृदाचैव तु विन्यसेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।। ६८ ।।
कन्यसं दशनिष्कं तु द्विगुणं मध्यमं भवेत् ।
त्रिगुणं चोत्तमं प्रोक्तं देशिकस्य तु दक्षिणा ।। ६९ ।।
गोभूमिदासधान्यानि गृहोपकरणानि च ।
दापयित्वा विशेषेण, देशिकं तोषयेत्ततः ।। ७० ।।
अध्येतृमूर्तिधारांश्च दैवज्ञं पूजयेत्ततः ।
सम्पूज्य स्थपतिं तत्र वस्त्राभरणकैरपि ।। ७१ ।।
मुहूर्ते समनुप्राप्ते गुरवे सन्निवेदयेत् ।
ध्यात्वा सदाशिवं देवं मूलमन्त्रं समुच्चरेत् ।। ७२ ।।

फेळान्तु प्राङ्मुखो भूत्वा स्थापयेदादिशैवकः ।
पांसुना पूरयेद्गर्तं सुस्निग्धं सुदृढं कुरु ।। ७३ ।।
तस्योर्ध्वे कल्पयेद्धीमान् सभां वै देवमन्दिरम् ।
प्रभाते तु विमानस्य गर्भस्थापनमारभेत् ।। ७४ ।।
आचार्यो मूर्तिपैस्सार्थं स्नानं कृत्वा यथाविधि ।
सकळीकरणं कृत्वा फेळाङ्गं धातुभिर्यजेत् ।। ७५ ।।
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद् हुनेत् ।
पूर्णाहुतिं च शिरसा स्विष्टमग्नेति होमयेत् ।। ७६ ।।
शङ्खकाहळभेर्याद्यैर्गीतवेदरवैस्तथा ।
स्तोत्रैश्च विविधैश्छत्र स्तुत्यैः पिञ्छैस्समाकुलम् ।। ७७ ।।
जले संस्राव्यपुरतः स्वस्तिसूक्त समन्वितम् ।
सुगन्धपुष्पधूपैश्च दीपैरर्घ्यैस्समन्वितम् ।। ७८ ।।
फेळामुद्धृत्य तद्धाम प्रादक्षिण्यक्रमेण तु ।
प्रविश्यालयमार्गस्य दक्षिणे प्राङ्मुखो गुरुः ।। ७९ ।।
गर्भप्रक्षेपणं कुर्याद्धामद्वारस्य दक्षिणे ।
उपाने शूद्रजातीनां जगत्युपरि मध्यमे ।। ८० ।।
कुमुदोर्ध्वे नृपाणां तु भित्यूर्ध्वेचाऽग्रजन्मनाम् ।
सर्वेषां भूगतं शस्तं गर्भन्यासन्तु सर्वदा ।। ८१ ।।
अष्टधा विभजेद्भित्तिं वेदांशं बाह्यतस्त्यजेत् ।
त्रिणिचाभ्यन्तरे कृत्वा मध्यैकांशेतु निक्षिपेत् ।। ८२ ।।
आचार्यं मूर्तिपैश्चैव पूर्ववत्संप्रपूजयेत् ।
आचार्यस्सुप्रसन्नात्मा पूर्ववत् स्थापयेत्क्रमात् ।। ८३ ।।
एवं यः कुरुते भक्त्या सपुण्यां गतिमाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे गर्भन्यासविधिपटलः षष्ठः समाप्तः

अथ प्रासादलक्षणविधिपटलःप्रारम्भः

अथाऽतस्सम्प्रवक्ष्यामि प्रासादानां तु लक्षणम् ।
प्रासादं भवनं सद्म गृहं धाम निकेतनम् ।। १ ।।
विमानं सदनं हर्म्यं वासो मन्दिरमालयम् ।
निलयस्त्विति विख्यातास्तस्य पर्यायवाचकाः ।। २ ।।
अङ्गुलं त्रिविधं प्रोक्तं पूर्वमानाङ्गुलं भवेत् ।
मात्राङ्गुलं द्वितीयं तु देहलब्धं तृतीयकम् ।। ३ ।।
जालान्तरगतं रश्मेः दृश्यादृश्यं तु यद्रजः ।
परमाणुस्तदाख्यातं रेणुरोमकलीक्षुका ।। ४ ।।
यूकं यवं क्रमेणैव वृद्धिरष्टाङ्गुलैस्तथा ।
यवोदराष्ट विस्तारमङ्गुलं चेति कीर्तितम् ।। ५ ।।
अङ्गुलं द्वादशं तालं किष्कु, हस्तं च तद्द्वयम् ।
प्राजापत्यकरं प्रोक्तं पञ्चभिर्विंशदङ्गुलम् ।। ६ ।।
षड्विंशति धनुर्मुष्टि सप्तविंशद्धनुग्रहम् ।
शयनं चासनं चैव किष्कुमानवशात्कुरु ।। ७ ।।
प्रासादादीन् सभां शालां मौळिकां मण्टपं ग्रहम् ।
प्राजापत्यकरेणैव कारयेत्तु विचक्षणः ।। ८ ।।
राजधान्यादिकं राजभवनं च तटाहकम् ।
दुर्गां चैव प्रकर्तव्यं धनुर्मुष्टिकरेण तु ।। ९ ।।
कुर्याद् धनुग्रहेणैवं नद्याध्वानं विशेषतः ।
मानाङ्गुलेन हस्ताभ्यां लक्षणं परिकीर्तितम् ।। १० ।।
मध्यमस्य करे दक्षे मध्याङ्गुलस्तु मध्यमम् ।
पर्वदीर्घन्तु यत्तुल्यं मात्राङ्गुलमिति स्मृतम् ।। ११ ।।
यागोपकरणं सर्वं कुर्यान्मात्राङ्गुलेन तु ।
ग्रहीत प्रतिमायामा तत्तालाङ्गुलिसङ्ख्यया ।। १२ ।।

भजेत्तेष्वेकभागं तु देवा लब्धाङ्गुलं स्मृतम् ।
कन्यसं मध्यमं श्रेष्ठं त्रिविधं भवनं स्मृतम् ।। १३ ।।
त्रिहस्तं तु समारभ्य षट्तालान्तं क्रमेण तु ।
एकत्रिंशति हस्ताच्च द्विद्विहस्तविवर्धनात् ।। १४ ।।
सप्तभूमिं समारभ्य क्रमादर्कतलान्तकम् ।
उत्तमंत्विवितिविख्यातं कारयेल्लक्षणान्वितम् ।। १५ ।।
विस्तारं द्विगुणोत्सेधं कन्यसस्य प्रकीर्तितम् ।
विस्तारं सप्तधा कृत्वा रव्यंशं मध्यमोच्छ्रयम् ।। १६ ।।
विस्तारं पूर्ववत्कृत्वा रुद्राशम् उत्तमोच्छ्रयम् ।
प्रासादस्य तु विस्तारं त्रिभिरंशैर्विभाजयेत् ।। १७ ।।
एकांशं गर्भगेहं तु शेषं भित्तिरिति स्मृतम् ।
विस्तारं पञ्चधा कृत्वा गुणांशं वाथ गर्भितम् ।। १८ ।।
विस्तारं सप्तधा कृत्वा गर्भं वेदांशकेन वा ।
विस्तारं दशधा कृत्वा गर्भमृत्वंशमेव च ।। १९ ।।
लक्षणेनालयं कुर्याल्लिङ्गं मानवशादपि ।
लिङ्गत्रितारकं पीठं गर्भपीठं त्रितारकम् ।। २० ।।
तद्वाह्ये पीठतारेण भित्तिं कुर्यात्समाहृतम् ।
अथवा गर्भविस्तारं पीठतारचतुर्गुणम् ।। २१ ।।
पीठताराद्धि द्विगुणं दर्भार्द्धं भित्तिविस्तृतम् ।
समंत्रिपादमर्धं वा हर्म्यस्य वक्त्रमण्टपम् ।। २२ ।।
अधोनासं प्रवक्ष्यामि एकभूमेः प्रमाणकम् ।
षड्वर्गसहितं कुर्याल्लक्षणेन समन्वितम् ।। २३ ।।
विस्तारयुगभागैकं वस्वाधारस्य चोच्छ्रयम् ।
पादवर्गसमं तस्य द्विगुणं चेति कीर्तितम् ।। २४ ।।

प्रस्तरं चरणार्थन्तु तत्समं ग्रीवमुच्यते ।
शिखरं चरणायामं स्थूप्युत्सेधं तदर्धकम् ।। २५ ।।
समं तारचतुर्विंशद्भागैकं पादतारकम् ।
पञ्चविंशतिभागैकं वैकं षड्विंशदंशके ।। २६ ।।
पादविष्कम्भकं यत्तद्दण्डं चेति प्रकीर्तितम् ।
दण्डाष्टांशैकहीनं यदग्रपादस्य तारकम् ।। २७ ।।
धरातलोपरिष्टात्तु पादवर्गन्तु कारयेत् ।
स्तम्भस्थूणश्च पादश्च स्थाणुर्दारुतलाङ्घ्रयः ।। २८ ।।
जङ्घा च चरणेनैव पर्यायवचनानि च ।
व्योमाग्निवर्तिभिर्वापि भूताब्धिपरिभिस्तु वा ।। २९ ।।
समतारेऽङ्घ्रिवर्गे तु एकभूमेस्तु कारयेत् ।
कृत्वा वेदीं द्विदण्डेन वस्वाधारस्य चोपरि ।। ३० ।।
तस्याऽयामन्तु नवधा कृत्वैकांशेन पट्टिका ।
कन्धरन्तु युगांशेन अंशेनाऽधारपट्टिका ।। ३१ ।।
पक्षांशा वेदिका प्रोक्तो व्योमांशा चोर्ध्वपट्टिका ।
उत्तराधस्त्रिपादेन दण्डत्रयपरिग्रहेतहः ।। ३२ ।।
तत्स्थाने ताटिकोत्सेधं दण्डार्थं चेति कीर्तितम् ।
तद्दैर्घ्यं रसधा भज्य एकेन गिरिकाद्वयम् ।। ३३ ।।
गिरिकायां तु विस्तारमग्रपादसमं भवेत् ।
एकेन वृत्तकं कुर्यात्पक्षांशेन सरोरुहम् ।। ३४ ।।
द्विभागेनास्यकं तस्य तारमध्यर्धदण्डकम् ।
तस्योर्ध्वे दणडमानं तु रसभागेन भाजयेत् ।। ३५ ।।
एकाशाङ्गळमित्युक्तं तत्तारं चाग्रपादवत् ।
कुम्भोच्चं तु युगांशेन द्विदण्डं तस्य विस्तरम् ।। ३६ ।।
वृत्तमेकेन कर्तव्यं तत्तारम् अग्रपादवत् ।
तस्योर्ध्वे चैव पादेन द्विदण्डं नवधा भवेत् ।। ३७ ।।

पद्मं कुर्याद्विभागेन व्योमांशं फलका भवेत् ।
फलकायास्तु विस्तारं दण्डत्रयमिति स्मृतम् ।। ३८ ।।
वीरकाण्डं गुणांशेन तत्तारं चाग्रवद्भवेत् ।
पोतिकायां गुणांशेन तत्तारं पञ्चदण्डकम् ।। ३९ ।।
उत्तमं तारमेवस्याद्युगदण्डं तु मध्यमम् ।
त्रिदण्डमधमं प्रोक्तं पोतिकायाः प्रकीर्तितम् ।। ४० ।।
उत्सेधं पोतिकायां तु एकदण्डमिति स्मृतम् ।
पोतिकाबन्धनिर्यूहं दण्डं वा तत् त्रिपादकम् ।। ४१ ।।
युगाश्रं वाऽथवृत्तं वा वस्वश्रं वा कलाश्रकम् ।
चरणाकृतिरेवं स्यात् भित्तेः पादस्य निर्गमम् ।। ४२ ।।
तस्य चैव तु भागैकं चतुरश्रस्य निर्गमम् ।
दण्डत्रिभागभागैकं वृत्तस्याष्टकलाग्रहा ।। ४३ ।।
वृत्ताष्टाश्र कलाश्राणां वेद्यूर्ध्वे चाङ्घ्रिमूलके ।
कर्णविस्तारमानेन चतुरश्रं तु कारयेत् ।। ४४ ।।
पादवर्गं समाख्यातं ततःप्रस्तरवर्गकम् ।
यल्लब्धोत्सेधमानं तु भजेद्विंशतिभागतः ।। ४५ ।।
उत्तरोच्चं गुणांशेन तदुच्चमष्टधा भजेत् ।
एकांशेनैव निर्यूहं पोतिकायास्तु बाह्यके ।। ४६ ।।
एकेन वाजनोच्चं तु तत्समं नीव्रमुच्यते ।
वसन्तकोच्चं त्र्यंशेन तस्योर्ध्वं नीव्रमुच्यते ।। ४७ ।।
तस्योर्ध्वपट्टिकांशेन युगभागैकनीव्रकम् ।
अब्ध्यंशन्तु कपोतोच्चं दण्डार्धं लम्बमानकम् ।। ४८ ।।
तन्नीव्रं तु त्रिदण्डं स्याद्वार्जनं तस्य नीव्रकम् ।
कपोतेनासिकायुक्तं कर्णे वल्लिसमायुतम् ।। ४९ ।।
नासितारं द्विदण्डं वा सार्धद्विदण्डमेववा ।
उत्सेधं तत्समां ज्ञेयं तद्भूतांश – गुणांशकम् ।। ५० ।।

तन्मध्यमेऽवगाढं तु तदुहादण्डमानतः ।
वाजिनोर्ध्वेसमं प्रोक्तं नासिकायाशिशिरस्तथा ।। ५१ ।।
एकांशेनोर्ध्वपट्टिं तु पादसूत्रसमं कुरु ।
एकेनान्तरितं कुर्यात्तत्तारमग्रपादवत् ।। ५२ ।।
अग्रपादार्धमानेन तन्नीव्रं परिकीर्तितम् ।
प्रमुखोच्चद्विभागेन तत्तुल्यं कर्णनिर्गमम् ।। ५३ ।।
प्रतिवाजनमेकांशं स्थाणुसूत्रसमं तु तत् ।
सिम्हव्याळगजैः पुष्पैः कुर्यादन्तरितं तथा ।। ५४ ।।
एवं प्रस्तरवर्गं तु ग्रीवावर्गमतः परम् ।
तस्योर्ध्वे वेदिकायाम मध्यर्थं दण्डमुच्यते ।। ५५ ।।
वेशनं वेदिकायां तु; द्विदण्डं चेति कीर्तितम् ।
वेदिकोत्सेधमानं तु सप्तभागेन भाजयेत् ।। ५६ ।।
कर्णोत्सेधगुणांशेन एकांशेनैव पट्टिका ।
तस्योर्ध्वनिर्गमं तस्याः पक्षांशं वेदिकोच्छ्रयम् ।। ५७ ।।
तन्नीव्रन्तु तदर्धं स्यादेकांशेनोर्ध्वपट्टिका ।
अथःपट्टिसमं चैव तत्पट्टीं कुरु बुद्धिमान् ।। ५८ ।।
वेदिविस्तारबाणांशं वेदांशं कर्णविस्तरम् ।
चतुर्दिक्षु विशेषेण नासिकाङ्घिं प्रकल्पयेत् ।। ५९ ।।
वेदितार रसांशैकं मध्यांशैक मथापि वा ।
ग्रीवामूलात्मनिर्यूहं नासिका स्थूणकस्य तत् ।। ६० ।।
तन्निर्यूह समं वापि युगदण्डमथापि वा ।
अर्धेन वेददण्डं वा उभयोः पादमध्यमम् ।। ६१ ।।
त्रिदण्डं वा चतुर्दण्डं गुहावेशं प्रकीर्तितम् ।
तत्पादस्य समायामं हंसमालावसानकम् ।। ६२ ।।
दण्डत्रिभागपक्षांशं तत् स्तम्भस्य तु तारकम् ।
शेषं तु पूर्ववत्कुर्यात् उत्तरं वाजनं तथा ।। ६३ ।।

ग्रीवाग्रे वार्धदण्डेन उत्तरं तु प्रकल्पयेत् ।
तत्समं तु गळान्नीव्रं तत्र भागैकवाजनम् ।। ६४ ।।
तत्समं तस्य नीव्रं तु हंसमालार्द्धदण्डकम् ।
तस्यार्धं तस्य नीव्रन्तु पट्टिवाजनवद्भवेत् ।। ६५ ।।
चतुर्भागं तु भागैकं नीव्रं तस्य प्रकीर्तितम् ।
ग्रीववर्गसमाख्यातमूर्ध्वे शिखरवर्गकम् ।। ६६ ।।
शिखरस्य तु विस्तारं वेद्यास्तारसमं भवते् ।
वेद्यास्तारं त्रिभागैकं महानास्या तु विस्तरम् ।। ६७ ।।
विस्तारस्य त्रिभागं तु उत्सेधं तस्य कीर्तितम् ।
तस्याः परिधिविस्तारधृवपादसमं भवेत् ।। ६८ ।।
शेषं स्यादवभागं तु गुहावेशं द्विदण्डकम् ।
विस्तारार्थं शिरोमानं किन्नरीवक्त्रवत्कुरु ।। ६९ ।।
नानावल्ली समायुक्तं सिंहव्याळ मृगैर्युतम् ।
भूतरूपैस्समायुक्तं परिधिं कारयेत्ततः ।। ७० ।।
शिखरं कारयेद्धीमान् घण्टायामाकृतिस्तथा
वेद्यास्तारस्य पञ्चांशं गुणांशं बलिविस्तरम् ।। ७१ ।।
बलितारस्य बाणांशं गुणांशं पद्मविस्तरम् ।
पद्मतारगुणांशैकं कुम्भतारमितिस्मृतम् ।। ७२ ।।
कुम्भतारशरांशैकं कन्धरस्य तु तारकम् ।
कुम्भतारं त्रिभागैकं पाल्यतारस्य विस्तरम् ।। ७३ ।।
पाल्यतारत्रिभागैकं कर्णतारमिति स्मृतम् ।
मुकुळस्य तु विस्तारं कर्णतारसमं भवेत् ।। ७४ ।।
शिखरोदित कुम्भेषु रसांशं वज्रतुङ्गकम् ।
स्थूपिकोत्सेधमानं तु द्वात्रिंशद्भागतो भजेत् ।। ७५ ।।
पद्मोत्सेधं नवांशं तु द्विभागं गळमुच्यते ।
व्योमांशेनोर्ध्वपद्मं तु अर्धांशेन घटं भवेत् ।। ७६ ।।

मन्दिरस्य तु विस्तारं षड्भागेन तु भाजयेत् ।
पक्षांशं मध्यमे चैव कोणेष्वेकांशमेव च ।। १०१ ।।
अध्यर्धदण्डमानेन बाह्ये चैव तु निर्गमम् ।
कारयेत्कर्णकूटानि प्रस्तरोपरि पूर्ववत् ।। १०२ ।।
चतुर्विंशन्नासिकाभिः कपोतं कारयेत्ततः ।
शिखरोपेतकाष्ठानि चतुर्दिक्षु प्रकल्पयेत् ।। १०३ ।।
यदुच्चं तु महानास्यः कोष्ठस्योत्सेधमुच्यते ।
महानास्याच्च निर्यूहं समनिर्यूहमुच्यते ।। १०४ ।।
शालायां चैव विस्तारं कूटस्य द्विगुंण भवेत् ।
शालायामं त्रिधा कृत्वा द्विभागं शिखरं भवेत् ।। १०५ ।।
शेषं स्थूपिरितिख्यातं कुक्षिनासिविचित्रितम् ।
पार्श्वयोः पृष्ठदेशे तु तोरणानि प्रकल्पयेत् ।। १०६ ।।
सर्वतोमुखमेवं स्यात्सर्वदेवार्हकं भवेत् ।
देवालङ्कारसंयुक्तं कोष्ठकूटस्य मध्यमम् ।। १०७ ।।
कपोते चाष्टभिश्चैव नासिकापञ्जरैर्युतम् ।
महानासिश्च कर्तव्यमूर्ध्वशालां च वर्जयेत् ।। १०८ ।।
अनुनासिचतुर्भिश्च नन्द्यावर्तमिति स्मृतम् ।
देवालङ्कारसंयुक्तं पञ्जरैरष्टभिर्युतम् ।। १०९ ।।
भौमाद्युत्तरकान्तं तु अष्टभागैर्विभाजयेत् ।
मसूकरमथांशेन पक्षांशं पाददैर्घ्यकम् ।। ११० ।।
त्रिपादं प्रस्तरं प्रोक्तं अर्धांशं वेदिकोच्छ्रयम्
कन्धरं तु त्रिभागेन शालाकारं द्विभागिकम् ।। १११ ।।
एकांशं स्थूपिकोत्सेधं स्थूपित्रयसमायुतम् ।
कुक्षिनासिसमायुक्तं प्रासादं सप्तधा भजेत् ।। ११२ ।।

पञ्जरस्य तु विस्तारं एकभागं प्रकीर्तितम् ।
पूर्ववत्तु मसूरादीन् वृत्तपादं प्रकल्पयेत् ।। ११३ ।।
एतत्पञ्चालमित्युक्तं देवालङ्कारसंयुतम् ।
अधिष्ठानस्य मध्यं तु अन्याधिष्ठानकं कुरु ।। ११४ ।।
चरणस्य तु वर्गे तु नानापादयुतं कुरु ।
विष्णुकान्तमिति प्रोक्तं सर्वदेवेषु योग्यकम् ।। ११५ ।।
नागरद्राविडं चैव वेसरं च त्रिधा भवेत् ।
भौमादि – स्थूपिपर्यन्तं युगाश्रं नागरं भवेत् ।। ११६ ।।
वेदिप्रभृतिचाष्टाश्रं द्राविडं चेति कीर्तितम् ।
कर्णप्रभृतिवृत्तं यद्वेसरं परिकल्पयेत् ।। ११७ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे प्रासादलक्षणविधिपटलस्सप्तमः समाप्तः

अथ प्राकारलक्षण विधिपटल प्रारम्भः

अथातस्संप्रवक्ष्यामि प्राकाराणां तु लक्षणम् ।
अन्तर्मण्टपमाद्यं स्यादन्तर्द्वारं द्वितीयकम् ।। १ ।।
मध्यहारं तृतीयं तु पश्चान्मर्यादि भित्तिकम् ।
महामर्यादिभित्तिस्तु पञ्चमः परिकीर्तितः ।। २ ।।
प्रासादस्य तु विस्तारं यत्तद्दण्डमिहोच्यते ।
अर्धदण्डप्रमाणेन अन्तर्मण्टपकं कुरु ।। ३ ।।
अन्तर्वारं तु दण्डेन मध्यहारं द्विदण्डतः ।
मर्यादिभित्तिकं कुर्याच्चतुर्दण्डेन बुद्धिमान् ।। ४ ।।
महामर्यादिभित्तिं च सप्तदण्डेन कल्पयेत् ।
दण्डमानमिति प्रोक्तं हस्तमानं ततश्शृणु ।। ५ ।।
चतुर्वारप्रविस्तारमन्तर्मण्टपमादिशेत् ।
अन्तर्वाराऽष्टहस्तेन भवेद्द्वादशहस्तके ।। ६ ।।
मध्यहारं तु कर्तव्यं ततष्षोडशभिः करैः ।
मर्यादिभित्तिकं कुर्याद्विंशद्धस्तविशालकम् ।। ७ ।।
महामर्यादिभित्तिस्स्यात्प्राकारं पञ्चधा विदुः ।
समन्तादेवमावृत्य तद्बहिर्वदनात्पदम् ।। ८ ।।
प्रासादाग्रे विशेषेण वक्त्रायामं प्रकल्पयेत् ।
पादं वाऽर्धत्रिपादं वा अधिकं द्विगुणं तु वा ।। ९ ।।
द्विगुणादधिकार्धं तु त्रिगुणं वा चतुर्गुणम् ।
मुखायाममितिख्यातमुपानात्तस्यनिर्गमम् ।। १० ।।
उत्तमं त्विति विख्यातं कुमुदं मध्यमं स्मृतम् ।
(पा)स्याद्बाह्ये निर्गमं चैव कन्यसं परिकीर्तितम् ।। ११ ।।
उपानकुमुदस्तम्भ बाह्यदण्डत्रयं स्मृतम् ।
तत्तल्लोकस्य कार्याणि तत्तद्दण्डेन कल्पयेत् ।। १२ ।।

मानसूत्रस्य बाह्ये तु भित्तिरभ्यन्तरेऽपि वा ।
मानसूत्रं तु यद्भित्तिर्मध्यमं वापि कारयेत् ।। १३ ।।
महामर्यादिभित्तेस्तु तारं षट्त्रिंशदङ्गुळम् ।
अग्न्यङ्गुळ क्षयेणैव गायत्री याऽङ्गुलान्तकम् ।। १४ ।।
प्राकारभित्तिविस्तारं चतुर्णां परिकीर्तितम् ।
पद्मपादसमोत्तुङ्गं प्रस्तारं तु समं तु वा ।। १५ ।।
चतुष्करं त्रिहस्तोच्चं द्विहस्तोत्तुङ्गमेव च ।
द्विहस्तं च द्विहस्तार्थं त्रिहस्तं च त्रिहस्तकम् ।। १६ ।।
प्रोक्तं महावृतं हर्म्यं निस्तारं तु चतुर्विधम् ।
पञ्चप्राकारयुक्तं वा त्रिप्राकारयुतं तु वा ।। १७ ।।
एकप्राकारसंयुक्तं कल्पयेत्कल्पवित्तमः ।
मर्यादिभित्तिकर्णोक्त्या अन्तर्मण्टपकं तथा ।। १८ ।।
शेषप्राकारकैर्युक्तं त्रिः प्राकारमिति स्मृतम् ।
अथ चैवं प्रकारेण त्रिप्राकारमिहोच्यते ।। १९ ।।
अन्तर्मण्डलकं चैवमर्यादिर्मध्यहारकम् ।
त्यक्त्वैवाऽन्यच्च शेषं तु त्रिप्राकारमिति स्मृतम् ।। २० ।।
एकप्राकारकं चेत्तु अन्तर्द्वारयुतं कुरु ।
भित्यूर्ध्वे सुदृढं कुर्याच्छत्राकारं शिरस्तथा ।। २१ ।।
अथवा बद्धहर्म्ये तु कूटशालायुतं तु वा ।
प्राकारे तु द्वितीयो वा मौळिकाऽकृतिरेव वा ।। २२ ।।
सभाकृतिर्वा कर्तव्या त्रितलं वा द्विभूमिकम् ।
कल्पयेत्तु विशेषेण प्राकारं प्रतिगोपुरम् ।। २३ ।।
शरादिनवहस्तं वा एकादशकरं तु वा ।
त्रयोदशकरं वापि गोपुराणां तु विस्तरम् ।। २४ ।।

पादादिकमथाद्यर्थं पादे(दो)न द्विगुणायुतम् ।
प्राकारशिखरान्तं वा स्थूप्यन्तं वा समुच्छ्र्यम् ।। २५ ।।
हर्म्यगोपुरकं वापि शालाकृतिरथाऽपि वा ।
मौळिकाकृतिकं वापि कुर्यादेव तु गोपुरम् ।। २६ ।।
गोपुरद्वारतुङ्गं स्यादुपानादुत्तरान्तकम् ।
द्वारस्येवचतुर्दिक्षु प्राकारेषु प्रकल्पयेत् ।। २७ ।।
प्राकारे तु द्वितीये वा तृतीये पावके दिशि ।
पवनालयं तु कर्तव्यं चतुश्शालासमन्वितम् ।। २८ ।।
द्वितीयप्राकारैशान्ये कूपस्थानं प्रकीर्तितम् ।
शक्रशाङ्करयोर्मध्ये वाद्य(र्य)स्थानं प्रकीर्तितम् ।। २९ ।।
आग्नेयशक्रयोर्मध्ये धनस्थानमुदाहृतम् ।
याम्यपावकयोर्मध्ये पुष्पमण्टपमुच्यते ।। ३० ।।
कुर्यात् स्नानाम्बुजालं तु याम्यनैर्ऋतिमध्यमे ।
वारुणे नैर्ऋतेर्मध्ये धर्मश्रवणमण्टपम् ।। ३१ ।।
वारुणानिलयोर्मध्ये कुर्यादायुधमण्टपम् ।
वायव्यसोमयोर्मध्ये शयनस्थानमुच्यते ।। ३२ ।।
ईशानसोमयोर्मध्ये यागमण्टपमुच्यते ।
सौम्ये तु मध्यहारायां कुर्यादास्थानमण्टपम् ।। ३३ ।।
अधुना देशिकादीनामावासं तु विधीयते ।
बाह्यप्राकारबाह्ये च द्विदण्डं वार्धमेव वा ।। ३४ ।।
व्यपोह्या सौम्यके देशे देशिकावासमुच्यते ।
कर्तव्यं मौळिकाकारं चतुश्शालाग्रकं तु वा ।। ३५ ।।
पश्चिमे परिचाराणामावासं परिकीर्तितम् ।
भिषजां तु गृहं याम्ये दैवज्ञानां तथैव हि ।। ३६ ।।
अम्बष्ठानां तु तत्रैव वाद्यकानामधैन्द्रके ।
शैवानाञ्चैव सर्वेषां प्राच्यामावासमुच्यते ।। ३७ ।।

महाव्रतीनां वह्नौ तु याम्ये पाशुपतालयम् ।
निर्ऋते कालमुख्यानां बौद्धानां वारुणे तथा ।। ३८ ।।
वायव्ये चार्हतानां तु सौम्ये भूसुरसत्रकम् ।
ज्ञानाभ्यासाय शालं तु ऐशान्ये सम्प्रकल्पयेत् ।। ३९ ।।
इन्द्र आग्नेययोर्मध्ये कार्यं खातजलाशयम् ।
याम्यपावकयोर्मध्ये जलदानप्रपां कुरु ।। ४० ।।
याम्यनैर्ऋतयोर्मध्ये गोशालां सम्प्रकल्पयेत् ।
निर्ऋतिवारुणयोर्मये कर्तव्यं सूतिकागृहम् ।। ४१ ।।
वारुणानिलयोर्मध्ये रोगार्तानां निवेशनम् ।
कुर्यादक्षरशिक्षार्धं कुबेरानिलमध्यमे ।। ४२ ।।
उत्तरेशानयोर्मध्ये धान्यस्थानमुदाहृतम् ।
ईशानशक्रयोर्मध्ये वेदाध्ययन मण्टपम् ।। ४३ ।।
तद्बाह्ये कल्पयेद्विद्वान् स्त्रीणां रागोपजीविनाम् ।
क्रयविक्रयकानाञ्च पुष्पतैलोपजीविनाम् ।। ४४ ।।
कुलालतन्तुवायानां मत्स्यमांसोपजीविनाम् ।
नापितश्मश्रुकाराणां गोपालानां तु कारुभिः ।। ४५ ।।
रक्षकानामथाऽवासमापणस्थानमेव च ।
बाह्ये त्वैशान्य देशे तु श्मशानस्थानमुच्य ते ।। ४६ ।।
बाह्योत्तरे तु कर्तव्यं तक्षकादि निवेशनम् ।
आवासं तद्बहिः कुर्याद्रजकानां तथैव च ।। ४७ ।।
चण्डालानां कुटीराणि तद्बाह्ये तु प्रकल्पयेत् ।
एवं स्वतः प्रधानस्य कल्पयेद्देशिकोत्तमः ।। ४८ ।।
वास्त्वङ्गं कल्पयेद्धीमान् ग्रामे पैशाचिके पदे ।
ग्रामतारशरांशैकं ग्रामबाह्ये विनिक्षिपेत् ।। ४९ ।।
तत्पैशाचमिति ज्ञेयं ग्रामं पैशाचसंयुतम् ।
शतं चतुश्चत्वारिंशदधिकं कारयेत्पदम् ।। ५० ।।

कर्णसूत्रं ततः कृत्वा ऐशद्वयांशकेपि च ।
इन्द्र ईशानयोर्मध्ये सोमशाङ्करमध्यमे ॥ ५१ ॥
यधेष्टायें कारयेद्धीमान् प्राकारंतोरणस्य तु ।
तत् स्थाने स्थापयेल्लिङ्गं वास्त्वङ्गं विधिना तथा ॥ ५२ ॥
अन्यथा पुरदुर्गादौ शिवस्थानमिहोच्यते ।
अष्टासु दिक्षु मध्ये च शिवस्थानं प्रकल्पयेत् ॥ ५३ ॥
पूर्वपश्चिमदिग्द्वारं पुरप्रवर पूर्वकम् ।
ग्रामे च सर्वदिक्ष्वेव पैशाचाद्बहिरिष्यते ॥ ५४ ॥
महेशं कारयेऽम् भोधिं सद्यो वास्तु समीष्यते ।
तत्सम्भ्रमाद्विमर्यादि कुदृष्टिरहितश्शिवः ॥ ५५ ॥
वास्त्वाङ्गस्थापनाच्चापि स्वप्रधाने शिवस्स्थितः ।
तत्फलं कोटिगुणितं साधयेद्विधिना ततः ॥
ग्रामान्यासोक्तमार्गेण सर्वेषां तु निवासनम्

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे प्राकारलक्षणविधिपटलोऽष्टमः समाप्तः

अथ लिङ्गलक्षणविधिपटलप्रारम्भः

अतः परं प्रवक्ष्यामि लिङ्गलक्षणमुत्तमम् ।
स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ॥ १ ॥
शैलजरत्नलोहैश्च मृन्मयेनैव कारयेत् ।
शिलामयं तु यद्रूपं अजविष्णुहरैर्युतम् ॥ २ ॥
त्रिसूत्रं मुकुळैर्युक्तं स्थावरं लिङ्गमुच्यते ।
शेषाण्यन्यानि सर्वाणि जङ्गमं लिङ्गमुच्यते ॥ ३ ॥
स्थावरं जङ्गमाच्छ्रेष्टं; स्थावरं त्वधुनोच्यते ।
सुमुहूर्ते सुनक्षत्रे शिलाग्रहणमारभेद् ॥ ४ ॥
मधुमाधवशुक्लेषु नभस्यकतपस्ययोः ।
तपस्यन्तेषु माशेषु शुक्लपक्षे शुभे दिने ॥ ५ ॥
अन्येषु सर्वमासेषु शिलारम्भं न कारयेत् ।
कृतं चेत्कर्तृनाशस्स्यात् स्थाननाशं धनक्षयम् ॥ ६ ॥
प्राजापत्ये मखे त्वाष्ट्रे वैष्णवे मृगशीर्षके ।
सावित्रे चैव रेवत्यां अनिले चोत्तरेषु च ॥ ७ ॥
मैत्रभेषु शुभेष्वेषु शिलाग्रहणमारभेत् ।
आदिशैवकुले जातः पञ्चगोचरसंस्थितः ॥ ८ ॥
मन्त्रागमज्ञः शास्त्रज्ञः सर्वलक्षणसंयुतः ।
दिव्यन्तरिक्षभौमानि निमित्तान्युपलक्षयेत् ॥ ९ ॥
देवाग्निगुरुभक्ताश्च देशिक स्समुदाहृतः ।
सुरेखः(लेखाः) सुगुणो धीमान् शास्त्रज्ञःस्सर्वयाग्यकः ॥ १० ॥
वास्तुविद्याकृताभ्यासश्शल्योद्धारविशारदः ।
मानादिरसमानज्ञः शिलादोषपरीक्षकः ॥ ११ ॥
सर्वलक्षणसंयुक्तः स्थपतिस्समुदाहृतः ।
शिवं सम्पूज्य विधिवत् ज्ञापयेद्देशिकोत्तमः ॥ १२ ॥

सितवस्त्रपरीधानौ गन्धमाल्यैरलङ्कृतौ ।
प्राच्यां वै चोत्तरायां वा गच्छेतां गुरुशिल्पिनौ ॥ १३ ॥
सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम् ।
नानाभक्तजनैस्सार्धं ततो मङ्गळवाचकैः ॥ १४ ॥
शुभाशुभनिमित्तानि तस्मिन्काले परीक्षयेत् ।
वृषभं पूर्णकुम्भं च सङ्खं मांसं गजं ध्वजम् ॥ १५ ॥
कन्याञ्च पद्मपुष्पं च दीपगौभेरिकादिभिः ।
सितपुष्पं क्षितीशं च वेश्यां च छत्रपल्लवौ ॥ १६ ॥
ब्राह्मणं शुभवाक्यं च दीप्ताग्निं तुरगं फलम् ।
शुभान्येतानि सर्वाणि गन्तव्यपथि दर्शने ॥ १७ ॥
काकस्य रोदनं चैव शिवारावक्षुतं तथा ।
शुभप्रदानि वामे तु सर्वसिद्धिकराणि च ॥ १८ ॥
कुररश्च शशश्चैव डुण्डुभश्च वराहकः ।
श्येनश्च कौशिकश्चैव दक्षिणाद्वामगाश्शुभाः ॥ १९ ॥
जराङ्गी रक्तनेत्री च जम्बुको नकुलः खरः ।
शुभान्येतानि सर्वाणि वामाद्दक्षणगानि वै ॥ २० ॥
अमङ्गली प्रेतरूपः पतितः क्षुत्पपीडितः ।
विकीर्णकेशो मुण्डश्च शाक्योदिग्वस्त्रकस्तथा ॥ २१ ॥
एतानि चाऽऌुभान्येव सर्वदोषकराणि च ।
भौमान्येतानि चोक्तानि चान्तरिक्षमथोच्यते ॥
निपातं च फलं पुष्पं शब्दो वा यदि जायते ।
अन्तरिक्षाणि चैतानि दिव्यानि तु वदाम्यहम् ॥ २२ ॥
विद्युस्तनितघोषैश्च सादित्यं वृष्टिपातनम् ।
शुभान्येतानि विज्ञेयान्यशुभानि निबोध मे ॥ २३ ॥
उल्कापातदिशोदाहं महावातप्रवर्तनम् ।
परिवेषमसृक्पातस्तारापातेन्द्रचापकौ ॥ २४ ॥

सुनिमित्तं भवेद्गच्छेद्दुर्निमित्तमधोस्थितः ।
हिमवान् हेमकूटैश्च निषधो नील एव च ॥ २५ ॥
ऋक्षश्च माल्यवांश्चैव श्रीशैलश्च तथैव च ।
गन्धमाधनशैलश्च मेरुस्तु नवमः स्मृतः ॥ २६ ॥
एते पर्वतराजानो महाशैलाः प्रकीर्तिताः ।
महेन्द्रो मलयश्चैव सह्योविन्ध्यस्तथैव च ॥ २७ ॥
अम्बुदोऽभ्युदयश्चैव पारियात्रस्तथैव च ।
श्रीपर्वतश्च विख्यातो देवपर्वत एव च ॥ २८ ॥
एतेषां चैव सामीप्यं वनेषूपवनेषु च ।
भूमिश्चतुर्विधा ज्ञेया शुभदा चऽशुभङ्करी ॥ २९ ॥
यत्र गुल्मयुता स्निग्धा फलपुष्पसमन्विता ।
तत्र गृह्णीत यत्नेन शिलासा वारुणी स्मृता ॥ ३० ॥
तया यत्क्रियते लिङ्गं तत्सर्वार्धप्रसाधनम् ।
यस्मात्तु सौम्यके तोयं वीहिक्षेत्रं तु दक्षिणे ॥ ३१ ॥
फलिनः क्षीरवृक्षा वा पूर्वे वा पश्चिमेपि वा ।
तत्रस्था या शिला रम्या माहेन्द्री सा शिला स्मृता ॥ ३२ ॥
धनधान्य विवृध्यर्थं लिङ्गस्यात्तु प्रजापतेः ।
पलाशखदिरा निम्बा काष्मर्या शक्रसंयुता ॥ ३३ ॥
तित्तिरा च कपोता च गृध्राश्चैव शवायनाः ।
मयूरभ्रमराकीर्णा स्वल्पतोयसमन्विताः ॥ ३४ ॥
अनिला सा विजानीयात् शिला तत्राऽनिला स्मृता ।
सदा शुभा बुधै, र्गाह्या आभिचाराय कल्पिता ॥ ३५ ॥
पीलुश्लेष्मातकाकीर्णा खादिरस्तु हि सङ्कुला ।
विभीतकाकबहुला कलिना शर्करान्विता ॥ ३६ ॥
तृणोदकविहीना तु तरक्षुकुलसेविता ।
जम्बुका यत्र दृश्यन्ते तथैव मृगतृष्णया ॥ ३७ ॥

तत्रस्था या शिला सा तु आग्नेयीति प्रकीर्तिता ।
तया लिङ्गं न कुर्वीत पण्डितश्शुभकर्मणि ॥ ३८ ॥
विपरीते तु कर्तव्या शत्रुनाशाय नान्यथा ।
एवं परीक्ष्य भूमिं तु शिलां गृह्णीत देशिकः ॥ ३९ ॥
सरित्सानिलनिर्धूतां पवित्रान्तर्जले स्थिताम् ।
द्रुमच्छायोपगूढां च तीर्थाश्रमनिषेविताम् ॥ ४० ॥
आयामपरिणाहाढ्यां सर्वदोषविवर्जिताम् ।
ग्राह्यं च दृश्यं ह्युपलं शेषादृश्यं तु वर्जयेत् ॥ ४१ ॥
यदनेन च तद्धृश्यं गृहीते धननाशनम् ।
पुत्रनाशं च सौभाग्यपुष्टेः करमदृश्यकम् ॥ ४२ ॥
यस्मिन् देशे शिला शेते प्राङ्मुखस्थः पतिः स्थितः ।
प्रदक्षिणं ततःकृत्वा शिर आदीनि लक्षयेत् ॥ ४३ ॥
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम् ।
पूर्वमग्रमिति प्रोक्तं पश्चिमं मूलमुच्यते ॥ ४४ ॥
दक्षिणं मूलमित्युक्तमुत्तरं चाग्रमुच्यते ।
शिरोभागः मुखं ज्ञेय मधोभागो विशेषतः ॥ ४५ ॥
दृश्यभागं तु पृष्ठं स्यात् पार्श्वो पार्श्व इति स्मृतः ।
निर्ऋत्यांशकमायामं नीलानिलगतं तथा ॥ ४६ ॥
ऐशाग्नेयौ शिरः प्रोक्तौ पृष्ठगावितरौ स्मृतौ ।
लाञ्छयित्वा कथं तत्र ततस्तत्क्षणमाचरेत् ॥ ४७ ॥
आचार्यश्शिल्पिभिस्सार्धं शिलामुद्धारयेत्क्रमात् ।
कुन्देन्दुहेमधवळा शङ्खशुक्तिजातनिभा ॥ ४८ ॥
दधिसमा शितवस्त्राभा विप्रशिला शेषशुक्लसमा ।
बालार्कपङ्कजाभा रोहितबन्धूकपुष्पसङ्काशा ॥ ४९ ॥
भुजगेन्द्रकोपसदृशा क्षत्रशिला शेषरक्तसमा ।
कनकहरिद्रभा सा हरितारनिभा सुकर्णिकाराभा ॥ ५० ॥

चणकादिपीतवर्णा शुभशिलावैश्यजातसमा ।
नीलयुगराजवक्त्राम्बरनीलनीरदराशिविभा ।। ५१ ।।
बहिर्गलाङ्गाराभां यश्चेच्छिलां शूद्रजातीनाम् ।
मरकतशैलनिभा दूर्वाश्यामाभिवेणुका भासा ।। ५२ ।।
हरितश्वेतयुता या सा शिला च सर्वजातीनाम् ।
अनुलोमक्रमाद्ग्राह्यं प्रतिलोमकमान्न हि ।। ५३ ।।
स्त्रीपुन्नपुंसका शैला बाला वृद्धा च मध्यमा ।
अष्टाश्रा चतुरश्रा वा स्त्रीशिला चेति निश्चिता ।। ५४ ।।
वृत्तं नपुंसकं शैलं द्वादशं दशकोणकम् ।
आयताश्रं च पुंल्लिङ्गं वृत्तायतं तथैव च ।। ५५ ।।
घण्टाशब्दस्तु पुंलिङ्गं स्वरहीनं नपुंसकम् ।
ताळशब्दशिलाया तु सा शिला युवती स्मृता ।। ५६ ।।
दीर्घशब्दा तु या वृद्धा; ह्रस्वभावेति कीर्तिता ।
एवं सर्वं तु संलक्ष्य प्रहरेच्छिल्पवित्तमाः ।। ५७ ।।
बालवृद्धशिलायास्तु वर्जयेत्तु प्रयत्नतः ।
सकळं निष्कळं बेरं पुंसां पुंशिलया विदुः ।। ५८ ।।
योज्या स्त्रीशिलया सम्यक् नारीबेरं च पिण्डिका ।
नपुंसकोपलेनैव ब्रह्मकूर्मशिले स्मृते ।। ५९ ।।
प्रासादशिल्पकुड्यादौ नपुंसकशिलां नयेत् ।
पुंलिङ्गैः कल्पिता पिण्डी राजराष्ट्रभयङ्करी ।। ६० ।।
युवत्याकलितं लिङ्गं सर्वप्राणिभयङ्करम् ।
नपुंसकेन लिङ्गं वा कृतं चेत्पिण्डिकाऽऽथवा ।। ६१ ।।
दुर्भिक्षं तु भवेद्भूमौ यजमानो विनश्यति ।
रेखाबिन्दुकळङ्कानि विमलं परिवर्जयेत् ।। ६२ ।।
पृष्ठपादवदाकारा सूत्रपादवदायता ।
सूर्यरश्मिवदाकारा रेखा वै त्रिविधा स्मृता ।। ६३ ।।

स्तनचूचुकसङ्काशा जम्बूफलसमप्रभा ।
बिन्दुरेवं समाख्याता द्विविधेन प्रजापतेः ।। ६४ ।।
बर्हिपिञ्छसमाकारं कृष्णामृगसमप्रभम् ।
कृष्णलोहवदाकारं कळङ्कं त्रिविधं भवेत् ।। ६५ ।।
त्रासस्फटिकसङ्काशं शुक्त्यभ्यन्तरसन्निभम् ।
त्रासोऽपि द्विविधो ज्ञेयो विमलं त्रिविधं भवेत् ।। ६६ ।।
शातकुम्भनिभं चैव दरीकृतसमप्रभम् ।
कांस्याभं विमलं ज्ञेयं सर्वदोषकरं भवेत् ।। ६७ ।।
वेण्वङ्कुरवदाकारा लूतपातासमप्रभा ।
खर्जूरपत्रसदृशा दूर्वास्तम्भकसन्निभा ।। ६८ ।।
इक्षोरग्रसमाकारा गिरिकापञ्चधा स्मृता ।
कृष्णशैलसिता रेखा सा प्रशस्तेति कीर्तिता ।। ६९ ।।
कृष्णाकृत्स्नविनाशं स्यात् सितकृष्णा सुगर्हिता ।
गिरिकाकृष्णशैले तु सितवर्णेन देशिकः ।। ७० ।।
खर्जूरपत्रसदृशा दूर्वास्तम्भाकृतिश्शुभा ।
अन्याकृतिर्न गृह्णीयाद्धान्यगोनाशनाय च ।। ७१ ।।
कलङ्कं रोगदं ज्ञेयं त्रासं राष्ट्रविनाशनम् ।
बिन्दुः पुत्रविनाशस्याद्विमलं दुःखदं भवेत् ।। ७२ ।।
श्वेतशैलं तु मोक्षार्थी रत्नशैलं जयप्रदम् ।
पीतवर्णं सम्पत्करं कृष्णं स्यात् सर्वकामदम् ।। ७३ ।।
श्यामं चैवाभिचारार्थं विधिलक्षणपूर्वकम् ।
बाह्यलक्षणमुद्दिष्टं शृणुष्वाभ्यन्तरं ततः ।। ७४ ।।
चतुरश्रां शिलां सम्यक् छेदयेत्तु विचक्षणः ।
तक्षकश्छेदने चैव मण्डलं यत्र दृश्यते ।। ७५ ।।
सगर्भान्तान्यबीजानि रत्नेन तु परीक्षयेत् ।
मञ्जिष्ठवर्णे मण्डूकं कर्कटो हरितालके ।। ७६ ।।

पीते गोधासिते सर्पः खद्योतो मधुवर्णके ।
कपिले मूषिकं विद्यात् कृकला समथारूणे ।। ७७ ।।
गुळवर्णे तु पाषाणे कपोतौ ग्रहगौळिका ।
भस्माभे सिकतां विद्यात् स्फटिकाभे जलं स्मृतम् ।। ७८ ।।
रक्तमण्डलके चित्रं चित्रवर्णे तु वृश्चिकम् ।
शफरं कृष्णचित्रे च किंशुकाभेन्द्रकोपकम् ।। ७९ ।।
एवं गर्भास्तु विज्ञेया बाह्यलक्षणलक्षिताः ।
लक्षणं नास्ति चेद्बाह्ये तेषां लोपानि लेपयेत् ।। ८० ।।
ब्रह्माणं वज्रपाणिं च शूलपाणिं च वैष्णवम् ।
अजाक्षीरेण संयोज्य उपलं लेपयेत्ततः ।। ८१ ।।
लेपिते यदि क्लिन्नं स्यादेकरात्रोषितं तथा ।
सगर्भत्वं विजानीयादभिगोथा च वृश्चिकम् ।। ८२ ।।
कासीसं पीतलोध्रं च गोक्षिरेण तु पेषयेत् ।
लेपिते न शिलान्तेन स रुधिराभं यदा भवेत् ।। ८३ ।।
दिवसैस्तु दिशैश्चैव एकरात्रोषितोऽपि वा ।
दद्दुरस्तत्र विज्ञेयः कूर्मोवाथ नसंशयः ।। ८४ ।।
पृथ्वीं त्रिशूलिनं ब्राह्म्यं महिषी क्षीरवेष्टितम् ।
लेपिते तु शिलान्तेन रुधिराभा यथा भवेत् ।। ८५ ।।
कृष्णमीनो भवेत्तत्र कृकला समथापि वा ।
मुस्तकं करवीरं च कुष्ठं मासि फलत्रयम् ।। ८६ ।।
एतानि पेषयित्वा तु स्त्रीस्तन्येन तु पेषयेत् ।
आश्मानं लेपयेत्तेन यदिस्याच्छिलि शिलेनकैः ।। ८७ ।।
कालकूटविषं तत्र न तु हस्तेन संस्पृशेत् ।
गर्भाणां लक्षणं ह्येवं शिलाग्रहणमारभेत् ।। ८८ ।।
शोधयित्वा भुवं पश्चात्तत्समीपप्रदेशकम् ।
पञ्चगव्येन संप्रोक्ष्यपवमानमुदीरयेत् ।। ८९ ।।

गन्धं पुष्पं तथा धूपं दीपं नैवेद्यमेव च ।
सद्यादिब्रह्मभिर्दत्वा शिलां वस्त्रेणवेष्टयेत् ॥ ९० ॥
तस्यैव पूर्वभागे तु होमकर्म समारभेत् ।
समिदाऽज्येन चरुणा प्रत्येकं तु शताहुतिः ॥ ९१ ॥
हृदयेन समिद्धोमं सर्पिरीशानमन्त्रतः ।
अघोरेण चरुं हुत्वा प्रत्येकं व्याहृतिर्हुनेत् ॥ ९२ ॥
ततः स्विष्टकृतं हुत्वा परिषेचान्तमाचरेत् ।
शिलां प्रदक्षिणीं कृत्वा दिग्देवानां बलिं ददेत् ॥ ९३ ॥
एकरात्रं वसेत्तत्र स्वप्ने माणवकं जपेत् ।
ॐ नमश्शम्भवे त्रिनेत्राय पिङ्गळाय महात्मने ॥ ९४ ॥
वामाय विश्वरूपाय स्वप्नाधपतये नमः ।
आचक्ष्महे महादेव प्रसन्नोऽसितवान्तिकम् ॥ ९५ ॥
स्वप्नजातानि सर्वाणि हृदिस्थानि भवान्तु मे ।
ॐ हिलि हिलिशूलपाणये स्वाहा ॥ ९६ ॥
दृष्टं स्वप्नं द्विजश्रेष्ठ ब्राह्मणेभ्यो निवेदयेत् ।
दुस्वप्नं चेज्जपेद्धीमान् पाशुपतं सहस्रकम् ॥ ९७ ॥
वस्त्राङ्गुलीयकैश्चैव तोषयेद्गुरुशिल्पिनौ ।
शिलां सम्यग्गृहीत्वा तु लिङ्गं कुर्यात्तु बुद्धिमान् ॥ ९८ ॥
गर्भं विंशतिभागैश्च भजेद्दशाऽधमं भवेत् ।
रुद्रांशं मध्यमं ज्ञेयं रव्यशं चोत्तमं भवेत् ॥ ९९ ॥
ज्येष्ठकन्यकयोर्मध्ये एतद्गर्भमितिस्मृतम् ।
विभेजेदष्टधा गर्भं शमं सूत्रविचक्षणः ॥ १०० ॥
एवं कृते भवेद्यत्र नवलिङ्गानि सुव्रत ।
गर्भमानमिति प्रोक्तं हस्तमानमथशृणु ॥ १०१ ॥
एकादिनवहस्तान्तं षडङ्गुलविवर्धनात् ।
आयामास्तु त्रयस्त्रिंशत्सङ्ख्यायाः परिकीर्तिताः ॥ १०२ ॥

एकहस्तप्रमाणं तु हीनलिङ्गं न कारयेत् ।
पञ्चहस्तं समारभ्य हर्म्यमानं विशेषतः ॥ १०३ .॥
हस्तमानेन लिङ्गं तु कारयेद्देशिकोत्तमः ।
एवं लिङ्गोच्छ्रूयं प्रोक्तं वक्ष्ये लिङ्गस्य विस्तरम् ॥ १०४ ॥
लिङ्गस्योत्सेधमानार्यम् अष्टधा विभजेत्ततः ।
विष्कम्भः पञ्चभागः स्याद्धस्ताच्छतुरश्रकम् ॥ १०५ ॥
अधस्ताच्चतुरश्रं तु ब्रह्मभागं तदुच्यते ।
अष्टाश्रं मध्यमं ज्ञेयं विष्णुभागं तदुच्यते ॥ १०६ ॥
और्ध्वे सुवृत्तभागं तु रुद्रांशमितिकीर्तितम् ।
नपुंसकन्तु ब्रह्मांशो विष्णवंशस्त्रयविद्यते ॥ १०७ ॥
तत्पुमानूर्ध्वभागस्स्यात् एवं सङ्कल्पितं त्रिधा ।
अर्धं कर्णस्य कर्णाभ्यामष्टमष्टाश्रमाङ्कितम् ॥ १०८ ॥
अथवाऽन्यप्रकारेण वक्ष्ये वस्वश्रकस्य तु ।
व्यासप्तांशदशत्र्यंश मध्यपट्ट मथापि वा ॥ १०९ ॥
अष्टाश्रं तु भवेत्सिद्धं षोडशाश्रमतः परम् ।
द्विचतुर्भागमध्ये तु बिन्दुरेखादिकल्पितम् ॥ ११० ॥
अष्टाश्रस्थैकभागोर्ध्वं कोणात्तु लाञ्छयेत्ततः ।
षोडशाश्रं भवेत्सिद्धं मश्रच्छेदेन वर्तुलम् ॥ १११ ॥
यत्तु लिङ्गस्य चायामं नाहं तत्सममुच्यते ।
जेष्ठोत्तमं तु लिङ्गस्य रुद्रभागस्य नाहकम् ॥ ११२ ॥
नाहार्दमष्टधा कृत्वा विष्कम्भं भूतभागिकम् ।
ज्योष्ठोत्तमस्य लिङ्गस्य विस्तारं हि विधीयते ॥ ११३ ।
यत्तारं पञ्चभागैकं विभजेद्वसुभागिकम् ।
विस्तारमष्टलिङ्गानामेकैकं तु विहीनकम् ॥ ११४ ॥
त्रिगुणीकृत्य विष्कम्भं भजेत्तारं तु पञ्चधा ।
भागं तेन समायोज्य सर्वेषां नाहमुच्यते ॥ ११५ ॥

समखण्डं वर्धमानं शैवाधिक्यं त्रिराशिकम् ।
लिङ्गं चतुर्विधं प्रोक्तं द्विजातीनामनुक्रमात् ।। ११६ ।।
वर्धमानं शिवाधिक्ये सर्वजात्यर्हके स्मृता ।
चतुःपञ्चषडङ्गं तु पञ्चषट्सप्तभागिकम् ।। ११७ ।।
वर्धमानमितिप्रोक्तं विप्रादीनामनुक्रमात् ।
सप्तसप्ताष्टभागं तु पञ्चपञ्चषडङ्गकम् ।। ११८ ।।
वेदवेदशरांशं तु गुणानलयुगांशकम् ।
एवं शिवाधिकं प्रोक्तं द्विजातीनां क्रमादूहे ।। ११९ ।।
किञ्चिदस्मिन् विशेषोऽस्ति समखण्डस्य तं शृणु ।
लिङ्गस्योत्सेधमानं तु चतुर्भागेन भाजयेत् ।। १२० ।।
आयामार्धं भजेदष्ट विष्कम्भं तु शरांशकम् ।
पक्षतारं भवेद्विष्णुस्तस्मात्तद्द्विगुणो हरः ।। १२१ ।।
अग्रे मूले च मध्ये च प्रमाणं सर्वतस्समम् ।
आयामं न वधा कृत्वा वृत्तं षड्भागमुच्यते ।। १२२ ।।
सप्तभागमथाष्टाश्रं तुर्यश्रं वसुभागिकम् ।
त्रैराशिकामिति ज्ञेयं धनधान्यसुखावहम् ।। १२३ ।।
धारालिङ्गमथो वक्ष्ये श्रूयतां तु प्रजापते ।
पादादूर्ध्वकपर्यन्तं धारालिङ्गं प्रशस्तकम् ।। १२४ ।।
अधो वेदाश्रकं कुर्यात्तदूर्ध्वे त्वष्टधारया ।
एतद्द्विज! महाप्राज्ञ ! सर्वकामप्रसाधनम् ।। १२५ ।।
ऊर्ध्वे षोडशधाराच्च भोगार्थी लभते सुखम् ।
एवं क्रमेण संयुक्तं धारालिङ्गमिति स्मृतम् ।। १२६ ।।
शिरसो वर्तनं कुर्यात् तच्चतुर्विधमुच्यते ।
छत्राकारं तु विप्राणं नृपाणां कुक्कुटाण्डकम् ।। १२७ ।।
वैश्यानां चैव खण्डेन्दु शूद्राणां तृपुषाकृतिः ।
कृत्वा लिङ्गं शिरस्तारं षड्भागेन समम्बुधः ।। १२८ ।।

सार्ध्वे वै न द्विभागेन चित्रितं त्रपुषाकृतिः ।
विस्तारं तु त्रिधा कृत्वा त्रिभागेन तु वर्तितुम् ।। १२९ ।।
अर्धचन्द्र इति प्रोक्तं सर्वकामफलप्रदम् ।
कुक्कुटाण्डं भवेत्तत्र विस्तारार्धेन वर्तनम् ।। १३० ।।
अष्टधा विभजेत्तार मध्यर्धेन तु वर्तिनम् ।
चन्द्रशीर्षकमित्युक्तं सर्ववर्णेषु योग्यकम् ।। १३१ ।।
मानहीने महाव्याधिरधिके शत्रुवर्धनम् ।
देहहीने तु दारिद्र्यं शिरोहीने धनक्षयम् ।। १३२ ।।
मूलहीने विनाशं स्यात् सूत्रहीने कुलक्षयम् ।
तस्मात्सर्वप्रयत्नेन कारयेल्लक्षणान्वितम् ।। १३३ ।।
मुखलिङ्गं ततो वक्ष्ये सर्वकामार्थसाधनम् ।
पूजाभागं समस्तं तु द्विषष्ट्यंशं भजेत्क्रमात् ।। १३४ ।।
त्रयोदशाङ्गुलार्धं तु मुखमेकं प्रकीर्तितम् ।
शराननं चतुर्वक्त्रं त्रिवक्त्रं चैकवक्त्रकम् ।। १३५ ।।
चतुर्दिक्षु चतुर्वक्त्रं त्रिवक्त्रं षृष्ठहीनकम् ।
कुर्वेकवक्त्रं मूर्ध्वेतु मुखमानेन बुद्धिमान् ।। १३६ ।।
मकुटेनोर्ध्ववक्त्रं तु त्रयोदशार्धाङ्गुलेन तु ।
ग्रीवं मूलात् स्तनान्तं स्यादर्धाधिकं त्रयोदश ।। १३७ ।।
स्तनसूत्रविथिर्यावत् कारयेद्द्विभुजान्वितम् ।
प्रतिमालक्षणोक्तेन मार्गेणैव समाचरेत् ।। १३८ ।।
शेषं लिङ्गवदाकारं कारयेल्लक्षणान्वितम् ।
वक्त्रलिङ्गप्रमाणं तु प्रोक्तं पीठमथो शृणु ।। १३९ ।।
स्त्रीशिलां तु परिग्राह्य पीठं कुर्याद्विशेषतः ।
लिङ्गं विस्तारमानेन त्रिगुणं पीठविस्तृतम् ।। १४० ।।
कर्णाद्विद्विगुणमेवं वा त्रिगुणं पीठविस्तृतम् ।
कर्णस्य द्विगुणार्धं वा लिङ्गदैर्घ्यसमं तु वा ।। १४१ ।।

गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तृतम् ।
लिङ्गमानेन हर्म्यं स्याल्लिङ्गमानेन पिण्डिका ।। १४२ ।।
पूर्वाकृतिर्यथा पीठं तथा कुर्यात्पुनः पुनः ।
अन्याकृतिर्न कर्तव्या कृता चेत्कर्तृनाशिनी ।। १४३ ।।
वेदाश्राऽष्टाश्रमानं तु विभजेदष्टधा पुनः ।
गुणभागमधस्त्यक्त्वा बाणांशं पीठकोच्छ्रयम् ।। १४४ ।।
ब्राह्मंयवैष्णवमानं तु षोडशांशेन भाजयेत् ।
सप्तभागमधो मुक्त्वा ग्रहांशं पिण्डिकोच्छ्रयम् ।। १४५ ।।
पीठोत्सेधं तु यन्मानं विकारांशेन भाजयेत् ।
पक्षांशं पट्टिका प्रोक्ता बाणांशं पद्मपिण्डकम् ।। १४६ ।।
अंशद्वयेन वृत्तं स्याद्वेदांशं चोर्ध्वपद्मकम् ।
तस्योर्ध्वे पट्टिका द्वाभ्यामंशेन घृतवारिणी ।। २४७ ।।
पीठतारं त्रिभागैकं नाळनिर्गममुच्यते ।
तत्समं मूलविस्तारं पत्रिभागैकमग्रतः ।। २४८ ।।
उत्तरे जलमार्गं स्यात्सोमस्याभिमुखं भवेत् ।
मध्येखातं त्रिभागैकं क्रमेण कृशका भवेत् ।। २४९ ।।
एवं तु पद्मपीठं स्याद् भद्रपीठमथोच्यते ।
पूर्ववत् षोडशांशेन पीठोत्सेधं भजेत्ततः ।। २५० ।।
व्योमांशं पादुकोत्सेधं वेदांशं जगती भवेत् ।
अन्यांशं वृत्तमित्युक्तं भागैकेन तु पट्टिका ।। २५१ ।।
गुणांशं कर्णमित्युक्तं भागैकेन तु पट्टिका ।
महापट्टिद्वयांशेन घृतवारितथांशकम् ।। २५२ ।।
एवं स्याद्भद्रपीठं तु सर्वलिङ्गेषु योग्यकम् ।
एकविंशतिभागेन पीठोत्सेधं विभाजयेत् ।। २५३ ।।

अंशेन पादुकां कुर्याच्चतुर्धा जगतीं कुरु ।
कर्णमेकेन कर्तव्यं पद्ममेकांशमेव च ।। २५४ ।।
तत्कुम्भं त्रिभिरंशैश्च पद्ममेकांशमेव च ।
कुर्यादेकेन कम्पं तु पक्षांशेनैव कर्णकम् ।। २५५ ।।
कम्पमेकेन कर्तव्यं पद्ममेकेन कारयेत् ।
महापट्टिद्विभागाभ्यां पद्ममेकांशकेन तु ।। २५६ ।।
तस्योर्ध्वे पट्टिकैकेन घृतवारि तथांशकम् ।
विजयंनाम पीठं तु सर्वशान्तिकरं परम् ।। २५७ ।।
विभजेत्पिण्डिकोत्सेधम् अष्टादशविभागतः ।
एकेन पादुकां कुर्यादध्यर्धं कम्पपद्मयोः ।। २५८ ।।
जगती चतुरंशं स्याद्गुणांशेनैव वप्रकम् ।
तदूर्ध्वे कम्पमेकांशं द्वाभ्यां वै पट्टिका भवेत् ।। २५९ ।।
पद्ममेकेन कर्तव्यमर्धेन घृतवारिणी ।
स्वायम्भवमिति प्रोक्तं सर्वदेवेषु योग्यकम् ।। २६० ।।
विकारांशेन विभजेद्भागेनोपानमुच्यते ।
पद्मतुण्डी द्विभागेन कम्पमेकेन कारयेत् ।। २६१ ।।
सप्तांशं कर्णमित्युक्तं द्वाभ्यां वै कम्पपद्मकम् ।
अध्यर्धेन महापट्टी पद्ममर्धेन कारयेत् ।। २६२ ।।
कम्पमर्धेन कर्तव्यमर्धेन घृतवारिणी ।
स्थण्डिलं(स्यादिदं) द्विविधं पीठं सर्वदेवेषु पूजितम् ।। २६३ ।।
भागार्धं तत्त्रिपादं वा समं वा शेषनिर्गमम् ।
मूलादष्टांशमग्रे तु हीनं स्यात्पद्मपीठके ।। २६४ ।।
सर्वेषामेव पीठानाम् उपानात्पीठविस्तरम् ।
पीठिकालक्षणं प्रोक्तं पादशैलविधिं शृणु ।। २६५ ।।

नपुंसकशिलां ग्रागृह्य पादाधारं च कल्पयेत् ।
ज्येष्ठं मध्यमकानिष्ठं त्रिविधं पादशैलकम् ।। २६६ ।।
लिङ्गायामसमं शैलमुत्तमं परिकीर्तितम् ।
यस्य लिङ्गस्य विस्तारं द्विगुणं पादशैलकम् ।। २६७ ।।
मध्यमं त्विति विज्ञेयम् अर्धार्धं कन्यसं भवेत् ।
समं वै चतुरश्रं तु तदर्धं बहुलं भवेत् ।। २६८ ।।
प्रासादमध्यसूत्रात्तु किञ्चिद्वामेऽधियोजयेत् ।
मध्यमे त्ववटं कुर्याल्लिङ्गविस्तारमानतः ।। २६९ ।।
अथवा श्वभ्रविस्तारं गर्भक्ष्मार्धार्धमुच्यते ।
ब्रह्मभागप्रवेशं हि ज्ञात्वा ब्राह्मशिलोच्छ्रयम् ।। २७० ।।
श्वभ्रावकाशं सन्त्यज्य ब्रह्मभागान्तमेव च ।
नन्द्यावर्तशिलां योज्य चत्वारि युगदिक्षु च ।। २७१ ।।
पूर्वपश्चिममायामं तथा वै दक्षिणोत्तरम् ।
पश्चात्पश्चिमपूर्वं तु तत्पश्चाद्दक्षिणोत्तरम् ।। २७२ ।।
लिङ्गस्याध्यर्धतारेण दैर्घ्यं तस्यार्धविस्तृतम् ।
तदूर्ध्वे पिण्डिकां योज्य बन्धयेदष्टबन्धनैः ।। २७३ ।।
पादाधारपदे मध्ये स्थापयेल्लिङ्गमुत्तमम् ।
ताश्चतां पुंशिलांसक्तां शैलचूर्णोऽपि बन्धयेत् ।। २७४ ।।
प्रदक्षिणक्रमेणैव योजयेत्तु विशेषतः ।
शैललिङ्गमिति..प्रोक्तं; रत्नलिङ्गविधिं..शृणु ।। २७५ ।।
द्विविधं तत्समाख्यातं चलं चैवाचलं तथा ।
स्थिरं प्रासादलिङ्गं तु चलं सर्वत्र पूज्यते ।। २७६ ।।
मरकतं पुष्टिदं ज्ञेयं, पद्मरागं धनार्थकम् ।
आयुष्यवृद्धिवैडूर्यं, स्फटिकं पुत्रवर्धनम् ।। २७७ ।।

स्तम्भनं पुष्यरागस्स्याद् दुष्टवश्यं प्रवाळकम् ।
अकर्षणं विद्रुमाख्यं, माणिक्यं सर्वसिद्धिदम् ।। २७८ ।।
इन्द्रनीलं तु मोक्षार्थं, रत्नजानां फलं भवेत् ।
अङ्गुल्यादि वितस्त्यन्तं कुर्याल्लिङ्गं तु रत्नजम् ।। २७९ ।।
आयामसदृशं नाहं शिरोवर्तनसंयुतम् ।
स्वप्रमाणेन क़र्तव्या रत्नलिङ्गस्य पिण्डिका ।। २८० ।।
पिण्डिका स्वस्वयोनिस्स्यात् तदभावे हिरण्मयम् ।
रजतं ताम्रकं चैव अधमं चेति कीर्तितम् ।। २८१ ।।
चतुरश्राऽथ वृत्ता वा चललिङ्गस्य पिण्डिका ।
आयामद्विगुणार्धं वा द्विगुणं त्रिगुणं तु वा ।। २८२ ।।
विस्तारं तत्समं ज्ञेयं शेषं पूर्वोक्तवत्कुरु ।
लिङ्गायासं त्रिभागैतं पीठमध्ये निवेशयेत् ।। २८३ ।।
सर्वत्र वृत्तकं लिङ्गं त्रिभागं सूत्रवर्जितम् ।
रत्नलिङ्गं समाख्यातं लोहजं लिङ्गमुच्यते ।। २८४ ।।
सौवर्णेन कृतं लिङ्गं भुक्तिमुक्तिफलप्रदम् ।
ताम्रजं पुत्रदं प्रोक्तं राजतं श्रीकरं भवेत् ।। २८५ ।।
सुखदं कांस्यमित्युक्तं पैत्तळं रोगनाशनम् ।
आयसं पुत्रनाशं तु, त्रिलोहं मारणं सं(कं)भवेत् ।। २८६ ।।
तथा च त्रपुसीसं तु, कल्पयेत्कल्पवित्तमः ।
रत्नजस्योक्तमार्गेण सर्वकर्म समाचरेत् ।। २८९ ।।
पञ्चवार्षिककां कन्यामलङ्कृत्य विशेषतः ।
तया संस्पर्शितं लिङ्गं तन्मुखं चेति कीर्तितम् ।। २९० ।।
लोहलिङ्गमिति प्रोक्तं पार्थिवं लिङ्गमुच्यते ।
अपक्कं चैव पक्कं च पार्थिवं लिङ्गमुच्यते ।। २९१ ।।

पार्थिवस्य तु लिङ्गस्य शैलवन्मानमिष्यते ।
यावदुत्सेधमानं तु तावद्वृत्तमिहोच्यते ।। २९२ ।।
तालनिम्नगमेकांशं एकांशं पीठबन्धनम् ।
त्रिसूत्रेण विना कुर्याच्चतुरष्टाऽश्रवर्जितम् ।। २९३ ।।
पर्वताग्रे नदीतीरे पुण्यक्षेत्रे मनोरमे ।
लिङ्गार्थं मृत्तिका ग्राह्या प्रशस्ता सर्वकामदा ।। २९४ ।।
श्वेतरक्ता तथा पीता कृष्णा चैव मनोरमा ।
श्लक्ष्णं चूर्णं ततः कृत्वा पञ्चगव्येन मर्दयेत् ।। २९५ ।।
कपिलं तु घृतं क्षीरं दधि वा तैलमेव च ।
यवगोधूमजं चूर्णं माषचूर्णं तथा समम् ।। २९६ ।।
आहृत्य सर्वचूर्णानि मृत्तिकासहितानि च ।
मर्दयेत्तु विशेषेण श्यामलाक्षां च कुरुन्दुरम् ।। २९७ ।।
श्रीवेष्टं गुग्गुलुं चैव सर्जगन्धरसं तथा ।
बिल्वोद्भवं रसं ग्राह्यमेकीकृत्य विमर्दयेत् ।। २९८ ।।
पञ्चनिर्यासनं युक्तं मासपक्षोषितं तथा ।
ततो लिङ्गं प्रकुर्वीत श्रेष्ठमध्यमकन्यसम् ।। २९९ ।।
पार्थिवं लिङ्गमाख्यातं पिण्डिकां तस्य मृण्मयीम्।
लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तरम् ।। ३०० ।।
पूजयेत्तु प्रयत्नेन धर्मकामार्थमोक्षदम् ।
शान्तिपुष्टिकरं नित्यं पृथिवीराज्यसिद्धिदम् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।। ३०१ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे लिङ्गलक्षणविधिपटलो नवमः समाप्तः

अथ मूर्ध्नीष्टकाविधिपटलप्रारम्भः

अथातस्सम्प्रवक्ष्यामि मूर्ध्नि शैलेष्टकाक्रमम् ।
यत्काले यत्समाप्तं तु विमानं लक्षणान्वितम् ॥ १ ॥
महानस्यान्तकं वापि शक्तिध्वजसमं तु तत् ।
मूर्ध्नीष्टकानां तत्काले विन्यसेद्विधिपूर्वकम् ॥ २ ॥
नपुंसकोपलेनैव कारयेल्लक्षणान्वितम् ।
विकाराङ्गुलमायामं तस्यार्थं च हलाश्शुभाः ॥ ३ ॥
तस्यार्धं नीव्रसंयुक्तं चतस्रस्वैकभूमिका ।
द्विभूमेरङ्गुलं वृद्ध्या रविभूम्यन्तकं क्रमात् ॥ ४ ॥
उपलं शैलके योज्यमिष्टका थाममिष्टिका ।
आदित्याङ्गुलमायामषडङ्गुलसुविस्तृता ॥ ५ ॥
नीव्रं युगाङ्गुलेनैव शेषं पूर्ववदाचरेत् ।
एवं मूर्ध्न्येष्टकां कुर्यात् स्तूपिदण्डं तु कारयेत् ॥ ६ ॥
असनं खादिरं वापि मधुकं पद्मतुण्डकम् ।
तिलकं त्रीणि सारं च चन्दनं चम्पकं तथा ॥ ७ ॥
एतैर्वृक्षैः प्रकर्तव्यं स्तूपिदण्डं विशेषतः ।
पादायामसमं दीर्घं पादविष्कम्भविस्तृतम् ॥ ८ ॥
स्तम्भायामं त्रिधा कृत्वा मूलांशं चतुरश्रकम् ।
तस्योर्ध्वे वृत्तकं कुर्याद्द्विभागेन विशेषतः ॥ ९ ॥
अगमङ्गुलविस्तारमानुपूर्वात्कृशं तथा ।
शिखीपादं ततः कुर्याद्विस्तारं त्रिगुणायतम् ॥ १० ॥
विस्तारसमविस्तारं योजयेतद्द्वयं समम् ।
दण्डमूले शिखीपादं सुस्निग्धं सुदृढं कुरु ॥ ११ ॥
ताम्रेण सायसेनाथ वेष्ट्यदण्डाग्रमूलका ।
पूर्वे वा चोत्तरे वापि मण्टपं चाष्टहस्तकम् ॥ १२ ॥
विकाराङ्घ्रिसमायुक्तं युगद्वारसमायुतम् ।
मण्टपं तत्त्रिभागैकं मध्यमे वेदिकां कुरु ॥ १३ ॥
तालमात्रं तलोत्सेधं दर्पणोदरसन्निभम् ।
दर्भमालासमायुक्तं वितानध्वजसंयुतम् ॥ १४ ॥

मुक्तादाम्ना स्वलङ्कृत्य तरङ्गेणैव वेष्टयेत् ।
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः ।। १५ ।।
वेदिकायाश्च तन्मध्ये चाष्टद्रोणैश्च शालिभिः ।
तदर्धैस्तण्डुलैश्चैव तदर्धैश्च तिलैरपि ।। १६ ।।
स्थण्डिलं कारयेद्धीमान् तन्मध्ये नळिनं लिखेत् ।
लाजपुष्पकुशांश्चैव विकिरेत्तु विशेषतः ।। १७ ।।
प्रोक्षयेत्पञ्चगव्येन शिलाचेष्टकयापि वा ।
प्रोक्षयेद्धृदये चैव शुद्धतोयेन देशिकः ।। १८ ।।
गैरिकेन लिखेद्धीमानक्षराणि विशेषतः ।
शकारं पूर्वभागे तु षकारं दक्षिणे लिखेत् ।। २० ।।
सकारं पश्चिमे लिख्य हकारं चोत्तरे लिखेत् ।
बिन्दुनादसमायुक्तमादौ प्रणवसंयुतम् ।। २१ ।।
सौवर्णमौर्णसूत्रं वा अथ कार्पासतन्तु वा ।
कौतुकं बद्धयेद्धीमान् प्रत्येकं वस्त्रवेष्टितम् ।। २२ ।।
गन्धपुष्पादिभिः पूज्य स्वस्वबीजेन देशिकः ।
वेदिकोपरि संस्थाप्य ऐन्द्रादिं सौम्यकान्तकम् ।। २३ ।।
नैवेद्यं दापयेत्तासां ताम्बूलं च निवेदयेत् ।
स्नापयेत्पञ्चगव्येन स्थाप्य दण्डं विशेषतः ।। २४ ।।
शिवाम्भसा तु संस्नाप्य यजेदीशानमन्त्रतः ।
कौतुकं बन्धयित्वा तु वस्त्रेणैव तु वेष्टयेत् ।। २५ ।।
स्थण्डिलस्योत्तरे देशे स्तूपे दण्डं तु विन्यसेत् ।
तन्तुना चित्रितान् कुम्भान् गन्धतोयेन पूरितान् ।। २६ ।।
सकूर्चान् सापिधानांश्च सवस्त्रान् हेमसंयुतान् ।
लोकपालाधिपान् स्थाप्य चाष्टौ वै वेदिकोपरि ।। २७ ।।
गन्धपुष्पादिभिः पूज्य पूर्वादिक्रमयोगतः ।
वालुकाभिश्चतुर्दिक्षु कुर्यात् स्थण्डिलमुत्तमम् ।। २८ ।।
अग्न्याधानादिकं सर्वम् अग्निकार्योक्तमाचरेत् ।
सद्येन समिधा हुत्वा आज्यमूलेन होमयेत् ।। २९ ।।

अघोरेण चरुं हुत्वा लाजं वै हृदयेन तु ।
तिलं हुत्वा तु शिखया सर्षपं कवचेन तु ॥ ३० ॥
बीजमुख्येन माषं तु प्रत्येकं पञ्चविंशतिः ।
होमं कृत्वा विशेषेण द्रव्यान्ते व्याहृतिं हुनेत् ॥ ३१ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ॥ ३२ ॥
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः ।
नववस्त्रो धृतोष्णीषः शुक्लमाल्यैर्विभूषितः ॥ ३३ ॥
हेमाङ्गुलीयकटकैः कुण्डलाद्यैरलङ्कृतम् ।
मुहूर्ते समनुप्राप्ते स्थापनं तु समारभेत् ॥ ३४ ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गलीयकैः ।
सर्वाऽऽतोद्य समायुक्तं स्वस्तिमङ्गळवाचकैः ॥ ३५ ॥
ब्रह्मघोषैस्समायुक्तं सर्वालङ्कारसंयुतम् ।
अनन्यमानसो भूत्वा स्थापयेत् स्थपतिस्सह ॥ ३६ ॥
सर्वाश्च बन्धयेत्तासामग्रं प्रतिदिशि स्थितः ।
न्यस्त्वा पूर्वादिषूर्ध्वे तु प्रागग्रविधिना क्रमात् ॥ ३७ ॥
तन्मध्ये विन्यसेद्रत्नमिन्द्रनीलमथेन्द्रके ।
मरकतं याम्यदेशे तु स्फटिकं वारुणे तथा ॥ ३८ ॥
वज्रं सौम्ये तु विन्यस्य पद्मरागं तु पावके ।
वैडूर्यं नैर्ऋते देशे मुक्तां वायुप्रगोचरे ॥ ३९ ॥
प्रवाळमैशे विन्यस्य माणिक्यं मध्यमे न्यसेत् ।
ईशानेन तु मन्त्रेण स्तूपीदण्डं ततोपरि ॥ ४० ॥
तन्मूले प्रोक्षयेन्मन्त्री कुम्भोदेन विशेषतः ।
पूजयेद्गन्धपुष्पाद्यैस्सुस्निग्दं बन्धयेत्ततः ॥ ४१ ॥
स्तूपीदण्डं त्रिभागैकं द्विभागेन तु बन्धयेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे मूर्ध्नीष्टकाविधिपटलो दशमः समाप्तः

अथ प्रतिमालक्षणविधिपटलप्रारम्भः

अतः परं प्रवक्ष्यामि प्रतिमालक्षणं शृणु ।
त्रिविधं व्यक्तमव्यक्तं व्यक्ताव्यक्तं तथैव च ।। १ ।।
व्यक्तं तु सकलाकारम् अव्यक्तं लिङ्गमुच्यते ।
मुखलिङ्गमिति प्रोक्तं व्यक्ताव्यक्तं प्रजायते ।। २ ।।
अधुना प्रोच्यते सर्वं सकलानां तु लक्षणम् ।
चलं चलाचलं चैव अचलं च त्रिधा भजेत् ।। ३ ।।
चलं धातुमयं ज्ञेयं शैलं चलाचलं स्मृतम् ।
अचलं मृन्मयं ज्ञेयं भित्तिचित्रपटं तथा ।। ४ ।।
चित्रहीनं चलं शैलमचलं चित्रयुक् सदा ।
गर्भद्वारे च हस्ते च हर्म्ये स्तम्भे च लिङ्गके ।। ५ ।।
अङ्गुले चैव तुङ्गानि जेनयेत्तु विशेषतः ।
गर्भमानवशान्मानं द्विविधेन प्रकीर्तितम् ।। ६ ।।
गर्भगेहं त्रिधा भज्य एकैकं तु त्रिधा भजेत् ।
उत्तमत्रयमग्रे तु मध्यमे मध्यमत्रयम् ।। ७ ।।
अधमं त्रयमधस्तादेवं मानमुदीरितम् ।
अथवाऽन्यप्रकारेण गर्भमानं वदाम्यहम् ।। ८ ।।
गर्भाद्विंशतिभागेन दशहस्तं तु कन्यसम् ।
रुद्रांशं मध्यमं ज्ञेयं रव्यं(थ्यं)शं चोत्तमं भवेत् ।। ९ ।।
द्वारस्य(द्वारोस्त्ये) सममानं तु उत्तमं तत्प्रकीर्तितम् ।
ग्रहभागैकहीनं तु मध्यमं प्रतिमोच्छ्रयम् ।। १० ।।
अष्टभागैकहीनं स्यादधमं प्रतिमादयः ।
त्र्यहस्तमधमं ज्ञेयं पञ्चहस्तं तु मध्यमम् ।। ११ ।।
उत्तमं नवहस्तं तु हस्तमानमुदीरितम् ।
एकादिनवहस्तान्तमधमाद्युत्तमान्तकम् ।। १२ ।।
वरदामानमित्युक्तं हस्तमानं विशेषतः ।
त्रयोदशकरादूर्ध्वमेकत्र्यंशकरान्तकम् ।। १३ ।।
हस्तमानेन कर्त्यवं क्षुद्रहर्म्ये न कारयेत् ।
आदिप्रासादविस्तारं यद्ग्राह्यं सूत्रनिश्चितम् ।। १४ ।।

तदर्धमुत्तमोत्सेधं तस्मादर्धन्तु मध्यमम् ।
तदर्धमधमं ज्ञेयं प्रतिमं हर्म्यमानतः ।। १५ ।।
प्राचीरुत्तरसीमान्तं स्तम्भमानमथोत्तमम् ।
रन्ध्रभागैकहीनं यत् मध्यमं समुदाहृतम् ।। १६ ।।
अष्टांशहीनमधमं स्तम्भमानं प्रकीर्तितम् ।
पूजाभागसमं मानं कन्यसं प्रतिमोदयम् ।। १७ ।।
द्विगुणं मध्यमं ज्ञेयं नाहमानमधोत्तमम् ।
लिङ्गमानं कनिष्ठं तु द्विगुणं मध्यमं भवेत् ।। १८ ।।
द्विगुणं मध्यमं प्रोक्तं लिङ्गनाहवशात्कुरु ।
तिथ्यङ्गुलं कनिष्ठं तु पञ्चविंशति मध्यमम् ।। १९ ।।
पञ्चत्रिंशतिमात्रं तु उत्तमं चेति कीर्तितम् ।
लब्धमानेन जात्यंशं योजयेत्तु विचक्षणः ।। २० ।।
चतुराशीति षष्टी च चतुर्विंशच्च षोडशः ।
भजैकांशं समायोज्य गणयेद्वसुभिः क्रमात् ।। २१ ।।
सप्तविंशतिभिर्भक्तैः शिष्टं श्वेतादिभिर्भजेत् ।
तेनैवांशेन संयुक्तमानं जात्याहकं भवेत् ।। २२ ।।
आयव्ययर्क्षवाराष्टा योन्यंशकानि लक्षयेत् ।
शतात्त्रिंशदंशादि बेरमानं भजेत्क्रमात् ।। २३ ।।
व्योमांशं तु समायोज्य यावत्तत्सुशुभोदयम् ।
वसुभिर्गणिते त्वेकं हृदि त्वायं विनिर्दिशेत् ।। २४ ।।
रसैस्तु गुणिते दिग्भिर्भाजिते व्ययमादिशेत् ।
वसुभिर्गुणिते सप्तविंशद्भक्ते तु सम्भवेत् ।। २५ ।।
शिष्टमाश्वयुगाद्यं तु नक्षत्रं गणयेत्क्रमात् ।
रन्ध्रैस्सगुणिते सप्त हृतेस्सूत्रादिवाकरः ।। २६ ।।
गुणैस्सङ्गुण्यवसुभिर्भूतयोनिरुदाहृतः ।
शिष्टं तु गणयेन्मन्त्री अष्टयोनिध्वजादिकम् ।। २७ ।।
वेदैर्गुणहते रन्ध्रैस्तस्कराद्यंशकं क्रमात् ।
आयाधिक्ये धनादिस्यात्, व्ययाधिक्ये धनक्षयम् ।। २८ ।।

आयाधिक्यं व्ययं हीनं तन्मानं शुभदं स्मृतम् ।
गुणयेत्तु द्विभाक्कर्ता नृपवास्तु दिनान्तकम् ।। २९ ।।
शुभानि नन्मसम्पत्ति क्षेमं साधकमैत्तकै ।
तथा परममैत्रं च वर्जितान्यन्यभानि वै ।। ३० ।।
वारेषु सितसोमज्ञगुरवश्शुभदा स्मृताः ।
अशुभा रविसौरारा: शुभयोगे शुभप्रदाः ।। ३१ ।।
योनिषु ध्वजसिंहाख्यो वृषो हस्ती शुभा स्मृता ।
धूमश्च खरकाकांश्च वर्जयेत्तु प्रयत्नतः ।। ३२ ।।
ध्वजश्चेदर्थसिद्धिः स्याद्धूमश्चेदग्निना भयम् ।
सिंहोऽपि विजयः प्रोक्तः कुकुरः कलहो भवेत् ।। ३३ ।।
वृषभं पुत्रवृद्धिस्स्यात् स्थानभ्रंशं तु गर्दभः ।
गजस्तु राष्ट्रवृद्धिस्स्यात्काको दुर्भिक्षसम्भवः ।। ३४ ।।
अंशकेषु च भुक्तिश्च शक्तिश्चैव विशेषतः ।
तथा विज्ञावनीनाथो निहितस्तु समृद्धिकम् ।। ३५ ।।
शुभान्येतानि चान्यानि वर्जयेत्तु प्रयत्नतः ।
तस्करो नाशनं भुक्ति भोगदं शक्तिरिष्टदम् ।। ३६ ।।
जयं वित्तावनीनाथो रोगवृद्धिः नपुंसकम् ।
निर्भीतः श्रीपदं ज्ञेयं दरिद्रो धननाशनम् ।। ३७ ।।
समृद्धिस्सर्वसिद्धिस्यात्पापं राष्ट्रविनाशनम् ।
एवं परीक्ष्य बहुधा कारयेल्लक्षणान्वितम् ।। ३८ ।।
आयांशं चैव जात्यंशं तेन मानेन योजयेत् ।
भक्त्था मानाङ्गुलेनाथ षट् शुभानि परीक्षयेत् ।। ३९ ।।
ज्ञात्वा युक्ताङ्गुलोच्छेदं वृध्या हान्या प्रयोगवित् ।
आयादिसम्पदर्थं तु गृह्णीयात्तु विचक्षणः ।। ४० ।।
लोहजत्वे मधूच्छिष्ठमग्निनादूरीकृतं तु यत् ।
वस्त्रेण शोधयेत्सर्वं दोषं त्यक्त्वा तु शिल्पिना ।। ४१ ।।
सर्वालङ्कारसंयुक्तं मण्टपे लक्षणान्विते ।
स्थण्डिलं कारयेत्तत्र अष्टद्रोणैश्च शालिभिः ।। ४२ ।।

तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् ।
कुशैः पुष्पैः परिस्तीर्य तस्योर्ध्वे फलकोपरि ॥ ४३ ॥
मुहूर्ते समनुप्राप्ते ग्रहीता याममात्रतः ।
सिद्धेन प्रतिमाऽऽकारं शिल्पिनाऽऽकारयेद्बुधः ॥ ४४ ॥
तस्य दक्षिणभागे तु शान्तिमन्त्रं जपेद्गुरुः ।
बिम्बं सम्पूजयेत् पश्चाद्गन्धपुष्पादिभिर्हृदा ॥ ४५ ॥
आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गळीयकैः ।
शिल्पिनं पूजयेत्पश्चाद्धेमाङ्गुलीयवस्त्रकैः ॥ ४६ ॥
बेरायामं परिग्राह्य तालं सङ्ख्याक्रमाद्व्रजेत् ।
दशतालं नवतालं वसुतालर्षितालकैः ॥ ४७ ॥
रसतालेषु सहिता युगतालं त्रितालकम् ।
एवं तालक्रमं प्रोक्तमेकैकं त्रित्रिभेदकम् ॥ ४८ ॥
उत्तमं मध्यमं चेति कन्यसं तालकं प्रति ।
दशतालोत्तमं वृद्धि चतुर्विंशच्छताधिकम् ॥ ४९ ॥
एतस्य मध्यभेदश्च त्रितालस्यार्धमात्रकम् ।
त्रयोविंशतिविख्याता भेदं प्रति युगाङ्गुलम् ॥ ५० ॥
क्रमाद्धीनं प्रकर्तव्यमेवं तालक्रमं भवेत् ।
कोष्ठेन दशतालेन ब्रह्मविष्णुमहेश्वरान् ॥ ५१ ॥
उमां सरस्वतीं दुर्गां सप्तमातॄ उषां महीम् ।
ज्येष्ठां लक्ष्मीं च कर्तव्यं दशतालस्य मध्यतः ॥ ५२ ॥
ऋषीणां चाश्विनी चैव आदित्येन्दुगुरुस्तथा ।
आर्यं शतमखं चैव चण्डीशं क्षेत्रपालकम् ॥ ५३ ॥
दशतालकनिष्ठेन कारयेत्तु विचक्षणः ।
विद्येशान् लोकपालांश्च अष्टमूर्तीन् वसूंस्तथा ॥ ५४ ॥
नवतालोत्तमेनैव कारयेल्लक्षणान्वितम् ।
अन्याश्च सर्वदेवांश्च नवतालोत्तमेन तु ॥ ५५ ॥
यक्षानप्सरसश्चैव अस्त्रमूर्तीर्मरुद्गणान् ।
नवतालस्य मध्येन विद्याधरांस्तथा कुरु ॥ ५६ ॥

राक्षसान्या तु धानांश्च गन्धर्वान् सिद्दचारणान् ।
असुरांश्च पितॄंश्चैव नवतालाधमेन तु ।। ५७ ।।
अष्टतालेन मर्त्यांश्च पिशाचान्सताप्तलतः ।
कुब्जकान् रसतालेन पिशाचान्सप्ततालतः ।। ५८ ।।
विघ्नेशं कारयेत्तस्य मध्यमेनाऽधमेन च ।
भूतरूपाणि कर्तव्यं युगतालेन बालकान् ।। ५९ ।।
किन्नरान् किम्पुरुषांश्चैव त्रितालेनैव कारयेत् ।
यल्लब्धोत्सेधमासं तु चतुर्विंशच्छतं कुरु ।। ६० ।।
अङ्गुलं तेषु भागेकं वस्वं शैकं ततो यवम् ।
तस्याष्सैकांशकं यूकम् इकैकन्तं नवांशकान् ।। ६१ ।।
लक्षायास्वष्टभागैकं तद्रोमाग्रमिति स्मृतम् ।
अङ्गुलं मात्रमित्युक्तं द्व्यङ्गुलं कोलकं भवेत् ।। ६२ ।।
त्रिमात्रं तु कालाज्ञेया भागं स्याच्चतुरङ्गुलम् ।
तद्द्वयं यवकं चैव रव्यङ्गुलमुखं भवेत् ।। ६३ ।।
मुखतालं मुखं चैव पर्यायिवचनानि च ।
मानं चैव प्रमाणं च उन्मानं ह्युपमानकम् ।। ६४ ।।
परिमाणं लम्बमानं षड्विधं मानमिष्यते ।
मानं यत्प्रतिमायामं तिर्यङ्गानं प्रमाणकम् ।। ६५ ।।
इक्मानं तत्प्रदेशाच्च द्व्यन्तरं ह्युपमानकम् ।
परिमाणं नाहमानं लम्बमानं च सूत्रकम् ।। ६६ ।।
मानहीने महाव्याधिरधिके शत्रुवर्धनम् ।
नाहंहीने विनाशं स्यात् तद्वद्धिस्यात् क्षयङ्करम् ।। ६७ ।।
प्रमाणहीने दारिद्र्यमधिके दारनाशनम् ।
लम्बमानविहीने तु राजा राष्ट्रस्य दोषकृत् ।। ६८ ।।
उपमानाधिके हीने शिल्पिनं हन्ति देशिकम् ।
सर्वलक्षणयुक्तं चेत्सर्वसिद्धिप्रदायकम् ।। ६९ ।।
चतुर्विंशच्च तन्मात्रं मूर्धाद्यङ्घितलान्तकम् ।
उष्णीषमङ्गुलं प्रोक्तं केशान्तं तु कला भवेत् ।। ७० ।।

सार्धत्रयोदशमात्रं मुखमानं विधीयते ।
केशान्तादक्षिसूत्रान्तं भागं चतुर्यवाधिकम् ॥ ७१ ॥
अक्षिसूत्रात्पुटान्तं तु तत्समं चैव कारयेत् ।
पुटान्ताद्धनुपर्यन्तं भागं चतुर्यवाधिकम् ॥ ७२ ॥
गळमर्धाङ्गुलं चैव कर्णं भागसमुच्छ्रयम् ।
हिक्कादिहृदयान्तं च सार्धत्रयोदशाङ्गलम् ॥ ७३ ॥
हृदादिनाभिपर्यन्तं तत्समं चेति कीर्तितम् ।
नाभ्यादिमेढ्रमूलान्तं त्रयोदशाङ्गुलं भवेत्॥ ७४ ॥
मेढ्रमूलात्तु जान्वन्तं सप्तविंशतिमात्रकम् ।
द्विकोलकं तु जानुस्स्यात् जङ्घाचाप्यूरुतत्समम् ॥ ७५ ॥
तलोत्सेधं तु भागं स्यात् कायमानमिति स्मृतम् ।
उष्णीषात्पूर्वकेशान्तं नवमात्रमिति स्मृतम् ॥ ७६ ॥
उष्णीषात्पृष्ठकेशान्तं सार्धत्रयोदशाङ्गुलम् ।
उष्णीषात्पार्श्वकेशान्तं द्वादशाङ्गुलमुच्यते ॥ ७७ ॥
द्वयोः कर्णान्तरं पूर्वे एकविंशतिमात्रकम् ।
कोलकं कर्णविस्तारमायामं यवकं भवेत् ॥ ७८ ॥
भ्रूसूत्रस्य समं चैव श्रोत्रोर्ध्वं परिकीर्तितम् ।
तत्पृष्ठकर्णयोर्मध्ये त्रयोदशाङ्गुलं भवेत् ॥ ७९
पिप्पल्यन्तादधः कुर्याद्भागं नाळावलम्बितम् ।
नाळात्तनोर्ध्वमात्रं च तद्घनं त्रियवं भवेत् ॥ ८० ॥
पिप्पली चार्धमात्रं च सुषिरं तस्य मानकम् ।
यस्य कुण्डलसंयुक्तं शेषं मात्रावलम्बितम् ॥ ८१ ॥
कर्णिकाकारवत्कर्णं नाळात्तु त्रिविशेषतः ।
द्वियवं कर्णपाली च तत्समं कर्णपट्टिका ॥ ८२ ॥
मात्रार्धा कर्णपाली स्यादङ्गुळं कर्णताळकम् ।
लकारावर्तयोर्मध्ये पञ्चली कर्णचूळिका ॥ ८३ ॥
आपादात्कर्णमूलान्तं सप्तमात्रेण कल्पयेत् ।
द्विमात्रद्वियवाधिक्यं नेत्रयामं विधीयते ॥ ८४ ॥

षड्यवं नेत्रविस्तारमायामं तु त्रिधा चरेत् ।
कृष्णमण्डलमेकं तन्मध्यमे सितमण्डलम् ॥ ८५ ॥
कृष्णमण्डलमध्ये तु दृष्टिर्यूकप्रमाणतः ।
करवीरो यवं रक्तं न यनत्रयमूलके ॥ ८६ ॥
कनीयका यवा दीर्घा त्रिवर्णैर्लोचनं युतम् ।
ऊर्ध्वं वर्मस्य मानं तु यवं चार्धमधो भवेत् ॥ ८७ ॥
नवतिः पक्ष(क्ष्म)रोमस्यात्कृष्णाञ्जनसमप्रभम् ।
भ्रूरेखा चक्षुरेखा च कोलद्वयवाधिकम् ॥ ८८ ॥
भ्रूरेखामूर्ध्वकेशान्तं तत्समं चेति कीर्तितम् ।
भ्रूदीर्घं रसमात्रं तु विस्तारं यवमेव च ॥ ८९ ॥
आरूढचापाकृतिवत् मालाग्रं तु क्रमात्कृशम् ।
द्व्यङ्गुलं त्रियवं प्रोक्तं द्वयोर्नेत्रान्तरं स्मृतम् ॥ ९० ॥
मूलनासार्धमात्रं च आर्धनासा यवाङ्गुलम् ।
पुटमर्धाङ्गुलं तारं तत्तुङ्ग पञ्चभिर्यवैः ॥ ९१ ॥
सुषिरं त्रियवं तिर्यग् बाह्ये चार्धयवं घनम् ।
पुटान्तात्त्रियवं चैव गोजिमानं चतुर्यवम् ॥ ९२ ॥
गोज्याश्चनासिकोत्सेधं कोलकं च यवाधिकम् ।
वंशस्यैव च विस्तारमङ्गुलं चेति कीर्तितम् ॥ ९३ ॥
पुष्करं तु यवोत्सेधं पुरस्तात् षड्यवं ततः ।
द्वियवं चार्धमेकं तु पुष्करस्य विधीयते ॥ ९४ ॥
तिलपुष्पसमाकारं नासाग्रस्य पुटद्वयोः ।
पुटान्तादधरोष्ठान्तं कोलकं द्वियवाधिकम् ॥ ९५ ॥
दशनो दृश्यादृश्यं हि द्वात्रिंशत्परिकीर्तितम् ।
द्वियवं दन्तविस्तारम् उत्सेधं तत्समं भवेत् ॥ ९६ ॥
दंष्ट्रायामं यवाधिक्यं सदंशमुकुळाकृतिम् ।
ऊर्ध्वे षोडशदन्तं स्यादधस्तादपि तावत् ॥ ९७ ॥
अधो दशनविस्तारं यवार्धं तारमुछ्र्यम् ।
जिह्वायामं तु षण्मात्रं विस्तारं स्यात्तदर्धकम् ॥ ९८ ॥

अधरोष्ठस्य विस्तारमङ्गुळं स्याद्यवाधिकम् ।
मुनीयवं रक्ततारमायामं स्याद्द्विमातृकम् ।। ९९ ।।
भागं च त्रियवाधिक्यमास्यतारमिति स्मृतम् ।
त्रिवक्त्रं चोत्तरापालीयवार्धं चोत्तमं मतम् ।। १०० ।।
उत्तरोष्ठस्य विस्तारं त्रियवं परिकीर्तितम् ।
अनु स्याद्द्व्यङ्गुलायामं तदूर्ध्वे तु यवं शुभम् ।। १०१ ।।
सप्तायवोच्चमधरं त्रिमात्रं हनुवर्धनम् ।
त्रियवं चोन्नतं विद्धि चातालार्धं चाम्बुनिर्गमम् ।। १०२ ।।
नासाग्रात्कर्णपाल्यं च त्रयोदशाङ्गुलं भवेत् ।
गळप्रदेशविस्तारं कोलकं चेति कीर्तितम् ।। १०३ ।।
ग्रीवाग्रस्य तु विस्तारं सार्धयावकमुच्यते ।
ग्रीवामूलस्य विस्तारं नवमात्रं च षड्यवम् ।। १०४ ।।
ग्रीवात्तु गळपर्यन्तं कला च द्वियवाधिकम् ।
तत्कळाद्धनुपर्यन्तमङ्गुळं चेति कीर्तितम् ।। १०५ ।।
ग्रीवा सुवृत्तमित्युक्तं द्विरेखापरिवेष्टितम् ।
हिक्कासूत्रात्क्रमेणोच्चं भागं कोलव(त)मङ्गुलम् ।। १०६ ।।
अर्धाङ्गुलं क्रमात् क्षीणं बाहुपर्यन्तमेव वा ।
वक्षस्थलस्य चायामः दशभागं चतुर्यवम् ।। १०७ ।।
हिक्कासूत्रादधो बाहुः सप्तविंशतिमात्रकम् ।
गोपुरं कोलकायाम् एकविंशत्प्रकोष्टकम् ।। १०८ ।।
मध्याङ्गुलाग्रात्तस्याग्रात्सार्धत्रयोदशाङ्गुलम् ।
सप्ताङ्गुलं तु चायामं शेषं मध्याङ्गुलायतम् ।। १०९ ।।
पाणेस्तलस्य विस्तारं सप्तमात्रमिति स्मृतम् ।
तत्तारस्याऽष्टभागैकहीनमग्रस्य तारकम् ।। ११० ।।
सार्धकोलकमात्रेण तालमूले घनं भवेत् ।
षड्यवेनैव मात्रं तु तस्याग्रस्य घनं भवेत् ।। १११ ।।
अनामिकेष्वङ्गुलायामं तन्मानाऽनामिका भवेत् ।
द्वियवोपेतभागेन अङ्गुष्ठं स्यात्तु दैर्घ्यकम् ।। ११२ ।।

यवाधिकेन भागेन दैर्घ्यं कानिष्टकस्य तु ।
रसाब्धिरन्धवस्वर्कयवतारं कनिष्ठका ।। ११३ ।।
अङ्गुष्ठान्तं तथाऽग्रे तु अष्टभागैकहीनकम् ।
अङ्गुल्यग्रं त्रिधा कृत्वा द्विभागं नखविस्तरम् ।। ११४ ।।
तत्तारेण यवोपेतं नखायामं प्रकीर्तितम् ।
अङ्गुष्ठं तु द्विपर्वं स्यादन्याङ्गुल्यास्त्रिपर्वका ।। ११५ ।।
तलाग्रेत्वङ्गुलं नीत्वा द्विरेखामन्तिमं कुरु ।
तलमूलादेकरेखा मध्यमाङ्गुलिमूलका ।। ११६ ।।
मणिबन्धस्य विस्तारं भागमेकं प्रकीर्तितम् ।
प्रकोष्टं मध्यविस्तारं त्रियवेन शराङ्गुलम् ।। ११७ ।।
प्रकोष्टं मूलतारं तु कौशिकाङ्गुलमुच्यते ।
कूर्परस्य तु विस्तारं सार्धसप्ताङ्गुलं भवेत् ।। ११८ ।।
बाहुमध्यमविस्तारं सार्धयावकमुच्यते ।
बाहुमूलस्य विस्तारं नवमर्धार्धमिष्यते ।। ११९ ।।
हिक्कासूत्रात्तु कक्षान्तं नवमात्रार्धमुच्यते ।
कारयेदुपबाहू च मूलतारं गुणाङ्गुलम् ।। १२० ।।
अध्यङ्गुलेन मध्ये तु शेषं पूर्वपदा चरेत् ।
कक्षयोरन्तरं तिर्यक्चतुर्विंशतिमात्रकम् ।। १२१ ।।
हिक्काचिबुकयोर्मध्ये सार्धत्रयोदशाङ्गुलम् ।
स्तनयोरन्तरं यद्वच्चूचुकं तु यवान्तकम् ।। १२२ ।।
द्वियवं तस्य विस्तारं मण्डलं तु द्विमात्रकम् ।
हृत्प्रदेशस्य विस्तारं सार्धं त्रियङ्गुलं भवेत् ।। १२३ ।।
जठरस्य तु विस्तारं सार्थत्रयोदशाङ्गुल ।
यवद्वयं तु निम्नं स्याद्विस्तारं षड्यवं भवेत् ।। १२४ ।।
नाभिप्रदक्षिणावर्तविस्तारं सममायतम् ।
श्रोणिप्रदेशविस्तारं सार्थसप्तदशाङ्गुलम् ।। १२५ ।।
कट्यग्रस्य तु विस्तारं विंशत्यङ्गुलमुच्यते ।
कटिमूलस्य विस्तारं द्वात्रिंशत्यङ्गुलं भवेत् ।। १२६ ।।

शरीरं गोमुखाकारं कट्या ऊर्ध्वं प्रशस्यते ।
शरमात्रयवोपेतं मेढ्रायामं विधीयते ॥ १२७ ॥
वेदाङ्गुलमिति प्रोक्तं मुष्कविस्तारदीर्घके ।
पक्षाङ्गुलप्रमाणेन एकैकवृषणं स्मृतम् ॥ १२८ ॥
शेफं शीर्षाङ्गुलायामं तारं दशयवं भवेत् ।
क्षयमग्रेऽष्टभागैकं मुकुळोत्पलवद्भवेत् ॥ १२९ ॥
ऊरुमूलस्य विस्तारम् सार्धत्रयोदशाङ्गुलम् ।
तन्मध्ये मत्सविस्तारम् यवमर्धाङ्गुलाधिकम् ॥ १३० ॥
ऊर्वग्रस्य तु विस्तारं सार्धरन्ध्राङ्गुलं भवेत् ।
जानुमण्डलविस्तारं वसुमात्रार्धमिष्यते ॥ १३१ ॥
यवेष्टानाङ्गुलं प्रोक्तं जङ्घामूलस्य विस्तरम् ।
तन्मध्ये मत्सविस्तारं सप्तमात्रयवाधिकम् ॥ १३२ ॥
नळकस्य तु विस्तारं सार्धवेदाङ्गुलं भवेत् ।
अक्षगुल्फद्वयोर्मध्ये विस्तारं तु शराङ्गुलम् ॥ १३३ ॥
तलमध्यमविस्तारं सार्धभूताङ्गुलं भवेत् ।
तलाग्रस्य तु विस्तारं रसाङ्गुलमिति स्मृतम् ॥ १३४ ॥
अक्षात् पार्ष्ण्यन्तरं भागं पार्ष्ण्युत्सेधं तु तत्समम् ।
अक्षादङ्गुष्टमूलं तु नवमात्रार्धमिष्यते ॥ १३५ ॥
पादाङ्गुष्टायतं भागं तत्तारं तु षडङ्गुलम् ।
त्रियवेन चतुर्मात्रं प्रदेशन्यायमिष्यते ॥ १३६ ॥
यवेन मात्राविस्तारं देशिकस्य विधीयते ।
अङ्गुष्ठतर्जिनीमध्ये रन्ध्रं तु त्रियवं भवेत् ॥ १३७ ॥
माल्यायामं त्रिमात्रार्धं विस्ताराङ्गुलकं स्मृतम् ।
मात्रार्धाऽनामिकादैर्घ्यं तत्तारमङ्गुलं स्मृतम् ॥ १३८ ॥
कनिष्ठाद्यङ्गुलायामं तत्तारमङ्गुलं स्मृतम् ।
दशायवं च पञ्चार्धं चतुरर्धं चतुर्यवम् ॥ १३९ ॥
त्रियवार्धं यवं तारमङ्गुष्ठादिनखा स्मृता ।
विस्तारं सममायामं नखानां परिकीर्तितम् ॥ १४० ॥

एकत्रिंशतिमात्रं स्यात्कर्तव्यार्थं तु दोस्समम् ।
पादाङ्गुष्ठस्य मूलात्तु नाभेर्मृत्यङ्गुलं भवेत् ।। १६९ ।।
पादाग्राग्रं स्तनान्तं स्यात्तयोर्मध्यन्तरं यवम् ।
वरदं चेत्तु तत्पृष्ठनाभेस्तु सममुच्यते ।। १७० ।।
कटिकाधः प्रदेशं तु मेढ्रमूलसमं भवेत् ।
ऋज्वागतिस्थितिं वामाद्वरदाभयहस्तकम् ।। १७१ ।।
कृष्णापरशुसंयुक्तं कारयेदिन्दुशेखरम् ।
अधोभागे तु भागेन जान्वन्तं तु न दृश्यकम् ।। १७२ ।।
एवं लिङ्गोद्भवं कुर्याच्चन्द्रशेखरमुच्यते ।
लिङ्गं च विष्णुरूपं च विना कुर्विन्दुशेखरम् ।। १७३ ।।
इन्दुशेखरमाख्यातं दक्षिणामूर्तिरुच्यते ।
द्विविधं दक्षिणामूर्तिं व्याख्यानं मूर्तिकं तथा ।। १७४ ।।
गेयमूर्तिं तयोश्चैव लक्षणं तु विधीयते ।
चतुर्भुजं त्रिनेत्रं च द्वीपिचर्माम्बरान्वितम् ।। १७५ ।।
आवृतालङ्कृताभङ्गी शश्यर्ककुसुमान्वितम् ।
सदशं दक्षिणं हस्तं पुस्तकं वामहस्तके ।। १७६ ।।
सव्यके चाऽक्षमालां च व्याळं वै वामहस्तके ।
पादाग्रे दृष्टिपातं तु किञ्चिद्भङ्गसमायुतम् ।। १७७ ।।
लम्बितं दक्षिणं पादं तस्योर्वग्रस्य चोपरि ।
वामपादस्य नळकं संयुतं कारयेत्सुधीः ।। १७८ ।।
नासाग्रे मेढ्रमूलस्य वामे भागेऽन्तरास्थितम् ।
वामे हृन्मध्यमात्सूत्रादन्तरं चाङ्गलं भवेत् ।। १७९ ।।
नाभेर्वामे तु सूत्रं तु द्व्यन्तरं कोलकं भवेत् ।
एवं वै शिवसूत्रं तु तत्पातालं भवेत्क्रमात् ।। १८० ।।
सूत्रादक्षाङ्घ्रिपार्ष्ण्यश्च मध्ये सार्थमयं तु वा ।
यमं तु कारयेद्धीमान् सदशं हस्तकोच्चकम् ।। १८१ ।।
चूचुकोच्चासमं तस्य अङ्गुष्ठं मूलकान्ततः ।
नाभेस्तु त्र्यङ्गुलं चैव द्व्यन्तरं परिकीर्तितम् ।। १८२ ।।

वामे तु वरदं हस्तं ऊर्ध्वे तु तलपृष्ठयोः ।
द्व्यन्तरं भावमित्युक्तं नाभेस्तु मणिबन्धकात् ।। १८३ ।।
द्व्यन्तदन्त्विति विख्यातमेकोनविंशदङ्गुलम् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु षडङ्गुलम् ।। १८४ ।।
परहस्तमणेश्चैव बाहुमध्याद्यमान्तकम् ।
मध्याङ्गुलाच्च दोर्मूलाद् द्वयन्तरं दशमात्रकम् ।। १८५ ।।
हिक्कासूत्रादिद्विमात्राधः समं हस्तस्य चोच्छ्रयम् ।
हिक्कामध्यं समारभ्य कटके मणिबन्धकात् ।। १८६ ।।
द्व्यन्तरं त्रियमं प्रोक्तं दृष्टिसङ्घैस्समावृतम् ।
अगस्त्यश्च पुलस्त्यश्च विश्वामित्रोऽङ्गिरास्तथा ।। १८७ ।।
एवं व्याख्यान मूर्तिं तु गेयमूर्तिंशृणुष्वथ ।
कटकं दक्षिणं हस्तमधोमुखं तदुच्यते ।। १८८ ।।
वामहस्तं तु कटकमूर्ध्ववक्त्रं तदुच्यते ।
तन्त्रिणीवेशयेदूरुकाग्रे दक्षिणपादके ।। १८९ ।।
वामहस्तस्य कटके सव्यहस्तं तथोपरि ।
हिक्कामध्यं समारभ्य कटके मणिबन्धनात् ।। १९० ।।
त्रिंशन्मात्रमिति प्रोक्तं दक्षिणे कटके तथा ।
नाभ्यादि मणिबन्धान्तं द्व्यन्तरं यवमुच्यते ।। १९१ ।।
ऊरुबाह्यं त्रिमात्रं तु कटकोर्ध्वे युगाङ्गुलम् ।
दण्डायाममिति प्रोक्तं विस्तारं तु द्विमात्रकम् ।। १९२ ।।
वाबुवक्त्रं तु षण्मात्रमुत्सेधं तु तदर्थकम् ।
एतदेव विशेषं तु शेषं पूर्वोक्तवद्भवेत् ।। १९३ ।।
दक्षिणामूर्तिमेवं स्याच्छृणु मन्मथनिग्रहम् ।
त्रिनेत्रं चतुर्भुजं देवं जटामकुटमण्डितम् ।। १९४ ।।
उग्रदृष्टिसमायुक्तम् अक्षमालोरगं धरम् ।
दक्षिणे तु पताका च वामहस्तं तु सूचिका ।। १९५ ।।
एतदेव विशेषं तु शेषं व्याख्यानमूर्तिवत् ।
बेरायामरसांशाच्च त्रिभागं मन्मथायतम् ।। १९६ ।।

पीठस्थो वा रथस्थो वा कामः काञ्चनसन्निभः ।
सर्वभूषणभूष्यं च दिव्यरूपसमन्वितम् ॥ १९७ ॥
पुष्पैश्चैव शरैर्युक्तमिक्षुचापं च षट्ध्वजम् ।
मदरागवसन्तैश्च हेमबान्धवसंयुतम् ॥ १९८ ॥
तापनी दहनी विश्वमोहिनी विश्वमर्दिनी ।
मादिनीनाम निर्दिष्टास्तस्य पञ्चशरा इमे ॥ १९९ ॥
कार्मुकं वामहस्ते तु बाणं तु सव्यहस्तके ।
देवस्याभिमुखं कुर्यात्कामरूपं प्रसादितम् ॥ २०० ॥
कामनिग्रहमेवं स्याच्छृणु वैवाह्यमूर्तिनम् ।
सचन्द्रार्धं जटामौळिं सौम्यं प्रथमयौवनम् ॥ २०१ ॥
चतुर्भुजं त्रिनेत्रं च हारकेयूरभूषितम् ।
मेखलोदरबन्धश्च क्षौमवस्त्रधरं शुभम् ॥ २०२ ॥
वासुकीकुण्डलं काञ्ची तक्षको हारपुष्करम् ।
किञ्च त्रिभङ्गिकं कायं दक्षपादं तु कुञ्चितम् ॥ २०३ ॥
वरदं वामहस्तं तु कृष्णापरशुहस्तकम् ।
देवस्य दक्षहस्ते तु देवीहस्तं तु संयुतम् ॥ २०४ ॥
नास्यन्तं वापि चास्यान्तं हिक्कासूत्रसमं तु वा ।
पीनोरः पीतगन्धां च पीनस्तनसमन्विताम् ॥ २०५ ॥
द्विबाहुकां द्विनेत्रां च सर्वाभरणभूषिताम् ।
दुकूलवसनां देवीं कुर्याद्देवस्य सव्यके ॥ २०६ ॥
देवस्यायाममानं तु विभजेद्द्वादशाङ्गुलम् ।
रुद्रांशं वा नवांशं वा वस्वंशं वैकहीनकम् ॥ २०७ ॥
आयामं तद्धरेः प्रोक्तं तस्य बाहुसमन्वितम् ।
चिबुकान्तं वाथ कक्षान्तं लक्ष्याऽयामं प्रकीर्तितम् ॥ २०८ ॥
विष्णुबिम्बसमं वापि तद्वस्त्वंशैकहीनकम् ।
सप्तभागैकहीनं वा रसांशैकविहीनकम् ॥ २०९ ॥
अजायाममिदं तस्य चतुर्भागैकभागता ।
अग्निज्वालोच्छ्रयं प्रोक्तं तस्यार्थं विस्तृतं भवेत् ॥ २१० ॥

देवमानाङ्गसयुक्तं कारयेत्तु विचक्षणः ।
ललाटनासिकामध्याद्वामपादस्य गुल्फकान् ॥ २११ ॥
व्यपोह्याभ्यन्तरे मात्रं तत्रस्थं शिवसूत्रकम् ।
तत्सूत्रात्स्तनमध्याच्च दक्षिणे चाङ्गुलान्तरम् ॥ २१२ ॥
तत्सूत्रान्नाभिमध्याच्च वामे व्योमाङ्गुलान्तरम् ।
एवं स्याच्छिवसूत्रं तु द्व्यन्तरं त्वधुना शृणु ॥ २१३ ॥
वरदस्यतलं पृष्टं नाभिसूत्रसमं भवेत् ।
नाभेस्तु मणिबन्धान्तादेकोनविंशदङ्गुलम् ॥ २१४ ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं कौशिकाङ्गुलम् ।
मेढ्रमूलसमं कुर्यात्किटकं लम्बितं तथा ॥ २१५ ॥
नाभेस्तु मणिबन्धान्ताद्वयन्तरं समृतिमात्रकम् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु शराङ्गुलम् ॥ २१६ ॥
द्व्यन्तरं दीपबाह्वोश्च चन्द्रशेखरवत्कुरु ।
पादाङ्गुष्ठद्वयोर्मध्ये सार्धत्रयोदशाङ्गुलम् ॥ २१७ ॥
तत्रिभागैकभागं तु पार्ष्ण्योः द्वन्तरकं भवेत् ।
एतत्कुञ्चितपादं तु द्विमात्रं वक्त्रमुच्यते ॥ २१८ ॥
देवस्य सूत्रवत्सूत्रं देव्यां चैव तु लम्बयेत् ।
देव्या दक्षिणहस्तस्य तलमध्यं हरस्य तु ॥ २१९ ॥
हस्तेन सङ्गृहीतं तु कारयेत्तु विचक्षणः ।
नाभेः प्रकोष्टमूलान्तात् द्व्यन्तरं चाब्धिमात्रकम् ॥ २२० ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु द्विमात्रकम् ।
लम्बितं वामहस्तं तु मध्यबाहुकपार्श्वयोः ॥ २२१ ॥
द्व्यन्तरं शरमात्रं तु ऊरोस्तु मणिबन्धकात् ।
भागं तु द्व्यन्तरं प्रोक्तमूर्वग्रं मध्यमाङ्गुलात् ॥ २२२ ॥
द्व्यन्तरं तु द्विमात्रं स्यात्पादान्तरं तु पूर्ववत् ।
देवीलक्षणमेवं स्यात् लक्ष्म्याश्च लक्षणं शृणु ॥ २२३ ॥
नागहस्तसमौ बाहू केयूरकटकोज्वलौ ।
शोभनाम्बरसम्पन्ना श्रोणी च विपुलं तथा ॥ २२४ ॥

मेखला अक्षिसूत्राङ्गा उमापार्श्वे वगाधता ।
ललाटनासिकामध्याद्वामाद्यङ्गुष्ठकाग्रतः ।। २२५ ।।
मध्यमे तु स्थितं सूत्रं शिवसूत्रमिति स्मृतम् ।
तत्सूत्राद्योनिमूलाच्च द्व्यन्तरं तु यवं भवेत् ।। २२६ ।।
तत्सूत्रं दक्षिणे नाभे द्व्यन्तरं वसुमात्रकम् ।
हस्तोभयाभ्यां देव्याश्च कटिदेशं स्पृशां कुरु ।। २२७ ।।
दक्षिणे ह्युदरस्यैव मध्ये बाह्वोश्च मध्यमे ।
द्व्यन्तरं तु द्विमात्रं स्याद्वामबाहुं कपार्श्वयोः ।। २२८ ।।
द्व्यन्तरं भागमित्युक्तं पादाङ्गुष्ठकयोस्ततः ।
अष्टादशाङ्गुलेनैव द्व्यन्तरं परिकीर्तितम् ।। २२९ ।।
पाष्र्ण्योश्च द्व्यन्तरं तत्र षडङ्गुलमुदीरितम् ।
एवं लक्ष्मी समाख्याता; विष्णुरूपमथोच्यते ।। २३० ।।
किरीटमकुटोपेतं कटिसूत्रोदरबन्धनम् ।
केयूरकटकं चैव यज्ञसूत्रसमन्वितम् ।। २३१ ।।
लम्बसूत्रसमायुक्तं पीताम्बरसमायुतम् ।
मकरं कुण्डलोपेतं श्रीवक्षं वक्षसि स्थितम् ।। २३२ ।।
शङ्खचक्रधरं कुण्डं हस्तद्वयेन धारिणम् ।
जलधारोन्मुखं किञ्चिद्वक्रेणैव समायुतम् ।। २३३ ।।
ललाटनासिकामध्यान्मध्यमे पादयोस्ततः ।
अङ्गुष्ठाग्रसमं सूत्रं लम्बयेच्छिवसूत्रकम् ।। २३४ ।।
तत्सूत्राद्द्व्यन्तरं नाभेर्वेदाङ्गलमिति स्मृतम् ।
कुण्डिकायास्तु चोत्सेधं त्रयोदशाङ्गलं भवेत् ।। २३५ ।।
नवाङ्गलं तु विस्तारं ग्रीवं पक्षाङ्गलं भवेत् ।
कुण्डिकाननदेशे तु सव्यहस्तसमायुतम् ।। २३६ ।।
कुण्डिकापृष्ठदेशेन वामहस्ततलद्वयम् ।
वामहस्ताग्रपृष्ठं तु नाभेस्तु सममुच्यते ।। २३७ ।।
नाभेस्तु मणिबन्धाच्च द्व्यन्तरं सप्तमात्रकम् ।
विष्णुरूपं समाख्यातं; ब्रह्मरूपमथ शृणु ।। २३८ ।।

चतुर्भुजं चतुर्बाहुं कमण्डल्वक्षधारिणम् ।
यज्ञसूत्रोत्तरीयं तु जटामकुटसंयुतम् ॥ २३९ ॥
सव्यहस्तेऽक्षमालां च वामहस्ते कमण्डलम् ।
स्रुवं दक्षिणहस्ते तु पताका वामहस्तके ॥ २४० ॥
अम्बुजासनकासीनं ब्रह्माणं होमसम्मुखम् ।
ललाटनासिकामध्यान्नाभेर्गुल्फस्य मध्यमात् ॥ २४१ ॥
तत्सूत्रान्मध्यमान्नाभेः द्व्यन्तरं तु शराङ्गुलम् ।
पताकाङ्गुष्ठमूलान्तान्नाभेरष्टादशाङ्गुलम् ॥ २४२ ॥
चूचुकोर्ध्वे समं कुर्यात्पताकाग्रं विचक्षणः ।
हुतं तु मणिबन्धायास्तन्नाभेस्तु समं भवेत् ॥ २४३ ॥
नाभेस्तु मणिबन्धाच्च त्रयोदशाङ्गुलं भवेत् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु षडङ्गुलम् ॥ २४४ ॥
उभयोर्जानुसीमान्तमूर्ध्वकायसमं भवेत् ।
एवं स्याद्ब्रह्मरूपं तु अग्निरूपमथ शृणु ॥ २४५ ॥
देवस्याङ्गुलमानेन चतुर्विंशतिमात्रकम् ।
अग्निकुण्डं तु विस्तारं मेखलात्रयसंयुतम् ॥ २४६ ॥
अग्न्यङ्गुलं तदुत्सेधं मेखला तारमङ्गुलम् ।
तन्मध्ये कल्पयेदग्निं पञ्चपात्रशिखान्वितम् ॥ २४७ ॥
एकं वैवाह्यमुद्दिष्टम् उमया सहितं शृणु ।
चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ॥ २४८ ॥
सर्वाभरणसंयुक्तं वरदाभयहस्तकम् ।
कृष्णापरशुसंयुक्तं दक्षिणे वामकेऽपि च ॥ २४९ ॥
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलं भवेत् ।
उपवीतधरं चैव शयनं वामपादकम् ॥ २५० ॥
लम्बितं दक्षिणं पादं वामे गौरीसमायुतम् ।
तयोर्मध्ये स्थितं स्कन्दस्सर्वलक्षणसंयुतम् ॥ २५१ ॥
ब्रह्मविष्णुद्विपार्श्वाभ्यां देवीभ्यां युक्तभोगदम् ।
ललाटनासिकामध्यान्नाभेश्च मध्यमं क्रमात् ॥ २५२ ॥

लिङ्गमध्यात्तु पादस्य गुल्फमध्यं स्थितं तथा ।
श्रोणिसंस्पर्शनं सूत्रं शिवसूत्रमिति स्मृतम् ।। २५३ ।।
मुखान्तात्पिप्पलीमूलाद्ग्रीवापार्श्वं तथैव च ।
चूचुकस्य तु मध्यात्तु श्रोणीकट्याश्च पार्श्वकात् ।। २५४ ।।
उष्णिकात्तु ककुद्वंशखण्डस्फिक् मध्यमाद्गतम् ।
पृष्ठसूत्रमिदं पार्श्वसूत्रात्तु सार्थमात्रकम् ।। २५५ ।।
हित्वा पार्श्वद्वयोश्चैव ऊर्वायाममतः परम् ।
जानुपक्षाङ्गुलं चैव क्षयमाजानुसीमकान् ।। २५६ ।।
दक्षिणं लम्बजानुश्च आयश्चैव गुणांशकम् ।
वामजान्वन्तरात्सूत्रादूर्ध्वकायाच्च मानतः ।। २५७ ।।
षण्मात्रं द्व्यन्तरं प्रोक्तं नाशिकामेढ्रमूलयोः ।
तलाग्रे ऊरुमध्याच्च द्व्यन्तरं तु गुणाङ्गुलम् ।। २५८ ।।
सूत्राद्गुल्फाङ्घिपार्ष्ण्यन्तं सार्धत्रयोदशाङ्गुलम् ।
कटके मणिबन्धाधः कट्ग्यग्रस्य समं भवेत् ।। २५९ ।।
नाभेस्तु मणिबन्धात्तु द्व्यन्तरं षोडशाङ्गुलम् ।
हस्तद्व्यन्तरकं सर्वं चन्द्रशेखरवत्कुरु ।। २६० ।।
देवस्य बाहुसीमान्तं देव्यास्त्वायाममुच्यते ।
द्विबाहुका द्विनेत्री च करण्डमकुटान्विता ।। २६१ ।।
सर्वाभरणसंयुक्ता दुकूलवसनान्विता ।
शयनं दक्षिणे पादं वामपादं तु लम्बितम् ।। २६२ ।।
कटकं दक्षिणे हस्ते वरदं वामहस्तके ।
ललाटनासिकामध्याद्दक्षिणे च गुणाङ्गुलम् ।। २६३ ।।
हित्वाऽत्रैव न्यसेत्सूत्रं शिवसूत्रमिति स्मृतम् ।
तत्सूत्राद्धृदयान्ताच्च वामे गुणाङ्गुलान्तरम् ।। २६४ ।।
तत्सूत्राद्दक्षिणे नाभे द्व्यन्तरं चाङ्गुलं भवेत् ।
कारयेत्कटकस्याग्रं चूचुकोर्ध्वसमं तथा ।। २६५ ।।
अङ्गुष्ठमूलनाभेस्तु सार्धत्रयोदशाङ्गुलम् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं पञ्चमात्रकम् ।। २६६ ।।

वरदस्य तलस्याधो नाभेस्तु सममुच्यते ।
नाभेस्तु मणिबन्धाच्च द्व्यन्तरं षोडशाङ्गुलम् ॥ २६७ ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु षडङ्गुलम् ।
अन्यानि सर्वकार्याणि देवस्योक्तवदाचरेत् ॥ २६८ ॥
बेरायामं तु विभजेदष्टया चैव भागिकम् ।
द्विभागं वा गुहायामं बाहुरूपेण कल्पयेत् ॥ २६९ ॥
द्विभुजश्च द्विनेत्रश्च सर्वाभरणभूषितम् ।
कटकं दक्षिणे हस्ते वामहस्तं प्रलम्बितम् ॥ २७० ॥
आसीनो वा स्थितो वापि कारयेत्तु गुहं ततः ।
पद्मपीठोर्ध्वको वापि केवलं पीठकोपरि ॥ २७१ ॥
भवानीसहितं ह्येवं वृषवाहनमुच्यते ।
गौरीश्वरौ स्थितौ पीठे वृषभं पृष्ठतःस्थितम् ॥ २७२ ॥
त्रिनेत्रं चतुर्भुजं जटामकुटसंयुतम् ।
दिव्याम्बरधरो देवस्सर्वाभरणभूषितः ॥ २७३ ॥
परशुं दक्षिणे हस्ते वामे कृष्णसमन्वितम् ।
कटकं दक्षिणे हस्ते वृषभस्यैवमस्तके ॥ २७४ ॥
वामहस्ते प्रकोष्ठं तु स्थापितं कुरु बुद्धिमा(म)न् ।
ललाटनासिकामध्याद्दक्षिणे स्थितपादके ॥ २७५ ॥
गुल्फमाध्यात् स्थितं सूत्रं शिवसूत्रमिति स्मृतम् ।
तत्सूत्रात् हृत्प्रदेशाच्च वामे चैव गुणाङ्गुलम् ॥ २७६ ॥
तत्सूत्रादङ्गुलं नाभेर्दक्षिणे चाङ्गुलान्तकम् ।
तत्सूत्रान्मेढ्रमूलान्तं दक्षिणे चतुरङ्गुलम् ॥ २७७ ॥
तत्सूत्राद्दक्षिणाङ्घ्रिश्च जान्वोश्चैव गुणाङ्गुलम् ।
मेढ्रमूलसमं कुर्यात्कटकं लळितं ततः ॥ २७८ ॥
नाभेस्तु मणिबन्धान्तादेकोनविंशदङ्गुलम् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं चाब्धिमात्रकम् ॥ २७९ ॥
बाहुकूर्परमध्योर्ध्वे सनसूत्रं न्यसेद्बुधः ।
पताकाऽधोमुखो वाथ हंसपक्षमथापि वा ॥ २८० ॥

तन्मध्यमाङ्गलाग्रं तु नाभिसूत्रसमं भवेत् ।
प्रकोष्ठमूलाद्धृदयात्पञ्चविंशतिमात्रकम् ॥ २८१ ॥
पार्श्वकान्मणिबन्धाच्च त्रयोदशाङ्गलान्तरम् ।
तन्मध्यमाङ्गुलं नाभेःद्व्यन्तरं तिथिमात्रकम् ॥ २८२ ॥
सभङ्गस्थानकं कृत्वा पादाङ्गुष्ठद्वयोस्तथा ।
द्व्यन्तरं तिथिमात्रं स्यात्पार्ष्ण्योर्मध्ये शराङ्गुलम् ॥ २८३ ॥
वामपादस्य चक्रं तु कोलकं चेति कीर्तितम् ।
इन्दुशेखरवत्कुर्यात्परहस्ते विशेषतः ॥ २८४ ॥
तस्यैव वामभागे तु देवीं कुर्याद्विचक्षणः ।
वृषारूढमिदं प्रोक्तं त्रिपुरारिं शृणुष्वथ ॥ २८५ ॥
चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमायुतम् ॥ २८६ ॥
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलान्वितम् ।
धनुर्बाणसमायुक्तं कृष्णापरशुसंयुतम् ॥ २८७ ॥
उपवीतसमायुक्तं सभङ्गस्थानकं कुरु ।
वामे कटकहस्तोर्ध्वं हिक्कासूत्रसमं भवेत् ॥ २८८ ॥
मणिबन्धं समारभ्य हिक्कासूत्रस्य मध्यमात् ।
षट्त्रिंशदङ्गलं चैव द्व्यन्तरं परिकीर्तितम् ॥ २८९ ॥
वृषवाहनवच्छेषं कारयेत्तु विचक्षणः ।
त्रिपुरान्तकमेवं स्यादर्धनारीं शृणुष्वथ ॥ २९० ॥
स बालेन्दुजटाभारमैशमर्धं तु दक्षिणम् ।
उमार्धं वामभागे तु सीमन्ततिलाकालकम् ॥ २९१ ॥
नयनार्धं ललाटे तु संयुक्तं दक्षिणांशके ।
दक्षिणे कुण्डलं कर्णे वामकर्णे तु पत्रकम् ॥ २९२ ॥
कुटिलं पालिकां वामे टङ्काऽभयौ च दक्षिणे ।
उत्पलं वामहस्ते तु केयूरकटकान्वितम् ॥ २९३ ॥
उमांशे तु स्तनं कुर्याद्विहकारधरं तु वा ।
श्रोण्यार्धदक्षिणे शम्भोर्व्याघ्रचर्मकृताम्बरम् ॥ २९४ ॥

उमार्धं कटिसूत्रान्तं चित्रवस्त्रपरिच्छदम् ।
नूपुरालङ्कृतं वामे सव्यपादं तु कुञ्चितम् ॥ २९५ ॥
आभङ्गेन तथा कुर्यात्सार्धनारीश्वरं वपुः ।
ललाटनासिकामध्याद्वामाङ्के गुल्फमध्यमात् ॥ २९६ ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु षडङ्गुलम् ।
पादाङ्गुष्ठद्वयोर्मध्ये द्व्यन्तरं तिथिमात्रकम् ॥ २९७ ॥
पार्ष्णिद्वयोश्च मध्ये तु भूताङ्गुलमिति स्मृतम् ।
तत्सूत्रात् हृत्प्रदेशाच्च दक्षिणे द्व्यङ्गुलान्तरम् ॥ २९८ ॥
तत्सूत्राद्वामके नाभेःद्व्यन्तरं चाङ्गुलं भवेत् ।
तत्सूत्रान्मेढ्रमूलाच्च द्व्यन्तरं तु युगाङ्गुलम् ॥ २९९ ॥
वामके कटकस्याग्रे चूचुकोर्ध्वसमं भवेत् ।
नाभेस्तु मणिबन्धान्तात्सार्धत्रयोदशाङ्गुलम् ॥ ३०० ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु षडङ्गुलम् ।
पादाङ्गुष्ठद्वयोर्मध्ये द्व्यन्तरं तिथिमात्रकम् ॥ ३०१ ॥
पादद्वयोश्च मध्ये तु भूताङ्गुलमिति स्मृतम् ।
शेषमन्यच्च सर्वं तु चन्द्रशेखरवद्भवेत् ॥ ३०२ ॥
अर्धनारीश्वरं ह्येवं; कङ्काळं त्वधुना शृणु ।
चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ॥ ३०३ ॥
पादे पादुकसंयुक्तं किञ्चिद्वै गमनोन्मुखम् ।
सर्वाभरणसंयुक्तं यज्ञसूत्रोपशोभितम् ॥ ३०४ ॥
शङ्खं तु वामकर्णे तु दक्षिणेन च कुण्डलम् ।
क्षौमवस्त्रधरं कुर्याद्दक्षिणे छुरिकायुधम् ॥ ३०५ ॥
डमरुं वामहस्ते तु प्रहरं दक्षिणे करे ।
कङ्काळं दण्डमूलं तु पिञ्छदण्डस्य मूलकम् ॥ ३०६ ॥
वामे त्वपरहस्तेन सङ्गृहीतं तु कल्पयेत् ।
उभयोर्दण्डकाग्रं तु अंशको परिविन्यसेत् ॥ ३०७ ॥
कृष्णामुखं गतं हस्तं दक्षिणे परहस्तकम् ।
नानानागसमायुक्तं किञ्चित्प्रहसिताननम् ॥ ३०८ ॥

बलिपात्रधरं भूतदेवं वामे तु कारयेत् ।
भिक्षादानोन्मुभस्त्रिभिःमोहिताभिस्समाकुलम् ।। ३०९ ।।
नानाभूतसमायुक्तं नानालीलसमन्वितम् ।
ललाटमध्यदक्षे तु मात्रं हित्वा तु सूत्रकम् ।। ३१० ।।
दक्षप्राणपुटात् पार्श्वस्थिताङ्घ्र्यङ्गुष्ठमूलकात् ।
दक्षभागाङ्गुलं हित्वा तत् स्थानाल्लम्बयेद्बुधः ।। ३११ ।।
तत्सूत्राद्धृदयाद्दक्षे द्व्यन्तरं तु गुणाङ्गुलम् ।
पूर्वकुण्डमलदृष्टाग्रं त्वष्टा दशाङ्गुलं भवेत् ।। ३१२ ।।
तत्सूत्राद्वामके नाभेः द्व्यन्तरं तु युगाङ्गुलम् ।
तत्सूत्रान्मेढ्रमूलान्तात् वामोच्चाद्द्व्यङ्गुलं भवेत् ।। ३१३ ।।
पादाङ्गुष्ठद्वयोर्मध्ये त्वष्टादशाङ्गुलं भवेत् ।
पार्ष्ण्योश्चैवोभयोर्मध्ये सप्ताङ्गुलमुदीरितम् ।। ३१४ ।।
उभयोर्जानुमध्ये तु मुखमेवं प्रकीर्तितम् ।
अधोमुखं तु कटकं तस्याग्रं नाभितस्समम् ।। ३१५ ।।
नाभ्यास्समं प्रदेशं तु उदरान्मणिबन्धकात् ।
द्व्यन्तरं भागमित्युक्तं पार्श्वमध्यमबाहुकान् ।। ३१६ ।।
द्व्यन्तरं भागमित्युक्तं कटकं कोणसंयुतम् ।
ढक्कासंयुक्तहस्तं तु वरदं चेति वर्तितम् ।। ३१७ ।।
वरदे मणिबन्धाधः कुक्षिमध्यसमं भवेत् ।
नाभेस्तु मणिबन्धाच्च द्व्यन्तरं स्मृतिमात्रकम् ।। ३१८ ।।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु शराङ्गुलम् ।
हरिण्यास्यगताहस्तमूरुमूलादधस्तथा ।। ३१९ ।।
एकविंशतिमात्रान्तं समन्तस्याग्रमुच्यते ।
तद्धस्तकटकं प्रोक्तं कुर्यादधोमुखं तु तत् ।। ३२० ।।
ऊरोश्च मणिबन्धाच्च द्व्यन्तरं तु यमं भवेत् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं सप्तमात्रकम् ।। ३२१ ।।
हरिणीजिह्वया हस्तस्याऽग्रमावेपितं कुरु ।
कङ्काळधारिणं हस्तकटकं चेति कीर्तितम् ।। ३२२ ।।

कक्षतुल्यं तु तस्याग्रं यमं दोर्मणिबन्धयोः ।
बिम्बस्य त्रिमुखं वापि सार्धत्रिमुखमेव वा ।। ३२३ ।।
कारयेद्भूतरूपाणि पञ्चतालेन बुद्धिमान् ।
देवस्तनसमोच्चं वा कक्षोच्चं वा विशेषतः ।। ३२४ ।।
नारीं सङ्कल्पयेद्धीमानुभयोः पार्श्वयोरपि ।
एवं कङ्काळमाख्यातं नृत्तरूपमथ शृणु ।। ३२५ ।।
चतुर्भुजं त्रिनेत्रं च सुविकीर्णजटान्वितम् ।
कुररीवक्षस्संयुक्तं बर्हिःपिञ्छसमन्वितम् ।। ३२६ ।।
मौले धत्ते तु धुत्तूरं अर्धचन्द्रसमन्वितम् ।
दक्षिणे तु जटाग्रे तु जाह्नावीमभिवन्दिताम् ।। ३२७ ।।
पत्रं तु वामकर्णे तु दक्षिणे नक्रकुण्डलम् ।
सर्वाभरणसंयुक्तमुपवीतसमन्वितम् ।। ३२८ ।।
व्याघ्राजिनाम्बरोपेतं पादकिङ्किणिशोभितम् ।
जगत्प्रसारितं वामे दक्षिणेऽभयहस्तकम् ।। ३२९ ।।
डमरुं सव्यहस्ते तु वह्निर्वै बामहस्तके ।
वक्रं तु दक्षिणं पादं अपस्मारोपरि स्थितम् ।। ३३० ।।
उद्धृतं वामपादं तु पादाग्रं दक्षिणानुगम् ।
ललाटमध्यदक्षे तु हित्वा सार्धाष्टकं यवम् ।। ३३१ ।।
तस्मात्तु लम्बयेत्सूत्रं दक्षनासापुटान्तकात् ।
दक्षिणाङ्घ्रे तु गुल्फस्य मध्यमादेव पादितम् ।। ३३२ ।।
तत्सूत्रकक्षयोर्मध्ये उरः स्मृत्यङ्गुलं भवेत् ।
तत्सूत्रकक्षयोरन्तर्वामोरूर्वसुमात्रकम् ।। ३३३ ।।
तत्सूत्राद्दक्षिणे ग्रीवा षडङ्गुलमिति स्मृतम् ।
तत्सूत्राद्वामकेशीं वा गुणाङ्गुलमुदाहृतम् ।। ३३४ ।।
तत्सूत्राद्दक्षिणे नाभेद्र्व्यन्तरं चाङ्गुलं भवेत् ।
तत्सूत्रान्मेढ्रमूलान्तात् सप्तानामङ्गुलं भवेत् ।। ३३५ ।।
वामास्फिक्पिण्डिकात्सूत्रात्सप्तानामाङ्गुलं भवेत् ।
तत्सूत्राद्वक्रपादस्य जानुकात्तु दशाङ्गुलम् ।। ३३६ ।।

दक्षिणे बाहुसीमन्ताद्धिक्कासूत्रस्य मध्यमात् ।
यवद्वयाधिकं विंशदङ्गुलं चेति कीर्तितम् ।। ३३७ ।।
हिक्कामध्यं समारभ्य दोस्सीमान्तं तु वामके ।
यवद्वयसमायुक्तं सप्तदशाङ्गुलं भवेत् ।। ३३८ ।।
नाभेर्दक्षिणके कुक्षितारं भागमिति स्मृतम् ।
नाभेर्वामौ तु कुक्षौ च तारं त्रयोदशाङ्गुलम् ।। ३३९ ।।
वरदाग्निधरं हस्तं दोस्समं चेति कीर्तितम् ।
शरमात्रं पावकोत्सेधं विस्तारं तु गुणाङ्गुलम् ।। ३४० ।।
त्रिशिखाभिस्समायुक्तं कल्पयेत्तलमध्यमे ।
बाह्वोश्च मणिबन्धाच्च चतुस्त्रिंशद्भवेङ्गुलम् ।। ३४१ ।।
डमरुकोपेतहस्तं सूचीहस्तमिति स्मृतम् ।
तत्सूचिहस्तकस्योर्ध्वं कर्णोर्ध्वसममुच्यते ।। ३४२ ।।
बाह्वोश्च मणिबन्धाच्च चतुर्विंशद्भवेङ्गुलम् ।
वामाङ्घ्रेश्चैव जानूर्ध्वान्नाभेस्तु सममुच्यते ।। ३४३ ।।
वामाङ्घ्रेः पार्ष्णिकाधश्च वक्त्राङ्घ्रेर्जानुकोपरि ।
तत्समं त्विति विज्ञेयं तत्सार्ष्णेर्जानुकान्ततः ।। ३४४ ।।
चतुस्त्रिंशति मात्रं तु द्व्यन्तरं चेति कीर्तितम् ।
मणिबन्धकजान्वोश्च द्व्यन्तरं तु यवं भवेत् ।। ३४५ ।।
दोर्मूलान्तसमश्चैव अभयाग्रं प्रकीर्तितम् ।
मणिबन्धकबाह्वोश्च द्व्यन्तरं तु यमं भवेत् ।। ३४६ ।।
तस्य कूर्परमध्ये तु व्याळं तत्रैव विन्यसेत् ।
चूचुकान्नाभिकामूलाद्व्यन्तरं तु यमं भवेत् ।। ३४७ ।।
सव्यस्य वामसूत्रस्य मध्याद्वै पार्श्वयोस्तयोः ।
वामबाहुद्वयोर्मध्ये शार्दूलाजिनकं न्यसेत् ।। ३४८ ।।
त्रिवक्रायाममानेन अपस्मारं ततः कुरु ।
चतुस्तालप्रमाणेन भूतरूपेण कारयेत् ।। ३४९ ।।

तस्यैव वामपार्श्वे तु देवीं कुर्यात्सलक्षणाम् ।
भुजङ्गत्रासमेवं तु भिक्षाटनमथ शृणु ॥ ३५० ॥
त्रिनेत्रं चतुर्भुजं नग्नं रूपं किञ्चित् स्मिताननम् ।
आवृतालङ्कृता भङ्गीपादे पादुकसंयुतम् ॥ ३५१ ॥
दक्षिणे तु कराग्रं तु हरिणास्यानुगं भवेत् ।
दक्षिणापरहस्तं तु डमरुकं युतं भवेत् ॥ ३५२ ॥
वामे कपालहस्तं तु अपरं पिञ्छधारिणम् ।
कुञ्चितं दक्षिणं पादं वामपादं तु स्वस्तिकम् ॥ ३५३ ॥
सभङ्गस्थानकं कुर्याद्गमनोन्मुखरूपकम् ।
कपालोपेतहस्तस्य पृष्ठं नाभिसमं भवेत् ॥ ३५४ ॥
मणिबन्धाच्च नाभेस्तु द्व्यन्तरं षोडशाङ्गुलम् ।
शेषं सर्वविशेषेण कङ्काळस्योक्तवद्भवेत् ॥ ३५५ ॥
एवं भिक्षाटनं प्रोक्तं कालनाशनमुच्यते ।
चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ॥ ३५६ ॥
उद्धृतं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
व्याघ्रचर्माम्बरोपेतं तीक्ष्णनासोग्रदंष्ट्रकम् ॥ ३५७ ॥
दक्षिणे तु करे शूलं सूचीहस्तं तु वामके ।
परशुं दक्षिणे हस्ते नागपाशं तु वामके ॥ ३५८ ॥
अधोमुखं भवेच्छूलंदृष्टिर्वै कालदेहके ।
ललाटमध्याद्दक्षे तु हित्वा सार्धाष्टकं यवम् ॥ ३५९ ॥
तस्मात्तु लम्बयेत् सूत्राद्दक्षनासापुटान्तकान् ।
दक्षिणाङ्घ्रेश्च पार्ष्ण्यग्रात्पक्षाङ्गुलान्तरं स्थितम् ॥ ३६० ॥
तत्सूत्राद्वामके नाभेरङ्गुलां द्व्यन्तरं स्मृतम् ।
तत्सूत्रान्मेढ्रमूलान्तात् दक्षभागमथान्तरम् ॥ ३६१ ॥
सूत्रजान्वोश्च मध्ये तु रन्ध्राङ्गुलमिति स्मृतम् ।
उच्छृताङ्घ्रेश्च जानुश्च कट्यग्रस्य समं भवेत् ॥ ३६२ ॥

उद्धृताङ्घ्रेः स्थलाग्रान्ता जङ्घायामस्तु मात्रकम् ।
सूचिहस्ताग्रकं नाभेस्सममित्यभिधीयते ॥ ३६३ ॥
मणिबन्धाच्च मध्याच्च द्व्यन्तरं षोडशाङ्गुलम् ।
शूलोपेतकराग्रं तु कर्णस्योर्ध्वसमं भवेत् ॥ ३६४ ॥
कर्णाग्रान्मणिबन्धाच्च द्व्यन्तरं द्वियवं भवेत् ।
अपरे तु द्विहस्तौ तु कटकाविति कीर्तितौ ॥ ३६५ ॥
दोस्समं कटकाग्रं तु द्व्यन्तरं तु यवं भवेत् ।
कालनाशनमेवं च; हरिरर्धमथ शृणु ॥ ३६६ ॥
ईशार्धं पूर्ववत्प्रोक्तं विष्णर्थे मकुटं नयेत् ।
वामे तु द्विभुजोपेतं केयूरकटकोज्ज्वलम् ॥ ३६७ ॥
स्यान्नक्रकुण्डलं कर्णे कटकं शङ्खहस्तकम् ।
अर्धपीताम्बरोपेतं भूषणं भूषणार्हकैः ॥ ३६८ ॥
ऋज्वागतं तथा सर्वं चन्द्ररशेखरवत्कुरु ।
हरिरर्धमिदं प्रोक्तं; सुखासनमथ शृणु ॥ ३६९ ॥
चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
अभयं दक्षिणं हस्तं वरदं वामहस्तकम् ॥ ३७० ॥
कृष्णापरशुसंयुक्तं वामदक्षिणहस्तयोः ।
शयनं दक्षिणं पादं वामपादं तु लम्बितम् ॥ ३७१ ॥
उमया सहवत्सर्वं स्कन्दगौरीविवर्जितम् ।
सुखासनमिति प्रोक्तं; गङ्गाधरमथ शृणु ॥ ३७२ ॥
चतुर्भुजं त्रिनेत्रं च कपर्दमकुटान्वितम् ।
अभयं दक्षिणं हस्तं कटकं वामहस्तकम् ॥ ३७३ ॥
कपर्दमकुटं तेन ग्रहीतुं जाह्नवीयुतम् ।
वामदक्षिणहस्तौ तु कृष्णापरशुसंयुतम् ॥ ३७४ ॥
अभयं पूर्ववत्प्रोक्तं कपर्दोपेतहस्तकम् ।
कर्णोर्ध्वस्य समं ज्ञेयं कर्णान्तं मणिबन्धयोः ॥ ३७५ ॥

द्व्यन्तरं द्वियवं प्रोक्तं शेषं तु त्रिपुरारिवत् ।
तस्य वामे भवानी तु कारयेल्लक्षणान्वितम् ।। ३७६ ।।
जान्वन्तं वापि नाभ्यन्तं भागीरथ्यास्तु मानकम् ।
प्रलम्बकजटोपेतमुष्णीषं जलहस्तकम् ।। ३७७ ।।
द्विभुजं च त्रिनेत्रं च वल्कलाम्बरसंयुतम् ।
एवं गङ्गाधरं प्रोक्तं; चण्डेशानुग्रहं शृणु ।। ३७८ ।।
उमासहितवत्सर्वं स्कन्देनैव विना कुरु ।
किञ्चिदस्मिन्विशेषोऽस्ति तं विशेषं शृणु द्विजाः ।। ३७९ ।।
कटकं दक्षिणे हस्तं वरदं वामहस्तके ।
देवस्य पुरभागं तु चण्डेशं तु प्रकल्पयेत् ।। ३८० ।।
देवस्य बाहुमात्रेण चण्डेशायाममुच्यते ।
कृताञ्जलिपुटोपेतं चासीनं पतिवक्त्रकम् ।। ३८१ ।।
देवशिरसि चण्डस्य मालया परिभूषयन् ।
चण्डेशानुग्रहं प्रोक्तं; मुखलिङ्गं पुरोक्तवत् ।। ३८२ ।।
आभङ्गं समभङ्गं च अतिभङ्गं त्रिधा भवेत् ।
आभङ्गं त्र्यङ्गुलं प्रोक्तं समभङ्गं युगाङ्गुलम् ।। ३८३ ।।
अतिभङ्गं शराङ्गुल्यं माने न्यूनं तु कारयेत् ।
देवस्य वक्त्रमानेन मौल्यायामं विधीयंते ।। ३८४ ।।
अध्यर्धद्विगुणं वापि पादोनद्विगुणं तु वा ।
त्रयोदशाङ्गुलं तारमग्रेष्टांशैकहीनकम् ।। ३८५ ।।
भिक्षाटने च कङ्काळे हर्यर्धे चार्धनारिके ।
सुखासने च कामारौ दक्षिणामूर्तिविग्रहे ।। ३८६ ।।
न योजयेदुमादेवीं शेषाणां तु सुयोजयेत् ।
कर्णान्तमुत्तमं ज्ञेयं हरास्यान्ते तु मध्यमौ ।। ३८७ ।।
बाह्वन्तमधमं ज्ञेयं देव्यायामं विधीयते ।
मन्वङ्गुलप्रमाणेन सर्वायुधानि कारयेत् ।। ३८८ ।।

तन्माने न शिरश्चक्रं शीर्षदेशे तु विन्यसेत् ।
नृत्तमूर्तिश्च कङ्काळं दक्षिणामूर्तिविग्रहम् ।। ३८९ ।।
कुन्देन्दुस्फटिकाभासमन्यो विद्रुमसन्निभम् ।
देवस्य मुखमानेन पद्मोत्सेधमिति स्मृतम् ।। ३९० ।।
पादाधिकमथाध्यर्धं समं वाब्जस्य चायतम् ।
उत्सेधं द्विगुणं तारमग्रेऽष्टांशैकहीनकम् ।। ३९१ ।।
बेरायामं त्रिभागैकमासने पीठतुङ्गकम् ।
बिम्बायामयुगांशैकमुत्सेधं स्थानकस्य तत् ।। ३९२ ।।
उत्सेधसममायामं पादाधिकमथापि वा ।
आध्यर्धं वा प्रकर्तव्यं चतुरश्रं समन्ततः ।। ३९३ ।।
उत्सेधद्विगुणं वापि सार्धद्विगुणमेव वा ।
पादोनद्विगुणं वापि विस्तारं पूर्ववद्भवेत् ।। ३९४ ।।
आयताश्रमिति प्रोक्तं निर्गमेन युतं तु वा ।
आयामं तु त्रिधा कृत्वा भागं निर्गमनं भवेत् ।। ३९५ ।।
सप्तभागचतुर्भागमथवा निर्गमं भवेत् ।
वीरोत्सेधं परिग्राह्य तिथ्यंशं विभजेत्क्रमात् ।। ३९६ ।।
जन्ममेङ्कांशमित्युक्तं युगांशं जगतिर्भवेत् ।
वेदांशं कुमुदोत्सेधं व्योमांशं पट्टिका भवेत् ।। ३९७ ।।
पक्षांशं कण्ठमित्युक्तं पट्टिकांशैवमुच्यते ।
महापट्टीद्विभागेन कुर्वेतद्भद्रपीठकम् ।। ३९८ ।।
उत्सेधं पूर्ववद्भज्य व्योमांशं जन्म उच्यते ।
जगतीचतुरंशेन वप्रमन्यांशकं भवेत् ।। ३९९ ।।
व्योमांशं पट्टिका ज्ञेया कन्धरं तु द्विभागया ।
एकोनपट्टिकां कुर्यान्महापंट्टिव्ययांशकम् ।। ४०० ।।
व्योमांशमूर्ध्वपट्टी च श्रीकरं त्विति कीर्तितम् ।
स्मृत्यंशा विभजेद्दैर्घ्यमुपानन्त्वेकमुच्यते ।। ४०१ ।।

एकांशेनैव कम्पं तु पद्ममेकेन कारयेत् ।
कम्पमेकेन कर्तव्यं जगती च युगांशकम् ॥ ४०२ ॥
रुद्राक्षांशं तु वप्रं स्यात्सट्टमेकेन कारयेत् ।
पक्षांशे सैव कर्णं तु कम्पमेकेन कारयेत् ॥ ४०३ ॥
ऊर्ध्वपद्ममथांशेन महापट्टिस्तुरीयकम् ।
एतत्सौन्दरमाख्यातं दैर्घ्यमन्वंशकं भवेत् ॥ ४०४ ॥
जन्ममेकांशमन्यांशं पद्ममंशेन पट्टिका ।
चतुरंशेन कर्णं तु व्योमांशेनैव कम्पकम् ॥ ४०५ ॥
ऊर्ध्वपद्ममथांशेन महापट्टिद्वयांशकम् ।
व्योमांशेनोर्ध्वपट्टी च पद्मपीठमिति स्मृतम् ॥ ४०६ ॥
चतुर्विंशत्पञ्चविंशत् षड्विंशद्भागसंयुतम् ।
पीठतारं भजेत्तेषु एकांशं वेशनिर्गमम् ॥ ४०७ ॥
विस्तारं जगतीबाह्यदशांशेनोर्ध्वपट्टिका ।
पङ्क्तित्रययुतं वापि भूतपङ्क्तियुतं तु वा ॥ ४०८ ॥
मुनिपङ्क्तियुतं वापि कर्णभागं तु कारयेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे प्रतिमालक्षणविधिपटल एकादशः समाप्

अथ स्त्रीमानदशतालपटलप्रारम्भः

स्त्रीमानं सम्प्रवक्ष्यामि यथावदनुपूर्वशः ।
उमां सरस्वतीं दुर्गां सप्तमातॄः, उषां महीम् ॥ १ ॥
ज्येष्ठां लक्ष्मीं च मध्येन दशतालेन कारयेत् ।
यावदुत्सेधमानं तु भजेद्विंशच्छताङ्गुलम् ॥ २ ॥
उष्णीषात्केशपर्यन्तं चतुर्मात्रमिति स्मृतम् ।
केशार्धान्तार्धपर्यन्तं त्रयोदशाङ्गुलं भवेत् ॥ ३ ॥
केशान्तादक्षिसूत्रान्तं तत्रिभागैकमुच्यते ।
अक्षिसूत्रात्पुटान्तं च तत्समं चेति कीर्तितम् ॥ ४ ॥
तत्पुटाद्धनुपर्यन्तं तत्समं त्वभिधीयते ।
ग्रीवायामं चतुर्भागं हिक्कासूत्रात् स्तनान्तकम् ॥ ५ ॥
त्रयोदशाङ्गुलं प्रोक्तं तस्मान्नाभेस्तु तत्समम् ।
नाभेस्तु योनिपर्यन्तं त्रयोदशाङ्गुलं भवेत् ॥ ६ ॥
योन्यर्वागग्रकान्तं च षड्विंशति च मात्रकम् ।
जान्वायामं तु भागं स्याज्जङ्घा चाप्यूरु तत्समम् ॥ ७ ॥
तलोत्सेधं चतुर्मात्रं कायमानमिति स्मृतम् ।
मूर्धादिपृष्ठकेशान्तं त्रयोदशाङ्गुलं भवेत् ॥ ८ ॥
मूर्धादिपूर्वकेशान्तं सप्ताङ्गुलमिति स्मृतम् ।
मूर्धादिपार्श्वकेशान्तं रन्ध्रामात्रमिति स्मृतम् ॥ ९ ॥
भूताङ्गुलं भ्रुवायामं तन्मध्ये तारकं यवम् ।
उभयोः पार्श्वयोश्चैव आनुपूर्व्यात्कृशं तदा ॥ १० ॥
भ्रूमध्यमूर्ध्वकेशान्तं द्विमात्रं चेति कीर्तितम् ।
अरूढकार्मुकाकारं भ्रुवोर्लक्षणसंयुतौ ॥ ११ ॥
भ्रूसूत्रनासिकामूलादङ्गुलं चेति कीर्तितम् ।
मध्ये सप्तयवं प्रोक्तं नासिमूलाद् भ्रुवाग्रयोः ॥ १२ ॥
दृगन्तरप्रमाणं च द्विमात्रं द्वियवं भवेत् ।
तत्समं स्याद्दृगायामं तद्विस्तारं तु मात्रकम् ॥ १३ ॥

द्वियवं तूर्ध्ववर्मं तु अधोवर्मं यवार्धकम् ।
कनीनिका यवा दीर्घा विस्तारं तत्समं भवेत् ।। १४ ।।
दृगायामं त्रिधा कृत्वा मध्ये तु कृष्णमण्डलम् ।
ज्योतिर्मण्डलकम्पस्य मध्यमे तु यवं भवेत् ।। १५ ।।
ज्योतिर्मण्डलमध्ये तु दृष्टिर्यूकप्रमाणतः ।
श्वेतरक्तकृष्णैश्च वर्णैर्युक्तं तु लोचनम् ।। १६ ।।
भ्रूसूत्रस्य समं कुर्याच्छ्रोत्रस्योर्ध्वं विशेषतः ।
अपाङ्गात्कर्णमूलान्तं यवहीनं सप्तमात्रकम् ।। १७ ।।
कोलकं कर्णविस्तारमुत्सेधं तु युगाङ्गुलम् ।
नलायामं ततः कुर्याद्रन्ध्रं चतुर्यवं भवेत् ।। १८ ।।
अपरन्नाळविस्तारं यवक्षीणाङ्गलं भवेत् ।
पूर्वन्नाळार्धमात्रं च विस्तारार्धं घनं तयोः ।। १९ ।।
पिप्पली चार्धमात्रं च सुषिरं तत्समं भवेत् ।
त्रियवं कर्णपट्टी च श्रोत्रावटं तु मात्रकम् ।। २० ।।
कर्णयोरन्तरे पूर्वे विंशदङ्गुलमेव च ।
प्राणामूलाग्रतारं तु अर्थमात्रमिति स्मृतम् ।। २१ ।।
अग्रनासस्तु विस्तारं यवोपेतस्तु मात्रकम् ।
नासिकापुटविस्तारमेकैकं तु चतुर्यवम् ।। २२ ।।
चतुर्यवं पुटोत्सेधं बाह्ये चार्थयवं घनम् ।
सुषिरं त्रियवं प्रोक्तं विंशविस्तारमङ्गुलम् ।। २३ ।।
अधस्तात्तस्य विस्तारमर्धं यवमिति स्मृतम् ।
पुटसूत्रादधस्तात्तु अग्रनासि यवं भवेत् ।। २४ ।।
द्वियवं गोजिकातारं गोज्योत्सेधं चतुर्यवम् ।
गोज्यादिनासिकाग्रान्तम् अश्वन्यङ्गुलमुच्यते ।। २५ ।।
उत्तरोष्ठस्य विस्तारं त्रियवं चेति कीर्तितम् ।
आस्यायामं चतुर्मात्रं वक्त्रत्रयसमन्वितम् ।। २६ ।।
यवप्रमाणमेवोक्तमुत्तरोष्ठस्य पालिका ।
अधरोष्ठस्य विस्तारमङ्गुलं स्याद्यवाधिकम् ।। २७ ।।

द्व्यङ्गुलं स्यात्तदायामं यवस्यात्तस्य पालिका ।
अर्धे त्वाकृतिवत्प्रोक्तं पक्वबिम्बफलं भवेत् ।। २८ ।।
ऊर्ध्वे षोडशदन्त स्यात् अधस्तात्तावदेव तु ।
ऊर्ध्वदन्तस्य विस्तारं द्वियवं तत्समासतः ।। २९ ।।
अधोदन्तं तु तस्यार्धं कारयेत्तु विचक्षणः ।
चिबुकं चार्धमात्रं च तन्निम्नं तु यवं भवेत् ।। ३० ।।
चिबुकाष्षड्यवं ज्ञेयमधरोष्ठस्य निर्गमम् ।
अनुचक्रत्रिमात्रं तु ग्रीवं सुवृत्तकं भवेत् ।। ३१ ।।
ग्रीवाग्रस्य तु विस्तारं सप्तमात्रं यवाधिकम् ।
ग्रीवामूलस्य विस्तारमष्टाङ्गुलयवाधिकम् ।। ३२ ।।
बाह्वोश्चैवान्तरं तिर्यग्द्वात्रिंशदङ्गुलं भवेत् ।
पक्षयोरन्तरं तिर्यगष्टादशाङ्गुलं भवेत् ।। ३३ ।।
बाहुमूलस्य विस्तारं सप्तमात्रमिति स्मृतम् ।
हिक्कासूत्रं तयोर्बाहु षड्विंशदङ्गुलायतम् ।। ३४ ।।
दशकोलप्रकोष्ठं तु तस्मान्मध्याङ्गुलाग्रकात् ।
त्रयोदशाङ्गुलायामं तस्यार्धं तालमुच्यते ।। ३५ ।।
शेषं मद्याङ्गुलायामं भागं पञ्चयवाधिकम् ।
देशिन्यायाममित्युक्तं भागं तु षड्यवाधिकम् ।। ३६ ।।
एतत्त्वनामिकादैर्घ्यं भागमङ्गुष्टकायतम् ।
तत्समं तु कनिष्टं स्याद्दशसप्तार्धकाष्ट च ।। ३७ ।।
सप्तार्द्धं षड्यवश्चैव अङ्गुष्ठान्तरमुच्यते ।
विस्तारस्याष्ट भागैकमग्रे चैव विहीनकम् ।। ३८ ।।
सप्तार्धं चतुरर्धं च पञ्चार्धं चतुरर्धकम् ।
त्रियवश्च नखानां तु तारमङ्गुष्ठकात् क्रमात् ।। ३९ ।।
विस्तारं द्वियवाधिक्यं तद्वदायाममुच्यते ।
द्विपर्वोपेतमङ्गुष्ठं शेषाः त्रिपर्वसम्युताः ।। ४० ।।
तलमध्यं त्रिरेखाभिस्संयुक्तं तु प्रकल्पयेत् ।
पक्षाङ्गुलप्रमाणं तु तलमूलघनं भवेत् ।। ४१ ।।

तत् घनस्याष्टभागैकमग्रेचैव विहीतकम् ।
मणिबन्धस्य विस्तारं त्र्यङ्गुलं द्वियवाधिकम् ॥ ४२ ॥
प्रकोष्ठमूलविस्तारं द्वियवं पञ्चमात्रकम् ।
बाहुकाग्रस्य विस्तारं कौशिकाङ्गुलमुच्यते ॥ ४३ ॥
बाहुमध्यम विस्तारं सार्द्धकौशिकमात्रकम् ।
हृदयावधिविस्तारं मन्वङ्गुलमिति स्मृतम् ॥ ४४ ॥
हिक्कामध्यात् स्तनाक्षान्तं रव्यङ्गुलमिति स्मृतम् ।
स्तनयोरग्रमध्यन्तु तत्समञ्चेति कीर्तितम् ॥ ४५ ॥
कुचमण्डल विस्तारं सार्द्धरन्ध्राङ्गुलं भवेत् ।
उन्नतं दशमात्रन्तु तन्मध्ये चाक्षिण्डलम् ॥ ४६ ॥
पक्षाङ्गुलन्तु विस्तारं तन्मध्ये तु स्तनाक्षकम् ।
द्वियवं तस्य विस्तारं वृत्तं दैर्घ्यन्तु तत्समम् ॥ ४७ ॥
जठरस्य तु विस्तारं रुद्राङ्गुलमिति स्मृतम् ।
नाभि प्रदक्षिणावर्तनिम्नं कुर्यात् सलक्षणम् ॥ ४८ ॥
निम्नं यवद्वयं तस्य विस्तारं षड्यवं भवेत् ।
श्रोणिप्रदेशविस्तारं विंशदङ्गुलमुच्यते ॥ ४९ ॥
कटिप्रदेशविस्तारं षड्विंशदङ्गुलं भवेत् ।
योनिमूलस्य विस्तारं शराङ्गुलमिति स्मृतम् ॥ ५० ॥
अग्रेत्वङ्गुलविस्तारमानुपूर्वात् कृशं तथा ।
योनिरेवं प्रकर्तव्यं पिप्पलस्यैव पत्रवत् ॥ ५१ ॥
ऊरुमूलस्य विस्तारं आदित्याङ्गुलमुच्यते ।
तस्य मध्यमविस्तारमेकादशाङ्गुलं भवेत् ॥ ५२ ॥
ऊर्वग्रस्यतु विस्तारं, नवमात्रमिति स्मृतम् ।
जानुमध्यमविस्तारं वस्वङ्गुलमुदाहृतम् ॥ ५३ ॥
जङ्घामूलस्य विस्तारमर्धेन सप्तमात्रकम् ।
जङ्घामध्यम विस्तारं षण्मात्रं समुदीरितम् ॥ ५४ ॥
नाळकस्य तु विस्तारं चतुरङ्गुलमुच्यते ।
अक्षं गुल्फद्वयोर्मध्ये विस्तारन्तु शराङ्गुलम् ॥ ५५ ॥

अङ्गुष्ठाग्रात्तु मध्याक्षं चतुर्यवसमं भवेत् ।
अग्रे तलाग्रविस्तारं कौशिकाङ्गुलमुच्यते ।। ५६ ।।
तलमध्यम विस्तारं शराङ्गुलमुदाहृतम् ।
तलाग्रस्य घनं तत्र पक्षाङ्गुलमुदाहृतम् ।। ५७ ।।
बाह्ये घनं तथाऽग्रन्तु मूलेऽध्यर्थं द्विमात्रकम् ।
पादाङ्गुष्ठायतं भागं तत्समन्तु प्रदेशिनी ।। ५८ ।।
त्रिमात्रं मध्यमायामं (अ)नामिकार्धं द्विमात्रकम् ।
कनिष्ठाङ्गुलस्य दैर्घ्यं कोलकं चेति कीर्तितम् ।। ५९ ।।
द्वादशं च नवाष्टौ च सप्तार्धं षड्यवं तथा ।
अङ्गुष्ठादिकनिष्ठान्तं पादाङ्गुल सुतारकम् ।। ६० ।।
तत्तदङ्गुल विस्तारादर्द्धं स्यान्नाळविस्तरम् ।
कक्षात्पार्ष्ण्यायतं भागमुत्सेधं चतुरङ्गुलम् ।। ६१ ।।
स्फिक् पिण्ड स्यतु विस्तारं सप्ताङ्गुलमिति स्मृतम् ।
ऊरुमूलं समारभ्यतस्योन्नतं गुणाङ्गुलम् ।। ६२ ।।
ककुदः कटिसन्धिश्च षड्विंशन्मात्रमुच्यते ।
कटिसन्धेर्वस्तिदेशस्त्रयोदशाङ्गुलं भवेत् ।। ६३ ।।
अपरे कक्षयोर्मध्ये एकोनविंशदङ्गुलम् ।
ककुद्दीर्घं भागमुक्तं विस्तारं नालमेवतु ।। ६४ ।।
अपरे कक्षयोर्मध्ये एकोनविंशदङ्गुलम् ।
ककुद्दीर्घं भागमुक्तं विस्तारं तालमेव तु ।। ६५ ।।
हिक्कासूत्रोपरि स्कन्धमानं चैव द्विकोलकम् ।
तन्मध्यमे च तस्याग्रे द्विमात्रं चार्धमात्रकम् ।। ६६ ।।
अपरे कर्णयोर्मध्ये अर्धेनैकादशाङ्गुलम् ।
सामान्यलक्षणं चैव विशेषमधुनोच्यते ।। ६७ ।।
द्विभुजाच्च द्विनेत्राच्च किञ्चित्प्रहसिताननम् ।
करण्डमकुटोपेता सर्वाभरणभूषिता ।। ६८ ।।
दुकूलवसनोपेता सर्वावयवसुन्दरी ।
दक्षिणे कटकं हस्तं वामहस्तं प्रलम्बितम् ।। ६९ ।।

आभागं तु पशात्कुर्यात्सूत्रं चैव तु लम्बयेत् ।
नासाग्राल्लम्बयेत्सूत्रं दक्षिणे स्थितपादुके ॥ ७० ॥
गुल्भमध्यस्थितं सूत्रं शिवसूत्रमिति स्मृतम् ।
तत्सूत्रात् स्तनमध्याच्च वामे स्यात्तु गुणाङ्गुलम् ॥ ७१ ॥
तत्सूत्राद्दक्षिणे नाभेरङ्गुलं चेति कीर्तितम् ।
तत्सूत्राद्योनिमध्याच्च दक्षिणे चतुरङ्गुलम् ॥ ७२ ॥
तत्सूत्राद्दक्षिणे जानुर्मध्याच्चैव गुणाङ्गुलम् ।
अङ्गुष्ठयोर्द्वयोर्मध्ये सार्धत्रयोदशाङ्गुलम् ॥ ७३ ॥
तत्रिभागैकभागं तु पार्ष्ण्योः रन्ध्रमिति स्मृतम् ।
कटकाग्रस्य चोत्सेधं स्तनकक्ष समं भवेत् ॥ ७४ ॥
नाभेस्तु मणिबन्धाच्च सार्धत्रयोदशाङ्गुलम् ।
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं सप्तमात्रकम् ॥ ७५ ॥
प्रलम्बितकरस्याग्रादूरुकोच्चं द्विमात्रकम् ।
ऊरुकान्मणिबन्धाच्च द्व्यन्तरं चतुरङ्गुलम् ॥ ७६ ॥
पार्श्वमध्यमबाह्वोश्च द्व्यन्तरं तु रसाङ्गुलम् ।
पीनोरुःपीनगन्धाश्च पीनस्तनसमन्विताः ॥ ७७ ॥
द्विबाहुका द्विनेत्रा च श्यामाभा कमलेक्षणा ।
दक्षिणे चोत्पलं हस्ते वामहस्तं प्रलम्बितम् ॥ ७८ ॥
भवान्याकृतिरेवं स्याद्वागीश्याकृतिरुच्यते ।
श्वेतपद्मासनासीनां शुक्लवर्णां चतुर्भुजाम् ॥ ७९ ॥
जटामकुटसंयुक्तां मुक्ताकुण्डलमण्डिताम् ।
यज्ञोपवीतिनीं हारमुक्ताभरणभूषिताम् ॥ ८० ॥
दुकूलवसनां देवीं नेत्रत्रयसमन्विताम् ।
सदशं दक्षिणे हस्ते वामहस्ते तु पुस्तकम् ॥ ८१ ॥
दक्षिणे चाक्षमाला च करकं वामके करे ।
वागीश्याकृतिराख्याता; दुर्गायाकृतिरुच्यते ॥ ८२ ॥
ललाटलोचनं तस्यास्तिलकं च शिखामणिः ।
शशिखण्डकिरीटं वा मकुटं सकरण्डकम् ॥ ८३ ॥

सनक्रकुण्डलं रत्नमण्डनं कर्णमण्डनम् ।
कर्णावतंसकाकर्णचूलिकापालिकान्वितम् ॥ ८४ ॥
चतुर्भुजसमायुक्तामष्टाभिर्दोर्भिरान्वितम् ।
शूलं खड्गं शरं चक्रं दक्षिणेषु करेषु च ॥ ८५ ॥
पाशखेटकशार्ङ्गश्च शङ्खं वामकरेषु च ।
चतुर्भुजे च वामे तु शङ्खं वरदहस्तकम् ॥ ८६ ॥
चक्रं चाभयहस्तं च दक्षिणे तु समायुता ।
द्विनेत्रा सौम्यवदना महिषस्य शिरस्स्थिता ॥ ८७ ॥
दुर्गायास्त्वाकृतिर्ह्येवं; ब्रह्माण्याकृतिरुच्यते ।
चतुर्भुजा विशालाक्षी तप्तकाञ्चनसन्निभा ॥ ८८ ॥
वरदाभयहस्ता च कमण्डल्वक्षमालिका ।
हंसध्वजा हंसरूढा जटामकुटधारिणी ॥ ८९ ॥
रक्तपद्मासनासीना ब्रह्माणी ब्रह्मरूपिणी ।
त्रिनेत्री शुक्लवर्णा च शूलपाणी वृषध्वजा ॥ ९० ॥
वरदाभयहस्ता च साक्षमालाकरान्विता ।
जटामकुटिनी शम्भोर्भूषणी सा महेश्वरी ॥ ९१ ॥
कुमारसदृशा कन्या वर्णवाहनकेतुभिः ।
वासिकाबद्धमकुटा शक्तिकाङ्कुशधारिणी ॥ ९२ ॥
रक्तवस्त्रा महावीर्या हारकेयूरभूषणी ।
वरदाभयहस्ता च कौमारी कुङ्कमप्रभा ॥ ९३ ॥
पद्मपत्रविशालाक्षी श्यामवर्णा महाबला ।
शङ्खचक्रगदापद्मधरा बाहुचतुष्टयी ॥ ९४ ॥
गरुढद्ध्वजसंयुक्ता वैष्णवी विष्णुभूषिणी ।
कृष्णपीताम्बरा शार्ङ्गी सर्वसम्पत्करी नृणाम् ॥ ९५ ॥
पवित्रालङ्कृतोरस्का पादनूपुरसंयुता ।
सव्येऽभयहलं चैव मुसलं वरमन्यके ॥ ९६ ॥
वराहवक्त्री वाराही यमभूषणभूषणी ।
वज्रहस्तागजारूढा लोचनद्वयसंयुता ॥ ९७ ॥

वस्त्रालङ्कारसम्पन्ना गजेन्द्रध्वजवाहना ।
वरदाभयशक्त्याऽष्टबाहुकेन्दुप्रकीर्तिता ॥ ९८ ॥
दीर्घजिह्वोर्ध्वकेशा च कृष्णका कृष्णदंष्ट्रिका ।
निर्मांसा व्यावृतमुखी चण्डी खण्डेन्दुमण्डिता ॥ ९९ ॥
काली कपालमाला च शवारूढा कृशोदरी ।
कौशिका रोहिणी वासौ चामुण्डा गृध्रकेतुका ॥ १०० ॥
मांसखण्डसुसम्पूर्णं कपालं वामपाणिभाक् ।
शूलाही दक्षिणे चैव वह्निर्वामकरस्थके ॥ १०१ ॥
व्याघ्रचर्माम्बरा काली त्रिनेत्री शङ्खकुण्डली ।
लोकानां मातरस्सप्तमातरः कथिता इमे ॥ १०२ ॥
मातॄणामाकृतिः प्रोक्ता; उषाया आकृतिं शृणु ।
गोक्षीरधवलप्रख्या द्विभुजा च द्विनेत्रिका ॥ १०३ ॥
सुस्तना चारुवदना उषा नीलालकान्विता ।
उषायाश्चाकृतिः प्रोक्ता; धरण्याकृतिरुच्यते ॥ १०४ ॥
चन्द्रपुष्करिणीतीरे चन्द्रमास्सहतारकैः ।
स्वकरैस्थापितं लिङ्गं पूजयामास भक्तितः ॥ १०५ ॥
सुराणां पूजितानां च गीतनृत्तमनोहरैः ।
सन्निधानप्रदं लिङ्गं कावेरीमध्यमे शुभे ॥ १०६ ॥
श्रीमद्दीर्घपुराधीशं सहस्रकिरणं सदा ।
सम्पूज्य लोकवन्द्यं त्वं पदमव्ययमाप्तवान् ॥ १०७ ॥
भद्रकाली स्वयम्पश्चाद्भक्तियुक्ता महेश्वरी ।
सम्पूज्य विधिवल्लिङ्गं सायुज्यं पदमाप्नुयात् ॥ १०८ ॥
इन्द्रपुष्करिणीतीरे स्नात्वा नियतमानसाः ।
क्षालयन्ति समस्तानि पापानि विविधानि च ॥ १०९ ॥
यक्षैश्च किन्नरैश्चैव कालेन वरुणेन च ।
कृशानुना च मरुता भास्करेण हिमांशुना ॥ ११० ॥
व्याघ्रपादहनूमद्भ्यां पातञ्जलपुरस्सरैः ।
वसुभिश्च मरुद्भिश्च दानवैश्च युगे युगे ॥ १११ ॥

दिव्यैस्तपोधनैश्चैव पूजितं लिङ्गमद्भुतम् ।
करण्डमूलसंस्तावं शिवलोकेश्वरं शिवम् ।। ११२ ।।
श्यामवर्णनिभा भास्वद्राजीवसमलोचना ।
हेमयज्ञोपवीता च द्विभुजा च द्विनेत्रका ।। ११३ ।।
सर्वाभरणसंयुक्ता करण्डमकुटान्विता ।
रक्ताम्बरधरा चैव दक्षहस्तोत्पलान्विता ।। ११४ ।।
धरण्याकृतिरेवं स्याज्ज्येष्ठायाकृतिरुच्यते ।
पीनोर्वी पीनगण्डा च पीनस्तनभरोदरी ।। ११५ ।।
नीलकालकसीमान्ता सधम्मिल्लशिरोरुहा ।
स्निग्धाञ्जननिभा रक्ता बिम्बोष्टी तुङ्गनासिका ।। ११६ ।।
द्विभुजा च द्विनेत्री च कुमुदं दक्षिणे करे ।
कन्यापुत्रान्विता देवी दक्षिणेऽदक्षिणेऽपि च ।। ११७ ।।
देव्या बाहुसमं कुर्यात्कन्यकापुत्रकौ क्रमात् ।
पुत्रो वृषभवक्त्रस्तु द्विभुजौ च द्विनेत्रकौ ।। ११८ ।।
ज्येष्ठायाकृतिरित्येवं; पद्मजाकृतिरुच्यते ।
पद्मपत्रासनासीना पद्माभा पद्महस्तिनी ।। ११९ ।।
हैमरत्नोज्वलं नक्रकुण्डलं कर्णमण्डनम् ।
कमण्डलामलमुखी कर्णपूर्णायतेक्षणी ।। १२० ।।
सुयौवना सुरम्याङ्गा कुञ्चितभ्रूस्सविभ्रमा ।
रक्तोष्ठी पीतगन्धा च कञ्चुकाच्छाधितस्तनी ।। १२१ ।।
शिरसोमण्डनं शङ्खं चक्रं सीमान्तपादजम् ।
नागहस्तसमौ बाहू केयूरकटकोज्वलौ ।। १२२ ।।
पङ्कजं श्रीफलं चैव वामके दक्षिणेऽपि च ।
शोभनाम्बरसम्पन्ना श्रोणी च विपुला मता ।। १२३ ।।
मेखला कटिकसूत्राङ्गलक्ष्मी लक्ष्मीविवर्धनी ।।

इति पूर्वकारणागमे प्रतिष्टातन्त्रे स्त्रीमानदशतालविधिपटलो द्वादशः समाप्तः

अथ कनिष्ठदशतालविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण कनिष्ठदशतालकम् ।
ऋषयश्चाश्विनी चैव आदित्येन्दुगुहास्तथा ॥ १ ॥
आर्यं शतमखं चैव चण्डेशं क्षेत्रपालकम् ।
कनिष्ठदशतालेन कारयेत्तु विचक्षणः ॥ २ ॥
बेरायामं तु विभजेद्धिक्कारादिशतांशकम् ।
उष्णीषमङ्गुलं प्रोक्तं केशमानं गुणाङ्गुलम् ॥ ३ ॥
केशान्ताद्धनुपर्यन्तं मध्येन द्वादशाङ्गुलम् ।
गलवृध्यर्धमात्रेण भागं कर्णमिति स्मृतम् ॥ ४ ॥
हिक्कासूत्रात् स्तनान्तं तु अर्धेन द्वादशांशकम् ।
स्तनान्तान्नाभिपर्यन्तं तत्समं चैव कीर्तितम् ॥ ५ ॥
नाभेस्तु मेढ्रमूलान्तमर्धेन द्वादशाङ्गुलम् ।
तन्मेढ्रमूलपूर्वाग्रात् पञ्चविंशतिमात्रकम् ॥ ६ ॥
जानुमानं तु भागं स्याज्जङ्घोर्वोरुसमं भवेत् ।
भागं तु चरणोत्सेधं कायमानमिति स्मृतम् ॥ ७ ॥
उष्णीषात्पृष्ठदेशान्तमर्धेन द्वादशाङ्गलम् ।
उष्णीषात्पार्श्वकेशान्तमष्टाङ्गुलमिति स्मृतम् ॥ ८ ॥
उष्णीषात्पार्श्वकेशान्तं भूतमात्रमिति स्मृतम् ।
केशान्ताद्धनुपर्यन्तं मानं चैव त्रिधा भवेत् ॥ ९ ॥
केशान्तादक्षिसूत्रान्तम् एकांशमिति कीर्तितम् ।
अक्षिसूत्रात्पुटान्तं च तत्समं तु विधीयते ॥ १० ॥
पुटान्तादनुपर्यन्तमेकांशेन प्रकल्पयेत् ।
यवोपेतं त्रिमात्रं तु दृगन्तरं प्रकल्पयेत् ॥ ११ ॥
वस्त्रालङ्कारसम्पन्ना गजेन्द्रध्वजवाहिनी ।
तत्समं नयनायामं भूतमात्रं भ्रुवायतम् ॥ १२ ॥
भ्रूमध्यादूर्ध्वकेशानं यवोपेतं द्विमात्रकम् ।
भ्रूमध्यमे यवं तारमानुपूर्वात्कुशाग्रकम् ॥ १३ ॥

षड्यवन्नेप्रविस्तारमूर्ध्ववर्मं यवार्धकम् ।
अर्धं यवं त्वधो वर्मं करवीरो यवो भवेत् ।। १४ ।।
नेत्रायामं त्रिधा कृत्वा मध्यैकं कृष्णमण्डलम् ।
कृष्णमण्डलमध्ये तु ज्योतिर्मण्डलकं यवम् ।। १५ ।।
दृष्टिःयूकप्रमाणेन तन्मध्ये परिकल्पयेत् ।
तारं भ्रुवाग्रयोर्मध्ये यवं चेति प्रकीर्तितम् ।। १६ ।।
भूसूत्रान्तं तु तस्योर्ध्वे दैर्घ्यश्चार्धयवं भवेत् ।
अपाङ्गात्कार्णमूलान्तं षण्मात्रं चैव षड्यवम् ।। १७ ।।
कर्णोर्ध्वं भ्रुवसूत्रस्य समं चेति प्रकीर्तितम् ।
द्विमात्रंकर्णविस्तारमायामं तु द्विमात्रकम् ।। १८ ।।
पिप्पलीचार्धमात्रं तु तत्समं सुषिरं भवेत् ।
पूर्वान्नाळार्धमात्रं च चत्तारार्धं घनं भवेत् ।। १९ ।।
अपाङ्गान्नाळविस्तारं यवाक्षाणाङ्गुलं भवेत् ।
पिप्पल्यानां तु नाळाग्रं मात्रद्वयमिति स्मृतम् ।
अपाङ्गान्नाळविस्तारं यवाक्षाणाङ्गुलं भवेत् ।। २० ।।
अन्तरालं तु मात्रेण कर्णपट्टी यवद्वयम् ।
द्वयोः कर्णान्तरं पूर्वे द्वात्रिंशश्च त्रिमात्रकम् ।। २१ ।।
पृष्ठे द्विकर्णयोर्मध्ये द्वादशाङ्गुलमुच्यते ।
घ्राणमूलस्य विस्तारं त्रियवं समुदाहृतम् ।। २२ ।।
नासिकाग्रस्य विस्तारमङ्गुलं चेति कीर्तितम् ।
पुटान्तरार्धमात्रं च तुङ्गं तत्सममुच्यते ।। २३ ।।
वंशाग्रतारमर्धांशमूलं तारयवं भवेत् ।
परितो नासिकापाल्याघसमर्धयवं भवेत् ।। २४ ।।
त्रियवं गोजिकायामं तालमर्धाधिकं यवम् ।
घ्राणान्ताद्गोजिकायाश्च यवहीनं द्विमात्रकम् ।। २५ ।।
उत्तरोष्ठस्य विस्तारं त्रियवं चेति कीर्तितम् ।
तस्यायामं चतुर्मात्रं वक्त्रत्रयसमन्वितम् ।। २६ ।।
अधरोष्ठस्य चायामं मात्रद्वयमुदाहृतम् ।
तस्यार्धं तस्य विस्तारं चिबुकं तु यवद्वयम् ।। २७ ।।

विस्तारं तत्समं ज्ञेयं नित्यमर्धयवं भवेत् ।
यवहीनाङ्गुलं तस्मादधरोष्ठस्य निर्गमत् ॥ २८ ॥
ऊर्ध्वपालीमधःफालीं कुर्यादर्धयवेन तु ।
शिवमूलस्य विस्तारं वस्वङ्गुलमिति स्मृतम् ॥ २९ ॥
शिवाग्रस्य तु विस्तारं सार्धसप्ताङ्गुलं भवेत् ।
वक्षस्तलस्य विस्तारं सप्तविंशतिमात्रकम् ॥ ३० ॥
पञ्चविंशतिमात्रं तु बाहुयामं प्रकीर्तितम् ।
आयामं तु प्रकोष्ठस्य एकोनविंशदङ्गुलम् ॥ ३१ ॥
मध्याङ्गुलाग्रात्तस्याग्रादर्धेन द्वादशाङ्गुलम् ।
तस्यार्धं तु कलायामं शेषं मध्याङ्गुलायतम् ॥ ३२ ॥
द्व्यङ्गुलं द्वियवाधिक्यमङ्गुष्ठायाममिष्यते ।
सार्थवेदाङ्गुलं प्रोक्तं नामिकायास्तु दैर्घ्यकम् ॥ ३३ ॥
तथैव नामिकायास्तु भागं कनिष्ठिकायतम् ।
धर्माब्धिवसुषड्भूतं यवमङ्गुष्ठकान् क्रमात् ॥ ३४ ॥
कनिष्ठाङ्गुलमन्तं तु विस्तारं तु विधीयते ।
विस्तारस्याब्जभागैकमग्रतारविहीनकम् ॥ ३५ ॥
विस्तारं तु त्रिधा कृत्वा द्विभागं नखविस्तरम् ।
तत्तारात्तु यवाधिक्यं नखायामं प्रकीर्तितम् ॥ ३६ ॥
अष्टाङ्गुलं द्विपर्वं स्यादन्येषां तु त्रिपर्वकम् ।
तलमध्यत्रिरेखाभिस्संयुक्तं परिकल्पयेत् ॥ ३७ ॥
तलमूलप्रदेशस्य घनं कोलकमुच्यते ।
अष्टांशहीनमग्रे तु तर्घनं परिकीर्तितम् ॥ ३८ ॥
तरायामसमं ज्ञेयं तलस्यैव तु तारकम् ।
मणिबन्धस्य विस्तारं मात्रं तु द्वियवाधिकम् ॥ ३९ ॥
प्रकोष्ठमूलविस्तारं शरमात्रं चतुर्यवम् ।
बाहुमूलस्य विस्तारं षण्मात्रं तु चतुर्यवम् ॥ ४० ॥
बाहुमध्यमविस्तारं सप्ताङ्गुलमुदाहृतम् ।
बाहुमूलस्य विस्तारं वस्वङ्गुलमुदाहृतम् ॥ ४१ ॥

हिक्कासूत्रात्तु कहिन्तं वस्वङ्गुलमुदाहृतम् ।
द्वात्रिंशदङ्गुलं प्रोक्तं कक्षयोरन्तरं ततः ॥ ४२ ॥
हृदयावधिविस्तारम् अष्टादशाङ्गुलं भवेत् ।
उदरस्य तु विस्तारं सप्तदशाङ्गुलं स्मृतम् ॥ ४३ ॥
श्रोणिप्रदेशविस्तारं स्मृत्यङ्गुलमुदाहृतम् ।
षड्यवं नाभिविस्तारं निम्नमर्धयवं भवेत् ॥ ४४ ॥
स्तनमण्डलविस्तारमर्धाङ्गुलमुदाहृतम् ।
चूचुकं द्वियवं प्रोक्तं उत्सेधं तत्समं भवेत् ॥ ४५ ॥
हिक्कामध्यात् स्तनान्ताच्च अर्धेन द्वादशाङ्गुलम् ।
उभयोः स्तनयोर्मध्ये अर्धेन द्वादशाङ्गुलम् ॥ ४६ ॥
मुक्तायामं तु भागं स्याद्विस्तारं तत्समं भवेत् ।
शेषं पञ्चाङ्गुलं दैर्घ्यं मुकुलोत्पलवद्भवेत् ॥ ४७ ॥
कटिप्रदेशविस्तारं स्मृत्यङ्गुलं त्रिपादकम् ।
ऊरुमूलस्य विस्तारमर्धेन द्वादशाङ्गुलम् ॥ ४८ ॥
ऊर्वग्रस्य तु विस्तारं साररन्ध्राङ्गुलं भवेत् ।
जानुमध्यमविस्तारम् अर्धेनाऽष्टाङ्गुलं भवेत् ॥ ४९ ॥
जङ्घामूलस्य विस्तारमर्धेन कौशिकाङ्गुलम् ।
नालकस्य तु विस्तारमर्धेन चतुरङ्गुलम् ॥ ५० ॥
अङ्घ्रोस्तालाग्रविस्तारं कौशिकाङ्गुलमुच्यते ।
तलमध्यमविस्तारं भूताङ्गुलमुदाहृतम् ॥ ५१ ॥
अङ्गुष्ठस्य तु दैर्घ्यं तु चतुरङ्गुलमुच्यते ।
तस्याग्राद्गुल्फमध्याच्च अर्धेन द्वादशाङ्गुलम् ॥ ५२ ॥
नामिकायास्समायामं भागं चैव यवाधिकम् ।
मध्याङ्गुलं ततः प्रोक्तं भागं त्वनामिकायतम् ॥ ५३ ॥
कनिष्ठाङ्गुलकायाममर्धेनैव गुणाङ्गुलम् ।
मुन्यद्रिनवनाड्याख्यत्रयोदशयवं क्रमात् ॥ ५४ ॥
कनिष्ठाद्यङ्गुलीनां च विस्तारं तु विधीयते ।
अग्रे मूले समं प्रोक्तं विस्तारं तु त्रिधा भजेत् ॥ ५५ ॥

द्विभागं नखविस्तारमायामं तत्समं भवेत् ।
तलाग्राङ्गुष्टमूले तु द्विमात्रं तु घनं भवेत् ।। ५६ ।।
कनिष्टमूले तस्याग्रे घनं नवयवं भवेत् ।
अग्र्यपार्ष्ण्यान्तिकं भागं पार्ष्ण्योत्सेधं तु तत्समम् ।। ५७ ।।
पृष्ठमण्डलविस्तारं नवमात्रमुदाहृतम् ।
पक्षोदण्डचवस्तौ तु पञ्चविंशतिमात्रकम् ।। ५८ ।।
ककुद्भागमिति प्रोक्तं भागितं मूलतारकम् ।
हिक्कायाः स्कन्धमूलान्ताच्चतुरङ्गुलमुच्यते ।। ५९ ।।
मध्ये चाब्रो क्रमेणैव कोलकं चैकमात्रकम् ।
कक्षयोरन्तरं पृष्ठे चतुर्विंशतिमात्रकम् ।। ६० ।।
एवं लक्षणमाख्यातं तेषामाकृतिरुच्यते ।
अगस्त्यश्च पुलस्त्यश्च विश्वामित्रः पराशरः ।। ६१ ।।
जमदग्निश्च वाल्मीकी सनत्कुमारश्च सप्त ।
शुक्लवस्त्रधरास्सर्वे शुक्लयज्ञोपवीतकाः ।। ६२ ।।
शुक्लवस्त्रोत्तरीयाश्च जटावल्कलसंयुताः ।
कमण्डल्वक्षहस्ताश्च दीर्घश्मश्रुसमन्विताः ।। ६३ ।।
ऋषीणामाकृतिः प्रोक्ता अश्विन्याकृतिरुच्यते ।
उभेभौ तौ सोपवीतौ च चूडामकुटधारिणौ ।। ६४ ।।
पुल्लरक्तोत्फलाक्षौ च पीतस्रक्शुक्लवस्त्रकौ ।
अश्विन्याकृतिरेवं तु; सूर्याकृतिं शृणुष्वथ ।। ६५ ।।
एकचक्रस्स सप्ताश्वस्ससारथिमहारथम् ।
कृत्वा तु स्थापयेत्सूर्यं पुरुषाकृतिरूपिणम् ।। ६६ ।।
तदर्धं वामतश्श्यामं नारीरूपसमन्वितम् ।
कृत्वा तु स्थापयेत्सम्यक्सर्वाभरणभूषितम् ।। ६७ ।।
आकुञ्चितसुकेश च प्रभामण्डलसंयुतम् ।
मकुटं वा विधातव्यम् अन्यत्सर्वं सुमण्डलम् ।। ६८ ।।
हस्तद्वयलसपद्मं कञ्चुकाञ्चितविग्रहम् ।
एकवस्त्रं द्विदोर्दण्डं स्कन्धे सक्तकराम्बुजम् ।। ६९ ।।

रथोपेतं विना वाथ केवलं पद्मसंस्थितम् ।
पादौ सखेटकौ तस्य स्थिरं पद्मासने स्थितम् ॥ ७० ॥
जातिहिङ्गल्यवर्णस्था(संस्थाप्यं)सूर्यमण्डलम् ।
वैकर्तनो विवस्वांश्च मार्ताण्डो भास्करो रविः ॥ ७१ ॥
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः ।
आदित्यश्च तथा सूर्य अंशुमांश्च दिवाकरः ॥ ७२ ॥
एते वै द्वादशादित्या एषामाकृतिरुच्यते ।
द्विभुजाश्च द्विनेत्राश्च पद्मस्थाः पद्महस्तकाः ॥ ७३ ॥
रक्ताम्बरविवर्णाश्च प्रभामण्डलमण्डिताः ।
उपवीतसमायुक्तास्सर्वाभरणभूषिताः ॥ ७४ ॥
अदित्याकृतिरेवं तु; चन्द्राकृतिरथोच्यते ।
चित्रसिंहासनासीनः कुन्दस्फटिकसन्निभः ॥ ७५ ॥
प्रभामण्डलसंयुक्तो द्विबाहुश्च द्विनेत्रकः ।
आसीनो वा स्थितो वापि कुमुदप्रज्वलत्करः ॥ ७६ ॥
तस्य दक्षिणभागे तु रोहिणी द्विभुजान्विता ।
सस्याङ्कुरनिभा सास्याद्राजीवसमलोचना ॥ ७७ ॥
चन्द्राकृतिःसमाख्याता स्कन्दस्याकृतिरुच्यते ।
रक्ताम्बरसदृक्स्तोकबालो बालार्कसन्निभः ॥ ७८ ॥
शिखण्डमणिका ग्रीवा मांसलः प्रियदर्शनः ।
शक्तिस्तु विलसत्खड्गचक्रपाशप्रसारितः ॥ ७९ ॥
दक्षिणे दक्षिणे रक्तजूटखेटककार्मुकः ।
फताकापिञ्छिकामुष्टिस्तर्जनी च प्रसारिता ॥ ८० ॥
गुहो द्वादशबाहुस्यात्पुरे खेटकपत्तने ।
चतुर्दोभिर्वाथ षड्दोर्भिसंयुक्तं परिकल्पयेत् ॥ ८१ ॥
सशक्तिस्सहयस्सासिस्साक्षमालस्सकुक्कुटः ।
सखेटश्च स षड्बाहुश्चतुर्दो स्वस्ति खेटकः ॥ ८२ ॥
सशक्तिः कुक्कुटस्त्वेकवक्त्रकः कुङ्कुमच्छविः ।
मयूरारोह सर्वत्र भ्रामराद्या द्विबाहुकः ॥ ८३ ॥

नासिकाबद्धमकुटस्सुब्रह्मण्यस्सुसुन्दरः ।
स्कन्दस्याकृतिरेवं तु; आर्यस्याऽकृतिरुच्यते ॥ ८४ ॥
मोहिनीतनय श्शान्तो द्विबाहुश्यामसन्निभः ।
पीठालम्बितशायी तौ तौवामदक्षिणपादकौ ॥ ८५ ॥
वामाङ्घ्रिजानुकोर्ध्वे तु वामहस्तस्थितां कुरु ।
मण्डलीभूतदण्डाग्रो वज्रदण्डधरो युवा ॥ ८६ ॥
स्निग्धनीलाञ्जनाकीर्णःकुन्दळीभूतभूध्वजः ।
गजवाहनकेतुस्याद्विलासी सविलासिनी ॥ ८७ ॥
नीलश्वेताश्च वृषभवाहनो वा चतुर्भुजः ।
रक्तचूडध्वजो वापि सर्वत्र परिकीर्तितः ॥ ८८ ॥
ज्ञानी योगासनासीनो वेदाध्यायायी पवित्रकः ।
सोभयांसोपवीतस्यान्न्यूनावीरासनासितः ॥ ८९ ॥
लीलाविगीतभावी स्यात्सुरभावी सुखासनः ।
वामोरूपरि विन्यस्तवामपादतलेक्षणः ॥ ९० ॥
आर्यस्याकृतिरेवं तु; शक्रस्याकृतिरुच्यते ।
वज्रपाणिर्महावीरः सिंहस्कन्धोवलीलधृक् ॥ ९१ ॥
ललाटोरस्थलायामः पीवरोरुर्महोदरः ।
प्रसन्नवदनश्श्यामवर्णो रक्ताम्बरस्सुखी ॥ ९२ ॥
किरीटी कुण्डली हारकेयूरादिविभूषितः ।
पृथुशीर्षो गजारूढो देवराजश्शचीपतिः ॥ ९३ ॥
शक्रस्याकृतिरेवं तु; चण्डेशस्याकृतिं शृणु ।
चण्डीचण्डेश्वरो रक्तश्वेतमिश्रश्चविस्तरः ॥ ९४ ॥
द्विबाहुस्सजटाचूडशेखरः कर्णकुण्डलः ।
धृतयज्ञोपवीतश्च शुक्लाम्बरधरश्शुचिः ॥ ९५ ॥
सर्वभूषणसम्भूष्यष्टङ्कपाणिरथापि वा ।
अर्धचन्द्रासनासीनः पुष्पमालावलम्बितः ॥ ९६ ॥
चण्डेशस्याकृतिर्ह्येवं; क्षेत्रपालाकृतिं शृणु ।
रक्तोग्रेक्षणः कालमेघवर्णो वाऽपि महाबली ॥ ९७ ॥

द्विबाहुर्वा चतुर्बाहुः अष्टबाहुरथोऽपि वा ।
कपालशूलो द्विभुजो घण्टापाशसमायुतः ॥ ९८ ॥
चतुर्बाहुः क्रमात् क्षेत्रपालो वामे च दक्षिणे ।
अग्निटङ्कौ च खट्वाङ्गाऽभयावष्टभुजे क्रमात् ॥ ९९ ॥
रक्तपद्मासनारूढःश्यामलश्चोग्ररूपकः ।
विसृतोर्ध्वरक्तकेशः कुञ्चितभ्रूस्सविलभ्रमः ॥ १०० ॥
नग्नरूपः, शिरोमलाभूषितः तीक्ष्णदंष्ट्रकः ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे निष्टदशतालविधिपटलःत्रयोदशःसमाप्तः

अथ नवतालोत्तमपटलप्ररम्भः

अथातस्सम्प्रवक्ष्यामि नवतालोत्तमं भवेत् ।
मुखं द्वादशमात्रं स्याद्भागं तु चतुरङ्गुलम् ।। १ ।।
चतुर्भागाष्टवक्त्रैश्च कारयेल्लक्षणान्वितम् ।
विद्येशा लोकपालाश्च अष्टमूर्तिं वसूंस्तथा ।। २ ।।
कारयेदन्यदेवांश्च नवतालोत्तमेन तु ।
अनन्तेशस्तथा सूक्ष्मशिवोत्तमश्चैकनेत्रकः ।। ३ ।।
एकरुद्रस्त्रिमूर्तिश्च श्रीखण्डश्च शिखण्डिनः ।
अष्टविद्येश्वर ह्येते त्रिनेत्राश्च चतुर्भुजाः ।। ४ ।।
अभयं वरदोपेतं टङ्कशूलधरास्तथा ।
रक्तकुन्दस्तथा नीलं पीतं कृष्णं च कुङ्कुमम् ।। ५ ।।
अरुणं चाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम् ।
जटामकुटसंयुक्ता उपवीतसमन्विता ।। ६ ।।
सर्वाभरणसंयुक्ता शान्तवक्त्रसमन्विता ।
विद्येशाकृतिरेवं स्यात्; दिक्पालाकृतिरुच्यते ।। ७ ।।
पूर्वमेव मया प्रोक्ता चाकृतिर्वज्रपाणिनः ।
अर्धचन्द्रासनासीनो ब्रह्मरूपो हुताशनः ।। ८ ।।
प्रज्वलत्काञ्चन ज्योतिः पिङ्गलःपिङ्गलोचनः ।
हेमकूर्चाग्रसदृशः स्वरूपं च शिरोरुहम् ।। ९ ।।
तरुणादित्यसङ्काशं तद्वस्त्रमुपवीतकम् ।
अक्षमाला च शक्तिश्च दक्षिणेऽदक्षिणेऽपि च ।। १० ।।
ज्वालामालाकुलं तीव्रं पार्श्वस्थानेंऽशुमण्डलम् ।
मेषारूढं च कुण्डस्थो योगपट्टेन वेष्टितम् ।। ११ ।।
दक्षिणे तु स्थिता स्वाहा रक्तकुण्डलमण्डिता ।
अग्नेराकृतिरेवं स्याच्छृणु वैवस्वताकृतिम् ।। १२ ।।
दण्डपाणिर्महादीप्तः कालाञ्जनसमच्छविः ।
महामहिषिकारूढो दीप्ताग्निसमलोचनः ।। १३ ।।

यमस्याऽकृतिरेवं तु; राक्षसेशाकृतिं शृणु ।
राक्षसेशो विशालाक्षः पीतवस्त्रः शवासनः ॥ १४ ॥
निर्ऋतिस्सुस्थितासीनः खड्गहस्तो महोज्वलः ।
निर्ऋतेराकृतिर्ह्येवं; वरुणस्याकृतिं शृणु ॥ १५ ॥
शङ्खकुन्देन्दुधवळः पाशहस्तो महाबलः ।
केयूरकुडली हारी पीतवासापास्सुशोभनः ॥ १६ ॥
आसीनो वा स्थितो वाऽपि मकरे वरुणः स्मृतः ।
कुञ्चितभ्रूः, युवा वायुस्ताम्रधृक् धूम्रसन्निभः ॥ १७ ॥
अङ्कुशेन करो वीरः शम्बराम्बकसंयुतः ।
मृगारूढो विधातव्यः सर्वभूषणभूषितः ॥ १८ ॥
एवं सदागतिस्सर्वव्यापकोऽयं समीरिणः ।
मकुटी कुण्डली हारी केयूरी नरवाहनः ॥ १९ ॥
यक्षराजः कुबेरोऽयं तप्तकाञ्चनसन्निभः ।
शङ्खपद्मनिधीयुक्तो गदाहस्तो निधीश्वरः ॥ २० ॥
वृषारूढो महाराजो धवळः पिङ्गलेक्षणः ।
त्रिशूलपाणिरीशानस्त्रिणेत्रो लोकशङ्करः ॥ २१ ॥
दिक्पालाकृतिरेवं स्यादष्टमूर्त्याकृतिं शृणु ।
भवश्शर्वस्तथैशान पशुपत्युग्रको तथा ॥ २२ ॥
रुद्रो भीमो महादेवः कीर्तितास्त्वष्टमूर्तयः ।
चतुर्भुजास्त्रिनेत्राश्च जटामकुटधारिणः ॥ २३ ॥
अभयं वरदोपेताष्टकं कृष्णधराः स्मृता ।
सर्वाभरणसंयुक्ताः रक्तक्षौमधरा इमे ॥ २४ ॥
शुक्लश्यामं च रक्तं च कृष्णं गोक्षीरसन्निभम् ।
काश्मीरं विद्रुमं नीलं भवादीनां तु वर्णकम् ॥ २५ ॥
अष्टमूर्त्याकृतिर्ह्येवं; वसूनामाकृतिं शृणु ।
धरो..धूम्रश्च सोमश्च आपश्चैवानिलो ऽनलः ॥ २६ ॥
प्रत्यूषश्च प्रभासश्च वसवश्चाष्ट एव च ।
द्विभुजाश्च द्विनेत्राश्च असिखेटकसंयुताः ॥ २७ ॥

रक्तवर्णे इमे सर्वे पीतवस्त्रसमन्विताः ।
सर्वाभरणसंयुक्ताः स्निग्धकुन्तलमूर्धजाः ।। २८ ।।
वसूनामाकृतिर्ह्येवम्; अस्त्रमूर्त्याकृतिं शृणु ।
वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम् ।। २९ ।।
गदा त्रिशूलं चक्रं च पद्मं चेति दशायुधम् ।
द्विभुजाश्च द्विनेत्राश्च सर्वाभरणसंयुताः ।। ३० ।।
कृताञ्जलिपुटोपेताः करण्डमकुटान्विताः ।
तत्तद्वक्त्रप्रमाणेन अस्त्रमूर्तिसमन्विताः ।। ३१ ।।
नानावर्णसमायुक्ता नीलजीमूतवर्णकम् ।
नीलकं पद्मरागं च तुषारं चेन्द्रनीलकम् ।। ३२ ।।
शारदाभ्रं च रक्तं च वज्रादीनां तु वर्णकम् ।
जाया शक्तिगता विद्या पाशपद्मे नपुंसके ।। ३३ ।।
शेषाः पुमानिति ख्याताः कीर्तितास्त्वस्त्रमूर्तयः ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे नवतालोत्तमविधिपटलश्चतुर्दशः समाप्तः

अथ नित्याग्निविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि नित्याग्नियजनक्रमम् ।
आग्नेय्यां स्थापयेदग्निं विधिना देशिकोत्तमः ॥ १ ॥
चतुरश्रंवाथ वृत्तं वा मेखलात्रयसंयुतम् ।
अरत्निमात्रविस्तारं तन्मानं बिलमुच्यते ॥ २ ॥
पश्चिमे दक्षिणे वापि योनिरश्वत्थपत्रवत् ।
कुण्डे तु स्थापयेदग्निमविच्छिन्नं तु कारयेत् ॥ ३ ॥
यावन्मूलोपचारं तु तावदग्निं सुपूजयेत् ।
त्रिकालं वैककालं वा द्विकालं वा यजेद्गुरुः ॥ ४ ॥
उत्तमं तु त्रिकालं स्यान्मध्यमं तु द्विकालकम् ।
अधमं त्वेककालं स्यान्नित्याग्नियजनं तथा ॥ ५ ॥
शिवाग्रे वाथ कर्तव्यं सर्वशान्तिकरं परम् ।
मार्जनं प्रोक्षणं तत्र गोमयेनोपलेपयेत् ॥ ६ ॥
अघोरास्त्रेण मन्त्रेण शोधयेत्तु विशेषतः ।
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ॥ ७ ॥
हरिस्तरेद् द्विदर्भैश्च परिषेकमथाऽचरेत् ।
कृत्वा चैवाज्यसंस्कारं पश्चादाघारमेवऽच ॥ ८ ॥
आज्यं हुत्वा हृदाऽऽमन्त्री हविश्चैवाक्षमात्रतः ।
अग्न आयाहि मन्त्रेण शोधयेत्तु विशेषतः ॥ ९ ॥
प्रत्येकं षोडशं वारं द्वात्रिंशद्वा समाचरेत् ।
प्रणवेनैव हुत्वा तु पश्चादिध्माहुतिं चरेत् ॥ १० ॥
चरुं हुत्वा तदन्ते तु व्याहृतिं जुहुयात्ततः ।
ब्रह्मङ्गानि ततो हुत्वा स्विष्टान्तं हि न कारयेत् ॥ ११ ॥
प्रणीताघारसमिधौ ब्रह्मकूर्चं विना चरेत् ।
कुर्याद्धीमान् प्रतिपक्षं स्थालीपाकं तदादितः ॥ १२ ॥
समिदाज्यचरूंश्चैव अष्टाविंशति सङ्ख्यया ।
होमयेत्तु विशेषेण स्थालीपाकं समाचरेत् ॥ १३ ॥

आज्यस्थालीं प्रणीतां च प्रोक्षणीं चैव कल्पयेत् ।
ब्रह्माणं दक्षिणेऽभ्यर्च्य वामे तस्य जनार्दनम् ।। १४ ।।
प्रणवेनैव होतव्यं वेदादींश्चैव होमयेत् ।
कूष्माण्डाहुतिभिर्हुत्वा स्विष्टान्तं नाऽचरेद्बुधः ।। १५ ।।
तत्पुरुषेण मन्त्रेण चरुहोमं समाचरेत् ।
चरुभागं त्रिधाऽऽभज्य गव्याज्येनाभिघारयेत् ।। १६ ।।
एकभागं निवेद्यं स्यादेकभागं हुतं भवेत् ।
भागार्धं चैव बल्यर्धं शेषमाचार्यभोजनम् ।। १७ ।।
अन्येषां भोजने दोषो भुक्तं चेत्कृच्छ्रमाचरेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे नित्याग्निविधिपटलः पञ्चदशः समाप्तः

अथ बलिकर्मविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण बलिकर्म सुयोजयेत् ।
बकारं बलवर्धन्यां लिकारं धान्यसंग्रहः ॥ १ ॥
स्वरद्वयसमायुक्तं बलिशब्दः प्रकीर्तितः ।
पृषादीबलिपीठान्तं बलिं कृत्वा विशेषतः ॥ २ ॥
अक्ष्माद्वयप्रमाणेन बलिकारेऽत्र कीर्तितम् ।
पतङ्गं च भुजङ्गं च ऊर्ध्वाधस्सम्पूजयेत् ॥ ३ ॥
द्विभुजौ च द्विनेत्रौ च सर्वाभरणभूषितौ ।
रक्ताक्षौ रक्तवर्णौच तद्वणाम बरभूषितौ ॥ ४ ॥
दक्षिणे तु शिरोन्यस्त्वा पादौ चैवोत्तरे तथा ।
द्विनेत्रौ पीतवर्णौ च भद्रकामौ भयङ्करौ ॥ ५ ॥
कृताञ्जलिपुटोपेतौ शोधयेत्तत्प्रजापतेः ।
नित्यं दक्षिणपादे च अपदानादपादतः ॥ ६ ॥
ग्रामे च द्विभुजं विद्यान्नागरादौ चतुर्भुजाः ।
स्वायंभवे च दैव्ये च आर्षे गाणे तथैव च ॥ ७ ॥
द्विभुजे च द्विनेत्रे च श्वेतोभौ चोग्ररूपकौ ।
नित्योत्पादानकौ चैव व्याळाभरणभूषितौ ॥ ८ ॥
द्विबाहू भद्रकायौ तु मातुलुङ्गसमप्रभौ ।
पूजयेद्द्वारपार्श्वे तु ग्रामादिषु च पूर्ववत् ॥ ९ ॥
द्वारस्य मध्यमे चैव दक्षिणे तु तथोत्तरे ।
स्थानशुद्धिं ततः कृत्वा तस्योर्ध्वे वक्त्रं कल्पयेत् ॥ १० ॥
तस्योर्ध्वे बलिदानं तु द्वारदेवान् सुवृद्धये ।
नारिकेळप्रमाणं तु उत्तमस्य विधीयते ॥ ११ ॥
कपित्थस्य फलं कृत्वा मध्यमं तु प्रमाणतः ।
कुक्कुटाण्डप्रमाणं स्याद्बलिं सर्वत्र दापयेत् ॥ १२ ॥
स्वयम्भूर्दैविकं चैव दि(दे)व्यं मानुषमार्षकम् ।
राक्षसं बाणलिङ्गं च सप्तधा लिङ्गमुच्यते ॥ १३ ॥

दैविकं तु भवादीनां मित्रादीनां तु मानुषम् ।
भूतादीनां स्वयम्भूतमार्षकं परिवारकैः ॥ १४ ॥
वसूनां बाणलिङ्गं तु विद्येशानां तु देविकम् ।
यक्षादेः राक्षसं लिङ्गं बलिदेवाः प्रकीर्तिताः ॥ १५ ॥
भवश्शर्वस्तथैशानः पशुपतिर्नील एव च ।
उग्रो भीमो महादेव इत्यष्टा मूर्तयस्तथा ॥ १६ ॥
पीतं च कुङ्कुमं कृष्णं नृणां भिन्नाञ्जनप्रभम् ।
नीलं श्वेतं तथा रक्तं अष्टमूर्तेश्च वर्णकम् ॥ १७ ॥
अभयां वरदास्सर्वे पाशाङ्कुशचतुर्भुजम् ।
त्रिनेत्रं मेघवर्णं च द्विपादं चैव नूपुरम् ॥ १८ ॥
जटामकुटसंयुक्तमष्टमूर्तिस्वरूपकम् ।
देविकाख्यं च लिङ्गं तु बलिदेवाः प्रकीर्तिताः ॥ १९ ॥
इन्द्राग्नी च यमश्चैव निर्ऋतिर्वरुणस्तथा ।
वायुस्सोमस्तथैशान्यो ब्रह्मा विष्णुश्च लोकपाः ॥ २० ॥
मानुषे लिङ्गवत्कृत्य लोकपालबलिस्तथा ।
संवर्तं पूर्वतो न्यस्य चोन्मत्तमग्निगोचरे ॥ २१ ॥
कुण्डोदरं दक्षभागे नैर्ऋतौ दीर्घकायकौ ।
वारुण्यां ह्रस्वपादं तु वायव्यां सिंहरूपकम् ॥ २२ ॥
सोमे गजमुखं प्रोक्तं ऐशान्यां तु प्रियं मुखम् ।
श्वेतं पीतं तथा कृष्णं रक्तं श्यामं च धूम्रकम् ॥ २३ ॥
अतिरक्तं तथा नीलं भूतवर्णमिति स्मृतम् ।
उग्ररूपसमायुक्तं द्विभुजं च द्विपादकम् ॥ २४ ॥
खड्ग(दण्ड)हस्तं तथा सर्वे भूतरूपमिति स्मृतम् ।
अष्टभूतमिदं प्रोक्तं स्वायम्भुवबलिं ददेत् ॥ २५ ॥
मध्यहारं च हारायां वृषभादिप्रदक्षिणम् ।
वृषभं पूर्वतस्स्थाप्य आग्नेय्यां पावकस्तथा ॥ २६ ॥
मातृणां दक्षिणे भागे वीरविघ्नसमन्वितम् ।
विघ्नेशं नैर्ऋते भागे सुब्रह्मण्यं तु पश्चिमे ॥ २७ ॥

ज्येष्ठायां वायुदिग्भागे दुर्गास्थानं तथोत्तरे ।
चण्डेशमीशदिग्भागे भास्करं पूर्वतो दिशि ॥ २८ ॥
कूपस्थानं तथैशान्यामाग्नेय्यां पचनालयम् ।
परिवादालयं सर्वं बाह्ये बाह्योत्तरे तथा ॥ २९ ॥
भूतपीठस्य पार्श्वे तु इन्द्रं सम्पूजयेत्ततः ।
आग्नेय्यां दिशि पर्यन्तं स्वस्वस्थाने विशेषतः ॥ ३० ॥
द्वारस्योत्तर पार्श्वे तु ब्रह्माणं तु प्रकीर्तितम् ।
पितामहेशयोर्मध्ये आदित्या द्वादशोच्यते ॥ ३१ ॥
भास्करं क्षेत्रपालौ च शाङ्करे वा विशेषतः ।
शक्रपावकयोर्मध्ये अश्विन्यौ द्वौ तु विन्यसेत् ॥ ३२ ॥
आग्नेययमयोर्मध्ये संस्थाप्य सप्तरोहिणीम् ।
याम्यनैर्ऋतयोर्मध्ये पितृस्थानं विधीयते ॥ ३३ ॥
निर्ऋतिवारुणयोः मध्ये अप्सरोगण एव च ।
वरुणवायव्ययोर्मध्ये मुनीनां स्थानमुत्तमम् ॥ ३४ ॥
वायव्यसोमयोर्मध्ये अष्टा वसुधरास्तथा ।
सोममिशानयोर्मध्ये रुद्रेकादश एव हि ॥ ३५ ॥
प्रतिमे वापि पीठे वा इष्टिके वा प्रपूजयेत् ।
बलिपीठं ततः कृत्वा चतुर्दिक्षु विशेषतः ॥ ३६ ॥
बाह्याभ्यन्तरयोः पीठौ पूर्वद्वारे तु विन्यसेत् ।
अन्तस्थसर्वदेवास्तु पिशाचाद्बाह्यपीठके ॥ ३७ ॥
यक्षाणां दक्षिणे पीठे राक्षसानां तु पश्चिमे ।
गन्धर्वाणां तु सौम्ये तु भूतानां पूर्वमेव च ॥ ३८ ॥
तदूर्ध्वे पद्ममित्युक्तमष्टशक्तिर्दळे न्यसेत् ।
सर्वदेवमयं पीठमग्रपीठं प्रकल्पयेत् ॥ ३९ ॥
ततः पुरस्थितं पीठं बलिं दद्याद्विशेषतः ।
आमोदश्च प्रमोदश्च प्रमुखोदुर्मुखस्तथा ॥ ४० ॥
अविघ्नो विघ्नकर्ता च बलिपीठाधिदेवताः ।
अविघ्नं कर्णिकामध्ये आमोदं पूर्वदिग्दळे ॥ ४१ ॥

याम्ये चैव प्रमोदं तु प्रमुखे पश्चिमे दळे ।
दुर्मुखं तु दळं सौम्ये विघ्नकर्तारमीशके ॥ ४२ ॥
आमोदं श्यामवर्णं तु प्रमोदं कृष्णवर्णकम् ।
प्रमुखं स्फटिकाभासं दुर्मुखं कुङ्कुमप्रभम् ॥ ४३ ॥
अविघ्नो विद्रुमाभासो विघ्नकर्ताञ्जनप्रभः ।
द्विभुजाश्च द्विनेत्राश्च टङ्कपाशधरास्तथा ॥ ४४ ॥
उग्रदृष्टिसमायुक्ताः भीमरूपा महाबलाः ।
सर्वाभरणसंयुक्ताः नागयज्ञोपवीतकाः ॥ ४५ ॥
प्रसादाभिमुखास्सर्वे दीर्घदन्ष्ट्रोत्कटाननाः ।
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा ॥ ४६ ॥
गर्भगेहश्च पश्चाच्च चतुष्कं चोत्तमोन्नतम् ।
त्रिभागं मध्यमं प्रोक्तं द्विभागमधमं भवेत् ॥ ४७ ॥
द्वारोत्सेधसमं श्रेष्ठं तत्त्रिपादं तु मध्यमम् ।
द्वारार्थमधमं विद्धि विस्तारोत्सेधतत्समम् ॥ ४८ ॥
विस्तारं सुविभज्याथ हाटकेन तु विंशति ।
भागेनोपानमेकेन चतुर्भिर्जगती तथा ॥ ४९ ॥
कम्पं कृत्वा तु केतूर्ध्वे तदूर्ध्वे केनपट्टिका ।
कण्ठां कुर्याच्चतुर्भागे केनैवोद्येनपट्टिका ॥ ५० ॥
महापट्टि तु द्व्यंशेन द्व्यंशाब्जदळकोन्नतम् ।
कर्णिकामेकभागेन प्रोत्तमुत्सेधमुत्तमम् ॥ ५१ ॥
बलिपीठमितिख्यातं सर्वेषां बलितृप्तये ।
यक्षराक्षसपैशाचभूतगन्धर्वकिन्नराः ॥ ५२ ॥
सर्वदेवऋषीणां तु बलिं सर्वत्र तृप्तये ।
आर्षं तु परिवाराख्यबलिं दद्यात्प्रकीर्तिताः ॥ ५३ ॥
धरो धृवश्च ह्लोमश्च आपश्चैवाऽनिलोऽनलः ।
प्रत्यूषश्च प्रभावश्च वसवश्चाष्ट एव च ॥ ५४ ॥
बाणलिङ्गं तथा योग्यं बलिं दद्यात्प्रकीर्तिताः ।
अनन्तेशस्तथा सूक्ष्मश्चैकनेत्रश्शिवोत्तमः ॥ ५५ ॥

एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ।
अष्ट विद्येश्वराश्चैव दिव्यलिङ्गबलिं तथा ।। ५६ ।।
पूर्वे यक्षगणाश्चैव राक्षसा गणगाणवाः ।
पिशाचगणदाक्षिण्या गाणवं गणनैर्ऋते ।। ५७ ।।
किन्नरो गणवारुण्ये पितृणां गणं वायवे ।
दानवानां गणे सौम्ये ऐशान्याङ्गगणा स्मृताः ।। ५८ ।।
अष्टानां गणमेवोक्तं बलिदानं तु रक्षसाम् ।
नित्यानां वसवानां तु प्रथमद्वारि पूजयेत् ।। ५९ ।।
नन्दिनं च महाकाळं द्वितीयद्वारि पूजयेत् ।
आमोदं च प्रमोदं च तृतीयद्वारि पूजयेत् ।। ६० ।।
गणेशं गुहमेवोक्तं चतुर्थे द्वारि पूजंयेत् ।
द्वारदेशं समाख्यातं बलिं तत्र प्रकल्पयेत् ।। ६१ ।।
प्रस्थपां बलिः प्रोक्तं तण्डुलस्य प्रमाणतः ।
नित्यं नैमित्तिकं चैव बलिं कृत्वा विशेषतः ।। ६२ ।।
त्रिसन्ध्यायां बलिं कृत्वा अन्यकाले न कारयेत् ।
अथवाऽन्यप्रकारेण काम्यार्थे तु बलिं ददेत् ।। ६३ ।।
महाहविर्निवेद्याऽन्ते बलिं दद्याद्विशेषतः ।
नैमित्तिकोपसन्ध्यास्तु हविष्यं च बलिं ददेत् ।। ६४ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे बलिकर्मविधिपटलष्षोडशः समाप्तः

अथ पञ्चामृतक्षीराभिषेकविधिपटलप्रारम्भः

इक्षुसारं च रूपं स्यान्मधुना विजयं तथा ।
घृतानां पुण्यमेवं तु पयसाऽऽयुर्विवर्धनम् ॥ १ ॥
आरोग्यं दधिसंयुक्तं पञ्चामृतफलं तथा ।
यावन्निश्चित्यममृतं तत्समं तु प्रकल्पयेत् ॥ २ ॥
पञ्चप्रस्थाधमं प्रोक्तं द्विगुणं मध्यमं भवेत् ।
त्रिगुणं चोत्तमं प्रोक्तं पञ्चामृतं तु कल्पयेत् ॥ ३ ॥
इक्षुर्मधु घृतं चैव पयोदधिक्रमेण तु ।
प्रस्थं प्रस्थं प्रमाणं स्यात्पञ्चामृतमिति स्मृतम् ॥ ४ ॥
इक्षुसारं च मध्ये तु मधूनां पूर्वमेव च ।
घृतं वै दक्षिणे स्थाप्य पश्चिमे तु पयस्तथा ॥ ५ ॥
दध्युत्तरे च कृत्वा वै पञ्चामृतं तु कल्पयेत् ।
सद्यादीशानमन्त्रं स्यान्मध्यादीनि कृतस्य तु ॥ ६ ॥
गन्धं पुष्पं तथा कूर्चं धूपदीपं तथा भवेत् ।
मूलमन्त्रेण सहजं शिवमन्त्रं तथोच्यरेत् ॥ ७ ॥
पञ्चगव्यान्तके पूज्य पञ्चामृतस्य कल्पयेत् ।
सर्वव्याधिविनिर्मुक्तं सर्वपापक्षयं भवेत् ॥ ८ ॥
अष्टोत्तरशतप्रस्थैः पूजयेत् क्षीरमेव च ।
द्विगुणं मध्यमं प्रोक्तं उत्तमं त्रिगुणं भवेत् ॥ ९ ॥
घृताभिषेकसंयुक्तं सर्वशान्तिकरं शुभम् ।
क्षीराभिषेकसंयुक्तं जिह्वा सहस्रं भोजफ़येत् ॥ १० ॥
फलाभिषेकसंयुक्तं सत्फलं पापनाशनम् ।
द्वादशानां तु भारं स्यादुत्तमं परिकीर्तितम् ।
तदर्धं मध्यमं प्रोक्तं ततर्धमधमं तथा ॥ ११ ॥
यथेष्टं काम्यमित्युक्तं कुर्यात् क्षीराभिषेचनम् ।
अनावृष्टौ ज्वरग्रस्ते, सर्वव्याधिनिवारणे ॥ १३ ॥
अर्कवारादिसंयुक्तं सोमवारादिसंयुतम् ।
जन्मनक्षत्रकर्तव्यं पूजयेत्परमेश्वरम् ॥ १४ ॥
मासं वाप्यर्धमासं वा सप्तवारमथापि वा ।
पञ्चाहं वा त्रयाहं वा एकाहं वा प्रपूजयेत् ॥ १५ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे पञ्चामृतक्षीराभिषेकविधिपटलस्सप्तदशः समाप्तः

अथ करणाधिकारविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि करणानां तु लक्षणम् ।
यागाङ्गाश्च तथा सर्वे करणं चेति कीर्तितम् ॥ १ ॥
अरणीलक्षणं चैव सृक्स्रुवस्य च लक्षणम् ।
लक्षणं तोरणानां च अष्टमङ्गळलक्षणम् ॥ २ ॥
आयुधानां प्रमाणं च कूर्मासनस्य लक्षणम् ।
खट्वाया लक्षणं चैवोलूखलस्य तु लक्षणम् ॥ ३ ॥
शिबिकालक्षणं चैव डोलया लक्षणं ततः ।
लक्षणं दीपमालायाः पुष्पाधारस्य लक्षणम् ॥ ४ ॥
भेरिकालक्षणं चैव कर्तृकाफलकाविधम् ।
समिधो लक्षणं चैव परिधीनां तु लक्षणम् ॥ ५ ॥
दर्भाणां लक्षणं चैव कूर्चानां लक्षणं ततः ।
लक्षणं विष्टरस्याग्रं लम्बकूर्चस्य लक्षणम् ॥ ६ ॥
परिस्तरणदर्भाणां दर्भमालाप्रमाणकम् ।
प्रोक्षणीलक्षणं चैव पवित्रस्य तु लक्षणम् ॥ ७ ॥
पाद्यप्रातस्य मानस्य पात्रस्याऽचमनाय च ।
लक्षणं चार्घ्यपात्रस्य पात्रयोर्गन्धपुष्पयोः ॥ ८ ॥
लक्षणं घृतपात्रस्य प्रणीतालक्षणं तथा ।
प्रोक्षणीलक्षणं चैव शिवकुम्भस्य लक्षणम् ॥ ९ ॥
वर्धनीलक्षणं चैव शिवकुम्भस्य लक्षणम् ।
लक्षणं कलशस्यैव शरावस्य तु लक्षणम् ॥ १० ॥
कुण्डिकालक्षणं चैव हविःपात्रस्य लक्षणम् ।
लक्षणं चरुपात्रस्य विधानस्य तु लक्षणम् ॥ ११ ॥
पात्रस्य चोपदंशानां जलाधारस्य लक्षणम् ।
तरङ्गलक्षणं चैव गात्रवेष्टनलक्षणम् ॥ १२ ॥
वितानलक्षणं चैव ध्वजानां लक्षणं ततः ।
उष्णीषं चोत्तरीयस्य वस्त्राणां चैव लक्षणम् ॥ १३ ॥

पर्यङ्कानां विधिं चैव उपधानस्य लक्षणम् ।
कक्ष्याया लक्षणं चैव प्रच्छन्नपटलक्षणम् ।। १४ ।।
छत्रस्य लक्षणं चैव पिञ्छचामरयोस्तथा ।
मयूरव्यजनं चैव दुकूलव्यजनस्य च ।। १५ ।।
लक्षणं धूपपात्रस्य घण्टायाश्चैव लक्षणम् ।
लक्षणं दीपपात्रस्य दीपाधारस्य लक्षणम् ।। १६ ।।
नीराजनस्य पात्रस्य महाघण्टासुलक्षणम् ।
स्थलिकालक्षणं चैव दध्यास्तु लक्षणं ततः ।। १७ ।।
दीपादिलक्षणं चैव पाद्याधारस्य लक्षणम् ।
तथाचाऽचमनाऽधारापात्रस्यैव तु लक्षणम् ।। १८ ।।
लक्षणं दर्पणस्याथ पादुकायाश्च लक्षणम् ।
पात्रस्य लक्षणं चैव, जलद्रोण्याश्च लक्षणम् ।। १९ ।।
यन्त्रिकालक्षणं चैव, उल्कालक्षणमेव च ।
गोळकापट्टपुष्पाणां, मकुटस्य च लक्षणम् ।। २० ।।
हुतप्रमाणं सर्वेषां द्रव्यानां च प्रजापते ।
शमी वा पिप्पलं वापि गृह्यारण्यतरु पुनः ।। २१ ।।
अब्ध्यङ्गुलं तु विस्तारं तिथ्यङ्गुलं तु दैर्घ्यकम् ।
रसाङ्गुलघनप्रोक्ता दैर्घ्याग्रा सुदृढं समा ।। २२ ।।
प्रथमस्य परीणाहं भूताङ्गुलमिति स्मृतम् ।
द्वाविंशदङ्गुलं दैर्घ्यं कीलं क्रव्याय साग्रके ।। २३ ।।
युगाङ्गुलेन मूले तु कीलं स्वेनैव कारयेत् ।
प्रथमस्याग्रके मूले त्वयः (यः) पट्टेन वेष्टयेत् ।। २४ ।।
सप्ताङ्गुलं तु विस्तारं तदर्धं घनमुच्यते ।
उभयोः पार्श्वयोश्चैव मुष्टिरष्टाङ्गुलं भवेत् ।। २५ ।।
भूताङ्गुलपरीणाहं सर्वत्रैव सुवृत्तकम् ।
पञ्चादशाङ्गुलायामं त्रिवृद्गोपालरज्जकम् ।। २६ ।।

तन्तुना वाऽथ कर्तव्यं कनिष्ठाङ्गुलिनाहकम्
अरणीलक्षणं प्रोक्तं; सृग्लक्षणमथ शृणु ॥ २७ ॥
सुक्स्रुवौ खदिरेणैव शम्या वैकङ्कतेन वा ।
अथवा याज्ञिकैर्वृक्षैः कर्तव्यौ लक्षणान्वितौ ॥ २८ ॥
सङ्गृह्य मध्यसारं तु द्विधा कृत्वा तरुं पुनः ।
तत्पार्श्वे बिलमाख्यातमव, कन्निर्व्रणं धृढम् ॥ २९ ॥
द्वात्रिंशदङ्गुलायामं सप्ताङ्गुलसुविस्तृतम् ।
तद्घनं तु चतुर्मात्रमेवं पादं च तत्र वै ॥ ३० ॥
मध्येसूत्रं प्रसार्यादौ मुखायामं षडङ्गुलम् ।
अग्रभागं त्रिभागैकं मुखविस्तारमुच्यते ॥ ३१ ॥
यवत्रयप्रमाणेन पट्टिकामुखपार्श्वयोः ।
यवमानेन निम्नं स्यान्मुखं सर्वमशेषकम् ॥ ३२ ॥
पक्षाङ्गुलं गळायामं विस्तारं तु शराङ्गुलम् ।
सप्ताङ्गुलाऽऽयता वेदी विस्तारं तत्समं भवेत् ॥ ३३ ॥
बिलं सुवृत्तं मध्ये तु चाङ्गुलद्वयमानतः ।
तद्विस्तारसमं गर्तं सुवृत्तं बिलमुच्यते ॥ ३४ ॥
पट्टिकाबिलबाह्ये तु यवमानघनान्वितम् ।
तद्बाह्येऽष्टदळं पत्रं यवनिम्नं विचित्रितम् ॥ ३५ ॥
वेदिकायास्तु परितः पट्टिका त्रियवा घनाः ।
बिलादूर्ध्वमुखात्खात्वा कनिष्ठाङ्गुलमानतः ॥ ३६ ॥
तारेण वाऽथ ताम्रेण नाळं कृत्वा तु योजयेत् ।
पक्षाङ्गुलप्रमाणेन पद्माकारं तु गण्डिका ॥ ३७ ॥
गण्डिकैकाङ्गुला वृत्ता तन्नाहं चाब्धिमात्मकम् ।
रव्यङ्गुलं तु दण्डोच्चं तस्यार्धन्नाहमुच्यते ॥ ३८ ॥
तन्मूले कलशाकारमङ्गुलद्वयमानतः ।
धर्माङ्गुलं तु नाहं स्यात्तस्याधस्ताच्च पादयुक् ॥ ३९ ॥

वेदिकायास्त्वधः पद्मं पृष्ठाकारं सकर्णिकम् ।
गजोष्ठपृष्ठसदृशमास्यं पृष्ठाकृतिर्भवेत् ॥ ४० ॥
एवं सङ्ग्राह्य तच्छेषं परित्यज्य दृढं यथा ।
एवं स्रुग्लक्षणं प्रोक्तं; स्रुवलक्षणमुच्यते ॥ ४१ ॥
द्वाविंशदङ्गुलायामं दण्डनाहं च साङ्गुलम् ।
मूलाद्ग्रीवान्तरं यावत्र्यङ्गुलं ग्रीवनाहकम् ॥ ४२ ॥
मूलवच्चाग्रनाहं स्याद्द्विबिलं नासिकाकृतिः ।
पूरितं करिषार्थेन बिलमानं प्रकीर्तितम् ॥ ४३ ॥
पुष्कराधः प्रकर्तव्या गण्डिका द्वियवोन्नता ।
दक्षिणेन करेणैव वामिकां तु सुवक्रिकाम् ॥ ४४ ॥
अङ्गुष्ठां च सुपर्वं स्यात्तर्जनी मध्यमाङ्गुली ।
संयुक्तौ चोच्छ्रितौ द्वौ च उच्छ्रिता च कनिष्ठिका ॥ ४५ ॥
करणे तेन मन्त्रज्ञः स्रुवेणैव तु होमयेत् ।
स्रुग्बिलं तु घृतेनैव पूरयित्वा बिलोपरि ॥ ४६ ॥
स्रुताग्रेणैव तन्त्रेण पुटं स्यात्तु विधाय च ।
उत्तानौ तु करौ कृत्वा वेणीबन्धं तु कारयेत् ॥ ४७ ॥
उच्छ्रितौ द्वौ तु तर्जन्यौ तथा चैव कनिष्ठिकौ ।
वक्राङ्गुष्ठौ स्रुवौ ग्राह्य द्वाभ्यां पूर्णाहुतिः हनेत् ॥ ४८ ॥
एवं स्रुक्स्रुवयोः प्रोक्तं; तोरणानन्ततश्शृणु ।
भूतहस्तसमुत्सेधं विस्तारः स्यात्तदर्धकम् ॥ ४९ ॥
करप्रमाणं शूलं स्यादङ्घ्रिनाहं रसाङ्गुलम् ।
कन्यासायममेतद्धि वक्ष्यतेऽतःपरं क्रमात् ॥ ५० ॥
भूतहस्तं समारभ्य नवहस्तान्तकं क्रमात् ।
दीर्घं तालाधिकं कुर्यात्तेषामर्धं तु विस्तृतम् ॥ ५१ ॥
तस्मात्पक्षाङ्गुलाधिक्यान्नाहं प्रत्येकमाचरेत् ।
तोरणानां च सर्वेषां शूलं वै हस्तमानकम् ॥ ५२ ॥

नवधा तोरणं प्रोक्तं शृणुष्वाऽथाष्टमङ्गलम् ।
याज्ञिकं वृक्षमादाय कारयेल्लक्षणान्वितम् ।। ५३ ।।
कलाङ्गुलसमायामं विस्तारं तु तदर्धतः ।
पद्मासनमधस्तात्तु विस्तारार्धेन कारयेत् ।। ५४ ।।
श्रीवत्सादीनि तस्योर्ध्वे लेखयेत्तु विशेषतः ।
श्रीवत्सं मत्स्ययुग्मं च स्वस्तिकं दर्पणं गजम् ।। ५५ ।।
पूर्णकुम्भं च वृषभं दीपं स्यादष्टमङ्गलम् ।
अष्टमङ्गलमेवं स्यादस्त्राणां लक्षणं शृणु ।। ५६ ।।
हैमराजतताम्रैर्वा अयसा पादपेव वा ।
एतेष्वेकतमेनैव कारयेल्लक्षणान्वितम् ।। ५७ ।।
षोडशाङ्गुलमायामं षडङ्गुलं तु विस्तृतम् ।
तदर्धं तु घनं प्रोक्तं सुदृढं सुव्रणम् ऋजुम् ।। ५८ ।।
चतुरङ्गुलमानेन मध्यमे गण्डिकात्रयम् ।
गण्डिकानां तु नाहं तु प्रत्येकं द्वादशाङ्गुलम् ।। ५९
कृताङ्गुलप्रमाणेन शूलं कुर्यात्तदग्रके ।
अर्धाङ्गुलप्रमाणेन पत्रतारं प्रकीर्तितम् ।। ६०
पक्षपत्रद्वयं कृत्वा अर्धचन्द्राकृतिर्भवेत् ।
मध्यपत्रमृजुं प्रोक्तं पत्रतारं यवद्वयम् ।। ६१
पत्रतारेण मूले तु पादायामं प्रकीर्तितम् ।
द्विगुणं मध्यपत्रस्य पादायामं प्रकीर्तितम् ।। ६२
अर्धाङ्गुलप्रमाणेन पत्राणां तु घनं भवेत् ।
शेषं दण्डमिति प्रोक्तं नाहं चैव नवाङ्गुलम् ।। ६३ ।।
एवं मूले तु कर्तव्यं त्रिशूलं लक्षणान्वितम् ।
वज्रस्य लक्षणं प्रोक्तं; शक्तिलक्षणमुच्यते ।। ६४ ।।
विकाराङ्गुलमायामं विस्तारं तु युगाङ्गुलम् ।
तस्यार्धं तु घनं मध्ये गण्डिका चतुरङ्गुलम् ।। ६५ ।।

तदूर्ध्वे तदधः कृत्वा त्रिशूलं मध्यपत्रवत् ।
शक्तिलक्षणमेवं तु; दण्डलक्षणमुच्यते ॥ ६६ ॥
कल्पाङ्गुलसमायामं मूलं वेदाङ्गुलेन तु ।
गण्डिका कारयेद्वृत्तं विस्तारं चतुरङ्गुलम् ॥ ६७ ॥
कृताङ्गुलं भवेन्मुष्टिस्तन्नाहं कौशिकाङ्गुलम् ।
कृत्वाङ्गुलं तु विस्तारं तस्योर्ध्वे गण्डिकाऽङ्गुलम् ॥ ६८ ॥
ऊर्ध्वे रसाङ्गुलं तारमधस्तात्तु युगाङ्गुलम् ।
क्रमेण कृशतां कुर्या द्विस्तारार्धेन वर्धितम् ॥ ६९ ॥
नाहं तु दण्डमेवं स्यादसिलक्षणमुच्यते ।
षोडशाङ्गुलमायाममश्विन्यङ्गुलविस्तृतम् ॥ ७० ॥
मध्यमे नव तन्मध्ये पृष्ठे त्वश्रं तु कारयेत् ।
कञ्चुकं तु षडङ्गुल्यं तद्विस्तारं यवद्वयम् ॥ ७१ ॥
युगाङ्गुलेन कण्ठं तु तस्य नाहं गुणाङ्गुलम् ।
अर्धाङ्गुलं तु फलकाविस्तारं त्रियवं घनम् ॥ ७२ ॥
पुष्पमर्धाङ्गुलं ज्ञेयं शेषं युक्त्या प्रकल्पयेत् ।
असिलक्षणमेवं स्यात्पाशलक्षणमुच्यते ॥ ७३ ॥
आयामं पूर्ववत्कृत्वा फलद्वयकृताङ्गुलम् ।
रसाङ्गुलं तु विस्तारं परस्परनिरीक्षकौ ॥ ७४ ॥
वेदाङ्गुलं तु नाहं तु तदूर्ध्वे द्वादशाङ्गुलम् ।
द्वयमर्धं तु नाहं स्यात्कृशतः कृशमूलतः ॥ ७५ ॥
पाशस्य लक्षणं प्रोक्तं शृणुध्वं कुशलक्षणम् ।
कलाङ्गुलं समायामं तन्नाहं तु षडङ्गुलम् ॥ ७६ ॥
अर्धाङ्गुलेन मुकुळमग्न्यङ्गुलप्रमाणतः ।
तरुणेन्दुसमाकारं मुकुळाधस्तु योजयेत् ॥ ७७ ॥
अङ्कुशं चैवमाख्यातं गदालक्षणमुच्यते ।
गण्डिकैकाङ्गुलं मूलं मुष्टिस्तु चतुरङ्गुलम् ॥ ७८ ॥

तदूर्ध्वे गण्डिकाङ्गुल्यं गदा शेषं प्रकीर्तितम् ।
षोडशाङ्गुलनाहं स्यादष्टाग्रं तु गदाकृतिः ।। ७९ ।।
गदाया लक्षणं प्रोक्तं शूलस्य लक्षणं शृणु ।
षोडशाङ्गुलमायामं विस्तारं तु षडङ्गुलम् ।। ८० ।।
वेदाङ्गुलघनं प्रोक्तं शूलवत्कारयेद्बुधः ।
शूललक्षणमेवं स्यात्, चक्रलक्षणमुच्यते ।। ८१ ।।
आयामं पूर्ववत्प्रोक्तमष्टाङ्गुलं तु विस्तृतः ।
मध्ये नाभिसमायुक्तं षोडसारसमायुतम् ।। ८२ ।।
एकाङ्गुलं तु विस्तारं परितः पत्रमुच्यते ।
मूर्ध्नि पार्श्वे तु कर्तव्यं ज्वलनान्तं विशेषतः ।। ८३ ।।
दण्डं तु शूलवत्कुर्यात्प्रोक्तं चक्रस्य लक्षणम् ।
चक्रलक्षणमेवोक्तं; शृणु पद्मस्य लक्षणम् ।। ८४ ।।
अर्धाङ्गुळं तु मुकुलं नालंस्मृत्यङ्गुलं भवेत् ।
दळाष्टकसमायुक्तं नाळायामं दशाङ्गुलम् ।। ८५ ।।
रसाङ्गुलं तु तन्नाहं कुर्यात्पद्मं सलक्षणम् ।
एवं दशायुधं प्रोक्तं; कूर्मासनविधं शृणु ।। ८६ ।।
रुद्राङ्गुलं तु विस्तारस्तदर्धं नैव वर्धयेत् ।
शपत्यङ्गुलं घनं प्रोक्तं मुष्टि भूताङ्गुलं भवेत् ।। ८७ ।।
सप्ताङ्गुलेन तन्नाहं मानाङ्गुलेन कारयेत् ।
कच्छपासनमेवं स्यात्खट्वाया लक्षणं शृणु ।। ८८ ।।
चतुर्विंशाङ्गुलं पादं ज्येष्ठं मानाङ्गुलेन तु ।
मध्यमं तु कलाङ्गुल्यमधमं द्वादशाङ्गुलम् ।। ८९ ।।
विंशत्यङ्गुलमानेन जेष्ठपादस्य नाहकम् ।
मध्यमस्याधमस्यैव विद्याङ्गुलविहीनकम् ।। ९० ।।
मूलपादस्य विस्तारं शेषं युक्त्या प्रकल्पयेत् ।
महाङ्घ्रिखरपादं वा मृगेन्द्राङ्घ्रिसमं तु वा ।। ९१ ।।

षट्त्रिंशदङ्गुलं तारं द्विगुणं तत्समायुतम् ।
ईशिकाङ्गुलविस्तारमीशिकाग्न्यङ्गुलं घनम् ॥ ९२ ॥
ईशितारं तथा कृत्वा मध्यभागेन पट्टिका ।
कुर्यात्कापोतकं बाह्ये पट्टिकाद्वयमेव तु ॥ ९३ ॥
अधमं कल्पतारैर्वा रत्नहेमेन वेष्टयेत् ।
ईशिकाभ्यन्तरे चैव विन्यस्त्वा धातुना गळात् ॥ ९४ ॥
सुषिरेष्वर्गळानां तु नाराचं योजयेत्सुधीः ।
नाराचैश्च समायुक्तं रज्वा संवेष्टयेत्ततः ॥ ९५ ॥
खट्वाया लक्षणं प्रोक्तं प्रोच्यते (उ)लूखलस्यतु ।
विंशत्यङ्गुलमायाममुत्तमं सम्प्रकीर्तितम् ॥ ९६ ॥
स्मृत्यङ्गुलं भवेन्मध्यं कन्यसं तु कलाङ्गुलम् ।
आयामं त्रिगुणीकृत्य तन्नाहं तु विधीयते ॥ ९७ ॥
चतुर्था विभजेदायं त्रिभागं गर्तमुच्यते ।
उत्सेधस्यार्थमानेन ग्रीवामूलस्य नाहकम् ॥ ९८ ॥
ओष्ठं पक्षाङ्गुलं प्रोक्तमुत्तमस्य विशेषतः ।
पादं पादाङ्गुलं हीनं मध्यमस्याऽधमस्य तु ॥ ९९ ॥
लूखलस्यैवमाख्यातं मुसलस्य विधिं शृणु ।
सार्धत्रितालमधमं युगतालं तु मध्यमम् ॥ १०० ॥
उत्तमं भूततालं तु मुन्यद्रिरन्ध्रकाङ्गुलम् ।
कन्यसादिपरीणाहं वृत्तं तु सर्वतस्समम् ॥ १०१ ॥
आयसार्थाङ्गुलेनैव वेष्टयेन्मूलके दृढम् ।
एवं तु मुसलं प्रोक्तं शिबिकालक्षणं शृणु ॥ १०२ ॥
सारदारुमयेनैव मानाङ्गुलेन कारयेत् ।
षट्त्रिंशदङ्गुलं तारं कन्यसस्य प्रकीर्तितम् ॥ १०३ ॥
मध्यमं चाष्टचत्वारि षष्ट्यङ्गुलमथोत्तमम् ।
विस्तारं द्विगुणायामं पादेन द्विगुणं भवेत् ॥ १०४ ॥

ईशिकायस्तु विस्तारं श्रेष्ठस्याब्ध्यङ्गुलं भवेत् ।
अङ्गुलाङ्गुलहीनं तु मध्यमस्याधमस्य च ॥ १०५ ॥
तस्यार्धं तु घनं प्रोक्तमीशिकायाः प्रजापते ।
ईशितारं त्रिधा कृत्वा मध्यभागेन पट्टिका ॥ १०६ ॥
भागेनैकेन तद्बाह्ये कारयेत्तु कपोतकम् ।
आयाममष्टधा कृत्वा भागेन भित्तिपादकम् ॥ १०७ ॥
कुम्भं च वलयं चैव वृत्तकं चारुहीनकम् ।
ईशिकामध्ययोर्मध्ये चतुरश्रीकृतं तथा ॥ १०८ ॥
एकैकांशेन चाध्र्वाऽधः पट्टिकाद्वयमेव हि ।
मध्यमे तु विभागेन फलका च क्रमेणतु ॥ १०९ ॥
ईशिकैर्जालकैश्चैव फलकैर्गळकैरपि ।
नानावल्लीसमायुक्तं नानाक्रीडा समायुतम् ॥ ११० ॥
तत्पूर्वभित्तेरुत्सेधमष्टाङ्गलमिति स्मृतम् ।
सिंहद्वयसमायुक्तं तदूर्ध्वेंमकरास्यकम् ॥ १११ ॥
पालिकासदृशं पादं तत्र सप्ताङ्गुलोन्नतम् ।
अधःपट्टेश्च नाराचैर्दृढं कुर्याद्विशेषतः ॥ ११२ ॥
वेणिकावेष्टनं वापि फलकाखबन्धनं कुरु ।
शिबिकालक्षणं प्रोक्तं डोलाया लक्षणं शृणु ॥ ११३ ॥
पादोर्ध्वे कल्पयेद्धीमान् मण्टपाकृतिकं तथा ।
अश्वश्च वृषभश्चैव गजं सारम्यकर्मणि ॥ ११४ ॥
विना चान्यानि सर्वाणि रथवत्कारयेत्क्रमात् ।
डोलाया लक्षणं प्रोक्तं दीपमालाविधिं शृणु ॥ ११५ ॥
अयसा वाऽथ ताम्रेण दारुभिर्दीपमालिका ।
द्वारेषु द्वारवत्कुर्याल्लिङ्गं पृष्ठिप्रभाकृतिः ॥ ११६ ॥
द्वारमानप्रमाणेन कारयेदन्यदेशके ।
सुस्निग्धं कारयेद्धीमान् स्कन्धान् वेदाङ्गुलायतान् ॥ ११७ ॥

त्रिभागैः कन्यसे दण्डेभूताङ्गुलमथान्तरम् ।
दीपमालाविधिः प्रोक्तं पुष्पाधारविधिं शृणु ॥ ११८ ॥
अशोकार्जुनकौ निम्बं मधूकं पनसासनः ।
खादिरं शिंशुपा चाम्रं चन्दनं चम्पका शुभा ॥ ११९ ॥
अष्टतालप्रमाणेन विस्तारं द्विगुणायतम् ।
वेदपादसमायुक्तं द्वादशाङ्गुलदैर्घ्यकम् ॥ १२० ॥
घनमष्टाङ्गुलं प्रोक्तं भित्युत्सेधं गुणाङ्गुलम् ।
दर्पणोदरसङ्काशं कुर्यान्मानाङ्गुलेन तु ॥ १२१ ॥
पुष्पाधारविधिःप्रोक्तं भेरिकालक्षणं शृणु ।
युगतालसमायामं नागभूतयमं भवेत् ॥ १२२ ॥
द्वादशाङ्गुलमानेन मुखतारं विधीयते ।
आमुखान्तं सुवृत्तं स्याद्धनमर्धाङ्गुलं भवेत् ॥ १२३ ॥
उभयोः पार्श्वयोर्मध्ये त्वधःपट्टेनवेष्टयेत् ।
सप्तकीलसमायुक्तं मानाङ्गुलेन कारयेत् ॥ १२४ ॥
भेरिकालक्षणं प्रोक्तं कत्रिकालक्षणं शृणु ।
षड्विंशत्यङ्गुलायामं तिद्यङ्गुलं तु विस्तृतम् ॥ १२५ ॥
पार्श्वे युगाङ्गुलं हित्वा वर्तयेच्छशिखण्डवत् ।
षडङ्गुलप्रमाणेन तन्मध्ये वर्तयेत्क्रमात् ॥ १२६ ॥
युगाङ्गुलप्रमाणेन भित्युत्सेधं प्रकीर्तितम् ।
द्वियवं तु घनं तस्य मध्ये गर्भं तु कारयेत् ॥ १२७ ॥
परितः पट्टिकां कुर्याद्व्यङ्गुलं तु घनं भवेत् ।
द्वादशाङ्गुलमायामं द्विवक्रं खरपादवत् ॥ १२८ ॥
नाहमर्धाङ्गुलं तस्य एकपातं तु योजयेत् ।
कत्रिकालक्षणं प्रोक्तं समिधालक्षणं शृणु ॥ १२९ ।
आदित्याङ्गुलमायामं कनिष्ठाङ्गुलनायकम् ।
पादेनपादसंयुक्तम् अग्रेणाग्रसमायुतम् ॥ १३० ॥

अवक्रं निर्यृणं चैव शुष्काश्चैव शुभप्रदाः ।
समिधालक्षणं प्रोक्तमेवमिध्मस्य लक्षणम् ॥ १३१ ॥
आयामं परिधीनां च वेदयुक्तं दशाङ्गुलम् ।
मध्याङ्गुलपरीणाहम् अवक्रं निर्वृणं समाम् ॥ १३२ ॥
प्रोक्ता तु यत्समित्तेन परिधिध्वनिसङ्ग्रहेत् ।
एवं स्यात्परिधीनां तु दर्भाणां लक्षणं शृणु ॥ १३३ ॥
स्त्रिपुन्नपुंसकाः काशाः त्रिविधास्समुदाहृताः ।
मृदुश्यामा च जाया च जायाकर्मसु योजयेत् ॥ १३४ ॥
ईषत्पक्षसमायुक्तः स्थिरः पुंलिङ्गकाशकः ।
पुंस्त्रियायास्तु पुङ्ल्लिलङ्गान् ग्राहयेत्तु विशेषतः ॥ १३५ ॥
नपुंसकास्तु सङ्ग्राह्यं स्थिरं कोमलवर्जितम् ।
मूलस्थूलं भवेन्नारी अग्रस्थूलं नपुंसकम् ॥ १३६ ॥
मूलाग्रं तु समं चैव पुमान् दर्भस्य लक्षणम् ।
विच्छिन्नाग्रानुभिन्नाग्रा अग्राह्यां खण्डितास्तथा ॥ १३७ ॥
दर्भाणां लक्षणं ह्येवं; कूर्चानां लक्षणं शृणु ।
नवकाशैश्चोत्तमं स्यात्सप्तकाशैस्तु मध्यमम् ॥ १३८ ॥
कन्यसं भूतकाशैस्तु ग्रन्थिं व्योमाङ्गुलं भवेत् ।
दक्षिणावर्तकं ग्रन्थिकूर्चाद्रं चतुरङ्गुलम् ॥ १३९ ॥
ग्रन्थिमूलात्समारभ्य रुद्रधर्मग्रहायतम् ।
कूर्चानां लक्षणं प्रोक्तं; विष्टरस्य विधिं शृणु ॥ १४० ॥
धातुकाशसमायुक्तं ग्रन्थितं सव्यमार्गतः ।
रव्यङ्गुलं तु मूलाग्रं ग्रन्थिं व्योमाङ्गुलं भवेत् ॥ १४१ ॥
विष्टरस्य विधिः प्रोक्तः; लम्बकूर्चविधिं शृणु ।
एकविंशतिदर्भैश्च ग्रन्थिरेकाङ्गुलं भवेत् ॥ १४२ ॥
ग्रन्थिं तद्दक्षिणावर्तं कूर्चाग्रं चतुरङ्गुलम् ।
मूर्धादिपादपर्यन्तं लम्बितं तत्तदायतम् ॥ १४३ ॥

लम्बकूर्चविधिः प्रोक्तः; परिस्तरणमुच्यते ।
धर्मकाशसमायुक्तं ग्रन्थि पक्षाङ्गुलं भवेत् ॥ १४४ ॥
वेदाङ्गुलं भवेदग्रं षट्त्रिंशदङ्गुलायतम् ।
परिस्तरणमेवं स्याद्दर्भमालाविधिं शृणु ॥ १४५ ॥
भूतवेदाग्निदर्भैर्वा व्योमहस्तं प्रलम्बितम् ।
कनिष्ठाङ्गुलनाहं तु रज्जुं कुर्यान्मनोरमम् ॥ १४६ ॥
दर्भमालाविधिः प्रोक्तः; प्रोक्षणीलक्षणं शृणु ।
सप्तविंशतिभिर्दर्भैः कालाङ्गुलसमायतम् ॥ १४७ ॥
व्योमाङ्गुलं भवेद्ग्रन्थिः वेदाङ्गुलं तथाग्रकम् ।
वेणिकाविष्टरावाथ प्रोच्यते प्रोक्षणी तथा ॥ १४८ ॥
कुशं काशसुवर्णैर्वा द्वाभ्यां वा त्रिभिरेव वा ।
एकीकृत्याऽग्रकान्तैश्च एकमूलं तु योजयेत् ॥ १४९ ॥
षोडशाङ्गुलमायामं वर्तयित्वा समन्ततः ।
द्विगुणीकृत्य तद्रज्जुं ग्रन्थिरेकाङ्गुलं भवेत् ॥ १५० ॥
दक्षिणावर्तं तस्य तदग्रं चतुरङ्गुलम् ।
अनामिकाया योक्तव्यमुभयोर्हस्तयो रपि ॥ १५१ ॥
सपवित्रकरेणैव सर्वकार्यं समाचरेत् ।
सपवित्रकरेणैव कुर्यादाचमनक्रियाम् ॥ १५२ ॥
नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् ।
सौवर्णं चेत्पवित्रं तु कुञ्जेनागफणेन तु ॥ १५३ ॥
नाहेनानामिकायास्तु कुर्याद्वृत्तसमं यथा ।
पवित्रलक्षणं चोक्तं; पात्राणां लक्षणं शृणु ॥ १५४ ॥
मृण्मयं कन्यसं तारं ताम्रजं मध्यमं भवेत् ।
सौवर्णेन कृतं पात्रमुत्तमं चेति कीर्तितम् ॥ १५५ ॥
तारं रसाङ्गुलं ज्ञेयमुत्सेधं तु युगाङ्गुलम् ।
तत्पृष्ठाङ्घ्रिसमायुक्तं चतुरङ्गुलमानतः ॥ १५६ ॥

आस्येन नासिकायुक्तं वेदाङ्गुलसमायुतम् ।
पाद्यपात्रं समाख्यातं; शृण्वाचमनपात्रकम् ।। १५७ ।।
आदित्याङ्गुलमानेन कुक्षिविस्तारमुच्यते ।
अष्टत्रिंशेन मात्रेण नाहं कुक्षेस्तु मध्यमम् ।। १५८ ।।
अग्न्यङ्गुलगळोत्सेधमोष्ठं व्योमाङ्गुलं भवेत् ।
आस्यतारं त्रिमात्रं तु पार्श्वे घ्राणसमायुतम् ।। १५९ ।।
पक्षाङ्गुलसमायामं रन्ध्रं कानिष्ठिकं समम् ।
अध्यर्धाङ्गुलमानेन पादं कुर्यात्तु पृष्ठके ।। १६० ।।
एवमाचमनं पात्रमर्घ्यपात्रमथ शृणु ।
वस्वङ्गुलं तु विस्तारमुत्सेधं चतुरङ्गुलम् ।। १६१ ।।
अर्घ्यपात्रमिदं प्रोक्तं; गन्धपात्रमथ शृणु ।
एवमेवं विशेषेण कल्पयेद्गन्धपात्रकम् ।। १६२ ।।
गन्धपात्रं समाख्यातं, पुष्पपात्रमथ शृणु ।
अष्टाङ्गुलसमुत्सेधं विस्तारं विंशदङ्गुलम् ।। १६३ ।।
नाहं भूताङ्गुलं ज्ञेयमुभयोः पार्श्वयोरपि ।
तन्मानं पादविस्तारं विधानकसमन्वितम् ।। १६४ ।।
एवमेवं तथा कुर्याद्वित्रेणैवाऽथवा कुरु ।
पुष्पपात्रविधिः प्रोक्तम्; आज्यपात्रविधिं शृणु ।। १६५ ।।
वेदाङ्गुलं समुत्सेधं विस्तारं तु षडङ्गुलम् ।
अष्टाङ्गुलेन तस्योर्ध्वमेतद्धि घृतपात्रकम् ।। १६६ ।।
सारभूताङ्गुलं तारं सार्धाङ्गुलसमुच्छ्रयम् ।
प्रणीतालक्षणं प्रोक्तं; प्रोक्षणीलक्षणं शृणु ।। १६७ ।।
बाणाङ्गुलं तु विस्तारमुत्सेधं तु गुणाङ्गुलम् ।
पात्राणामप्यलाभे तु शङ्खं वा शुक्तिकं तु वा ।। १६८ ।।
प्रोक्षणीपात्रमेवं हि; शिवकुम्भविधिं शृणु ।
तिथ्यङ्गुलप्रविस्तारं निम्नं रुद्राङ्गुलायतम् ।। १६९ ।।

आस्यं वेदाङ्गुलं ज्ञेयं कण्ठायामं तथाङ्गुलम् ।
ओष्ठमेकाङ्गुलं ज्ञेयमर्धाङ्गुलं तु निर्गमम् ।। १७० ।।
गळादधस्त्रिरेखायुक् पक्वबिम्बफलप्रभम् ।
कळङ्करहितं स्निग्धं दाडिमीकुसुमप्रभम् ।। १७१ ।।
शिवकुम्भविधिः प्रोक्तो; वर्धनीलक्षणं शृणु ।
रन्ध्राङ्गुलं प्रविस्तारं वर्धनीजठरस्य तु ।। १७२ ।।
अग्न्यङ्गुलं तदुत्सेधं वक्त्रमर्धाङ्गुलं भवेत् ।
अग्न्यङ्गुलमधोष्ठं तु पार्श्वे तु नासिकायुतम् ।। १७३ ।।
सार्धाङ्गुलप्रमाणेन उत्पलाकृतिवत्कुरु ।
सार्धाङ्गुलं गळोत्सेधं त्रियवं चाष्टनिर्गतः ।। १७४ ।।
वर्धनीलक्षणं प्रोक्तं कुम्भानां लक्षणं शृणु ।
रुद्राङ्गुलं तु विस्तारमुत्सेधं पर्वताङ्गुलम् ।। १७५ ।।
त्र्यङ्गुलं चोष्ठविस्तारमुत्सेधं व्योममात्रकम् ।
सार्धाङ्गुलं गळोत्सेधं त्रियवं चोष्ठनिर्गमम् ।। १७६ ।।
कुम्भानां लक्षणं प्रोक्तं कलशानां शृणुष्वथ ।
वस्वङ्गुलप्रविस्तारमुत्सेधं तु रसाङ्गुलम् ।। १७७ ।।
ग्रीवमर्धाङ्गुलोत्सेधमोष्ठं तत्सममेव तु ।
त्र्यङ्गुलं चोष्ठविस्तारं यवमोष्ठस्य निर्गतः ।। १७८ ।।
पक्वबिम्बफलोपेतं शेषं युक्त्या प्रकल्पयेत् ।
कलशस्य विधिः प्रोक्तः, शरावलक्षणं शृणु ।। १७९ ।।
पक्षाङ्गुलसमोत्सेधं विस्तारं तु गुणाङ्गुलम् ।
शरावमेवमाख्यातं; कुण्डिकालक्षणं शृणु ।। १८० ।।
वेदाङ्गुलं तु विस्तारमग्न्यङ्गुलं तु दैर्घ्यकम् ।
सार्धाङ्गुलेन नादं तु चोष्ठमर्धाङ्गुलं भवेत् ।। १८१ ।।
पक्षाङ्गुलं गळोत्सेधं पार्श्वे घ्राणसमायुतम् ।
व्योमाङ्गुलप्रमाणेन पदं पृष्ठे नियोजयेत् ।। १८२ ।।

कुण्डिकालक्षणं प्रोक्तं हविःपात्रविधिं शृणु ।
तस्य कुक्षेस्तु विस्तारं दशाङ्गुलमिति स्मृतम् ॥ १८३ ॥
अर्धाङ्गुलसमुत्सेधं कर्णोत्सेधमथाङ्गुलम् ।
कण्ठं व्योमाङ्गुलं ज्ञेयमास्यतारं कृताङ्गुलम् ॥ १८४ ॥
शेषं बुध्या प्रकर्तव्यं पयेत्पात्रार्धके शिवम् ।
कण्ठं व्योमाङ्गुलं यावत्तावद्ब्रह्माणमाचरेत् ॥ १८५ ॥
हविःपात्रविधिः प्रोक्तः, चरुपात्रविधिं शृणु ।
उदरस्य तु विस्तारं धर्माङ्गुलमिति स्मृतम् ॥ १८६ ॥
शताङ्गुलं तदुत्सेधं कर्णमेकाङ्गुलोच्छ्रयम् ।
आस्यमेकाङ्गुलं प्रोक्तमोष्ठमेकाङ्गुलं भवेत् ॥ १८७ ॥
चरुपात्रविधिः प्रोक्तः; विधानस्य विधिं शृणु ।
पात्रस्य तारं यावत् स्यात् तावत्कुर्याद्विधानकम् ॥ १८८ ॥
ईषन्निमग्नं तन्मध्ये वलयं तत्र विन्यसेत् ।
विधानस्य विधिः प्रोक्तमुपदंशविधिं शृणु ॥ १८९ ॥
उदरस्य तु विस्तारमष्टाङ्गुलमिति स्मृतम् ।
युगाङ्गुलसमुत्सेधं कण्ठमेकाङ्गुलं भवेत् ॥ १९० ॥
षडङ्गुलेनास्यतारमोष्ठमेकाङ्गुलं भवेत् ।
पात्रं स्यादुपदंशाय; जलाधारविधिं शृणु ॥ १९१ ॥
चतुर्विंशतिमात्रं तु विस्तारमुदरस्य तु ।
विंशदङ्गुलमुत्सेधमास्यतारं कलाङ्गुलम् ॥ १९२ ॥
ओष्ठं पक्षाङ्गुलं ज्ञेयं तस्याधस्तात्त्रिरेखया ।
यवत्रयप्रमाणेन कुर्यादुदरबन्धनम् ॥ १९३ ॥
विस्तारमुदितं यत्र तस्योर्ध्वेनैव वर्धयेत् ।
पात्राणामपि सर्वेषां तन्नाहविधिरुच्यते ॥ १९४ ॥
पाद्यपात्रादिपात्राणि कुर्यान्नानाङ्गुलेन तु ।
जलाधारमिति प्रोक्तं तरङ्गस्य विधिं शृणु ॥ १९५ ॥

क्षौमपट्टदुकूलैर्वा कुर्यात्कार्पासशालिना ।
तिथिवस्त्रयुतं वापि चार्कवस्त्रयुतं तु वा ॥ १९६ ॥
रन्ध्रवस्त्रयुतं वापि चास्ये रज्जुसमायुतम् ।
नानावर्णसमायुक्तं नानारूपसमन्वितम् ॥ १९७ ॥
एवं तरङ्गमाख्यातं स्तम्भवेष्टनमुच्यते ।
गात्रायामसमं वस्त्रं निच्छिद्रं तेन वेष्टयेत् ॥ १९८ ॥
स्तम्भवेष्टनमेवं तु; वितानमधुनोच्यते ।
दैर्घ्यं वै पङ्क्तिमानं स्याद्विस्तारमपि तत्समम् ॥ १९९ ॥
दुकूलपट्टदेवाङ्गैः कार्पासेनैव कारयेत् ।
वितानलक्षणं प्रोक्तं; केतूनां लक्षणं शृणु ॥ २०० ॥
विंशदङ्गुलविस्तारमायामं त्रिंशदङ्गुलम् ।
विस्तारेण समं पुच्छं तस्योर्ध्वे शिखरं भवेत् ॥ २०१ ॥
चतुःपुच्छं त्रिपुच्छं वा पुच्छद्वयमथापि वा ।
पार्श्वे कदलिकायुक्तं वेत्रद्वयसमायुतम् ॥ २०२ ॥
केतुलक्षणमेवोक्तं; पताकालक्षणं शृणु ।
नवहस्तमष्टहस्तं सप्तहस्तमथापि वा ॥ २०३ ॥
ध्वजवत्कारयेच्छेषं नानावस्त्रैश्च कारयेत् ।
पताकालक्षणं ह्येवं; क्षुद्रध्वजविधिं शृणु ॥ २०४ ॥
बाणाङ्गुलं तु विस्तारं द्वादशाङ्गुलदैर्घ्यकम् ।
वेत्रद्वयसमायुक्तं शेषं तु केतुवत्कुरु ॥ २०५ ॥
क्षुद्रध्वजविधिः प्रोक्तः शिखरे रज्जुसंयुतम् ।
ध्वजानां लक्षणं प्रोक्तम् उष्णीषस्य विधिं शृणु ॥ २०६ ॥
षट्हस्तं पञ्चहस्तं वा पञ्चभागेन विस्तृतः ।
सुश्लक्ष्णं सदशं सूक्ष्मं सितं रोमविवर्जितम् ॥ २०७ ॥
शिरसं चिबुकेनैव कर्णाभ्यां चैव वेष्टयेत् ।
पुच्छं वै वामकर्णं तु वेष्टयेत्तु प्रदक्षिणम् ॥ २०८ ॥

वेष्टयत्वैवमेकं तु शेषं शिरसि वेष्टयेत् ।
उष्णीषलक्षणं प्रोक्तमुत्तरीयविधिं शृणु ।। २०९ ।।
बाणहस्तायतं वापि वेदहस्तायतं तु वा ।
तालमात्रप्रविस्तारं बन्धयेत्तु द्विपुच्छकौ ।। २१० ।।
यज्ञोपवीतवद्धार्यमुत्तरीयं विशेषतः ।
यजने स्थापने चाग्निकार्ये चैवोत्सवे जपे ।। २११ ।।
उष्णीषं चोत्तरीयं च धारयेद्देशिकोत्तमः ।
उत्तरीयविधिः प्रोक्तम्; वस्त्रलक्षणमुच्यते ।। २१२ ।।
देवाङ्गं क्षौमकं वापि नेत्रकार्पाससम्भवम् ।
उत्तमं नवहस्तं स्यान्मध्यमं रसहस्तकम् ।। २१३ ।।
अधमं बाणहस्तं स्याच्चतुर्भागैकविस्तृतम् ।
सामान्यवस्त्रमेवं तु सर्वकार्यं तु सङ्ग्रहेत् ।। २१४ ।।
पीठोत्सेधस्य चाध्यर्धं वस्त्रविस्तारमुच्यते ।
तस्याङ्गुलसमायामं सदशं तु सलक्षणम् ।। २१५ ।।
जीर्णितं चाग्निदग्धं च आखुदष्टं च वर्जयेत् ।
वस्त्रस्य लक्षणं प्रोक्तं पर्यङ्कानां विधिं शृणु ।। २१६ ।।
अण्डजं मुण्डजं चैव रोमजं चर्मजं तथा ।
वामजं चैव पञ्चैते शयनं सम्प्रकल्पयेत् ।। २१७ ।।
खट्वायामासमायामम् आवियामार्धं तु विस्तृतम् ।
उत्सेधं हस्तमानं तु प्रहिणं व्याघ्रचर्मणा ।। २१८ ।।
पूरितं चानिलेनैव चर्मजं चेति कीर्तितम् ।
आधारं पूर्ववत्कृत्वा रोमैः कृष्णमृगोद्भवैः ।। २१९ ।।
सम्पूर्णकं च यत्तल्पं रोमजं चेति कीर्तितम् ।
पूर्वोक्तलक्षणोपेतं वस्त्रेण प्रहणं कुरु ।। २२० ।।
शाल्मलीतूलसम्पूर्णं मुण्डजं चेति कीर्तितम् ।
प्रागुक्तलक्षणोपेतं देवाङ्गैः पञ्जरं कुरु ।। २२१ ।।

हंसरोमेण सम्पूर्णम् अण्डजं चेति कीर्तितम् ।
सुस्थितं सूक्ष्मसुश्लक्ष्णं कार्पासेनैव सम्भवम् ॥ २२२ ॥
उपरि पूरणं यत्तु वामजं चेति कीर्तितम् ।
उपर्युपरि कल्प्येवं पर्यङ्कं चैव पञ्चधा ॥ २२३ ॥
पर्यङ्कानां विधिः प्रोक्तश्चोपधानविधिं शृणु ।
षट्त्रिंशदङ्गुलायामं तन्नाहं त्रिगुणं भवेत् ॥ २२४ ॥
हंसरोमेण सम्पूर्णं देवाङ्गेनैव पञ्जरम् ।
कार्पासपञ्जरेणैव कारयेदुपवेष्टनम् ॥ २२५ ॥
उपधानं हस्तपादानां युक्त्या तु परिकल्पयेत् ।
उपधानविधिः प्रोक्तः; कक्ष्याया लक्षणं शृणु ॥ २२६ ॥
अग्न्यङ्गुलं तु विस्तारमश्विन्यङ्गुलमेव च ।
कार्पासेन तथा कुर्याद्यावत् खट्वा प्रवेष्टनम् ॥ २२७ ॥
कक्ष्याया लक्षणं प्रोक्तं प्रच्छन्नपटमुच्यते ।
द्वारायामसमं दीर्घं विस्तारस्यार्धविस्तृतम् ॥ २२८ ॥
बाणहस्तसमायामं पटस्याधारदण्डकम् ।
प्रच्छन्नपटमेवं तु छत्रलक्षणमुच्यते ॥ २२९ ॥
चतुर्मुखप्रविस्तारं समवृत्तमधोमुखम् ।
आधारं वैणवेनैव तन्तुना बन्धयेत्क्रमात् ॥ २३० ॥
वस्त्रेण वेष्टयेत्सर्वं मुक्तादामैश्च रत्नकैः ।
मकुटं हेमपट्टैश्च भूषयेद्भूषणार्हकैः ॥ २३१ ॥
वस्त्रेण मध्यमं कुर्यात्तालपत्रैश्च कन्यसम् ।
बाणानि रसतालैर्वा नाळायामं प्रकीर्तितम् ॥ २३२ ॥
छत्रलक्षणमेवोक्तं पिञ्छलक्षणमुच्यते ।
बर्हिपिञ्छं प्रकर्तव्यं विस्तारं त्रियवं भवेत् ॥ २३३ ॥
वस्त्रेण वेष्टयेत्सर्वं पुनः पिञ्छैश्च वेष्टयेत् ।
आधारमयसा कृत्वा हैमेन मकुटं कुरु ॥ २३४ ॥

शेषं बुद्ध्या प्रकर्तव्यं नाळस्य च्छत्रनाळवत् ।
पिच्छलक्षणमेवं तु चामरस्य विधिं शृणु ॥ २३५ ॥
दर्भेन दारुजेनैव शुल्बेन रजतेन वा ।
सौवर्णेनैव रत्नेन दण्डं कुर्याद्विचक्षणः ॥ २३६ ॥
चतुर्विंशाङ्गुलायामं दण्डनाहं शराङ्गुलम् ।
नानागण्डिकया युक्तं नानाकुम्भलतान्वितम् ॥ २३७ ॥
नानाकर्णसमायुक्तं नानामण्डलसंयुतम् ।
संयुक्तं चमरीवालैः यथाशोभं तु कारयेत् ॥ २३८ ॥
चामरस्य विधिः प्रोक्तः; मयूरव्यजनं शृणु ।
दण्डं तु पूर्ववत्प्रोक्तं शिखिनो भिन्नपिञ्छकैः ॥ २३९ ॥
क्रमेणैव तु संयोज्य शेषं युक्त्या प्रकल्पयेत् ।
मयूरव्यजनं ह्येवं दुकूलव्यञ्जनं शृणु ॥ २४० ॥
षोडशाङ्गुलविस्तारं वैणवेनैव वर्तुलम् ।
क्षौमदेवाङ्गपट्टैर्वा दुकूलेनैव वेष्टयेत् ॥ २४१ ॥
त्र्यङ्गुलं दण्डनाहं तु षट्त्रिंशदङ्गुलायतम् ।
नानातन्तुसमायुक्तं दण्डमात्रं विचित्रयेत् ॥ २४२ ॥
दण्डाग्रं तु त्रिधा कृत्वा शेषं यक्त्या प्रकल्पयेत् ।
पर्यङ्कादीनि सर्वाणि कुर्यान्मानाङ्गुलेन तु ॥ २४३ ॥
दुकूलव्यजनं ह्येवं धूपपात्रविधिं शृणु ।
हेमेन रजतेनैव ताम्रेण पैत्तळेन वा ॥ २४४ ॥
वेदाङ्गुलं तु विस्तारं पत्रोत्सेधं तदर्धकम् ।
ओष्ठमर्धाङ्गुलं प्रोक्तं बाह्ये पद्मदलान्वितम् ॥ २४५ ॥
ग्रीवयस्याधो द्विपादं तु पादायामद्विमात्रकम् ।
अब्ध्यङ्गुलसमायामं नाहं पक्षाङ्गुलं भवेत् ॥ २४६ ॥
दण्डपुच्छेन पादं तु कारयेद्गजपादवत् ।
पक्षाङ्गुलं तु विस्तारं नानावल्लीसमायुतम् ॥ २४७ ॥

अग्न्यङ्गुलं विधानोच्चमनेकसुषिरान्वितम् ।
कारयेन्मुकुळाकारं शेषं बुद्ध्या प्रकल्पयेत् ।। २४८ ।।
धूपपात्रविधिः प्रोक्तः; धूपघण्टाविधिं शृणु ।
बाणाङ्गुलं तु विस्तारमुत्सेधं तत्समं भवेत् ।। २४९ ।।
त्रियवं चोष्ठविस्तारं तन्नाहं तु चतुर्यवम् ।
उपपट्टिकया युक्तं मात्रेण शिखरान्वितम् ।। २५० ।।
चतुर्यवाङ्गळोत्सेधं जिह्वा वेदाङ्गुलायतम् ।
घण्टायां चैव तन्नाहं विस्तारार्थेन विस्तृतम् ।। २५१ ।।
अग्न्यङ्गुलेन दण्डोच्चं नाहं तत्सममेव तु ।
दण्डस्याग्रे वृषं वापि नळिनं शूलमेव च ।। २५२ ।।
शेषं युक्त्या प्रकर्तव्यं शुद्धकांस्येन सुवृतम् ।
कृत्वा तु विधिवद्धीमान् धूपदाने तु घोषयेत् ।। २५३ ।।
धूपघण्टाविधिः प्रोक्तः; दीपपात्रविधिं शृणु ।
धूपपात्रवदाकारं विशेषं किञ्चिदस्ति हि ।। २५४ ।।
अग्न्यङ्गुलं तु विस्तारमायामं तु शराङ्गुलम् ।
अश्वत्थपत्रवत्कुर्यादोष्ठस्य च द्वयं भवेत् ।। २५५ ।।
मध्ये नाभिसमायुक्तं मुकुळेनैव वर्जितम् ।
नवशक्तिः नवे दीपे सप्तदीपे तु मातरः ।। २५६ ।।
पञ्चदीपे निवृत्यादिरेकदीपे सरस्वती ।
दीपपात्रविधिः प्रोक्तं दीपाधारविधिं शृणु ।। २५७ ।।
एकहस्तं समारभ्य नवहस्ताश्चमेव च ।
शरांशं पादविस्तारमाज्याधारं तु तत्समम् ।। २५८ ।।
तस्योर्ध्वे मुकुळाकारं धर्मांशेन प्रकल्पयेत् ।
नानापट्टिकया युक्तं नानाकुम्भसमायुतम् ।। २५९ ।।
एकदण्डेन कर्तव्यमनुरूपक्रमेण तु ।
शुद्धकांस्यकतारैर्वा पैत्तळेनैव कारयेत् ।। २६० ।।

दीपाधारमिदं वक्ष्ये नीराजनाय पात्रकम् ।
सौवर्णं राजतं ताम्रं ज्येष्ठादीनि क्रमेण तु ॥ २६१ ॥
षट्त्रिंशदङ्गुलायाममुत्तमं तत्प्रकीर्तितम् ।
तस्मात् षडङ्गुलं हीनं मध्यमं परिकल्पयेत् ॥ २६२ ॥
हस्तमात्रप्रविस्तारं कन्यसं पात्रमुच्यते ।
कर्णिका तत्त्रिभागैकं तत्पञ्चांशैकमुच्छ्रयम् ॥ २६३ ॥
यवद्वयविशालेन पट्टिकां परितः कुरु ।
उत्सेधं तत्समं ज्ञेयं तद्बाह्येऽष्टदळं भवेत् ॥ २६४ ॥
ओष्ठं तु परितः कुर्यात्कर्णिकोच्छ्रयमानतः ।
एवं कुर्याद्विशेषेण पूर्णचन्द्रसमं यथा ॥ २६५ ॥
युगाङ्गुलसमायामं दीपाधारघटोपमम् ।
अश्विन्यङ्गुलविस्तारं घटवक्त्रं प्रकीर्तितम् ॥ २६६ ॥
प्रोक्तं पक्षाङ्गुलं रन्ध्रं कर्णिकामध्यमे युतम् ।
दीपाधाराण्यधिष्ठात्राऽयोजयेत्तु दलं प्रति ॥ २६७ ॥
रन्ध्राधारं शराधारं एकाधारमथापि वा ।
मध्ये चैव महाशासु पञ्चधारणि कल्पयेत् ॥ २६८ ॥
अग्न्यङ्गुलोच्चमानेन पृष्ठपादं प्रकल्पयेत् ।
पात्रं नीराजनायेदं; महाघण्टाविधिं शृणु ॥ २६९ ॥
शुद्धकांस्येन कर्तव्यं विस्तारं पर्वताङ्गुलम् ।
अब्ध्यङ्गुलं तदुत्सेधं गलोत्सेधं गुणाङ्गुलम् ॥ २७० ॥
नाहं रसाङ्गुलं तस्य पट्टिकाद्वयसंयुतम् ।
शिखरोच्चं द्विमात्रेण तन्नाहं भूधराङ्गुलम् ॥ २७१ ॥
सुषिरेण समायुक्तं चतुर्नासिसमायुतम् ।
तारार्धाद्वृद्धितं नाहं जिह्वारन्ध्राङ्गुलायतम् ॥ २७२ ॥
शिखरावलयोपेतं शेषं युक्त्या प्रकल्पयेत् ।
महाघण्टाविधिः प्रोक्तः स्थालिकालक्षणं शृणु ॥ २७३ ॥

कन्यसं कांश्यसम्भूतं रजतं मद्ध्यमं भवेत् ।
हेमन्तु चोत्तमं प्रोक्तं स्थालिका नवधोदिता ।। २७४ ।।
द्वादशाङ्गुलविस्तार मधमाधममुच्यते ।
अग्न्यङ्गुलविवृद्ध्या तु षट्त्रिंशदङ्गुलान्तकम् ।। २७५ ।।
अष्टधा तारमेवन्तु कन्यसादित्रयं त्रयम् ।
द्वियवचौष्ठविस्तारम् उत्सेधं तत्समं भवेत् ।। २७६ ।।
वेत्रं युगाङ्गुलेनैव अधमस्याधमस्य तु ।
यवेनैकेन वृद्ध्या तु यावन्नवयवान्तकम् ।। २७७ ।।
स्थालिकानामथाष्टानां वेत्रेष्टौ सम्प्रकल्पयेत् ।
स्थलिकालक्षणं प्रोक्तं; दर्व्याश्च लक्षणं शृणु ।। २७८ ।।
द्वादशाङ्गुलमायामं तद्दैर्घ्यं पञ्चधा भवेत् ।
अध्यर्धांशेन पुच्छं स्यात् पक्षांशचाग्रमुच्यते ।। २७९ ।।
त्रियवं पुच्छतारं तु वक्त्रतारं शराङ्गुलम् ।
व्योमाङ्गुलप्रमाणेन मध्यतारं विधीयते ।। २८० ।।
अर्धाङ्गुलं तु हीनं स्यात् मध्यमस्याधमस्यतु ।
दर्व्याश्च लक्षणं प्रोक्तं; त्रिपादलक्षणं शृणु ।। २८१ ।।
चतुर्थांशं खपादी च बकपादा त्रिपादिका ।
कर्तव्यं स्थालिकापादं लक्षणेन विशेषतः ।। २८२ ।।
उच्चं युगाङ्गुलं ज्ञेयं मुखतारं तु तत्समम् ।
अग्निपादसमायुक्तं त्रिवक्रांशङ्खपादिका ।। २८३ ।।
तारं षडङ्गुलं ज्ञेयं तच्चतुर्गुणमायतम् ।
ईषत् त्रिभागिकापादं पक्षाङ्गुलं तु नाहकम् ।। २८४ ।।
मृगराट्पादवन्मूले बकपादिप्रकीर्तितम् ।
शराङ्गुलं तु विस्तारमुत्सेधं पर्वताङ्गुलम् ।। २८५ ।।
अग्निपादसमायुक्तं त्रिवक्राङ्गुष्ठनाहकम् ।
शरावाकृतिवन्मूले शेषं बुध्या प्रकल्पयेत् ।। २८६ ।।

एवं त्रिपादिका प्रोक्ता स्थालिकापादमुच्यते ।
पिण्डिकोत्सेधमानं यदुत्सेधं तत्समं भवेत् ।। २८७ ।।
शेषं पूर्वोक्तवत् कुर्यात् द्विगुणं पादनाहकम् ।
पादाग्रेषु खुरं कुर्यात् शेषं युक्त्या तु कारयेत् ।। २८८ ।।
स्थलिकापादमेवोक्तं; पाद्याधारविधिं शृणु ।
कलाङ्गुलं तु विस्तारमुत्सेधं पर्वताङ्गुलम् ।। २८९ ।।
सोमाङ्गुलं भवेदोष्ठमाकृतिस्स्याच्छराववान् ।
उभयोः पार्श्वयोश्चैव वलयेन समन्वितम् ।। २९० ।।
पृष्ठे त्रिपादसंयुक्तं चतुरङ्गुलमायतम् ।
वक्त्रद्वयसमायुक्तं तस्याधस्सिंहपादवत् ।। २९१ ।।
पाद्योदकं तथा तस्मिन् पात्रे तु परिवर्जयेत् ।
पाद्याधारमिदञ्चैवाऽऽचमनाधारमुच्यते ।। २९२ ।।
कलाङ्गुलसमायामं मुखतारं यवं भवेत् ।
ओष्ठमेकाङ्गुलं प्रोक्तं धुत्तूरकुसुमोपमम् ।। २९३ ।।
ऊर्ध्वकायमिदं कृत्वा दण्डायामम् नवाङ्गुलम् ।
अग्न्यङ्गुलं तु विस्तारं द्विगुणं पादविस्तरम् ।। २९४ ।।
गण्डिकात्रयसंयुक्तं दण्डं कुर्याद्विशेषतः ।
वर्जयेत्तु तथैतस्मिन् पात्रेत्वाचमनोदकम् ।। २९५ ।।
प्रोक्तमाचमनाधारं दर्पणस्य विधिं शृणु ।
स्मृत्यङ्गुलं तु विस्तारं पूर्णचन्द्राकृतिर्यथा ।। २९६ ।।
नालं वस्वङ्गुलं ज्ञेयं पादं वेदाङ्गुलं भवेत् ।
नानापट्टिकया युक्तं शुद्धकांस्येन कारयेत् ।। २९७ ।।
विस्तारमुदितं पूर्वमेषामर्धेन वर्तयेत् ।
तन्नाहञ्चैव सर्वेषां नाहमित्यभिधीयते ।। २९८ ।।
एवं तु दर्पणं प्रोक्तं; पादुकस्य विधिं शृणु ।
नित्योत्सवस्यात्रान्ते पूजनार्थं तु पादुका ।। २९९ ।।

ताम्रतारसुवर्णैर्वा कारयेल्लक्षणान्विता ।
त्रिमात्रार्धं तु मात्रान्तम् अर्धेनार्धेन वर्धयेत् ।। ३०० ।।
रन्ध्रायामानि चोक्तानि कन्यसादित्रयं त्रयम् ।
आयामस्यार्धमेवं तु अग्रपादस्य विस्तृतम् ।। ३०१ ।।
षष्ठांशेन तु मद्ध्यान्तमायामं युगभागिकम् ।
एकभागं भवेदुच्चं गुणांशे द्व्यंशकं खुरम् ।। ३०२ ।।
शेषमूर्ध्वदळं प्रोक्तं युक्त्या सम्परिकल्पयेत् ।
अङ्गुष्ठोच्चं तलोच्चस्य चतुर्भागं त्रिभागिकम् ।। ३०३ ।।
तच्छरांशे युगांशन्तु नाळं शेषन्तु पुष्करम् ।
अङ्गुष्ठोच्चसमं पुष्पं विस्तारमुकुळान्वितम् ।। ३०४ ।।
पुष्पोन्नते त्रिभागैकं मुकुळं कारयेत् द्विजः ।
एवं सलक्षणं कृत्वा प्रोक्षणं विधिना कुरु ।। ३०
मण्टपस्य तु मध्ये तु स्थण्डिलं शालिना कुरु ।
परिस्तीर्य ततो दर्भैर्हृदा गन्धादिनाऽर्चयेत् ।। ३०
नववस्त्रमथास्तीर्य पञ्चगव्यैस्तु पादुकम् ।
क्षालयेदष्टमृद्भिस्तु शुद्धतोयेन सेचयेत् ।। ३०७ ।
वस्त्रोपरि न्यसेद्धीमान् पादुकं वर्मणा ततः ।
वस्त्रेणोपरि सञ्छाद्य स्थापयेत् कलशाष्टकान् ।। ३०८
तन्मध्ये पादुकाग्रे तु वृषकुम्भे निधापयेत् ।
सकूर्चान् सापिधानांश्च सूत्रान् दिक्पालकात्मकान् ।। ३०९ ।।
मध्यमे वृषकुम्भे तु वृषबीजं न्यसेत् ततः ।
धेनुमुद्रां प्रदार्श्याथ हैमं तत्र विनिक्षिपेत् ।। ३१० ।।
पुण्याहं वाचयेत्तत्र स्थण्डिलस्य कृतेन तु ।
अग्न्याधानादिकं सर्वं अग्निकार्योक्तमाचरेत् ।। ३११ ।।
समिदाज्यचरून् लाजान् तिलान् सद्यादिमन्त्रतः ।
होमयेत्तु विशेषेण प्रत्येकं पञ्चविंशतिः ।। ३१२ ।।

घृतेन वृषमन्त्रेण हुनेदष्टोत्तरं शतम् ।
प्रभाते सुमुहूर्तेषु मन्त्रन्यासमथाचरेत् ।। ३१३ ।।
जयादिरभ्याधानञ्च राष्ट्रभृच्च क्रमाद्धुनेत् ।
स्विष्टमग्नेतिमन्त्रेण होमं परिसमापयेत् ।। ३१४ ।।
आचार्यं पूजयेत्तत्र वस्त्रनिष्कादिभिः क्रमात् ।
वषृबीजं समादाय कुम्भात्तत्पादुकाद्वये ।। ३१५ ।।
तज्जलञ्चाभिषेकन्तु कुम्भादादाय देशिकः ।
तत् कुम्भस्थजलेनैव अभिषेच्य स्वबीजकैः ।
अर्चयेत् गन्धपुष्पाद्यैर्मुद्गान्नं तु निवेदयेत् ।। ३१६ ।।
सर्वालङ्कारसंयुक्तं प्रासादभ्रमणं कुरु ।
एवं कृत्वा तु विधिना अर्चयेत् प्रतिसन्धिषु ।। ३१७ ।।
पादुकस्थापनं प्रोक्तं; शृणु दात्रस्य लक्षणम् ।
षोडशाङ्गुलमायामं विस्तारन्तु द्विमात्रकम् ।। ३१८ ।।
मध्ये वक्रसमायुक्तं द्वियवं घनमुच्यते ।
वेदाङ्गुलं भवेन्मुष्टि दारुणा परिकल्पयेत् ।। ३१९ ।।
भूताङ्गुलपरीणाहमयः पट्टेन वेष्टयेत् ।
दात्रस्य लक्षणं प्रोक्तं; जलद्रोण्या विधिं शृणु ।। ३२० ।।
वेदभारजलैः पूर्णं श्रुत्यश्रं वाऽथ वर्तुलम् ।
वलयैर्युगपार्श्वे तु संयुक्तं ग्रीववर्जितम् ।। ३२१ ।।
जलद्रोण्या लक्षणं ह्येवं लोहजं मृन्मयन्तु वा ।
एवं कृत्वा विधानेन यन्त्रिकालक्षणं शृणु ।। ३२२ ।।
मध्याङ्गुलपरिणाहं तन्मूले वलयद्वयम् ।
वक्रद्वयसमायुक्तं गळकस्यार्हकं कुरु ।। ३२३ ।।
यन्त्रिकालक्षणं प्रोक्तमुल्कस्य लक्षणं शृणु ।
हस्तमात्रसमायामं कनिष्ठाङ्गुलिनाहकम् ।। ३२४ ।।

दीपस्याधारमग्रे तु कुर्यात् धुत्तूरपुष्पवत् ।
त्र्यङ्गुलेनास्य तारन्तु गर्तायामं गुणाङ्गुलम् ।। ३२५ ।।
कारयेदयसायस्तां मुष्टिन्तु दारुणा कुरु ।
उल्कस्य लक्षणं प्रोक्तं; गोळकालक्षणं शृणु ।। ३२६ ।।
अर्धाङ्गुलसमायामं पूजाभागसमायुतम् ।
नाहं चैव परिग्राह्यं कुर्याद्धैमेन गोळकाम् ।। ३२७ ।।
प्राग्वल्लक्षणमुद्धृत्य सूत्राग्रे सुषिरत्रयम् ।
नानारत्नसमायुक्तं लिङ्गवत् कारयेत्ततः ।। ३२८ ।।
गोळकालक्षणं प्रोक्तं; पट्टलक्षणमुच्यते ।
रुद्राक्षाङ्गुलमानेन पट्टतारं प्रकीर्तितम् ।। ३२९ ।।
लिङ्गनाहन्तु नाहंस्यात् पट्टं हे(है)मेन कारयेत् ।
पट्टलक्षणमेवं स्यात् पुष्पलक्षणमुच्यते ।। ३३० ।।
अग्न्यङ्गुलन्तु विस्तारं मध्यमे कर्णिकायुतम् ।
दळाष्टकसमायुक्तं सरत्नं काञ्चनेन तु ।। ३३१ ।।
सुवर्णकुसुमं ह्येवं; मकुटस्य विधिं शृणु ।
कपर्दमकुटश्चैव किरीटमकुटं तथा ।। ३३२ ।।
करण्डमकुटश्चैव केयूरमकुटे तथा ।
रशनाकर्णपूरश्च कुक्षिबन्धनमेव च ।। ३३३ ।।
कटिसूत्रं नूपुरश्च छन्नवीरं तथैव च ।
कर्णमाला च यज्ञश्च, प्रतिमाणां यथार्हकम् ।। ३३४ ।।
नानारत्नसमायुक्तं सर्वं हैमेन कारयेत् ।
धूपपात्रादिकान् सर्वान् मानाङ्गुलेन कारायेत् ।। ३३५ ।।
प्रोक्षयेत् पञ्चगव्येन पुरुषेण विशेषतः ।
प्रासादस्याग्रतः कुर्यात् मण्टपं चतुरश्रकम् ।। ३३६ ।।

सम्प्रोक्ष्य हृदयेनैव पात्रेनैव तु विन्यसेत् ।
शिवाग्निं कारयेद्धीमान् पूर्ववत् विधिना सह ।। ३३७ ।।
समिदाज्यचरूंश्चैव सद्यास्त्रहृदयैर्हुनेत् ।
प्रत्येकन्तु शतं हुत्वा हुत्वान्ते स्पर्शनं कुरु ।। ३३८ ।।
आदावन्तेच कर्तव्यमग्निकार्योक्तमार्गतः ।
हृदयेनैव सङ्ग्राह्यं ईशानेन तु भूषयेत् ।। ३३९ ।।
एवमाभरणं प्रोक्तम् आहितीनां विधिं शृणु ।
कर्षार्धं गोघृतेनैव एकाहुतिं समाचरेत् ।। ३४० ।।
भुक्तिमात्रेणजुहुयात् तिलञ्चैव तु सर्षपम् ।
द्विपर्वश्चावतर्जन्या बिन्दुरित्यभिधीयते ।। ३४१ ।।
बिन्दुषट्कं तु कर्षार्धं तद्द्वयं कर्षकं भवेत् ।
कर्षद्वयं तु मुष्टिस्स्यात्तद्द्वयं प्रसृतिर्भवेत् ।। ३४२ ।।
तद्द्वयं कुडवं प्रोक्तं तद्विंशद्धारणं भवेत् ।
धारणाष्टपलं प्रोक्तं प्रस्थं विंशत्पलं भवेत् ।। ३४३ ।।
दुग्धस्य मधुनोदन्धस्वर्णपूर्णाहुतिर्भवेत् ।
ओदनञ्चाक्षमात्रेण शुक्त्यर्धेन कुलत्थकम् ।। ३४४ ।।
निष्पावनमभिप्रोक्तं यवावेणुकुलुत्थवत् ।
शुक्तिमात्रेण शालिं तु विंशद्भिर्माषमुद्गकौ ।। ३४५ ।।
पृधुकं धान्यकं सक्तु मुष्टिमात्रेण होमयेत् ।
प्रियङ्गुकोद्रवं चैव अर्घ्यन्तु तिलवत् भवेत् ।। ३४६ ।।
फलानि स्वप्रमाणेन पात्राणि शरसंख्यया ।
त्रिंशदंशेन भागेन हित्वा तु पनसं हुनेत् ।। ३४७ ।।
विहितं फलमात्रेण कन्दं हित्वा तु कारयेत् ।
तन्मात्रेण गुडं प्रोक्तम् अपूपं स्वप्रमाणतः ।। ३४८ ।।

क्षीरान्नं कृसरान्नं च गुडान्नं शक्तिमात्रतः ।
करणे जुहुयात् द्रव्य रसमाज्यं स्रुवेण तु ॥ ३४९ ॥
स्थाल्या मानं विनिक्षिप्य हुनेत्तत्तत् प्रमाणतः ।
पूर्णाहुतिं स्रुवा कुर्यात् सर्पिषा द्विपलेन तु ॥ ३५० ॥
स्रुक् स्रुवमङ्गल तोरण भेरीकुम्भ समिद्भिः कलशादिहुतानाम् ।
मानहीनाविभावितमन्यत् स्थानधनक्षय कर्तृविनाशम् ॥ ३५१ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

करणाधिकार लक्षणपटलोऽष्टादशः समाप्तः

अथ मृत्सं ग्रहण विधिपटल प्रारम्भः

अतःपरं प्रवक्ष्यामि मृत्सङ्ग्रहणमुत्तमम् ।
सर्वपापहरं पुण्यं सर्वदोषनिकृन्तनम् ॥ १ ॥
सर्वमङ्गळदं पुंसां सर्वशान्त्यर्थमुच्यते ।
उत्सवे स्थापने चैव स्नपने प्रोक्षणे तथा ॥ २ ॥
प्रायश्चित्ते च दीक्षाऽदावष्टबन्धनकर्मणि ।
अन्येषां मङ्गळे कार्ये मङ्गळाङ्कुरमुच्यते ॥ ३ ॥
अङ्कुरं सर्वकार्याणामर्पणं चाङ्गवत्क्रमात् ।
उभयोरपि सम्बन्धान्मृत्सङ्ग्रहणमुच्यते ॥ ४ ॥
नदीतीरे तटाके वा केदारे शुद्धदेशके ।
आलयात्सौम्यदिग्भागे पर्वतोर्ध्वे विशेषतः ॥ ५ ॥
समुद्रे च महापुण्ये शैत्यवृक्षे महाशुभे ।
आरग्वधस्य मूले तु पलाशस्य तरोरधः ॥ ६ ॥
बिल्वमूले च मन्दारे तुलसीमूलदेशके ।
अश्वत्थद्रुममूले च पूर्वे वा चोत्तरेऽपि वा ॥ ७ ॥
अथवा पश्चिमे पूज्यं कारयेत्तु विचक्षणः ।
उत्तराभिमुखो भूत्वा न्यसेन्यस्तैकचित्तधीः ॥ ८ ॥
आदिशैवकुले जातो दिनोपोष्यः प्रसन्नधीः ।
सुस्नातो नववस्त्रस्तु सोष्णीषश्चोत्तरीयकः ॥ ९ ॥
पञ्चाङ्गभूषणोपेतश्चन्दनाद्यनुलेपितः ।
रुद्राक्षमालाभरणस्सर्वलक्षणलक्षितः ॥ १० ॥
मन्त्रतन्त्रक्रियामुद्राभावनाभावगर्भितः ।
विघ्नेशं पूजयेत्पूर्वं भक्ष्यभोज्यादिना सह ॥ ११ ॥
मोदकं चेक्षुदण्डं च पिष्टमापूपमेव च ।
पायसान्नं ददेत्पश्चात्ताम्बूलं तु निवेदयेत् ॥ १२ ॥
नाळिकेरं ददेत् पश्चात् मुखवाससमन्वितम् ।
पुण्याहप्रोक्षणं कृत्वा वेदोक्तेन विधानतः ॥ १३ ॥
भूमिचर्म च रोमं च वर्जयेत्तु विचक्षणः ।
स्वर्गस्थलेषु पाताळे गृह्यते सङ्ग्रहेद्यदि ॥ १४ ॥

अनन्तमूर्तिमादौ तु तन्मध्ये कूर्ममेवच ।
तन्मध्ये तु महारक्षो रक्षोमध्ये तु पन्नगम् ।। १५ ।।
तस्य मध्ये तु कृत्स्नौ च तदूर्ध्वे शैवभूमिका ।
मध्यमेन च ।। १६ ।।
तस्य राक्षसमध्ये तु वास्तुवास्तुसमन्वितम् ।
चर्मरोम विसृज्याऽथ वास्तुहोमं तु मध्यमे ।। १७ ।।
वास्तुशयनमाख्यातं तत्तत्काले पृथक् पृथक् ।
भूम्यन्तरिक्षमध्ये तु राक्षसानां न कीर्तितम् ।। १८ ।।
सर्वराक्षससंयुक्तं शयनं परिकीर्तितम् ।
तस्य राक्षसमध्येतु वास्तुहोमन्तु मध्यमे ।। १९ ।।
चर्मरोम विसृज्याथ वास्तु वा सु(स्तु)समन्वितम् ।
वास्तुशयनमाख्यातं तत्तत्काले पृथक् पृथक् ।। २० ।।
पूर्वाह्णे श्यामवर्णं तु मध्याह्ने कृष्णवर्णकम् ।
अपराह्णे श्वेतवर्णमर्धयामे तु पीतकम् ।। २१ ।।
उषःकाले तु संयुक्तं स्फटिकाभं तु कीर्तितम् ।
निर्ऋतौ तच्छिरश्चैव पादमीशानगोचरे ।। २२ ।।
अग्नौ तु दक्षिणं हस्तं वामहस्तं तु वायुके ।
पादमूरुकटिश्चैव हृदयं देवतात्मकम् ।। २३ ।।
अशुभं शिरसा युक्तं कारयेद्देशिकोत्तमः ।
वास्तुमीशं तु कर्तव्यं मृत्सङ्ग्रहणमेव च ।। २४ ।।
हृदये विपुला ग्रामे भूमिं च कमलां तथा ।
कमलां सव्यपार्श्वे तु भूमिं वै वामपार्श्वके ।। २५ ।।
तन्मध्ये तु समायुक्तं कारयेद्देशिकोत्तमः ।
विष्णूनां वामपार्श्वे तु भूमिपद्मं तु मध्यमे ।। २६ ।।
तत्पद्मे तु महामृद्भिरङ्कुरार्पणसर्वकम् ।
अङ्कुरार्पणं तु सर्वशः ।। २७ ।।
भूमिचर्म न्यसेत् खात्वा पूजयेद्देशिकोत्तमः ।
पूर्वेऽप्यघोरभस्म स्याद्दक्षिणे स्वर्णपात्रकम् ।। २८ ।।

दर्भैरास्तीर्य खड्गेन प्राङ्मुखो वाप्युदङ्मुखः ।
मृदं वा सिकतं वापि कराभ्यामीशमन्त्रतः ॥ ५७ ॥
आदाय मौठिमन्त्रं तु प्रजपन् कर्मसिद्धये ।
त्रिःप्रकारं मृदं खात्वा भूमिं समतलां कुरु ॥ ५८ ॥
स्थालिमध्ये विनिक्षिप्य ब्रह्माङ्गेन मृदं यजेत् ।
पञ्चब्रह्मषडङ्गैश्च पूजयेत्तु विशेषतः ॥ ५९ ॥
धूपदीपौ हृदा दत्वाऽप्यस्त्रमूर्तिं विनिक्षिपेत् ।
दुकूलवासनेनैव समाच्छाद्य मृदं हृदा ॥ ६० ॥
पुनःप्रोक्ष्य हृदा मन्त्री तदूर्ध्वे निक्षिपेत्सुमम् ।
शङ्खदुन्दुभिनिर्घोषैः ढक्कावल्लरिनिस्वनैः ॥ ६१ ॥
विविधैर्वेदघोषैश्च नृत्तगीतसमाकुलैः ।
गजे वा शिबिकायां वा तुरङ्गे वाहनेऽपि वा ॥ ६२ ॥
अश्वादौ वा समारोप्य स्थालीं वै सावधानतः ।
समालम्ब्य कुशैः स्पर्शन् छत्रचामरभूषितः ॥ ६३ ॥
हर्म्यं प्रदक्षिणीकृत्य प्रविशेदालयं बुधः ।
मासत्रयं तु वर्षाणां राजराष्ट्रसमृद्धिदम् ॥ ६४ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे मृत्सङ्ग्रहणविधिपटलःएकोनविंशतिः समाप्तः

अथ अङ्कुरार्पणविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि अङ्कुरार्पणमुत्तमम् ।
उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा ॥ १ ॥
अन्यस्मिन् मङ्गळे कार्ये मङ्गळाङ्कुरमुच्यते ।
द्विविधं तत्समाख्यातं भद्रं क्षुद्रं तथैव च ॥ २ ॥
सर्वेषु यागपूर्वेषु नवमे सप्तमेऽहनि ।
पञ्चमे वा शिवं पूज्य कारयेदङ्कुरार्परणम् ॥ ३ ॥
अधिवासनानि रात्रौ तु तद्दिनात्पूर्वरात्रके ।
अङ्कुरार्पणकार्ये तु निश्चित्य दिवसं तथा ॥ ४ ॥
नवाहे चैव सप्ताहे पञ्चाहे त्रयहेऽपि वा ।
सद्योङ्कुरार्पणं वापि कारयेदङ्कुरार्पणम् ॥ ५ ॥
बीजानामधिपश्चन्द्रः तस्मात्तु निशि निर्वपेत् ।
अनङ्कुरं तु यत्कर्म तत्कर्म निष्फलं भवेत् ॥ ६ ॥
अङ्कुरादङ्कुरं नास्ति तत्कर्माण्यन्तरं विना ।
दिवाकाले न कर्तव्या कृतं चेत्सस्यनाशनम् ॥ ७ ॥
चन्द्रदृष्टौ पराह्ले वा ततस्सद्याङ्कुरार्पणम् ।
सद्याङ्कुरार्पणं चेत्तु दिवा वा निशि निर्वपेत् ॥ ८ ॥
पालिका घण्टिका चैव शरावा च त्रिधा भवेत् ।
सौवर्णं राजतं वापि ताम्रं वा मृन्मयं तु वा ॥ ९ ॥
पालिका षोड(अष्टा)शाङ्गुल्यामुच्चं मात्राङ्गुलेन तु ।
पालिका मूलविस्तारं षोडशाङ्गुलमुच्यते ॥ १० ॥
तदर्थं पादविस्तारं तत्षड्भागैकमोष्ठकम् ।
विस्तारस्य त्रिभागैकं वर्तितं बिलमुच्यते ॥ ११ ॥
एवं पादक्रमं प्रोक्तं शेषदण्डं प्रकल्पयेत् ।
विस्तारस्य त्रिभागैकं दण्डविस्तारमुच्यते ॥ १२ ॥
पालिकालक्षणं प्रोक्तं घटिकालक्षणं शृणु ।
घटिकाघटविस्तारमष्टाङ्गुलमुदाहृतम् ॥ १३ ॥

पालिका पादवत्कुर्यात् दण्डं वै चतुरङ्गुलम् ।
पञ्चवक्त्रसमायुक्तं घटिकां कारयेद्बुधः ।। १४ ।।
घटिकालक्षणं प्रोक्तं शरावमधुनोच्यते ।
शरावमुखविस्तारमष्टाङ्गुलमुदाहृतम् ।। १५ ।।
तदर्धं पादविस्तारमुत्सेधाष्टाङ्गुलोच्छ्रयम् ।
नाहं स्यात्पालिकादीनां विस्तारार्थेनवर्तितम् ।। १६ ।।
कालं भिन्नं च सुषिरं भेदं चैव तु लीनकम् ।
वर्जयेत्तु प्रयत्नेन कारयेल्लक्षणान्वितम् ।। १७ ।।
ईशोविष्णुर्विरिञ्चिश्च पालिकाद्यधिदेवताः ।
प्रत्येकमष्टकं ग्राह्यं तत्तत्स्थापनमारभेत् ।। १८ ।।
भवं शर्वं तथैशानं पशुपत्युग्रकौ तथा ।
रुद्रं भीमं महादेवं पालिकाद्यष्ट विन्यसेत् ।। १९ ।।
केशवं माधवं चैव नारायणत्रिविक्रमम् ।
वामनं श्रीधरं विष्णुं पद्मनाभं घटे न्यसेत् ।। २० ।।
त्रयीमयं त्रिमूर्तिं च पद्माक्षं पद्मयोनिकम् ।
चतुर्मुखं च धातारं पितामहाजयं तथा ।। २१ ।।
ब्रह्माष्टकमिदं ज्ञेयं शरावे क्रमशो न्यसेत् ।
पूजयित्वा यथान्यायं कारयेत्पालिकादिषु ।। २२ ।।
चतुर्विंशतिसङ्ख्याभिस्स्थापयेत्तु विशेषतः ।
षोडशं द्वादशं चैव वसु चैव चतुर्थकम् ।। २३ ।।
प्रासादस्याग्रके वापि दक्षिणे चोत्तरेऽपि वा ।
गोमयालेपिते शुद्धे मण्डपे समलङ्कृते ।। २४ ।।
प्राक्सूत्रं वसुभिः कुर्यात्, उदक् सूत्रं तथैव च ।
मध्ये व्योमपदा ग्राह्या लेपयेदभिकोष्ठकम् ।। २५ ।।
त्रीणि चाभ्यन्तरे त्यक्त्वा चतुर्दिक्षु क्रमाद्बुधः ।
द्वारार्थं च महाशासु पदमेकं परित्यजेत् ।। २६ ।।
स्थाण्डिलं कारयेद्धीमानष्टद्रोणैश्च शालिभिः ।
तस्य मध्ये लिखेत्पद्ममष्टपत्रं सकर्णिकम् ।। २७ ।।

स्थापयेत्कर्णिकामध्ये चन्द्रकुम्भं नवं शुभम् ।
सौवर्णं राजतं वापि पङ्कजं त्वर्धचन्द्रवत् ।। २८ ।।
कुम्भमध्ये तु तोयं स्यात् तोयमध्ये तु पङ्कजम् ।
पङ्कजस्यैव मध्ये तु चन्द्ररूपं प्रशस्यते ।। २९ ।।
ससूत्रं सापिधानं च सवस्त्रं वारिपूरितम् ।
पूजयित्वा यथान्यायं वारुणं मन्त्रमुच्चरन् ।। ३० ।।
पायसान्नं ददेत्पश्चात् ताम्बूलं तु निवेदयेत् ।
पालिकादौ न्यसेद्धीमान् द्वाराणां पार्श्वयोर्द्वयोः ।। ३१ ।।
विन्यसेत् घटिकादौ तु कोणेषु च पदद्वयोः ।
शेषेषु च शरावाणि स्थापयेद्धृदयेन तु ।। ३२ ।।
दर्भाग्रैश्च कुशाग्रैर्वा निच्छिद्रं सुषिरैः कुरु ।
अश्वत्थपत्रपूर्वेण तं तु नावेष्टयेत्पृथक् ।। ३३ ।।
वालुकैर्गोमयैर्मृद्भिः पालिकादीनि पूरयेत् ।
पूजयित्वा यथान्यायं पुण्याहं तत्र कारयेत् ।। ३४ ।।
ततो जनेभ्यस्ताम्बूलं दापयेत्तु विशेषतः ।
बीजानि वापयेत्पश्चात् पयसि प्लावितानि वै ।। ३५ ।।
मुद्गमाषकुळुत्थाश्च निष्पावं शिम्बमाढकम् ।
तिलसर्षपशालिश्च सिद्धार्थं नवबीजकम् ।। ३६ ।।
उत्तमं नवबीजानि षड्बीजं मध्यमं भवेत् ।
अधमं त्रीणि बीजानि यथालाभं प्रकल्पयेत् ।। ३७ ।।
पयसैव तु संक्षाळ्य विन्यसेत्तु क्रमेण तु ।
बीजमुख्यं विशेषेण विन्यसेद्बीजमध्यमे ।। ३८ ।।
शकृत्मृद्भिस्तदापूर्य सेचयेत्तु जलेन तु ।
तिलसर्षपमुद्गानि मूषशिम्बाढकानि तु ।। ३९ ।।
कुळुत्थं सप्तबीजानि हृदयेन विशेषतः ।
आचार्यो वाऽर्पयेत्तत्र प्राङ्मुखोदङ्मुखोऽथ वा ।। ४० ।।
सोमकुम्भस्थतोयेन पालिकादीनि सेचयेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुळीयकैः ।। ४१ ।।

भद्रमेतत्समाख्यातं क्षुद्रं वै च शृणुष्वथ ।
प्राङ्मुखं पञ्चसूत्राणि तथैव च उदङ्मुखम् ॥ ४२ ॥
मध्ये चतुष्पदं त्यक्त्वास्थण्डिलं कारयेद्बुधः ।
मध्यमे सोमकुम्भं तु पूजयेत्पूर्ववत्क्रमात् ॥ ४३ ॥
हृदयेन तु मन्त्रेण पालिकादीनि विन्यसेत् ।
शरावं पालिका चैव घटिका च यथाक्रमम् ॥ ४४ ॥
ईशानादि समारभ्य प्रत्येकं युगसङ्ख्यया ।
पूर्वोक्तविधिना सर्वं कारयेद्देशिकोत्तमः ॥ ४५ ॥
विधानैस्सर्वपात्राणि त्वनुगुप्तं निधापयेत् ।
आपूर्णानि च कृष्णानि श्यामलानि तथैव च ॥ ४६ ॥
सधूम्राणि च कुब्जानि तथा तिर्यगगतानि च ।
अङ्कुराण्यशुभान्यत्र तद्दोषशमनाय च ॥ ४७ ॥
अस्त्रमन्त्रं समुच्चार्य जुहुयाच्छतसङ्ख्यया ।
शूलं प्रदक्षिणं कुर्यात् तीर्थाङ्कुरस्य सुव्रत ॥ ४८ ॥
अन्येषां चैव सर्वेषां वर्जयेत्तु प्रदक्षिणम् ।
प्राङ्मखोदङ्मुखो वाऽथ निर्व्रजेद्देशिकोत्तमः ॥ ४९ ॥
सर्वदेवमयं शूलम् अलङ्कृत्य विशेषतः ।
नदीतीरे तटाके वा उद्याने वा विशेषतः ॥ ५० ॥
सुक्षेत्रे पर्वते चैव मृत्सङ्ग्रहणमारभेत् ।
शुद्धस्थानमनुप्राप्य शुद्धीं कृत्वा महीं ततः ॥ ५१ ॥
मृत्तिकाग्रहणार्थाय पुण्याहस्वस्तिवाचकैः ।
गन्धादिना समारभ्य हृदयेन तु देशिकः ॥ ५२ ॥
अस्त्रमभ्यर्च्य विधिना गन्धपुष्पादिना बुधः ।
खातयेदस्त्रमन्त्रेण मृदं सङ्गृह्य वामतः ॥ ५३ ॥
मृदमभ्यर्च्य विधिना प्रदक्षिणमथाचरेत् ।
प्रविशेदालयं पश्चात् बीजनिर्वापमारभेत् ॥ ५४ ॥
सौवर्णं राजतं वापि पङ्कजं चार्धचन्द्रकम् ।
कुम्भमध्ये तु तोयं स्यात् तोयमध्ये तु पङ्कजम् ॥ ५५ ॥

पङ्कजस्य तु मध्ये तु चन्द्ररूपं प्रशस्यते ।
श्वेतवर्णं द्विनेत्रं च श्वेतपद्मोपरि स्थितम् ।। ५६ ।।
द्विभुजं कुमुदोपेतं श्वेतवस्त्रेण वेष्टितम् ।
सर्वैराभरणैर्भूष्यैः मुक्ताभरणभूषितैः ।। ५७ ।।
किरीटमकुटोपेतं प्रभामण्डलमध्यगम् ।
कृत्तिकां दक्षिणे भागे रोहिणीं वामपार्श्वके ।। ५८ ।।
दुकूलवसनोपेतां सर्वाभरणभूषिताम् ।
एवं ध्यात्वा विशेषेण पालिकावृतमध्यमे ।। ५९ ।।
द्विभुजमखिललोकद्वन्द्वनासं द्विनेत्रम्
कुमुदयुगळहस्तं कोमलं बीजपार्श्वे ।
गगनसहितलोकं सर्वबीजाधिपत्यम्
सकलभुवननाथं विन्यसेत्कुम्भमध्ये ।। ६० ।।
अङ्कुरादङ्कुरं नास्ति पूर्वे निर्दिष्टमुच्यते ।
शीतळा ऋजवो दीर्घा स्फुटाश्च बहुदीर्घकाः ।। ६१ ।।
ह्रस्वाश्च कुटिलाकारा अप्लनास्सुखयां कुरु ।
अङ्कुरोर्ध्वमुखं चैव पूर्वोत्तरद्वयोत्तमम् ।। ६२ ।।
वह्निर्यमश्च निर्ऋतिर्वारुणो वायुरुत्तरः ।
ज्वरं व्याधिमनोदुःखं रिपुनाशं च वर्धते ।। ६३ ।।
चन्द्रोङ्कुराणामधिपो न व्रणादीनि वा व्रतम् ।
चन्द्रदृष्टौ पराह्ने वा तथा सद्याङ्कुराधिपः ।। ६४ ।।
चन्द्रदृष्टौ विहीनं स्यात् प्रातःकाले समर्चयेत् ।
नाळिकेरप्रसूनैश्चाप्यक्षतैर्लाजसंयुतैः ।। ६५ ।।
अङ्कुराण्यर्पणं कृत्वा सर्वकर्म समाचरेत् ।
सद्योङ्कुरार्पणं चेत्तु दिवाकाले समर्चयेत् ।। ६६ ।।
तद्द्वयोरर्पणं नेष्टं क्षपायामेवमिष्यते ।
दिवाकाले कृतं चेत्तु कर्तृनाशःधनक्षयः ।। ६७ ।।
अतः कार्यं प्रयत्नेन रजन्यामङ्कुरार्पणम् ।
भास्करास्तमयात् पश्चात् पञ्चनाड्यास्ततोपरि ।। ६८ ।।

सुयोगे सुमुहूर्ते च सुनक्षत्रे तिथौ दिने ।
अङ्कुरार्पणकार्यं तु प्रागुक्तविधिना चरेत् ।। ६९ ।।
शुभं पीतेषु शुक्लेषु; रक्तेषु कलहो भवेत् ।
तिर्यग्गतेषु रोगं स्यात् अग्रऊर्ध्वे वृतं भवेत् ।। ७० ।।
सर्वेषामेव देवानां बलिभोज्यक्रमं शृणु ।
वैकर्तनस्य शुद्धान्नं यवोदनं विवस्वतः ।। ७१ ।।
मार्ताण्डस्य गुडान्नं स्यात् भास्करस्य घृतौदनम् ।
मुद्गौदनं रवेस्साज्यं रम्भाशर्करयान्वितम् ।। ७२ ।।
लोकप्रकाशकस्यैव पायसं गुडदुग्धयुक् ।
तिलोदनं लोकसाक्षी नैवेद्यं पनसान्वितम् ।। ७३ ।।
त्रिविक्रमस्य दध्यन्नमादित्यस्य पयोदनम् ।
शाल्यन्नं सूर्यमूर्तेस्तु तिलचूर्णघृतान्वितम् ।। ७४ ।।
हरिद्रान्नं सूपयुक्तं सघृतं चांशुमालिनः ।
दिवाकरस्य दुग्धान्नं तेषां नैवेद्यमुच्यते ।। ७५ ।।
धराद्यष्टवसूनां तु घृतोदनबलिं क्षिपेत् ।
गगनाद्यष्टवायूनां शुद्धान्नेन बलिं क्षिपेत् ।। ७६ ।।
कदळीनाळिकेराज्यगुडयुक्तं बलिं क्षिपेत् ।
सर्वेषामेवशुद्धान्नम्, उक्तौदनविहीनके ।। ७७ ।।
अथवा क्षीरमिश्रेण तण्डुलेनाज्यमिश्रतः ।
सर्वेषामेव देवानां बलिं दद्याद्विशेषतः ।। ७८ ।।
उत्तमं करपूर्णेन मध्यमं लिकुचोपमः ।
अथवाऽप्यक्षमात्रं वा बलिं सर्वत्र दापयेत् ।। ७९ ।।
तत्तत्पदस्य रेखायां प्रक्षिपेद्बलिमुत्तमम् ।
अथवा पूर्वदिग्भागे मण्डले वा विशेषतः ।। ८० ।।
पृथक् पृथक् बलिं दद्यात् कर्मसाफल्यहेतवे ।
श्रीकरं विजयं पुण्यमायुरारोग्यवर्धनम् ।। ८१ ।।
अङ्कुरार्पणकं त्वादौ कृत्वा कर्म समाचरेत् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।। ८२ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे अङ्कुरार्पणविधिपटलो विंशतिः समाप्तः

अथ कुण्डलक्षणविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण कुण्डानां लक्षणं शृणु ।
सर्वलोकहितं पुण्यं सर्वदेवप्रियार्थकम् ।। १ ।।
श्रुत्यश्रं योनिचापाश्रमग्न्यश्रं वर्तुलाकृतम् ।
भूताश्रं पङ्कजाश्रं च वस्वश्रं च विधीयते ।। २ ।।
कोट्याहुत्याऽष्टहस्तं स्यात् लक्षहोमं तु षट्करम् ।
अयुतस्य चतुर्हस्तं तथैवाष्टसहस्रकम् ।। ३ ।।
द्विहस्तं पञ्चसाहस्रे हस्तं साहस्रहोमके ।
रत्निमात्रं शताहुत्या मुष्टिमात्रं शतार्धके ।। ४ ।।
मुष्टिमात्रमधोमानम्, अष्टहस्तात् परं न हि ।
मात्राङ्गुलेन कर्तव्यमन्यमानेन कारयेत् ।। ५ ।।
कुण्डविस्तारमानेन कुर्यादवटकं ततः ।
कुण्डं त्रिमेखलोपेतमेकमेखलमेव वा ।। ६ ।।
त्रिमेखलोर्ध्वमानं तु श्रुत्यग्न्यश्विनिकाङ्गुलैः ।
षडङ्गुलोच्चविस्तारं कर्तव्यं ह्येकमेखला ।। ७ ।।
एवं हस्तं प्रमाणस्य कुण्डस्य परिकीर्तितम् ।
द्विहस्ते ऋतुभूतांशौ मेखलाङ्गुलयः क्रमात् ।। ८ ।।
चतुष्करे तु वस्वब्धिकौशिकाङ्गुलयः क्रमात् ।
षड्ढस्ते दशरन्ध्राष्टमेखलाङ्गुलयः क्रमात् ।। ९ ।।
अष्टहस्तं तथा कुर्यात् भानुरुद्रदशाङ्गुलम् ।
यदाकाराणि कुण्डानि तदाकाराश्च मेखलाः ।। १० ।।
अग्न्यङ्गुलं तु विस्तारं भूताङ्गुलं तु दैर्घ्यकम् ।
क्रमेण कृशतां योनिः कुर्यात् पिप्पलपत्रवत् ।। ११ ।।
योनिलक्षणमेवोक्तं कुण्डस्यैककरस्य तु ।
विस्तारस्य त्रिभागैकमुत्सेधं परिकीर्तितम् ।। १२ ।।
द्विहस्तादि समारभ्य यावदष्टकरान्तकम् ।
विस्तारे त्वङ्गुलाधिक्यं दैर्घ्याश्विन्यङ्गुलाधिकम् ।। १३ ।।

योनिलक्षणमेवं स्यान्मेखलोपरिकल्पयेत् ।
पक्षाङ्गुलं समुत्सेधं भूताङ्गलं तु विस्तरम् ॥ १४ ॥
पद्माकारं तथा नाभिं कर्योत्कुण्डस्य मध्यमे ।
द्विभागदळमानं स्यात् एकभागं तु कर्णिका ॥ १५ ॥
द्विहस्तादि समारभ्य वसुहस्तान्तकं क्रमात् ।
विस्तारे चाङ्गलाधिक्यमुत्सेधार्धाङ्गलाधिकम् ॥ १६ ॥
नाभिलक्षणमेवं स्यात् कर्णमानं प्रकल्पयेत् ।
कुण्डस्य परितश्चान्तश्चाङ्गुलेनैव हस्तकम् ॥ १७ ॥
हस्तद्वयं समारभ्य यावद्वसुकरान्तकम् ।
आर्धाङ्गलविवृध्या तु विष्टरं सम्प्रकल्पयेत् ॥ १८ ॥
योन्याष्टनाभिनेमीनामुक्तमुच्छ्रायविस्तरम् ।
योनौ योनिर्न कर्तव्या पद्मे नाभिं न कारयेत् ॥ १९ ॥
सुधापक्वेष्टकाभिर्वा मृदा चैव तु कारयेत् ।
सन्निकृष्टदिने चैव स्थण्डिलं कारयेद्बुधः ॥ २० ॥
कुण्डानां वर्धनार्थाय चतुरश्रं तु साधयेत् ।
प्राक्सूत्रं तु न्यसेत्पूर्वं मत्स्यं तु दक्षिणोत्तरम् ॥ २१ ॥
कुर्यात्पश्चिमपूर्वं तु यावत्कुण्डस्य विस्तरम् ।
पूर्वापरायतं सूत्रं मध्यात् प्रागायतं समम् ॥ २२ ॥
पूर्वापरसमानेन सूत्रेणोत्तरदक्षिणे ।
अङ्कयेदपरानेकान् पूर्वानपि तथैव च ॥ २३ ॥
तत्तत्क्षेमार्धमानेन मत्स्यं कोणेषु साधयेत् ।
तत्र सूत्रप्रधानेन चतुरश्रं भवेदिह ॥ २४ ॥
चतुरश्रं पुनः कृत्वा चतुष्कोष्ठसमन्वितम् ।
कुण्डानामपिसर्वेषां वेदाश्रं योनिरुच्यते ॥ २५ ॥
श्रोत्रार्धार्धांशमानेन क्षेत्रार्धं पार्श्वयोस्ततः ।
क्षेत्रार्धावधिकं भूम्याक्षेत्रपञ्चैकभागिकम् ॥ २६ ॥
तत्पुरस्तात् बहिर्न्यस्त्वा तस्मात्तद्द्वयपार्श्वयोः ।
सूत्रे संयोजिते कुण्डं भवेत्पिप्पलपत्रवत् ॥ २७ ॥
श्रोत्रार्धं तु परिग्राह्य क्षेत्रार्धे तु विनिक्षेपेत् ।
द्विधा कृत्वाधिकं तत्रयाम्योन्तरप्रदेशयोः ॥ २८ ॥

एकैकांशं न्यसेद्वाह्ये सूत्रादभ्यन्तरे ततः ।
तन्मानेन भ्रमेद्विद्वान् चापाभं चोत्तरे क्रमात् ।। २९ ।।
क्षेत्रे तु भूतभागे तु एकैकांशं तु पार्श्वयोः ।
विन्यसेच्च परं तत्र नैर्ऋते वायुदेशके ।। ३० ।।
त्रिकोणाभ्यन्तरे सत्रं कृत्वा वै मत्स्यपुच्छके ।
संयोज्य त्रिगुणानेव त्रिकोणायतनं स्मृतम् ।। ३१ ।।
श्रोत्रार्धं तु परिग्राह्य क्षेत्रार्धं तु विनिक्षिपेत् ।
द्विधा कृत्वाधिकं तन्त्रं व्योमांशो बाह्यतो न्यसेत् ।। ३२ ।।
वर्तयेत्ते नमानेन वर्तुलं कुण्डमुत्तमम् ।
तत्षट्भागैकभागेन क्षेत्रार्धेनैव वर्तुलम् ।। ३३ ।।
तद्वृत्ताकारमादाय रव्यंशं विभजेत्ततः ।
धात्वंशेन भुजं कुर्यात् भूताश्रं तु भवेत्स्फुटम् ।। ३४ ।।
तत्क्षेत्रमष्टधा कृत्वा भागैकं पार्श्वयोर्बहिः ।
तयोर्मध्यं गृहीत्वाऽर्धसूत्रेणैव भुजं तथा ।। ३५ ।।
षट्सूत्रं परितः कृत्वा षट्कोणं तद्भवेदिह ।
अष्टभागकृतक्षेत्रे दिक्षु चैकांशकं न्यसेत् ।। ३६ ।।
चतुर्भागकृतं क्षेत्रमेकैकांशं न्यसेत्ततः ।
क्षेत्रार्धं तेन मानेन मत्स्यं कृत्वा विचक्षणः ।। ३७ ।।
तन्मध्यमाच्चतुर्दिक्षु चतुष्पत्रं तु वर्तुले ।
बिसिनीकुण्डमेवं तु क्षेत्रे गायत्रिभाजिते ।। ३८ ।।
तदेकांशं बहिर्न्यस्त्वा परितश्चतुरश्रकम् ।
कर्णार्धं सूत्रमानेन कोणात् कोणं तु लाञ्छयेत् ।। ३९ ।।
चतुर्दिक्ष्वष्टकोणाख्यं कुण्डं कुर्यात् सलक्षणम् ।
सप्तभागैकभागेन क्षेत्रार्धेनैव वर्तुलम् ।। ४० ।।
क्षेत्रं षोडशभागैकं क्षेत्रार्धेनैव योजयेत् ।
वर्तयेत्तेन मानेन धात्वश्रं भवति स्फुटम् ।। ४१ ।।
मानहीने महाव्याधिः अधिके शत्रुवर्धनम् ।
भग्ने चैव त्वनावृष्टिः स्फुटिते सस्यनाशनम् ।। ४२ ।।

विशेषकुण्डलक्षणविधिः :-

त्रिभक्तचतुरश्रं तु षोडशस्तम्भसंयुतम् ।
नासिकाभिर्द्विरष्टाभिः युक्तं मध्येऽङ्कणान्वितम् ।। १ ।।
मध्योर्ध्वकूटयुक्तं वा प्रभावादविधानतः ।
कृत्वैकाशीतिभागान्निशितविपुलधी मण्डलाभ्यन्तरन्त
स्तन्मध्ये वेदीनवांशा भवति तत स्त्रीणिभागानि मध्ये ।
अश्रं योन्यर्धचन्द्रं गुणभुजमपरं वै सुवृत्तं षडश्रं
पद्मं वस्वश्रकुण्डं सुरपतिभवनादिक्क्रमेणैव कुर्यात् ।। २ ।।
नवनवकेन केन तु वेदिनवनवमध्यपदेकपदेकः ।
नवनवकुण्डमधाष्टमादधाना नवनवदेवताहोममिदं स्यात् ।। ३ ।।
अस्त्रविस्मृतिखातवत् चतुष्कोटिकं दिशि त्रिसूत्रकम् ।
सति मेखलमथ द्विकं तु वा धातुभूतगणमात्रकोन्नतम् ।। ४ ।।
व्यासमन्ध्यनलपक्षमात्रकैःयोनिमूर्ध्व इहेष्टवत्कुरु ।
तारदैर्घ्यकसमुद्गमं चतुष्षण्णवाङ्गुलिभिरग्निसम्मुखः ।। ५ ।।
देवं नयनाङ्गुलोन्नतं मेघयुतं तु वा पुनः ।
तालं गाढमथवैकमेखलं सर्वकुण्डकं कर्णयोनिकम् ।। ६ ।।
वृत्तसन्निभमधो तदाकृतिर्वायुकेषुरसमात्रवैपुनः ।
व्यासवेदगुणतुङ्गकनाभिमब्जमिव कुण्डमध्यमे ।। ७ ।।
न्यस्यैकांशं पञ्चभागैःपुरस्तात्, कोणस्यार्धार्धं ग्रहीत्वा तत्तत् ।
कोणं यावद्भ्रमयेत्तद्वदन्यं, योन्याकारम् स्याद्विसूत्रप्रयोगात् ।। ८ ।।
व्यासे धर्मांशेशमूर्ध्वा दधस्तात्, नीत्वैवर्जान् पातयित्वा च सूत्रम् ।
तन्मानेन भ्रामयेदर्धचन्द्रं कुण्डंयुक्त्या वास्तुविद्याविधिज्ञैः ।। ९ ।।
क्षेत्रव्यासो षट्कृते चाष्टभागे मानेनानेन त्रिसूत्रप्रयोगात् ।।
त्र्यश्र्यंप्रोक्त्यब्धिं नवांशेशकं तत् बाह्ये न्यस्य भ्रामयेद्वृत्तकुण्डकम् ।।
व्यासे बुद्धिकांशं चाशकं पुच्छयोस्तत् बाह्ये न्यस्यानेन मध्यात् ।। १० ।।
मत्स्यं कृत्वा युग्यदद्विपश्चात् षट्कोणं स्यात् पातयेत् सूत्रषट्कम् ।
वृत्तं कृत्वा पूर्ववत् तस्य मध्ये वृत्तं भ्राम्येद्द्वयं मध्यतस्तत् ।। ११ ।।

पद्मस्याकारं यथा कर्णिकादीन् विद्यान्यापक्षे येन योग्यान् ।
क्षेत्रव्यासे षट्चतुर्भागिकेऽस्मिन् भागं बाह्ये न्यस्य सूत्रं समन्तात् ।।१२।।
कोणस्यार्धं कोणकाख्यानलिख्येदष्टाश्रं स्यादष्टसूत्रप्रयोगात् ।
सैक्यत्वेदाष्टांशकैः पट्टदैर्घ्यं सप्तसप्तसूत्रप्रयोगात् ।। १३ ।।
तत्तर्धेलोपात्तभागेषु तत्तद्भागं कृत्वा प्राग्निपैकैकभागे ।
न्यूनाधिक्येनाश्रनाहस्य तुल्यं युक्त्वा धीमान् योजयेत्सर्वकुण्डम् ।।१४।।
अथवान्यप्रकारेण कुण्डलक्षणमुच्यते ।
रत्निमात्रसमं कृत्वा मुष्टिमात्रं तदर्धकम् ।। १५ ।।
त्रिमेखलसमायुक्तम् अथवा, एकमेखलम् ।
षडङ्गलप्रमाणेन विस्तारोत्सेधमेखलः ।। १६ ।।
ऊर्ध्वमेखलसंयुक्तं चतुरङ्गुलविस्तृतम् ।
मध्ये त्रियङ्गुलं चैव, आधारे द्व्यङ्गुलस्य तु ।। १७ ।।
उत्सेधं तु समाज्ञेयं विस्तारं तत्समं भवेत् ।
चतुरश्रं त्रियश्रं च षडश्रं च पुमान् भवेत् ।। १८ ।।
योन्याकरं धनुःपद्मं स्त्रीरूपं प्रतिकीर्तितम् ।
सुवृत्तमष्टकोणं च नपुंसकं हुताशनः ।। १९ ।।
पूर्वस्यां सृष्टिबहलं कन्यालाभं तु पावके ।
शतृक्षयं स्याद्याम्ये तु नैर्ऋत्यां रोगनाशनम् ।। २० ।।
पश्चिमे सस्यवृद्धिस्स्यात् वायौ वायुप्रदं भवेत् ।
उत्तरे धनवृद्धिस्स्यादीशाने भुक्तिमुक्तिदम् ।। २१ ।।
इन्द्रईशानयोर्मध्ये सर्वप्राणिसुखावहम् ।
मध्ये ब्रह्मपदे वेदी दैविके मङ्गळायुते ।। २२ ।।
मानुषे च पदे कुण्डं पैशाचे तोरणं न्यसेत् ।
वह्नौ तु दक्षिणे पूर्वे चोत्तराभिमुखंस्ततः ।। २३ ।।
अन्येषु प्राङ्मुखो भूत्वा होमं कुर्याद्विचक्षणः ।
भवश्शर्वस्तथैशानो पशुपतिर्नील एव च ।। २४ ।।
उग्रो भीमो महादेवो विध्यष्टमूर्तयस्स्मृताः ।
पूर्वादीशानपर्यन्तं कुण्डानामधिदेवताः ।। २५ ।।

पञ्चाग्न्यायतनं चेत्तु ब्रह्माद्याः पञ्चमूर्तयः ।
एकाग्न्यायतनं चेत्तु यथा कुण्डे सदाशिवः ।। २६ ।।
स्थण्डिलं भूमिदैवत्यं कुण्डं तु विष्णुदैवतम् ।
वर्धनी ब्रह्मदैवत्यं प्रोक्षणी देवपुष्करम् ।। २७ ।।
प्रणीता वरुणादैवत्यं परिधी भवदेवता ।
परिस्तरो ऋषिदैवत्यं समिधा चैन्द्रदेवताः ।। २८ ।।
अक्षतं नागदैवत्यं गन्धमश्विनिदेवता ।
पुष्पं गन्धर्वदैवत्यं व्याघ्रं श्रीदेविरुच्यते ।। २९ ।।
दीपं प्रजापतिर्देवं प्रोक्षणी भृगुदैवतम् ।
लाजा नक्षत्रदैवत्य मित्येते अधिदेवताः ।। ३० ।।
प्राग्भूतकुम्भं तदेकाग्नि कुम्भं दाक्षिण्यवेदै नैऋत्यदाग्निकम् ।
वारुण्यषट्कं ततश्चाग्निवायौ सोमे युगस्यात्त्रयकुम्भमीशे ।। ३१ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे कुण्डलक्षणविधिः,
विशेषकुण्डलक्षणविधिपटल एकविंशतिः समाप्तः

अथ अग्निकार्यविधिपटलप्रारम्भः

अग्निकार्यविधिं वक्ष्ये सर्वलोकहिताय च ।
कुण्डं वा स्थण्डिलं वापि अग्निरायतनं द्विधा ।। १ ।।
चतुरश्राकृतिं विप्र! सर्वकामार्थसाधनम् ।
प्रजावृद्धिकरं योनौ चार्धचन्द्रे रिपुक्षयम् ।। २ ।।
गुणाश्रे शान्तिदं प्रोक्तं पर्जन्यार्थं तु वर्तुळे ।
पञ्चाश्रे रोगनाशार्थं जयार्थं चैव पद्मके ।। ३ ।।
वस्वश्रे पुष्टिदं प्रोक्तं सप्ताश्रे सस्यवर्धनम् ।
कुण्डानां च फलं ह्येवं स्थण्डिलं चाधुनोच्यते ।। ४ ।।
गोमयालेपितां भूमिमभिसम्मृज्य वै हृदा ।
निकुड्योत्करमादाय प्रोक्ष्य सौम्ये विवर्जयेत् ।। ५ ।।
शुद्धदेशोर्ध्वसिकतैरनाद्यैरस्तविस्तृतम् ।
अङ्गुलत्रयमानोच्चं समं निम्नोन्नतं तथा ।। ६ ।।
प्रागग्रास्तिस्त्ररेखास्तु तद्वत्सौम्याग्ररेखया ।
ब्रह्मा वैवस्वतस्सोमो मध्ये दक्षिणवामयोः ।। ७ ।
तिसृणां प्रागग्राणामधिदेवाःप्रकीर्तिताः ।
रुद्रो विष्णुश्च शक्रश्च मध्ये पश्चिमपूर्वयोः ।। ८
तिसृणामुदगग्राणामधिदेवाःप्रकीर्तिताः ।
कुण्डं चेत् शोधनं चैव क्षाळनं शोषणं तथा ।। ९
पावनं प्रोक्षणं चैव सद्यादिब्रह्मपञ्चकैः ।
सूर्यकान्तोद्भवं श्रेष्ठं काष्ठजं मध्यमं भवेत् ।। १० ।।
श्रोत्रियागारजं वह्निः कन्यसं चेति कीर्तितम् ।
शरावे ताम्रपात्रे वा पावकं तु समानयेत् ।। ११ ।।
होतुरग्रे तु विन्यस्य सम्प्रोक्ष्य बहुरूपिणा ।
गन्धादिभिस्समभ्यर्च्य वर्मणा चावकुण्ठयेत् ।। १२ ।।
प्रक्षिप्येन्धनमग्नौ तु वह्निरायतनान्तरे ।
स्थण्डिले चैव षड्रेखान् ब्रह्मादीनां प्रपूजयेत् ।। १३ ।।

नाभिमध्ये तु वागीशीं नीलोत्पलसमप्रभाम् ।
ऋतुस्नातां सकूर्चस्थां ध्यात्वा तन्मूलमन्त्रतः ॥ १४ ॥
सम्पूज्याग्निं समादाय सम्भ्राम्यायतनं त्रिधा ।
योनिमार्गेन निक्षिप्य वह्निबीजमनुस्मरन् ॥ १५ ॥
उपस्थानं तु कृत्वा तु मन्त्रजुष्टो तदूनकम् ।
सदर्भैरिन्धनं क्षिप्त्वा दर्भाग्रैःहृदयेन तु ॥ १६ ॥
गर्भाधानमिदं प्रोक्तं कुर्यात्पुंसवनं तथा ।
हृदयेन जपेदीशमेतत्पुंसवनं स्मृतम् ॥ १७ ॥
अघोरेण यजेदर्घ्यं सीमन्तस्याधिकं तथा ।
अग्निं प्रज्वाल्य वक्त्रेण पुष्पाक्षतसमायुतम् ॥ १८ ॥
निक्षिप्य शिरसा मन्त्री जातकर्मविधिं शृणु ।
द्विमुखं चैकहृदयं चतुश्रोत्रं द्विनासिकम् ॥ १९ ॥
आस्यद्वयं च षण्णेत्रं पिङ्गलं सप्तहस्तकम् ।
त्रिमेखलं त्रिपादं च सप्तजिह्वासमायुतम् ॥ २० ॥
चतुश्शृङ्गं वृषारूढं बालादित्यसमप्रभम् ।
उपवीतसमायुक्तं जटामकुटमण्डितम् ॥ २१ ॥
सव्यभागे चतुर्हस्तं त्रिहस्तमपसव्यके ।
स्रुक्स्रुवे चाक्षमाला च सशक्तिर्दक्षिणे करे ॥ २२ ॥
चामरं व्यजनं चैव घृतपात्रं तु वामके ।
सव्यवक्त्रे चतुर्जिह्वा वामवक्त्रे त्रयस्तथा ॥ २३ ॥
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरक्ता बहुरूपा सप्तजिह्वा प्रकीर्तिता ॥ २४ ॥
हिरण्यादिचतस्रस्तु जिह्वा दक्षिणवक्त्रके ।
तिस्रस्तु सुप्रभादिस्स्याज्जिह्वा वै वामवक्त्रके ॥ २५ ॥
हिरण्या वारुणे जिह्वा कनका मध्यमस्थिता ।
रक्ता चोत्तरजिह्वा स्यात् कृष्णा याम्यदिशि तथा ॥ २६ ॥
सुप्रभा पूर्वजिह्वा स्यादतिरक्ताग्नौ व्यवस्थिता ।
बहुरूपेशजिह्वा स्यात् जिह्वास्थानं प्रकीर्तितम् ॥ २७ ॥

सर्वसिद्धिप्रदं ह्येतत् वह्निरूपं प्रजायते ।
अग्निमध्ये स्थितं ध्यात्वा स्वासीनं पश्चिमाननम् ।। २८ ।।
सम्प्रोक्ष्यैशानमन्त्रेण दत्वार्घ्यं पुष्पमिश्रितम् ।
तन्नामकरणं प्रोक्तमेवं संस्कारपञ्चयुक् ।। २९ ।।
दर्भेणेन्धनमग्नौ तु उपस्थानं हृदा क्षिपेत् ।
दर्भैश्चैव परिस्तीर्य प्रतिदिग् दशभिस्तथा ।। ३० ।।
दक्षिणाश्चोत्तराश्चैव उत्तरास्त्वधरास्तथा ।
पूर्वाग्राश्चोत्तराग्राश्च प्रागादीनि क्रमात् क्षिपेत् ।। ३१ ।।
देवस्य त्वेति मन्त्रेण पूर्वे चैव परिस्तरेत् ।
स्रुक्स्रुवौ च घृतस्थालीं प्रणीता प्रोक्षणी तथा ।। ३२ ।।
समित्कूर्चं चरुं दर्वीं विहारं च कमण्डलुम् ।
द्रव्यपात्राणि सर्वाणि वामे काशोपरि न्यसेत् ।। ३३ ।।
अधोमुखानि पात्राणि द्वन्द्वपात्राणि सादयेत् ।
प्रोक्षणीपात्रमादाय जलेनैव प्रपूरयेत् ।। ३४ ।।
वितस्तिमात्रमायामं तन्मध्ये ग्रन्थिसंयुतम् ।
अङ्गुष्ठानामिकाभ्यां तु उदकोत्प्लवनं कुरु ।। ३५ ।।
संस्कृत्य तेन तोयेन प्रोक्ष्य पात्राणि वर्मणा ।
स्रुक्स्रुवौ चेन्धनादीनि सर्वद्रव्याणि दक्षिणे ।। ३६ ।।
संस्थाप्य तेन तोयेन प्रोक्षयेत् स्नानशेषकान् ।
द्रव्यान् होमार्हकान् विद्धि पात्राण्यूर्ध्वाननं कुरु ।। ३७ ।।
बद्ध्वा तु सप्तभिर्दर्भै कूर्चं होतुश्च दक्षिणे ।
निधायार्घ्यं विरिञ्चिं तु ब्रह्मबीजेन बुद्धिमान् ।। ३८ ।।
प्रणीतान् तोयसम्पूर्णान् कूर्चपुष्पाक्षतान्वितान् ।
होतुर्वामे न्यसेदूर्ध्वे मेखलोपरि मध्यमे ।। ३९ ।।
गन्धपुष्पादिभिश्चैव विष्णुबीजेन पूजयेत् ।
वह्नौ तु दक्षिणे पूर्वे चोत्तराभिमुखस्थितः ।। ४० ।।
अन्येषु प्राङ्मुखो भूत्वा होमं कुर्याद्विचक्षणः ।
घृतेन पात्रमापूर्य नीत्वाङ्गाराणि पश्चिमे ।। ४१ ।।

तस्योर्ध्वे तु न्यसेत्पात्रे द्विकुशाग्रं विनिक्षिपेत् ।
पर्यग्निं च कुशाग्रं च कृत्वाग्नौ तु विनिक्षिपेत् ॥ ४२ ॥
प्रादेशमात्रकूर्चेन मध्यग्रन्थियुतेन च ।
हृदये न तु मन्त्रेण त्रिस्सम्प्लवनमाचरेत् ॥ ४३ ॥
ग्रन्थिं विसृज्य सम्प्रोक्ष्य वह्निमध्ये विनिक्षिपेत् ।
घृतं प्रदक्षिणं नीत्वा योन्यूर्ध्वे तु निधापयेत् ॥ ४४ ॥
स्रुवं प्रक्षाळ्य तोयैश्च दर्भाग्रैर्हृदयेन तु ।
समृज्य मध्यमं मध्ये मूलं मूलैश्च शोधयेत् ॥ ४५ ॥
अग्रमग्रेण संस्पृश्य सन्तप्याधोमुखं स्रुवम् ।
क्षिप्त्वा परिधयस्तत्र पाशभृद्याम्यसौम्ययोः ॥ ४६ ॥
वर्मनेत्रास्त्रमन्त्रैश्च प्रक्षिपेत्तु यथाक्रमम् ।
पलाशोदुम्बुराश्वत्थं प्लक्षन्यग्रोधजास्त्विह ॥ ४७ ॥
शमीखादिरबिल्वार्कअपामार्गं यथाविधि ।
द्वादशाङ्गुलमात्रेण इध्मं चाष्टादशाङ्गुलम् ॥ ४८ ॥
तेष्वपि द्वन्द्वसमिधौ संयोज्याऽनलनीलयोः ।
क्षिपेदग्नौ तथैशान्यां हृदा च शिरसा कुरु ॥ ४९ ॥
अनुयाज्ञं समित्तत्र प्रणीतोर्ध्वे न्यसेद्धृदा ।
पावकं गन्धपुष्पाद्यैः पूजयेत्तु विशेषतः ॥ ५० ॥
लोकपालान्यथास्थाने पूजयेद्देशिकोत्तमः ।
परिषेचनं ततः कृत्वा अदितेन्वादिमन्त्रकैः ॥ ५१ ॥
प्रागग्रा प्रथमं याम्ये ततोदीचीं तु पश्चिमे ।
तृतीयमुत्तरे प्राच्यां चतुर्थं च समन्त्रकम् ॥ ५२ ॥
आज्याभिघारं तत्रैव नेत्रेणास्त्रेण बुद्धिमान् ।
क्षुरेणोद्घाटयेदास्यमस्त्रेणैव तु निष्कृतिः ॥ ५३ ॥
गृह्य पञ्चदशेध्मानि सकृन्मूलेन होमयेत् ।
सद्योजातेन मन्त्रेण वायव्याग्नेयमाहुतिम् ॥ ५४ ॥
हृदयेन तु मन्त्रेण नैर्ऋतैशानमाहुतिम् ।
अघोराहुतिरेवं स्यादाज्यभागमतःपरम् ॥ ५५ ॥

सौम्ये तत्पुरुषं हुत्वा बहुरूपं तु याम्यके ।
शिखामन्त्रं तथैन्द्रे तु जुहुयान्नेत्रपश्चिमे ।। ५६ ।।
मध्यमे तु शिखामन्त्रं जुहुयाद्देशिकोत्तमः ।
अग्निबीजमनुस्मृत्य हुत्वा वै पञ्चविंशतिः ।। ५७ ।।
अन्नप्राशनमेवं स्यात् चौलोपनयनं स्मृतम् ।
समावर्तनमेवं स्यात् सद्यादिब्रह्मपञ्चकैः ।। ५८ ।।
यथाक्रमेण जुहुयात् सप्तसङ्ख्या पृथक् पृथक् ।
अग्निमध्येविशेषेण आसनं परिकल्पयेत् ।। ५९ ।।
ध्यात्वा सदाशिवं देवं पञ्चमावरणान्वितम् ।
गन्धपुष्पादिभिश्चैव पूजयेत्तु विशेषतः ।। ६० ।।
शिवे दशाहुतिः प्रोक्त मन्येषामहुतिर्भवेत् ।
शिवाग्निजनितोहव्यं(ह्येवं)होमं कुर्याद्विचक्षणः ।। ६१ ।।
अग्निकर्णे हुतं द्रव्यं कुर्याद्व्याधिं च पीडनम् ।
अन्धता नेत्रयोर्हुत्वा कण्ठे तु गुरुनाशनम् ।। ६२ ।।
लिङ्गे तु स्थाननाशाय जानुरुच्चाटनं भवेत् ।
मरणं पादमूले तु जिह्वायां सर्वकामदम् ।। ६३ ।।
तस्मादग्नौ विशेषेण जिह्वायां होममाचरेत् ।
हिरण्यायां हुनेदिध्मं कनकायां घृतं चरुम् ।। ६४ ।।
जुहुयाल्लाजं च कृष्णायां रक्तायां च यवं हुनेत् ।
सुप्रभायां हुनेत्सक्तुमतिरक्तौ तिलाहुतिम् ।। ६५ ।।
सिद्धार्थं बहुरूपायां सर्वासु व्याहृतिं हुनेत् ।
द्रव्याण्येतानि सर्वाणि कनकायां हुनेत्क्रमात् ।। ६६ ।।
वह्नेस्तु रक्तजिह्वानि ज्ञात्वा कर्म समाचरेत् ।
शब्दं वर्णं च गन्धं च शिखाधूम्रं तथैव च ।। ६७ ।।
भेर्याश्च गजनादाश्च शब्दास्त्वतिशुभाः स्मृताः ।
खरस्वरो महानादो वयश्शब्दस्त्वशोभनम् ।। ६८ ।।
शातकुम्भमयं चैव वैदूर्यादित्यसन्निभम् ।
सिन्धूरमिन्दुकोपाभं पिङ्गलं चन्द्रमण्डलम् ।। ६९ ।।

रौप्यं वज्रं हरीताळं नीलाभं कृष्णवर्णकम् ।
रौप्यनीलहरीताळं कृष्णाभान्यशुभानि वै ॥ ७० ॥
अन्यानि सर्ववर्णानि सर्वसिद्धिकराणि हि ।
उशीरपाटले चैव पुन्नागं पद्मकं तथा ॥ ७१ ॥
आज्यगुग्गुलुगन्धानि सर्वसिद्धिकराणि च ।
स्विन्नगन्धं तथा मूत्रं विष्टा च खरपूतिकम् ॥ ७२ ॥
एतान्यशुभगन्धानि सर्वदोषकराणि हि ।
शिखा शिखाप्रतीकाशाश्छत्राकारास्तु कम्पकम् ॥ ७३ ॥
एताश्च शुभदाः प्रोक्ताः कुररा वर्तुला शुभा ।
कुन्दकाशनिभं धूम्रं सर्वसिद्धिप्रदं स्मृतम् ॥ ७४ ॥
कपोतशुकपिञ्छाभं धूम्रं तदशुभं भवेत् ।
अप्रदक्षिणमावर्तं सस्फुलिङ्गं च दर्शनम् ॥ ७५ ॥
तथापसव्यगमनमपशब्दं च मक्षिकम् ।
करणानि तथैतानि सर्वदोषकराणि तु ॥ ७६ ॥
तिर्यक्प्रदक्षिणं चैव मध्यभागमधोगतिः ।
पुनरावर्त[illegible]व खाननं च शुभानि वै ॥ ७७ ॥
अशुभैर्लक्षणैर्युक्तं प्रायश्चित्तं तु कारयेत् ।
अस्त्रेणैव तु मन्त्रेण हुनेदष्टशतं क्रमात् ॥ ७८ ॥
दशाहुतिं च कर्तव्यं व्याहृतिं च विशेषतः ।
तदूर्ध्वे समिधौ चैव वर्मणा परिधिः क्रमात् ॥ ७९ ॥
तन्मन्त्रेण क्षिपेदग्नौ आघारसमिधौ तथा ।
प्राग्गुप्तब्रह्कूर्चस्य ग्रन्थिं मुक्त्वा विसर्जयेत् ॥ ८० ॥
अनुयाजिं समादाय वह्निमारोप्य रक्षयेत् ।
आरोपणस्य मन्त्रं तु योन्ते यो निऋऋत्वियः ॥ ८१ ॥
अथवाऽग्नौ विनिक्षिप्य अनुयाजक्रियां द्विज ।
प्रणीतापात्रमादाय प्रोक्षण्याऽद्भिस्तु सेचयेत् ॥ ८२ ॥
प्रणीतातोयं प्राच्यादि प्रणीताद्भिः स्पृशेद्बुधः ।
प्रणीताधोमुखं कृत्वा तेनैव प्रोक्ष्य सर्वतः ॥ ८३ ॥

आज्यशेषं समादाय नैर्ऋत्यां स्रावयेद्भुवि ।
राक्षसेन्द्रश्च तेनैव तृप्तिमाप्नोति नित्यशः ॥ ८४ ॥
दर्भास्तरणमानीय साग्रमेकंविहाय वै ।
ततश्चाभ्युज्य दर्भांश्च क्रमादग्राद्दहेत्ततः ॥ ८५ ॥
तदेकं प्रोक्ष्य वह्नौ तु क्षिपेदग्रं दहेत्ततः ।
तद्भस्म सङ्गृहीत्वा तु त्रिपुण्ड्रं पापनाशनम् ॥ ८६ ॥
श्रीकरं विजयं पुण्यमायुरारोग्यवर्धनम् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे अग्निकार्यविधिपटलो द्वाविंशतिःसमाप्तः

अथ वह्निरूप विधिपटल प्रारम्भः

अतःपरं प्रवक्ष्यामि वह्निरूपं प्रजाचते ।
वकारो वर्धते ज्ञानं ह्निकारेण मलक्षयः ।। १ ।।
प्रज्ञोत्पन्नो मलच्छेदात् वह्निरित्यभिधीयते ।
वागीशो अग्निमाता च पिता वागीश्वरस्तथा ।। २ ।।
वागीशसम्भवा गौरी वागीशस्तु महेश्वरः ।
कर्षणादिप्रतिष्ठान्तं प्रतिष्ठाद्युत्सवान्तकम् ।। ३ ।।
प्रायश्चित्ते तथान्यस्मिन् मङ्गळे शान्तिकर्मणि ।
कर्मारम्भेषु सर्वेषु वह्निरूपो महेश्वरः ।। ४ ।।
पूजनीयो विशेषेण रूपध्यानपुरस्सरम् ।
सर्वदेवमयो वह्निस्सर्वमन्त्रमयस्तथा ।। ५ ।।
तस्मात्सर्वेषु कार्येषु ध्यातव्यो विधिमार्गतः ।
अग्निपूजां विना यत्र तत्र वै निष्फलं भवेत् ।। ६ ।।
सर्वविद्यात्मकश्चासौ सर्वज्ञानात्मकस्तथा ।
बिन्दुस्[illegible]ात् परेशाख्यक्षोभात् संज्ञायतेऽनलः ।। ७ ।।
अतस्तद्रूपममलं कोटिमार्ताण्डसन्निभम् ।
ज्वलदग्निसमप्रख्यमेवमेवं विचिन्तयेत् ।। ८ ।।
सदाशिवस्य हृदये शक्तिश्शिवहृदि श्शिवा ।
उभयोरन्तरं नास्ति वायुरम्बरयोरपि ।। ९ ।।
शिवशक्तिसमायोगाच्छिवाग्निस्तु समुद्भवः ।
शिवाग्नेस्तु सहस्रांशात् गार्हपत्यसमुद्भवः ।। १० ।।
गार्हपत्यसहस्रांशात् दक्षिणाग्निसमुद्भवः ।
दक्षिणाग्निसहस्रांशादाहवनीयमुद्भवः ।। ११ ।।
तस्मात्सर्वप्रयत्नेन अग्निरुद्भवमुच्यते ।
अग्नित्रयमिदं प्रोक्तं बालयौवनवृद्धकाः ।। १२ ।।
दीक्षाशन्तिस्तु बालाग्निः प्रोक्षणोत्सवयौवनम् ।
प्रतिष्ठा–नित्य–वृद्धाग्निः अग्निभेदं त्रिधा भवेत् ।। १३ ।।

नामान्तं बालमग्निस्स्यात् आवृतायां तु यौवनम् ।
विवाहान्तं तु वृद्धाग्निरग्नित्रयमिति स्मृतम् ।। १४ ।।
शिवाग्निं प्रथमं विद्यात् द्वयं चाहवनीयकम् ।
वृद्धाग्निश्च तृतीयं स्यात् दक्षिणाग्निश्चतुर्थकम् ।। १५ ।।
पञ्चमं यौवनाग्निश्च गार्हपत्यं च षष्ठकम् ।
बालाग्निं सप्तमं चैव अष्टमं केवलाग्निकम् ।। १६ ।।
सामान्याग्निश्च नवममग्निभेदं प्रकीर्तितम् ।
अग्निभेदं तथा वक्त्रं जिह्वाभेदानुरूपकम् ।। १७ ।।
बीजभेदं क्रियाद्रव्यं ज्ञात्वा सर्वं समाचरेत् ।
पूर्वतो वसतो वह्निः पूर्वतस्तच्छिवद्विजः ।। १८ ।।
अग्निमन्त्रं शतं जप्त्वा प्रीतिप्रत्यङ्गखो भवेत् ।
पाश(शि)मध्ये च सौम्ये च याम्ये राक्षसके भवेत् ।। १९ ।।
पूर्वाग्नौ रुद्रदिग्भागे सुरस्यादीनि योजयेत् ।
पूर्ववद्रूपसंयुक्ता स्वाहादेवी च भावयेत् ।। २० ।।
प्रतिष्ठोत्सवकाले तु दीक्षाकाले तथैव च ।
वृद्धरूपं प्रतिष्ठाग्निः उत्सवादीनि यौवनम् ।। २१ ।।
दीक्षाग्निं बालरूपं तु अग्नित्रयमिति स्मृतम् ।
नित्यग्नौ वृद्धयःप्रोक्ता यौवनाग्नौ च उत्सवः ।। २२ ।।
बालाग्नौ च प्रतिष्ठा च अग्निरूपमिहोच्यते ।
बाला च वृद्धा च सुयौवना च त्रेताग्निरूपं कथितं प्रशस्तम् ।
बालाग्निरूपं कथितं प्रतिष्ठा नित्याग्नि-वृद्धोत्सव-यौवनाग्निः ।। २३।।
गार्हपत्याहवनीयदक्षिणान् बालयौवनवृद्धस्वरूपकान् ।
स्थापनोत्सवनित्यविधौ सदा पूजयेत्तु शिवाग्निस्वरूपकान् ।। २४ ।।
अनलशतसहस्रं रूपभूतं च वक्त्रं स्रुवमभयपरशुं खड्गघण्टां च सव्ये।
वरदमनलखेटं चाङ्कुशं चान्यहस्ते दधति जनितरूपं
शैवमाहुश्शिवाग्निम् ।। २५ ।।
पञ्चवक्त्रयुतं रक्तं पञ्चजिह्वासमायुतम् ।
अजवाहनसंरूढं सृष्टिसंहारकारणम् ।। २६ ।।

दशहस्तसमायुक्तं शैवमग्निस्वरूपकम् ।
वृद्धरूपत्रियक्षचतुर्भुजमक्षपिङ्गमथो वृषवाहनम् ।
दीप्तमग्निसमुज्ज्वलितावरः शक्तिपाणिः शिवाग्निमथाऽचरेत् ।। २७ ।।
सर्वत्राऽहवनीयाग्निम् आवाह्याभ्यर्च्य हूयते ।
यदि भेदेन किं कार्यं ब्रूहि चन्द्रार्धशेखर ।। २८ ।।
विवाहादिशुभे कार्ये गार्हस्थ्यं समुदाहृतम् ।
पितृयुक्तेषु कार्येषु दक्षिणाग्निं प्रकल्पयेत् ।। २९ ।।
देवकार्येषु सर्वेष्वाहवनीयं तथैव च ।
रक्तवर्णं द्विनेत्रं च एकवक्त्रं चतुर्भुजम् ।। ३० ।।
शुक्लवस्त्रसमायुक्तं शुक्लयज्ञोपवीतिनम् ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ।। ३१ ।।
त्रिपादयुक्तं चैष्वेकं कुञ्चितोर्ध्वे व्यवस्थितम् ।
दक्षिणेऽभयहस्तं च वामे वरदसंयुतम् ।। ३२ ।।
स्रुक्स्रुवौ तु द्विहस्ते च धारणं तु प्रशस्यते ।
मेषारूढोग्ररूपं स्यात् सशक्तिसहितस्तथा ।। ३३ ।।
एवं च गार्हपत्याग्नौ; दक्षिणाग्निरथोच्यते
रक्तारूपाङ्गनेत्रं श्रुतिकरवदनं पक्षशृङ्गं तु चैवं
रक्तावस्त्रावृतं स्यादभयवरदके स्रुक्स्रुवोर्ध्वे वहन्तम् ।
हारं केयूरमाला गुणचरणजटा ऽलङ्कृतं सत्रिपादम्
अश्वारूढं सशक्तिं रथगजध्वजयुतं(युक्) गार्हपत्याग्निरूपम् ।। ३४।।
द्विमुखं षट्भुजं सूत्रं सितं हसितवर्णकम् ।
जटामकुटसंयुक्तं षण्णेत्रं पिङ्गलप्रभम् ।
रौद्रदंष्ट्रं महाकायं किञ्चित्प्रहसिताननम् ।। ३५ ।।
सर्वेऽभयं स्रुवं खड्गं धारितं चाऽभयङ्करम् ।
वरदं कूर्चकं फालं वामंशे धारितं पुनः ।। ३६ ।।
उक्षारूढं त्रिपादं तु स्वाहासन्निभरूपकम् ।
दक्षिणाग्निस्वरूपं तु विस्पष्टं गद्यते मया ।। ३७ ।।

वक्ष्ये चाहवनीयाग्निरूपमुद्भवरूपकम् ।
दक्षिणाग्नेस्सहस्रं स्यादुद्भूतस्य चतुर्मुख ।। ३८ ।।
द्विमुखं च त्रिपादं च नासिकाद्वयसंयुतम् ।
त्रिमेखलसमायुक्तं षण्णेत्रं पिङ्गलप्रभम् ।। ३९ ।।
चतुश्शृङ्गो वृषारूढो बालार्कसमकेशधृक् ।
सप्तजिह्वासमायुक्तं तेषु त्रीणि च वामके ।। ४० ।।
सव्यवक्त्रे चतुर्जिह्वा वामवक्त्रे त्रयं तथा ।
सव्यभागे वेदहस्तमग्निहस्तमसव्यके ।। ४१ ।।
स्रुक्स्रुवौ चाक्षमाला च सशक्तिः सव्यहस्तके ।
चामरं व्यञ्जनं चैव घृतपात्रं तु वामके ।। ४२ ।।
हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा ।
अतिरक्ता बहुरूपाः सप्तजिह्वाः प्रकीर्तिताः ।। ४३ ।।
एवमाहवनीयाग्निस्वरूपं चाधुनोच्यते ।
एकवक्त्रं द्विनेत्रं च द्विभुजं च द्विपादकम् ।। ४४ ।।
रक्तवर्णनिभं चैव अजारूढं स्मिताननम् ।
ब्राह्मणानां विशेषेण वैदिकाग्निस्वरूपकम् ।। ४५ ।।
दिक्पतेश्च सहस्रांशात् केवलाग्निसमुद्भवः ।
द्विनेत्रो द्विभुजश्चण्डो वरदाभयसंयुतः ।। ४६ ।।
शुक्लवस्त्रपरीधानः श्वेतवर्णः स्मरद्युतिः ।
केवलाग्निरिति ख्यातो महासनमिहोच्यते ।। ४७ ।।
केवलाग्नेस्सहस्रांशात् उद्भवश्च महासनम् ।
एकवक्त्रो द्विबाहुश्च मेषारूढो वृषासनः ।। ४८ ।।
रक्ताम्बरसमायुक्तः त्रिशिखश्च ज्वलत्कचः ।
चतुश्शृङ्गं त्रिनेत्रं च स्रुवं स्याद्दक्षिणे करे ।। ४९ ।।
प्रसारितकरोपेतो सिताङ्गो वृषरूढ(प)धृत् ।
महासनमिति ख्यातो व्यक्तरूपं पितामह(:) ।। ५० ।।

रक्तनिभ षण्णयन युग्ममुख जिह्वासप्त गुणपादकर सप्तकरयुग्मम् ।
दक्षकरशक्तिस्रुवस्रुक्नयनमालां चामरव्यञ्जनं घृतपात्रकरमन्ये ।। ५१।।
तेषु वह्न्याकृतिं विप्र! प्रथमं प्रोच्यतेऽधुना ।
द्विभुजं च द्विपादं च रक्तकुञ्चितमूर्धजः ।। ५२ ।।
रक्तवस्त्रपरीधानो रक्तमाल्यानुलेपनः ।
शुक्लयज्ञोपवीतं च शुक्लवस्त्रोत्तरीयकम् ।। ५३ ।।
स्रुवं सव्ये वहन् वामे स्रुचं सन्धाय वै तथा ।
दिव्याभरणसंयुक्ता शान्तरूपस्थिताननाः ।। ५४ ।।
एवं वह्न्याकृतिः ख्यातमरूपमधुनोच्यते ।
चतुर्भुजं त्रिनेत्रं च ज्वालामालाभिशोभितम् ।। ५५ ।।
खड्गखेटकहस्तं च शरचापधरं प्रभुम् ।
कालाग्निरुद्रदेवानां रूपं चैव तदुच्यते ।। ५६ ।।
अग्निश्चेव विवाहाग्निः कालाग्निश्चामलाग्निकः ।
यागाग्निश्चैव बालाग्निः सर्वपापहराग्निकः ।। ५७ ।।
पूर्वाद्यैशानपर्यन्तं वह्न्यावृतं तदुच्यते ।
पूर्वतो वसतो वह्निं पूर्वतस्थःद्विज स्थितः ।। ५८ ।।
अग्निमन्त्रशतं जप्त्वा ततः प्रत्यङ्मुखो भवेत् ।
आग्निकर्णे हुतं कुर्याद् व्याधिभिः परिभूयते ।। ५९ ।।
नासिकायां हुतं दःखं, नेत्रे होतुर्विनाशनम् ।
शिखास्थाने हुतं चैव राजराष्ट्रं विनश्यति ।। ६० ।।
तस्मात्सर्वप्रयत्नेन जिह्वायां होममाचरेत् ।
यत्र काष्ठं तु तत् श्रोतं यत्र धूमं तु नासिकम् ।। ६१ ।।
यत्राल्पज्वलितं नेत्रं यत्र भस्म तु तच्छिरः ।
यत्र ज्वलितजिह्वायां तथा होमं समाचरेत् ।। ६२ ।।
अश्वत्थोदुम्बरप्लक्षवटाः पूर्वादिदिक्षु च ।
शमीखदिरबिल्वार्काः विदिक्षु क्रमशस्तथा ।। ६३ ।।

प्रधानस्य पलाशं तु समिधस्सम्प्रकीर्तिताः ।
द्वादशाङ्गुलमायामं कनिष्ठाङ्गुलनाहकम् ।। ६४ ।।
समिधं षोडशं हुत्वा हुनेदिध्मं पृथक् पृथक् ।
समिधाज्यचरुं लाजान् सर्षपं माषमुद्गकौ ।। ६५ ।।
तिलवेणुयवाश्चैव ततो हूयात् क्रमेण तु ।
शतद्वयं शतं वापि अर्धं बा जुहुयात्तथा ।। ६६ ।।
सद्येन समिधं हुत्वा घृतं वामेन मन्त्रतः ।
हृदयेन चरुं हुत्वा लाजं हुत्वा शिरेण तु ।। ६७ ।।
सर्षपं कवचेनैव माषमीशेन मन्त्रतः ।
मुद्गं त्वघोरमन्त्रेण तिलं तत्पुरुषेण तु ।। ६८ ।।
वेणुं वै बीजमुख्येन यवमस्त्रेण हूयते ।
उक्तानुक्तं तु यत्सर्वं मूलमन्त्रेण होमयेत् ।। ६९ ।।
प्रत्येकं व्याहृतिं हुत्वा शेषाहुतिमधाऽचरेत् ।
आज्याहुतिस्तु प्रथमं द्वितीयं समिधाहुतिः ।। ७० ।।
तृतीयं तु चरुं हुत्वा चतुर्थं तिलमेव च ।
पञ्चमं सर्षपं चैव षष्ठं तु माषमेव च ।। ७१ ।।
सप्तमं लाजमेवं तु अष्टमं सक्तुरुच्यते ।
नवमं क्षीरमित्युक्तं दशमं दधिरुच्यते ।। ७२ ।।
द्रव्याहुतिर्द्वादशपर्वपूरितं पक्काहुतिर्बादरिकं प्रमाणम् ।
आज्याहुतिर्माषनिमग्नमात्रं हुताशनस्योपरि षोडशाङ्गुलम् ।। ७३ ।।
स्थण्डिलं भूमिदैवत्यं कुण्डं तु विष्णुदैवतम् ।
वर्धनी ब्रह्मदैवत्यं प्रोक्षणी देवपुष्करम् ।। ७४ ।।
प्रणीता वरुणं देवं परिधिर्भवदैवतम् ।
परिस्तरे ऋषिःप्रोक्तं समिधं चेन्द्रदैवतात् ।। ७५ ।।
अङ्गारे गुरुदैवत्यम् आज्यस्थाल्यां वसुस्तथा ।
आज्यं कालाग्निदैवत्यम् इध्मं सर्वाधिदैवतम् ।। ७६ ।।

मन्त्रं सारस्वतं प्रोक्तं स्वरं सवितृदैवतम् ।
पुष्पपात्रे श्रियं विद्यात् चरुस्थाल्यां कलानिधिः ।। ७७ ।।
अक्षतं योगदैवत्यं गन्धं माधवदैवतम् ।
पुष्पं गन्धर्वदैवत्यमर्घ्यं श्रीदेविरुच्यते ।। ७८ ।।
दीपं प्रजापतिं देवं धूपं वै भृगुदैवतम् ।
लाजं नक्षत्रदैवत्यमित्येतास्त्वधिदेवताः ।। ७९ ।।
कुम्भस्य वदने रुद्रो मध्ये विष्णुः प्रकीर्तितः ।
मूले हिरण्यगर्भस्तु जले गङ्गा प्रकीर्तिता ।। ८० ।।
रत्ने चन्द्रमसं ध्यायेत् कूर्चे वाग्देवतां स्मरेत् ।
अपादाने महालक्ष्मीम् अपान्तेवरुणं स्मरेत् ।। ८१ ।।
शालीनां वृषभो देवः तण्डुलानां तु षण्मुखः ।
तिले च काममुक्तिस्तु पार्वती च परिस्तरे ।। ८२ ।।
रेखायामष्टदिक्पालो लेपिते भूमिदेवता ।
वेद्यां तु वेदिकामूर्तिरुपवेद्यं सरित्पतिः ।। ८३ ।।
आसने नृत्य(त्त)मूर्तिस्तु सुन्दरी मङ्गलाष्टके ।
अङ्कुरेषु च सोमस्स्याद्दीपे ज्वलनदेवता ।। ८४ ।।
वर्धन्यां वदने गौरींत्येवं धीमान् प्रकल्पयेत् ।
होमारम्भस्य पूर्वे तु स्रुक्स्रुवं चेन्धनं तिलम् ।। ८५ ।।
परिधिश्चैव दर्भाश्च समिदाज्यचरुं तथा ।
गन्धाक्षतं च पुष्पं च विष्टरं घृतपात्रकम् ।। ८६ ।।
दीपं वै द्रव्यपात्राणि प्रोक्षणीं वर्धनीं तथा ।
प्रणीतां पुष्पपात्रं च चरुपात्रं तथैव च ।। ८७ ।।
आहृत्य होमसम्भारान् कुण्डं प्रति विशेषतः ।
प्रथमं कुण्डसंस्कारं द्वितीयं ज्वलनोज्ज्वलम् ।। ८८ ।।
तृतीयं तु परिस्तरणं चतुर्थं पात्रसाधनम् ।
पञ्चमं तु पवित्रं च षष्ठं वै प्रोक्षणं तथा ।। ८९ ।।

सप्तमं सङ्ग्रहेद्द्रव्यमष्टमं घृतसङ्ग्रहः ।
नवमं परिधिन्यासं दशमं परिषेचनम् ।। ९० ।।
एकादशं चोर्ध्वहोमं द्वादशं होममाचरेत् ।
समिधाज्यान्नशालिस्तु यवगोधूमवैणव ।। ९१ ।।
नीवारलाजसक्तुश्च माषमुद्गकुलुत्थकम् ।
निष्पावतरळं चैव लाजमाषाढकं तिलम् ।। ९२ ।।
प्रियङ्गुसर्षपं चैव मधुदधिपयोघृतम् ।
फलापूपं तु ताम्बूलं षड्विंशद्रव्यमुच्यते ।। ९३ ।।
हिरण्या हेमवर्णाभा कनका श्यामलाकृतिः ।
रक्ता च रक्तवर्णाभा कृष्णा चैव हरित्प्रभा ।। ९४ ।।
सुप्रभा पीतवर्णाभाऽ तिरिक्ता श्वेतवर्णिका ।
बहुरूपाऽग्निवर्णा च, जिह्वावर्णं प्रकीर्तितम् ।। ९५ ।।
हिरण्या कनका शान्ता रक्ता वश्यकरी भवेत् ।
कृष्णा च मारणी प्रोक्ता सुप्रभा मोक्षकारिणी ।। ९६ ।।
बहुरूपाऽतिरक्ता च सर्वाभीष्टप्रदा भवेत् ।
सद्योजातेन पूर्वायां समिद्धोमं समाचरेत् ।। ९७ ।।
आग्नेय्यां हृदयेनैव याम्यायां गुह्यमन्त्रतः ।
नैर्ऋत्यां शिखया हुत्वा वारुण्यां वाममन्त्रतः ।। १८ ।।
वायव्यां कवचेनैव सौम्यायां पुरुषेण तु ।
ऐशान्यां शिरसा हुत्वा मध्यमे मूलमन्त्रतः ।। १९ ।।
विवाहे पश्चिमे जिह्वां जातकर्मे च मध्यमे ।
चौलोपवीतयोस्सौम्ये पितृकार्येषु दक्षिणे ।। २० ।।
आग्नेय्यां शान्तिहोमं स्यादीशाने चोग्रकर्मणि ।
पूर्वे पुंसवनं प्रोक्तमेतद्धोमस्य लक्षणम् ।। २१ ।।
ईशाने मुक्तये होमः पुरुषे चाणिमादिकम् ।
प्रायश्चित्तादिकं (अ)घोरे तथास्ये क्रूरकर्म च ।। २२ ।।

वश्याकर्षणहोमार्थं वामदेवे तु होमयेत् ।
नित्यकर्मविधानं तु वक्त्रेऽस्मिन् पश्चिमे हितः ॥ २३ ॥
वश्याकर्षणयोराद्या कनका स्तम्भने हिता ।
विद्वेषमोहयोः रक्ता कृष्णा मारणकर्मणि ॥ २४ ॥
सुप्रभा शान्तिके प्रोक्ता सुरक्तोच्चाटने मता ।
एकैव बहुरूपा च सर्वकामफलप्रदा ॥ २५ ॥
मूलं कर्मविनाशाय मध्येन पुत्रनाशनम् ।
अग्रतो व्याधिदं चैवाप्येकहस्तेन निर्धनम् ॥ २६ ॥
मूलमध्याग्रतश्चैवाऽप्युपहस्तात्समिद्धुनेत् ।
स्वकारो सूतकं विद्यादाकारो रिपुवर्धनम् ॥ २७ ॥
हकारो ब्रह्महत्यानामाहुतिः कुत्र दीयते ।
नादान्ते चाहुतिं कुर्यास्सर्वसिद्धिकरं भवेत् ॥ २८ ॥
आज्यहोमेन शयनं शेषमासीन एव वा ।
तथेन्द्रे मेखलापादं द्विभुजौ दक्षिणोत्तरे ॥ २९ ॥
पश्चिमे तु शिरो विद्यात् शिखा तद्योनिरुच्यते ।
तज्ज्वाला वदनं यस्य तन्नाळं नाभिरुच्यते ॥ ३० ॥
अनलं प्राणमित्युक्तं कुण्डमूर्तिरुदाहृता ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे वह्निरूपविधिपटलस्त्रयोर्विंशतिः समाप्तः

अथ स्रुक्स्रुवलक्षणपटलप्रारम्भः

अथस्स्रुक्स्रुवयोर्वक्ष्ये लक्षणं तु प्रजापते ।
यज्ञोक्तलक्षणैर्वृक्षैः कारयेत् स्रुक्स्रुवौ बुधः ॥ १ ॥
वैकङ्कतशमी बिल्वचूतन्यग्रोधखादिराः ।
अश्वत्थोदुम्बरप्लक्षपनसाश्च शिरीषका ॥ २ ॥
यज्ञवृक्षास्समाख्याताः प्रागुक्ता लक्षणान्विताः ।
मूलाग्रं तु विनिश्चित्य वृक्षसङ्ग्रहकालके ॥ ३ ॥
मूलाग्रेण च तेनैव कार्यं मूलाग्रकं तयोः ।
स्रुक्स्रुवावेकवृक्षार्धात् मध्ये सारं प्रगृह्य च ॥ ४ ॥
द्विधा विभज्य तद्वृक्षं त्वक् पार्श्वे बिलमाचरेत् ।
मूलं स्रुक्स्रुवयोर्दण्डे तरोरग्रे तु पङ्कजम् ॥ ५ ॥
कृत्वा सलक्षणं ह्येवं सर्वदोषविवर्जितम् ।
मानहीने भवेद्रोगं भिन्ने प्राणिकुलक्षयम् ॥ ६ ॥
अधिके शतृवृद्धिस्स्यात् स्फुटिते मूर्तिनाशनम् ।
विलक्षणे क्रियानाशं खाताधिक्ये धनक्षयम् ॥ ७ ॥
तस्मात्सर्वप्रयत्नेन यथोक्तं सम्यगाचरेत् ।
उत्तमं मध्यमं चैव कन्यसं त्रिविधं मतम् ॥ ८ ॥
वस्वङ्गुलैस्त्रिगुणितैस्स्रुवदैर्घ्यमुक्त
मृक्षाङ्गुलैर्भवति तस्य तु मूलनाहम् ।
आस्याग्र नाहेमपि मूलवदेव कुर्यात्
कर्णस्य नाहमिदं मध्यवदेवमेव ॥ ९ ॥
नासापुटप्रतिम पुष्करमास्यकार्यं
कर्षाज्यपूरमनलाङ्गुलदैर्घ्यमुक्तम् ।
मूलात्क्रमेण कृशतानपि तद्गळन्तम्
कुर्वीत सर्वभवनेषु मनोज्ञरूपम् ॥ १० ॥
त्रितालायामसम्पन्नविस्तारे कलशद्वयोः ।
कालोत्सेधसमोपेता स्रुग्भवस्तस्य कर्मणा ॥ ११ ॥

सप्ताङ्गुलं भवेदास्यं विस्तारायामतो बहिः ।
त्रिभागादेकमग्रं स्यात् कण्ठायामं कलार्धतः ।। १२ ।।
वेदिकां सम्यगाकल्प्य तन्मुखौ चतुरीकृताः ।
तन्मध्ये तु बिलं कुर्यात् वर्तुलं श्वभ्रशोभनम् ।। १३ ।।
पार्श्वेष्टपत्रसम्युक्तं प्रान्तरेखाविभूषितम् ।
तत्परं पक्षिकां कुर्यात् तस्याः कर्णप्रमाणतः ।। १४ ।।
परितः पवमानं तु तत्परं तत्र चित्रितम् ।
बाह्ये वेदिकयायुक्तं दण्डाग्रे गण्डिकात्रयम् ।। १५ ।।
मुखमेवं प्रकल्प्यैवमग्रे स्यात्तु तदर्धकम् ।
गण्डिकां पद्मचित्रं वा दण्डमूले स्रुवे भवेत् ।। १६ ।।
स्रुवमायाममानेन तयाऽरत्निमिदं भवेत् ।
षडङ्गुलपरीणाहुमग्रे स्यात् तत्तदर्धकम् ।। १७ ।।
गोपादसदृशाकारं भद्रे स्यात्तु पुटद्वयम् ।
कर्षप्रमाणपूर्णं तत् स्रुवमेवं विधीयते ।। १८ ।।
इति लक्षणसंयुक्तौ न्यस्त्वा तौ होमसधनैः ।
वेदभानुयुगनागतुङ्गकमन्ये... मेतदृषिभिः पुरातनैः ।। १९ ।।
कुम्भदण्ड-उपदेशका तथा वेदिकागलकृतं मुखं क्रमात् ।
तस्य दण्डपरीणाह षट् पुनः गर्तमस्य चतुरङ्गुलं बुधैः ।। २० ।।
खातव्योमाग्निपरितोऽत्र वेत्रयुक् पद्मपुष्पमयपृष्ठदेशके ।
कनिष्ठताराकृतवर्धनी स्रुवं गर्तगण्डिपरितो इदं स्रुवम् ।। २१ ।।
त्रित्रिहस्तं समारभ्य यावद्रुद्रकरान्तकम् ।
तोरणस्योच्छ्रयं विद्यादधमादि त्रयं त्रयम् ।। २२ ।।
भित्यूर्ध्वोत्सेधकार्धं तु तस्याकारमिति स्मृतम् ।
तद्विस्तारं त्रिधा भज्य एकभागप्रमाणकः ।। २३ ।।
मध्ये शूलं प्रकर्तव्यं पात्राग्रेऽपि तथैव च ।
तद्विस्तारद्वयाङ्गुलं खनमेकाङ्गुलं भवेत् ।। २४ ।।
रसाङ्गुलं समारभ्य यावन्मन्वङ्गुलान्तकम् ।
द्वारोत्सेध स्ततोत्सेध द्वारविस्तारविस्तृतम् ।। २५ ।।

तोरणाग्रे तु शूळं स्यात् त्रिः त्रिः कीलसमवृतम् ।
सप्ताङ्गलस्य विस्तारं युगाङ्गुल घनं भवेत् ।। २६ ।।
तोरणस्येवमाख्यातमष्टमं गलमुच्यते ।
देवाष्टमङ्गलश्चैव द्विजानामष्टमङ्गलम् ।। २७ ।।
नृपाष्टमङ्गलश्चैव वेश्यानामष्टमङ्गलम् ।
देवानां च विशेषेणाष्टमङ्गलमुच्यते ।। २८ ।।
दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम् ।
श्रीवत्सं स्वस्तिकं शङ्खं दीपो देवाष्टमङ्गलम् ।। २९ ।।
देवाष्टमङ्गलं प्रोक्तं, द्विजाष्टमङ्गलं शृणु ।
पताकाशं खचक्रं च पूर्णकुम्भं सपत्रकम् ।। ३० ।।
छत्रं लक्ष्मीप्रदीपं च द्विजानामष्टमङ्गलम् ।
द्विजाष्टमङ्गलं प्रोक्तं, नृपाष्टमङ्गलं शृणु ।। ३१ ।।
भेरी वृषो गजश्चैव चामरी केशरी झषः ।
पताका च प्रदीपं च भूभुजां चाष्टमङ्गलम् ।। ३२ ।।
नृपाष्टमङ्गलं प्रोक्तं, वैश्याष्टमङ्गलं शृणु ।
सवस्त्राध्यात्तु पतका भेरी कुम्भं च दीपिका ।। ३३ ।।
नन्द्यावर्तं च देवानां वैश्यानामष्टमङ्गलम् ।
वैश्याष्टमङ्गलं प्रोक्तं शूद्राष्टमङ्गलं शृणु ।। ३४ ।।
दर्पणं पूर्णकुम्भं च पताकाच्छत्रभेरिका ।
श्रीवत्सं स्वस्तिकं पद्मं शूद्राणामष्टमङ्गलम् ।। ३५ ।।
एवं पञ्चविधं ज्ञेयं लक्षणं वक्ष्यते शृणु ।
याज्ञिकं वृषमादाय कारयेत् सप्रमाणतः ।। ३६ ।।
उत्सेधं षोडशाङ्गल्यं विस्तारं तु तदर्धकम् ।
तद्विंशांशं घनं प्रोक्तं ग्राहयेत्फलकाष्टकम् ।। ३७ ।।
एतदन्यत्प्रकारेण विस्तारोत्सेधमुच्यते ।
विस्तारं पूर्ववद्ग्राह्यमर्घ्याङ्गुलविहीनकम् ।। ३८ ।।
उत्तमोत्तममारभ्य कन्यसस्याधमान्तकम् ।
उत्सेधं चैवमाख्यातं विस्तारं तद्द्वयं क्षयेत् ।। ३९ ।।

नवधा मानमित्युक्तं फलकानां प्रजायते ।
अथवाऽन्यप्रकारेण विस्तारोत्सेधमुच्यते ॥ ४० ॥
षोडशाङ्गुलमायामं विस्तारं तु तदर्धकम् ।
अधस्तात्पद्मपीठं तु चतुरङ्गुलमानतः ॥ ४१ ॥
तदूर्ध्वे दर्पणादीनि लेखयेदथ कारयेत् ।
दर्पणं दर्शनं चैव पूर्णकुम्भं तु कुम्भकम् ॥ ४२ ॥
वृषभे वृषभं चैव सव्यानो युग्मचामरैः ।
श्रीवत्से चैव श्रीदेवी स्वस्तिके तु सरस्वती ॥ ४३ ॥
शङ्खे च विमलं प्रोक्तो दीपे तु ज्वलनं स्मृतः ।
स्वस्वनाम्ना समभ्यर्च्य सूत्रपातं तु कारयेत् ॥ ४४ ॥
दर्पणस्य ह्युमादेवी पूर्णकुम्भस्य जाह्नवी ।
वृषभस्य स्वधादेवी करवी युग्मचामरे ॥ ४५ ॥
श्रीवत्सस्य तु श्रीदेवी स्वस्तिके तु सरस्वती ।
शङ्खस्य शशिनी देवी दीपस्य स्कन्ददैवतम् ॥ ४६ ॥
ऊर्वशी मेनका चैव रम्भा चैव तिलोत्तमा ।
सुमुखी दुर्मुखी चैव कामुकी कामवर्धनी ॥ ४७ ॥
एताश्चाप्सरसः प्रोक्तास्त्वष्टमङ्गळधारिकाः ।
अष्टमङ्गळमाख्यातमायुधानां ततश्शृणु ॥ ४८ ॥
वज्रं शक्तिं च दण्डं च खड्गं पाशाङ्कुशं तथा ।
गदा त्रिशूलं चक्रं च पद्मं चैव दशायुधम् ॥ ४९ ॥
द्वारतारप्रमाणं वा तस्यार्धं वा तदर्धकम् ।
युक्तीनां चैव सर्वेषां शिल्पिनां मनसाऽथ वित् ॥ ५० ॥
वज्रवृक्षेण कर्तव्यं पूर्ववद्रूपमेव च ।
इन्द्रानलयमाश्चैव राक्षसोवरुणस्तथा ॥ ५१ ॥
वायुस्सोमस्तथैशान्यो ब्रह्मा विष्णुश्च देवताः ।
वज्रादिपद्मपर्यन्तं खड्गानांत्वधिदेवताः ॥ ५२ ॥
विलसिनी रूपिणी चाथ धारिणी विमुखी तथा ।
निर्मुखी दुर्मुखी चैव मतिभ्रङ्गी सुमालिनी ॥ ५३ ॥

सरस्वती च लक्ष्मी च शक्तयः परिकीर्तिताः ।
विपुला च शचीदेवी स्वधा स्वाहा च पार्श्वयोः ॥ ५४ ॥
नीली च कालकर्णी च ज्वालकेशी सुकेशिनी ।
हर्षणी च हृदार्थी च मञ्जरी मांसिषी तथा ॥ ५५ ॥
बुद्धिश्चैव निवृत्तिश्च स्वरूपी च निवृत्तिका ।
सावित्री भारती चैव श्रीदेवी पृथिवी तथा ॥ ५६ ॥
इत्येवं लोकपालानां शक्तिद्वयमुदाहृतम् ।
भेदिनी मोहिनी माया ह्लादिनी लोकमातरी ॥ ५७ ॥
क्षेत्रभर्वाचवीरेशी मालिनी भूतमातरी ।
सुप्रिया च सुकेशी च जृम्भिणी भैरवी तथा ॥ ५८ ॥
इत्येवं द्वारपालानां शक्तिद्वयमुदाहृतम् ।
मङ्गळं शक्तिकुम्भं च कटकं च सरोरुहम् ॥ ५९ ॥
चामरं मुकुरं चैव दीपो देव्याऽष्टमङ्गळम् ।
नाराचं च त्रिशूलं च घण्टां खट्वाङ्गमेव च ॥ ६० ॥
कपालं डमरुं चैव ध्वजपादं तथैव च ।
वेताळसूरिपाशं च देवीनां तु दशायुधम् ॥ ६१ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे स्रुक्स्रुवलक्षणपटलश्चतुर्विंशतिः समाप्तः

अथ यागशालालक्षणपटलप्रारम्भः

समानतो यागशाला लक्षणं वक्ष्यतेऽधुना ।
मण्टपं कुण्डवेदीं च सृक्सृवावष्टमङ्गळम् ॥ १ ॥
दशायुधवितानं च दर्भमाला च दिक्ध्वजम् ।
कदळीपूगदामानि दुकूलकबरीकचम् ॥ २ ॥
नारङ्गलिकुचं स्रुक्च गात्रवेष्टनदर्पणम् ।
तोरणं पुष्पमाला च कुम्भं तस्य च वर्धनीम् ॥ ३ ॥
घटं वा कलशं वापि नाळिकेरं तिलाक्षतम् ।
गन्धपुष्पगळं चैव द्रव्याण्यन्यानि यानि च ॥ ४ ॥
होमद्रव्याणि सर्वाणि समासाद्य विधानवित् ।
उत्सवे च प्रतिष्ठायां दीक्षायां प्रोक्षणेऽपि च ॥ ५ ॥
स्नपनादिषु कार्येषु यागमण्टपमुच्यते ।
प्रासादस्याग्रतो वापि पूर्वे याम्ये च वारुणे ॥ ६ ॥
सौम्ये दिशीऽऽशके वापि पावके वा विधीयते ।
त्रिपञ्चरससप्ताष्टनवपङ्क्तिश्च रुद्रयुक् ॥ ७ ॥
भानुत्रयोदशं विंशत् द्वात्रिंशत् हस्तमानकम् ।
एतैर्मानैः क्रमात्कुर्यान्मण्टपं चतुरश्रकम् ॥ ८ ॥
आशोध्य वसुधां सम्यक्जानुपर्यन्तमेव च ।
समीकृत्वोपलिप्याथ तस्मिन् वास्तु समर्चयेत् ॥ ९ ॥
मण्डपं कारयेद्धीमान् मात्राङ्गुलवशात्क्रमात् ।
मण्डपेषु च सर्वेषु पूर्वे वाष्टादशक्रियाम् ॥ १० ॥
गुप्तशल्यनिवृत्त्यर्थं प्रकुर्यात्तु विचक्षणः ।
उत्तमत्रयलिङ्गेषु द्वात्रिंशद्धस्तमिष्यते ॥ ११ ॥
विंशतिर्मध्यमेषूक्तो कन्यसेऽष्टादशं करम् ।
रसाष्टद्वादशं हस्तं पवित्रादिषु कर्मसु ॥ १२ ॥
बाणसप्तत्रिहस्तं वा चललिङ्गेऽकुरेऽपि वा ।
मानमादौ विनिश्चित्य मण्डपं कारयेत्सुधीः ॥ १३ ॥

लिङ्गस्य स्थापने चैव सकलस्थापने तथा ।
उत्सवे प्रोक्षणे चैव दीक्षायां बाणलिङ्गके ॥ १४ ॥
प्रकर्तव्यं विधानेन पदे भुवनसंज्ञिके ।
विमानस्थापने चैव त्रिशूलस्थापने तथा ॥ १५ ॥
विमानप्रोक्षणे चैव तत्पवित्राधिवासने ।
कार्यं रुद्रपदे चैव गेहद्वादशसूत्रकैः ॥ १६ ॥
चललिङ्गप्रतिष्ठायाम् अष्टबन्धनकर्मणि ।
प्रायश्चित्तादिके कार्ये सकलप्रोक्षणेऽपि च ॥ १७ ॥
कार्यं नन्दपदे धीमान् शेषं युक्त्या प्रकल्पयेत् ।
सूत्रपातं प्रकुर्वीत प्रागग्रं चोत्तराग्रकम् ॥ १८ ॥
शालिपिष्टार्धसूत्रेण पङ्क्तिसूत्रमथाऽचरेत् ।
मण्डपाभ्यन्तरं सर्वमेकाशीतिपदं कुरु ॥ १९ ॥
ब्राह्म्यं नवात्मकं प्रोक्तं दैविकं षोडशं क्रमात् ।
चतुर्विंशतिसङ्ख्यं च मानुषं पदमीरितम् ॥ २० ॥
द्वात्रिंशदात्मकं ज्ञेयं पैशाचं यागवेश्मनि ।
मानुषं च पदं तत्र देशिकस्थानमुच्यते ॥ २१ ॥
मध्ये ब्रह्मपदे वेदी देविके मङ्गळाष्टकम् ।
मानुषे च पदे कुण्डं पैशाचे तोरणं भवेत् ॥ २२ ॥
मध्ये त्वेकपदे कुम्भं प्रधानं वर्धनीमुमाम् ।
अभितः पदविद्येशान् देविके षोडशाह्वये ॥ २३ ॥
अष्टमङ्गळमित्युक्तं चतुर्विंशतिसंज्ञिके ।
मानुषे कुण्डमित्युक्तं द्वात्रिंशत्पदसंज्ञिके ॥ २४ ॥
पैशाचे तोरणं चैव कलशश्च यथाक्रमम् ।
वृक्षं च खादिरं जाति क्रमुकं नाळिकेरकम् ॥ २५ ॥
न्यग्रोधं वेणुदण्डं च पङ्क्तिमानमथोच्छ्र्यम् ।
नाहं विशन्तिरङ्गुल्यं क्रिमिकोटरवर्जितम् ॥ २६ ॥
मण्डपं वापि कूटं वा प्रपां वापि प्रकल्पयेत् ।
नाळिकेरदळेनैव ताळपूगदळेन वा ॥ २७ ॥

ऊर्ध्वमाच्छादयेन्मन्त्री नीरन्ध्रं तु सलक्षणम् ।
द्वादशस्तम्भसंयुक्तं षोडशस्तम्भसम्युतम् ।। २८ ।।
षट्त्रिंशत्स्तम्भसंयुक्तं चतुष्टष्ट्यङ्घ्रिसंयुतम् ।
दशाष्टषट्करोत्सेधैश्श्रेष्ठादीनामनुक्रमात् ।। २९ ।।
षड्विंशद्धस्तदीर्घंस्यादष्टतालसुविस्तरः ।
वितानमध्ययोर्मध्ये यागसद्मनि देशिकः ।। ३० ।।
कलातालोत्तमं विद्धि मध्यमं शिवतालकम् ।
कन्यसं वसुतालं स्यात्तोरणं चार्धविस्तरम् ।। ३१ ।।
षडङ्गुलं समारभ्य यावन्मन्वङ्गुलान्तकम् ।
तोरणाङ्घ्रिं प्रकुर्वीत याज्ञिकैः पादपैस्तथा ।। ३२ ।।
तद्विस्तारं त्रिधा भज्य तेषु शूलं न्यसेद्बुधः ।
शूलं रसाङ्गुलायामं नेत्राङ्गुलसुविस्तरम् ।। ३३ ।।
व्योमाङ्गुलघनं तत्र कल्पयेद्देशिकोत्तमः ।
ऋषिबाणाग्निदर्भाग्रैः विंशत्यङ्गुललम्बनम् ।। ३४ ।।
सप्तद्वित्र्यङ्गुलं योज्यं कारयेद्दर्भमालिकाः ।
नेत्राङ्गुलमिदं रज्जुं बन्धयेत्तोरणाग्रके ।। ३५ ।।
अष्टदिक्षु ध्वजानष्टौ लम्बयेत्तु प्रदक्षिणम् ।
पूर्वस्यां पीतवर्णं तु पावके रक्तवर्णकम् ।। ३६ ।।
नीलाम्बुजनिभं याम्ये धूमाभं राक्षसे ध्वजम् ।
क्षीराभं वारुणे देशे शबलाभं तु मारुते ।। ३७ ।।
तप्तहेमनिभं सौम्ये स्फटिकाभं तु शाङ्करे ।
गायत्र्यङ्गुलविस्तारं द्विकलाङ्गुलमायतम् ।। ३८ ।।
विस्तारेण समं पुच्छं पुच्छार्धं शिखरं भवेत् ।
ध्वजमध्ये लिखेद्धीमान् दिग्गजांश्च विशेषतः ।। ३९ ।।
चतुःपुच्छं त्रिपुच्छं वा पुच्छद्वयमथापि वा ।
पूर्वद्वारोत्तरे कुम्भे नन्दिशान्तिद्विकुम्भकौ ।। ४० ।।
तद्याम्ये त्रिषु कुम्भेषु शककाळरविं यजेत् ।
अग्निं चानलदिग्भागे कुम्भमेकं प्रपूजयेत् ।। ४१ ।।

यार्म्यस्य पूर्वदिग्भागे भृङ्गिविद्याद्विकुम्भकौ ।
तत्पश्चाद्यमविघ्नेशौ कुम्भयुग्मं प्रपूजयेत् ॥ ४२ ॥
नैर्ऋत्यां त्रिषु कुम्भेषु ब्रह्मा निर्ऋतिकेशवम् ।
प्रतीच्यां दक्षिणे भागे वृषभं च निवृत्तिकम् ॥ ४३ ॥
तस्योत्तरत्रिकुम्भेषु स्कन्दोमावरुणान् न्यसेत् ।
वायौ च वायुविघ्नेशौ कुम्भयुग्मं प्रपूजयेत् ॥ ४४ ॥
उदीच्यां पश्चिमे भागे द्विकुम्भे संयजेत् गुरुः ।
गौरीप्रतिष्ठा तत्पूर्वे तथा सोमं च चण्डकम् ॥ ४५ ॥
ईशाने त्रिषु कुम्भेषु गुरुमीशविधिं यजेत् ।
वास्तुपं निर्ऋतिं विष्णुं द्विपदे तु प्रकल्पयेत् ॥ ४६ ॥
तथा च वरुणस्कन्दौ श्रियं च द्विपदे क्रमात् ।
गुरुमीशविधिं चैव द्विपदे तु प्रशस्यते ॥ ४७ ॥
अन्येषां सर्वदेवानां तत्तत्स्थानेषु पूजयेत् ।
दिव्यन्तरिक्षभूमिष्ठविघ्नानुद्वास्य बुद्धिमान् ॥ ४८ ॥
दक्षजङ्घां समुत्क्षिप्य वामजङ्घां विवर्जयेत् ।
दक्षिणाग्रे पार्ष्णिदेशं चतुरङ्गुलमुन्नतम् ॥ ४९ ॥
भूमौ त्रिताडनं कृत्वा पार्ष्णिघातं विधीयते ।
शान्तिभूतिबलारोग्यं तोरणेषु प्रकल्पयेत् ॥ ५० ॥
उत्तमं त्रिंशदङ्गुल्यं मध्यमं षोडशाङ्गुलम् ।
अधमं द्वादशाङ्गुल्यं वेदिकोत्सेधमुच्यते ॥ ५१ ॥
कुण्डं सलक्षणं कुर्यान्मानाङ्गुलवशेन तु ।
उत्तमं तु शिलाधानं मध्यमं त्विष्टिका तथा ॥ ५३ ॥
कन्यसं मृण्मयं प्रोक्तं त्रिविधं कारयेत्क्रमात् ।
कुण्डं हस्तप्रविस्तारं त्रिमेखलसमायुतम् ॥ ५४ ॥
त्रिमेखलं त्रितत्त्वं च ब्रह्मविष्ण्वीशरूपकम् ।
मूले चैव विधातारं मध्यमे विष्णुदैवतम् ॥ ५५ ॥
अग्रे शिवमयं कृत्वा त्रिमेखलाधिदैवतम् ।
शिवमेखलविस्तारम् उत्सेधं तु युगाङ्गुलम् ॥ ५६ ॥

अग्न्यङ्गुलं तु विस्तारमुत्सेधं विष्णुमेखला ।
अङ्गुलद्वयविस्तारमुत्सेधं शिवमेखला ।। ५७ ।।
चतुरश्रं त्र्यश्रं च षडश्रं च पुमान् भवेत् ।
योन्याकारं धनुःपद्मं स्त्रीरूपं सम्प्रकीर्तितम् ।। ५८ ।।
सुवृत्तमष्टकोणं च नपुंसकहुताशनम् ।
अष्टाश्रं चतुरश्रं च वृत्तं चेति षडश्रकम् ।। ५९ ।।
पुमान् कुण्डमिति प्रोक्तं स्थितं वा कुण्डमुच्यते ।
योन्याकारं त्रिकोणं च वर्तुलं पद्मकुण्डकम् ।। ६० ।।
आसीनं तु प्रकर्तव्यं स्त्रीरूपमिह चोदितम् ।
अर्धचन्द्रं च पञ्चाश्रं षडश्रं शयनं भवेत् ।। ६१ ।।
नपुंसकमिति ज्ञेयं त्रिविधं तु प्रजापते ।
ब्रह्मणां चतुरश्रं तु राज्ञां वर्तुलमिष्यते ।। ६२ ।।
वैश्यानामर्धचन्द्राभं शूद्राणां त्रयमीरितम् ।
चतुरश्रं तु सर्वेषां अष्टमे सर्वतां त्रिकम् ।। ६३ ।।
कुण्डस्वरूपं जानीयात् परमं प्रकृतेर्वपुः ।
वृत्तपीठस्य लिङ्गस्य वृत्तमेवमुदाहृतम् ।। ६४ ।।
पद्मपीठस्य पद्मं स्यात् चतुरश्रयुतस्य च ।
पीठस्य तु युगाश्रं स्यात् कुण्डं मानाङ्गुलेन तु ।। ६५ ।।
मेखलात्रितयं कुण्डे पादत्रयमिहोच्यते ।
योनौ योनिं विजानीयात् खातं कुक्षिं विचिन्तयेत् ।। ६६ ।।
परिधित्रितयं बाहुं नाभौ नाभिं च भावयेत् ।
एकज्योति त्रिपादं च चतुश्शृङ्गं द्विधा शिराः ।। ६७ ।।
सप्तजिह्वा सप्तहस्ता सप्तार्चिस्सर्वकामदः ।
ऊर्ध्वास्यस्सुमुखो भूत्वा सुखासनसमन्वितः ।। ६८ ।।
स्वाहा स्वधा च तत्पत्नी दक्षिणे वामके तथा ।
...चतुरङ्गुल मविच्छिन्नं घृताहुतिः ।। ६९ ।।
पञ्चाननं शिरोग्रीवं पञ्चादशसुलोचनम् ।
दशहस्तं वृषारूढं त्रिपदाग्निसदाशिवम् ।। ७० ।।

पूर्वे चाहवनीयाग्निः दक्षिणे वैदिकं यजेत् ।
पश्चिमे केवलाग्निश्च गार्हपत्यमुदक्दिशि ।। ७१ ।।
ईशाने च प्रधानं तु वह्निरूपं विशेषतः ।
हिरण्यायां समिद्धूयात् कनकायां घृतं हुनेत् ।। ७२ ।।
रक्तायां तु यवं प्रोक्तं कृष्णायामन्नकं हुनेत् ।
सुप्रभायां हुनेत्सक्तुमतिरिक्ता तिलं तथा ।। ७३ ।।
सिद्धार्थं बहुरूपायां सर्वासु व्याहृतिं हुनेत् ।
द्रव्याण्येतानि सर्वाणि कनकायां हुनेत्ततः ।। ७४ ।।
यो जिह्वां तु न जानाति तद्धुतं निष्फलं भवेत् ।
तस्मात्सर्वप्रयत्नेन कनकायां हुनेत् क्रमात् ।। ७५ ।।
समिधायां शिवं प्रोक्तमाज्ये च परमेश्वरी ।
चरोस्तु परमो विष्णुः लाजानामृषिरेव च ।। ७६ ।।
सर्षपं चाग्निदैवत्यं सक्तूनां सूर्यदेवता ।
मधूनां सोमदैवत्यम् इक्षूणां वायुरेव च ।। ७७ ।।
तिलस्य पितरः प्रोक्ता मुद्गस्य वरुणस्तथा ।
माषमीश्वरदैवत्यं नीवारं वृषभेश्वरम् ।। ७८ ।।
आढकी शुकदैवत्यं शालीनां सोमदैवतम् ।
दधिनां माधवं प्रोक्तं क्षीरस्य श्रुतिरेव च ।। ७९ ।।
अपूपस्य गणेशं तु गुळ(ड)स्य स्कन्ददैवतम् ।
होमद्रव्यादिसर्वेषामधिदेवाः प्रकीर्तिताः ।। ८० ।।
सूकरी च मृगी हंसी होममुद्राः त्रयस्स्मृताः ।
तर्जनी मध्यमाङ्गुष्ठैश्शान्तिकर्मणि हंसिका ।। ८१ ।।
मध्यमानामिकाङ्गुष्ठैः काम्यार्थे च मृगी स्मृता ।
सर्वैरङ्गुळिभिश्चोग्रकार्येषु सूकरी स्मृता ।। ८२ ।।
मुद्राहीनं तु यद्धोमं तद्धोमं निष्फलं भवेत् ।
घृतं कर्षार्धहोमं स्यात्क्षीरस्य मधुनस्तथा ।। ८३ ।।
शुक्तिमात्रं हुनेद्दध्ना दधिना पायसस्य तु ।
तथा च सर्वभक्षाणां लाजानां मुष्टिरेव च ।। ८४ ।।

खण्डत्रयं तु मूलानां स्वप्रमाणविमिश्रितम् ।
ग्रासार्थं चैवमन्नानाम् ।। ८५ ।।
इक्षोरापर्विकम्मानं भूतानामङ्गुलद्वयम् ।
पत्रं पुष्पं स्वमानेन समिथो द्वादशाङ्गुलम् ।। ८६ ।।
चन्द्रचन्दनकाश्मीरकस्तूरीयक्षकर्दमान् ।
कला..........गुग्गुलं बदरास्थिकम् ।। ८७ ।।
कन्दानामष्टभागं तु अपूपं सप्रमाणतः ।
नाळिकेरं तथा भिद्य दशांशं होमयेत्ततः ।। ८८ ।।
फलानि स्वप्रमाणेनाऽप्यन्नमक्षप्रमाणतः ।
तिलं च सर्षपं शुक्त्या होमयेत्तु यथाविधि ।। ८९ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे यागशालालक्षणपटलःपञ्चविंशतिःसमाप्तः

अथ आचार्यलक्षणपटलप्रारम्भः

आचार्यलक्षणं वक्ष्ये लिङ्गसंस्थापनाय च ।
पञ्चशैवास्समाख्याताः सिद्धान्ते तु प्रजापते ॥ १ ॥
प्रथमोऽनादिशैवस्तु स शैवस्तु सदाशिवः ।
आदिशैवो द्वितीयस्तु स शिवब्राह्मणः स्मृतः ॥ २ ॥
आदौ सदाशिवेनैव दीक्षितस्त्वादिशैवकः ।
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ॥ ३ ॥
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
कौशिकश्शिवमूर्त्या तु दीक्षितश्शिवगोचरः ॥ ४ ॥
काश्यपस्त्वीश्वरेणैव शिखागोचरसंस्थितः ।
ईशानेन भरद्वाजो दीक्षितो ज्योतिगोचरः ॥ ५ ॥
गौतमो ब्रह्ममूर्त्या तु सावित्रीगोचरःस्थितः ।
अगस्त्यश्चोर्ध्ववक्त्रेण दीक्षितो व्योमगोचरः ॥ ६ ॥
ऋषीणामेव पञ्चानां गोचरास्सम्प्रकीर्तिताः ।
आदिशैवा इमे ख्याताः गोचरं कुलमुच्यते ॥ ७ ॥
कुलेष्वेतेषुसंज्ञा(जा)ताः स्थापनादिक्रियार्हकाः ।
सदा प्रवर्तकास्त्वेते ह्यादिशैवा इति स्मृताः ॥ ८ ॥
तृतीयं तु महाशैवः स शैवो विप्र उच्यते ।
चतुर्थश्चानुशैवोक्तो नृपश्चैव तथा स्मृतः ॥ ९ ॥
पञ्चमोत्तरशैवस्तु शूद्रश्चेति तथा मतः ।
बिन्द्वर्धेनाश्रितः प्रोक्तस्त्वादिशैव इति स्मृतः ॥ १० ॥
आदिशैवा इति प्रोक्ताः; महाशैवस्तु कथ्यते ।
महाशैवाऽश्रितः प्रोक्तश्चानुशैव इति स्मृतः ॥ ११ ॥
अनुशैवाऽश्रितःप्रोक्तश्चानुशैवोऽपि कथ्यते ।
महाशैवानुशैवाश्च तथा चाऽन्तरशैवकाः ॥ १२ ॥
आत्मार्थयजनं कुर्यान्न कुर्यात्तु परार्थकम् ।
तेषु मन्त्रेण शूद्रस्तु ज्ञात्वा सम्पूजयेच्छिवम् ॥ १३ ॥

आदिशैवेन(वस्य) कर्तव्यम् आत्मार्थं च परार्थकम् ।
स्थापनं यजनं सर्वं चादिशैवार्चका विदुः ॥ १४ ॥
कृतं चेदन्यथा स्यातामाभिचाराय चैव हि ।
यथागोरन्यवत्सव्यं नदुक्रत्ये व तद्रसम् ॥ १५ ॥
तस्मात्सर्वप्रयत्नेन आदिशैवेन कारयेत् ।
कुमारीहिमवन्मध्यं पूतं कृष्णमृगोद्भवम् ॥ १६ ॥
जातश्चात्रादिशैवश्च आचार्यः परमस्मृताः ।
अध्यापकं चाध्ययनं याजनं यजनं तथा ॥ १७ ॥
दानं प्रतिग्रहं चैव षट्कर्मनिरतस्सदा ।
जातस्तत्रादिशैवस्तु तथाऽऽचार्यवरस्तु सः ॥ १८ ॥
शैवसिद्धान्ततत्त्वज्ञो देवाग्निगुरुभक्तिमान् ।
सर्वाचारसमायुक्तस्तपस्वी जनवत्सलः ॥ १९ ॥
स हि जिष्णुर्जितश्श्रीमान् जितेन्द्रियो विगतस्पृहः ।
(ज्ञे)हेयो वेदार्थतत्वज्ञस्तत्त्वार्थे तु व्यवस्थितः ॥ २० ॥
धर्मक्रियादिनिपुणो वीतरागो विमत्सरः ।
परापवादहीनश्च रन्ध्रान्वेषणहीनकः ॥ २१ ॥
परतत्त्वे सदा ध्यायी शिवशासनतत्परः ।
सर्वशास्त्रार्थकुशलस्समयाचारपालकः ॥ २२ ॥
ग्रहस्थस्सरसो वाग्मी सुशीलः प्रियदर्शनः ।
शिखी च बद्धकेशो वा श्मश्रुरोमादिवर्जितः ॥ २३ ॥
अरोगी दीक्षितश्चैव मन्त्रमुद्राक्रियान्वितः ।
पदवाक्यप्रमाणज्ञः पशुशास्त्रपराङ्मुखः ॥ २४ ॥
शिवतन्त्रैकचित्तात्मा सर्वप्राणिहिते रतः ।
वास्तुविद्याकृताभ्यासः शल्योद्धारविशारदः ॥ २५ ॥
सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः ।
ईदृग्लक्षणसम्पन्नः स्थापकश्श्रेष्ठ उच्यते ॥ २६ ॥
पिङ्गाक्षो डाम्बिकः कुब्जो वामनः कुनखी कृशः ।
व्यसनी निर्दयः स्तब्धः चपलः पारदारिकः ॥ २७ ॥

व्रतच्युतश्शठः क्लीबो दीनो नैपुण्यवर्जितः ।
सन्यासी तार्किकशुद्धः शिवशास्त्रच्युतोऽवरः ।। २८ ।।
पण्याङ्गनोपजीवी च कृतघ्नो नास्तिकः खलः ।
गुरुदेवद्विजातीनां निन्दको दन्तुरो भिषक् ।। २९ ।।
खल्वटः, श्यावदन्तश्च कुसुमाक्षी च पातकः ।
शिपिविष्टोऽधिकाङ्गश्च नास्तिकश्चातिदीर्घकः ।। ३० ।।
हीनाङ्गः पिशुनश्चैव दुश्शीलो दन्तहीनकः ।
बालो बहुगुणोपेतो वृद्धो विकटदन्तकः ।। ३१ ।।
परापवादो व्यसनी बधिरश्चुबुकस्तथा ।
अतिस्थूलश्च काणश्च धूर्तो वै रक्तकेशकः ।। ३२ ।।
गायको नर्तकश्चैव खञ्जो नग्नो व्रतच्युतः ।
दुराचारी जडः पङ्गुः पतितः पापकर्मभुक् ।। ३३ ।।
आलस्यो विकटाङ्गश्च रोमशस्त्वतिभोजकः ।
एभिस्त्वलक्षणैर्युक्तो गर्हितः सर्वकर्मसु ।। ३४ ।।
आदिशैवकुले जातास्तादृशास्स्थापकाः स्मृताः ।
देशिकारब्धतन्त्रेषु निपुणा वीतसंशयाः ।। ३५ ।।
स्थापकाश्चानुकूलास्ते त्वभिप्रायविदस्तथा ।
मूर्तिज्ञा मूर्तिपास्सर्वे सर्वकर्मसु पेशलाः ।। ३६ ।।
आचार्यस्साधकश्चैव पुत्रकस्समयस्तथा ।
दीक्षिताश्च प्रतिष्ठाश्च आचार्यस्यैव योग्यकः ।। ३७ ।।
व्याख्याता शिवशास्त्राणामुत्सवे स्नपनेऽपि च ।
पवित्रारोपणं चैव शान्तिके पौष्टिके तथा ।। ३८ ।।
अन्येष्वपि च सर्वेषु मन्त्रकर्मसु योग्यकः ।
तथैव साधकश्चापि दीक्षास्थापनवर्जितः ।। ३९ ।।
क्रियास्सर्वास्त्वयोग्यास्स्युः पुत्रकस्तु विशेषतः ।
व्याख्यानं वर्जयेत्ताभ्यां समयीनामनन्तरम् ।। ४० ।।
कुर्यादात्मार्थमर्चां च शुश्रूषा देशिकादिषु ।
अन्यकर्म विशेषेण वर्जयेत्तु विचक्षणः ।। ४१ ।।

पञ्चानां कौशिकादीनां गुरुस्थापनमुच्यते ।
कौशिकस्य महच्छत्रं काश्यपस्य उपानहम् ।। ४२ ।।
भरद्वाजमुनेश्चैव नाभोद्भव प्रकीर्तितम् ।
नागीरिकं चतुर्थस्य चण्डोमं पञ्चमस्य तु ।। ४३ ।।
ऋषीणां चैव पञ्चानां गुरुस्थानं प्रकीर्तितम् ।
शिवगोचरविज्ञेया गुह्यमन्त्रेण संयुताः ।। ४४ ।।
शिखागोचरविख्यातो वाममन्त्रेण संयुतः ।
ज्योतिर्गोचरसंज्ञेयोऽघोरमन्त्रेण संयुतः ।। ४५ ।।
सावित्रीगोचरो यस्तु बहुरूपेण संयुतः ।
व्योमगोचरगो यस्तु चैशमन्त्रेण संयुतः ।। ४६ ।।
गोचरस्त्वितिविख्यातो वर्गिणां च ततश्शृणु ।
कौशिको नन्दको दक्षो विश्वामित्रस्सुनन्दनः ।। ४७ ।।
वाल्मीकी च मुनिस्सत्यं पुलस्त्यो विपुलस्तथा ।
अतिदीर्घश्च वक्राङ्गो बोधायनसनातनः ।। ४८ ।।
सनत्कुमारो मेधावी वाल्मीकी मध्यमस्तथा ।
आश्वलायनश्चाग्निश्च शिवगोचरवर्गिणः ।। ४९ ।।
काश्यपोऽङ्गिरसस्स्थूलः कर्दमश्च्य वनोदकः ।
नाट्यायनश्च शाण्डिल्यश्शङ्कुकर्णः पुरातनः ।। ५० ।।
शङ्खचूडशिखिश्चैव मुख्यो वै रोमहर्षणः ।
आपस्तम्ब इमे सर्वे शिखागोचरवर्गिणः ।। ५१ ।।
भारद्वाजस्त्रिशङ्कुश्च मार्कण्डेयोशनोरजः ।
सुमहा देवलो जङ्घः पिङ्गळो वरुणस्तथा ।। ५२ ।।
विश्वसृड्व्याघ्रपादश्च रोमश्चान्तरवाजसः ।
कृष्णश्चैव इमे सर्वे ज्योतिर्गोचरवर्गिणः ।। ५३ ।।
गौतमो गालवश्चैव मुद्गलोऽवयवस्तथा ।
गव्यश्च विजयश्चैव बिन्दुश्चोपंतवस्तथा ।। ५४ ।।
ऋग्यश्चाङ्गो वसिष्ठश्च कात्यायनो बृहस्पतिः ।
सावित्रीगोचराश्चैव पुनस्ते व्योमगोचराः ।। ५५ ।।

भूधरो गौतमश्चैव श्वेतः कौत्सो विभावसुः ।
पराशरश्च बिलशः शम्बरो नीललोहितः ।। ५६ ।।
पलवश्च इमे सर्वे व्योमगोचरवर्गिणः ।
कुलेष्वेतेषु सञ्जातास्त्वादिशैवा इति स्मृताः ।। ५७ ।।
एतेषां सङ्करं ज्ञात्वा वैवाह्यं कुरु देशिक ।
शैवं चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा ।। ५८ ।।
सोमं लाङ्(गु/कु)ळमित्येतेचतुर्भेदाः प्रकीर्तिताः ।
एतेषु शैवभेदेषु यदा तेनैव देशिकः ।। ५९ ।।
तत्तन्मन्त्रेण कर्तव्या स्थापनादि क्रियान्विताः ।
एतेषु दीक्षितेष्वेषु सर्वान्वै स्थापनादिकान् ।। ६० ।।
यः करोत्यन्यतन्त्रेण तन्त्र सङ्करमुच्यते ।
तेन दोषेण तद्वास्तु राजा राष्ट्रं च नश्यति ।। ६१ ।।
तस्मात्सर्वप्रयत्नेन वर्जयेत्तन्त्र सङ्करम् ।
वाम-दक्षिण-सिद्धान्तः त्रिविधं शुद्धशैवकम् ।। ६२ ।।
मूलावतारतन्त्रादि शास्त्रं यद्वामशैवकम् ।
तद्भेदानि च सर्वाणि प्रोक्तं द्विज मया पुरा ।। ६३ ।।
स्वच्छन्दादीनि शास्त्राणि दक्षिणं शैवमुच्यते ।
आचार्येण समायुक्तं मया प्रोक्तं पुरा तथा ।। ६४ ।।
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः ।
सङ्करं दोषमेतेषां वर्जयेत्तु प्रयत्नतः ।। ६५ ।।
कामिकं योगजं चिन्त्यं कारणं त्वजितन्तथा ।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेधकम् ।। ६६ ।।
विजयं चैव निश्वासं स्वायम्भुवमथानिलम् ।
नीरं च रौरवं चैव मकुटं विमलं तथा ।। ६७ ।।
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च ।। ६८ ।।
किरणं वातुळं त्वेतास्त्वष्टाविंशति संहिताः ।
वातुलान्ताः कामिकाद्या प्रादुरासन् शिवास्यतः ।। ६९ ।।

पञ्चानां कौशिकादीनां गुरुस्थापनमुच्यते ।
कौशिकस्य महच्छत्रं काश्यपस्य उपानहम् ।। ४२ ।।
भरद्वाजमुनेश्चैव नाभोद्भव प्रकीर्तितम् ।
नागीरिकं चतुर्थस्य चण्डोमं पञ्चमस्य तु ।। ४३ ।।
ऋषीणां चैव पञ्चानां गुरुस्थानं प्रकीर्तितम् ।
शिवगोचरविज्ञेया गुह्यमन्त्रेण संयुताः ।। ४४ ।।
शिखागोचरविख्यातो वाममन्त्रेण संयुतः ।
ज्योतिर्गोचरसंज्ञेयोऽघोरमन्त्रेण संयुतः ।। ४५ ।।
सावित्रीगोचरो यस्तु बहुरूपेण संयुतः ।
व्योमगोचरगो यस्तु चैशमन्त्रेण संयुतः ।। ४६ ।।
गोचरस्त्वितिविख्यातो वर्गिणां च ततश्शृणु ।
कौशिको नन्दको दक्षो विश्वामित्रस्सुनन्दनः ।। ४७ ।।
वाल्मीकी च मुनिस्सत्यं पुलस्त्यो विपुलस्तथा ।
अतिदीर्घश्च वक्राङ्गो बोधायनसनातनः ।। ४८ ।।
सनत्कुमारो मेधावी वाल्मीकी मध्यमस्तथा ।
आश्वलायनश्चाग्निश्च शिवगोचरवर्गिणः ।। ४९ ।।
काश्यपोऽङ्गिरसस्स्थूलः कर्दमश्च्य वनोदकः ।
नाट्यायनश्च शाण्डिल्यश्शङ्कुकर्णः पुरातनः ।। ५० ।।
शङ्खचूडशिखिश्चैव मुख्यो वै रोमहर्षणः ।
आपस्तम्ब इमे सर्वे शिखागोचरवर्गिणः ।। ५१ ।।
भारद्वाजस्त्रिशङ्कुश्च मार्कण्डेयोशनोरजः ।
सुमहा देवलो जङ्घः पिङ्गळो वरुणस्तथा ।। ५२ ।।
विश्वसृड्व्याघ्रपादश्च रोमश्चान्तरवाजसः ।
कृष्णश्चैव इमे सर्वे ज्योतिर्गोचरवर्गिणः ।। ५३ ।।
गौतमो गालवश्चैव मुद्गलोऽवयवस्तथा ।
गव्यश्च विजयश्चैव बिन्दुश्चोपंतवस्तथा ।। ५४ ।।
ऋग्यश्चाङ्गो वसिष्ठश्च कात्यायनो बृहस्पतिः ।
सावित्रीगोचराश्चैव पुनस्ते व्योमगोचराः ।। ५५ ।।

भूधरो गौतमश्चैव श्वेतः कौत्सो विभावसुः ।
पराशरश्च बिलशः शम्बरो नीललोहितः ॥ ५६ ॥
पलवश्च इमे सर्वे व्योमगोचरवर्गिणः ।
कुलेष्वेतेषु सञ्जातास्त्वादिशैवा इति स्मृताः ॥ ५७ ॥
एतेषां सङ्करं ज्ञात्वा वैवाह्यं कुरु देशिक ।
शैवं चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा ॥ ५८ ॥
सोमं लाङ्(गु/कु)ळमित्येतेचतुर्भेदाः प्रकीर्तिताः ।
एतेषु शैवभेदेषु यदा तेनैव देशिकः ॥ ५९ ॥
तत्तन्मन्त्रेण कर्तव्या स्थापनादि क्रियान्विताः ।
एतेषु दीक्षितेष्वेषु सर्वान्वै स्थापनादिकान् ॥ ६० ॥
यः करोत्यन्यतन्त्रेण तन्त्र सङ्करमुच्यते ।
तेन दोषेण तद्वास्तु राजा राष्ट्रं च नश्यति ॥ ६१ ॥
तस्मात्सर्वप्रयत्नेन वर्जयेत्तन्त्र सङ्करम् ।
वाम-दक्षिण-सिद्धान्तः त्रिविधं शुद्धशैवकम् ॥ ६२ ॥
मूलावतारतन्त्रादि शास्त्रं यद्वामशैवकम् ।
तद्भेदानि च सर्वाणि प्रोक्तं द्विज मया पुरा ॥ ६३ ॥
स्वच्छन्दादीनि शास्त्राणि दक्षिणं शैवमुच्यते ।
आचार्येण समायुक्तं मया प्रोक्तं पुरा तथा ॥ ६४ ॥
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः ।
सङ्करं दोषमेतेषां वर्जयेत्तु प्रयत्नतः ॥ ६५ ॥
कामिकं योगजं चिन्त्यं कारणं त्वजितन्तथा ।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेधकम् ॥ ६६ ॥
विजयं चैव निश्वासं स्वायम्भुवमथानिलम् ।
नीरं च रौरवं चैव मकुटं विमलं तथा ॥ ६७ ॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च ॥ ६८ ॥
किरणं वातुळं त्वेतास्त्वष्टाविंशति संहिताः ।
वातुलान्ताः कामिकाद्या प्रादुरासन् शिवास्यतः ॥ ६९ ॥

एतेषामेकभेदत्वान्नदोषं न तु सङ्करम् ।
कश्चिदेष विशेषोऽस्ति तं विशेषं श्रुणु द्विज ॥ ७० ॥
प्रारब्धं येन तन्त्रेण तत्तन्त्रेण समापयेत् ।
नोक्तं चेदन्यतन्त्रेण तत्सर्वं तु समाचरेत् ॥ ७१ ॥
समापयेद्यागकार्ये यागार्थं च वृतं चरेत् ।
सम्भवे सूतकप्रेते चाशौचं न तु संस्पृशेत् ॥ ७२ ॥
येनैव वर्तमानायाः क्रियायाः कारणं विना ।
सा चान्येन कृता चेत्तु तत्स्यादाचार्यसङ्करः ॥ ७३ ॥
गुरुणा करणस्यैव विरोधे सति यत्र तु ।
सा क्रिया तस्य शिष्येण कर्तव्या तेन शास्त्रतः ॥ ७४ ॥
अन्यथा सा कृता चेत्तु कर्तृनाशं न संशयः ।
ज्ञात्वाऽऽचार्यस्य सद्भावं क्रियाकरणकौशलम् ॥ ७५ ॥
ज्ञात्वा सिद्धान्तवैदुष्यं पाठकर्मबलं तथा ।
एवमादीन् परीक्ष्याऽथ कारकं सङ्ग्रहेद्गुरुः ॥ ७६ ॥
अज्ञात्वा तस्य वृत्तान्तं गुरुसङ्ग्रहणं कृतम् ।
तत्कृतं विफलं प्राहुः कर्तृनाशं धनक्षयम् ॥ ७७ ॥
अज्ञेन स्थापितं बिम्बं पुनस्संस्थापयेद्बुधः ।
स्थापनादावभावे तु राज्ञां मरणमादिशेत् ॥ ७८ ॥
अतस्संस्थापनं दक्षैः करणीयं विशेषतः ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे आचार्यलक्षणपटलः षड्विंशतिः समाप्तः

अथ कलान्यास विधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण कलान्यासविधिक्रमम् ।
कूटब्रह्मकलां वक्ष्ये कलाशक्तिसमन्वितम् ॥ १ ॥
कलाः पुमांस इत्युक्ताः तत्कलाशक्तयस्त्रियः ।
निष्कलाश्चेति विख्याताः तत्कलाशक्तयःकलाः ॥ २ ॥
ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः ।
अघोरस्य कालाश्चाष्टौ वामदेवाः त्रयोदश ॥ ३ ॥
अष्टौ सद्यकलाश्चैव मकुटादिक्रमान्न्यसेत् ।
ईशानश्चेश्वरो ब्रह्मा शिवश्चेति सदाशिवः ॥ ४ ॥
तत्पुरुषश्च महादेवो रुद्रश्चेति प्रचोदयात् ।
अघोरश्चाप्यघोरश्च घोरघोरतरस्तथा ॥ ५ ॥
सर्वतस्सर्वसर्वश्च रुद्रस्य (अ)घोरस्य तु ।
वामो ज्येष्ठश्च रुद्रश्च कलाश्चैव कलास्तथा ॥ ६ ॥
विकरीणो बलश्चैव विकरेणौ बलस्तथा ।
बलप्रमथनस्सर्वभूतश्चात्मन एव च ॥ ७ ॥
सद्योजातश्च सद्यश्च भवश्च भव एव च ।
तथाऽनादिभवश्चैव भवस्वेति भवोद्भवः ॥ ८ ॥
कलास्त्वेतास्समाख्याताः कलाशक्तिरथोच्यते ।
शशिनी चाङ्गदा चेष्टा मरीची ज्वालिनी तथा ॥ ९ ॥
पञ्चैताः शक्तयः प्रोक्ताः कलानां पञ्चमस्य तु ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥ १० ॥
चतस्रश्शक्तयः प्रोक्ताः कलानां पुरुषस्य तु ।
तमो मेधाक्षया निष्ठा धृतिः क्षान्तिः स्मृतिः क्षितिः ॥ ११ ॥
अघोरस्य कलानां तु चाष्टौ वै शक्तयस्स्मृताः ।
रजो रक्षा रतिः पाल्या वामा संयमिनी क्रिया ।
तृष्णा मोहा क्षुधा पीता ग्रामणी भ्रामणी तथा ॥ १२ ॥
वामदेवकलानां तु शक्तयस्तु त्रयोदश ।
बुद्धिर्वृष्टिर्द्युतिर्लक्ष्मीर्मेथा कान्तिर्बुधा प्रजाः ।
सद्यमन्त्रकलानां तु ह्यष्टौ वै शक्तयस्मृताः ॥ १३ ॥

ईशानस्य कलाः पञ्च न्यसेदीशानमूर्धसु ।
पूर्वे च पश्चिमे याम्ये सौम्ये चैव क्रमेण तु ।। १४ ।।
चतुष्टयेषु वक्त्रेषु पुरुषस्य कला न्यसेत् ।
हृदये कण्ठदेशे चाप्यंसयोरुदरेऽपि च ।। १५ ।।
नाभौ पृष्ठोरसश्चैव(वाऽ)घोरस्यैव कला न्यसेत् ।
गुह्ये गुदे च मेढ्रे चाप्यूर्वोः जान्वोश्च जङ्घयोः ।। १६ ।।
स्फिक्द्वयोश्चैव कट्योश्च वामदेवकला न्यसेत् ।
पादयोरुभयोश्चैव हस्तद्वितलयोरपि ।। १७ ।।
बाह्वोरास्ये शिरस्यव सद्योजातकलां न्यसेत् ।
उक्तस्थाने कलाश्चैव विन्यसेच्छक्तिसंयुतः ।। १८ ।।
गौरीकलास्त्वहं वक्ष्ये गौरीबीजसमुद्भवाः ।
तारा चैशकला ज्ञेया विद्या वक्त्रकला स्मृता ।। १९ ।।
मृत्युश्रद्धा.रजो मेधा स्वस्तिश्च वरवर्मणा ।
पालिनी ज्वालिनी तृष्णा धृतिः क्षामा मतिः प्रजा ।। २० ।।
चिन्ता भूतिः क्रिया क्षान्तिर्वामदेवकला इमे ।
शान्तिर्दान्तिर्दयासूतिर्द्युतिस्सिद्धा तु सद्यजा ।। २१ ।।
पञ्चविंशत्कलाह्येताः गौरीदेहे तु विन्यसेत् ।
तारां च विन्यसेन्मूर्ध्नि वक्त्रे विद्यां च विन्यसेत् ।। २२ ।।
हृदये च गळे,चांसौ जठरे नाभिदेशके ।
अघोरस्य कलां न्यस्त्वा योनौ गुह्यप्रदेशके ।। २३ ।।
ऊर्वोर्जानुद्वयोश्चैव जङ्घयोश्च प्रकोष्ठके ।
उभयोः पार्श्वयोश्चैव वामदेवकळां न्यसेत् ।। २४ ।।
पादयोरुभयोश्चैव हस्तयोरुभयोरपि ।
स्तनयोरुभयोश्चैव सद्योजातकलां न्यसेत् ।। २५ ।।
उक्तस्थाने कलाश्चैव विन्यसेच्छक्तिसंयुतम् ।
कलावर्णं च तत्त्वं च पदमन्त्रं च भौवनम् ।। २६ ।।

एवं षडध्वमार्गेण मन्त्रन्यासं समारभेत् ।
पञ्चब्रह्मकला ब्रह्म पञ्च पूर्वोक्तवन्न्यसेत् ॥ २७ ॥
एवमक्षमतो वापि केवलं तु कलां न्यसेत् ।
एवं लिङ्गप्रतिष्ठान्तं न्यासं कुर्वति देशिकः(के) ॥ २८ ॥
महेशप्रतिमानं तु ऊर्ध्ववक्त्रप्रदेशके ।
ईशानस्सर्वविद्यानां शशिन्याद्याश्च मूर्ध्निषु ॥ २९ ॥
तत्पुरुषाय विद्महे भूते चेति च वक्त्रके ।
समानं चैव सर्वेषामघोरादिक्रमेण तु ॥ ३० ॥
अघोरस्य कलाश्चैव वामदेवकलास्तथा ।
सद्योजातकलाश्चैव वामदेवकलास्तथा ॥ ३१ ॥
सद्योजातकलाश्चैवाप्येकविंशत्कलां न्यसेत् ।
एकविंशत्कला ह्येते गौरीदेवीं तु विन्यसेत् ॥ ३२ ॥
अन्यासां देवतानां च प्रतिष्ठायां तथाक्षरान् ।
अक्षराणां तु विन्यासं प्रवक्षामि प्रजापते ॥ ३३ ॥
आदौ नादस्समुत्पन्नो नादात् बिन्दुः प्रजायते ।
बिन्दोश्शक्त्याकृतिर्जाता शक्तेराद्यस्वरो भवेत् ॥ ३४ ॥
तस्मात् स्वरद्वयोजातस्तेषां भेदास्त्रयोदश ।
सर्वाष्षोडशका जीवाः कादयोऽपि च संस्मृताः ॥ ३५ ॥
प्राणोपाधिविभेदेन पञ्चाशन्मातृकाः स्मृताः ।
तैरेव चार्चिता देवाः सर्वशास्त्रे प्रजापते ॥ ३६ ॥
अकारादिक्षकारान्तं मातृकां विन्यसेत्क्रमात् ।
शिरो ललाटनेत्रेषु कर्णयोस्तु द्विगण्डयोः ॥ ३७ ॥
नासिकोष्ठद्वयोश्चैव दन्तपङ्क्तिद्वयोरपि ।
जिह्वायां तालुमूले च स्वराः षोडश विन्यसेत् ॥ ३८ ॥
कवर्गं सव्यहस्ते तु चवर्गं वामहस्तके ।
टवर्गं दक्षिणे पादे तवर्गं वामपादके ॥ ३९ ॥

पफौ दक्षिणपार्श्वे तु बभौ वै वामपार्श्वके ।
कण्ठदेशे मकारं तु कुक्षौ पृष्ठेतथा न्यसेत् ॥ ४० ॥
रसत्वग्रक्तमेदोस्थि मज्जाशुक्लासु धातुषु ।
यकारादिसकारान्तं क्रमेणैव तु विन्यसेत् ॥ ४१ ॥
हकारं हृदि विन्यस्य ळकारं वृषणे तथा ।
क्षकारं मेढ्रदेशे तु प्रणवेन समन्वितम् ॥ ४२ ॥
बिन्दुनादसमायुक्तं नमस्कारयुतं न्यसेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे कलान्यास विधिपटलस्सप्तविंशतिः समाप्तः

अथ मुद्रालक्षणविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण मुद्राणां लक्षणं परम् ।
मुदं करोति देवानां द्रावयत्यसुरांस्तथा ॥ १ ॥
मोदनाद्द्रावणाच्चैव मुद्रेयं सम्प्रकीर्तिता ।
लिङ्गमुद्रा नमस्कारा ताळाख्या शङ्खमुद्रिका ॥ २ ॥
सुरभी मुकुळी चैव वाराही चैव निष्ठुरा ।
बीजाख्या पञ्चवक्त्री च द्रव्यमुद्रा शिखाख्यका ॥ ३ ॥
संहारमुद्रिका चैव सादाख्या चैव मुद्रिका ।
आसनी च महेशाख्या वज्राख्या शक्तिमुद्रिका ॥ ४ ॥
दण्डमुद्रा तथाखड्गा पाशमुद्राऽङ्कुशाख्यका ।
गदामुद्रा च शूलाख्या पद्ममुद्रा तथैव च ॥ ५ ॥
चक्रमुद्रा तथा टङ्का महामुद्रा तथैव च ।
घण्टामुद्राऽस्त्रमुद्रा च शरमुद्रा धनुस्तथा ॥ ६ ॥
मुद्राणामुच्यते चैव द्वात्रिंशल्लक्षणं परम् ।
अङ्गुष्ठं चोर्ध्वगं मुष्टिं कृत्वा वामेन वेष्टयेत् ॥ ७ ॥
लिङ्गमुद्रा तु विख्याता प्रच्छन्नेति प्रदर्शयेत् ।
मणिबन्धौ तु संयोज्य चाङ्गुल्यश्चोर्ध्वका क्रमात् ॥ ८ ॥
सन्निवेश्य हृदि स्थाने नमस्कारेति चोच्यते ।
हस्ताभ्यां ताडयेत्तालमुद्रां कुर्यात्तु शोधने ॥ ९ ॥
तर्जनीमूलपर्वस्थावङ्गुष्ठावञ्जलीकृतौ ।
एषा हि शङ्खमुद्रा स्यात् स्नानकाले प्रदर्शयेत् ॥ १० ॥
मणिबन्धं ततः कृत्वा चाङ्गुष्ठौ तलमध्यगौ ।
तर्जनीमध्यमे लग्नौ कनिष्ठाभ्यामनामिके ॥ ११ ॥
मुद्रेयं सुरभिख्याता द्रव्यशुध्यर्थकारिणि ।
संयोज्यं तेन हस्ते तु चान्तरे सुषिरं तयोः ॥ १२ ॥
बिसिनीमुकुळाकारा स्नानान्ते तु प्रदर्शयेत् ।
कृत्वा करतलेऽङ्गुष्ठौ श्लिष्टोर्ध्वाशेषतः क्रमात् ॥ १३ ॥

कृते वराहिनी ख्याता कुर्यादावाहने तथा ।
मुष्टिं कृत्वा तु हस्तौ च करपृष्ठौ च योजयेत् ।। १४ ।।
कनिष्ठौ प्रसृतौ दीर्घौ निष्ठुरौसन्निरोधने ।
अङ्गुष्ठौ प्रक्षिपेन्मध्ये कनिष्ठौ प्रसृतौ युतौ ।। १५ ।।
बीजमुद्रेयमाख्याता दर्शयेच्छक्तिकल्पने ।
द्वौ हस्ततलिकौ योज्य मध्याङ्गुल्यग्रसंयुते ।। १६ ।।
तर्जन्यनामिकौ योज्यौ चाङ्गुष्ठाभ्यां कनिष्ठके ।
इयं पञ्चमुखी ख्याता दर्शयेद्वक्त्रकर्मणि ।। १७ ।।
कराभ्यामञ्जलिं कृत्वा सवक्त्रो स्यादनामिके ।
तयोरग्रौ तु संलग्नौ शेषाश्च प्रसृतास्तथा ।। १८ ।।
द्रव्यमुद्रा भवेदेषा द्रव्याभावे प्रदर्शयेत् ।
उत्तानौ तु करौ कृत्वा वेणिबन्धं तु कारयेत् ।। १९ ।।
प्रसार्य मध्यमे ज्ञेयौ शिखाख्यस्थापने तथा ।
वामाङ्गुलयः प्रसृताः चाङ्गुष्ठद्वयसंस्थितम् ।। २० ।।
दक्षिणे मुष्टिबन्धस्थमङ्गुष्ठं चोर्ध्वसंस्थितम् ।
तन्मुष्टिमूर्ध्वं कृत्वा सा मुद्रा संहता वरा ।। २१ ।।
उत्तानौ तु करौ कृत्वा वेणिबन्धं तु कारयेत् ।
तर्जन्यौ च कनिष्ठौ च प्रसृतौ संयुतौ तथा ।। २२ ।।
मुद्रा सदाशिवाख्याता वाहनान्ते प्रदर्शयेत् ।
उत्तानौ तु करौ कृत्वा वेणिबन्धं तथा कुरु ।। २३ ।।
प्रसार्य मध्यमाङ्गुष्ठौ तर्जन्याङ्गुष्ठसंयुतौ ।
निधायाङ्गुष्ठशिरसा तर्जन्यग्रे विशेषतः ।। २४ ।।
अनामिकाग्रौ संलग्नौ वक्रेणैव समायुतौ ।
कनिष्ठौ चोद्धृतौ युक्तौ मध्यमं तु तथा भवेत् ।। २५ ।।
आसनाख्या तथा कुर्यात् सिंहासनं प्रकल्पयेत् ।
उत्तानौ तु करौ कृत्वा वेणिबन्धं ततः कुरु ।। २६ ।।
प्रसार्य मध्यमाङ्गुष्ठौ कनिष्ठौ च समायुतौ ।
महेशाख्या तु सा मुद्रा प्रतिष्ठान्ते प्रदर्शयेत् ।। २७ ।।

उत्तानौ तु करौ कृत्वा कनिष्ठाङ्गुष्ठसंयुतम् ।
तर्जन्यनामिकामध्या प्रसृता च तथा भवेत् ॥ २८ ॥
सव्योपरि स्थिताया च वज्रमुद्रा प्रकीर्तिता ।
उत्तानौ तु करौ कृत्वा चाङ्गुष्ठौ तलमध्यगौ ॥ २९ ॥
शेषाः परस्परं प्रोक्ष्य तर्जनीप्रसृतौ युतौ ।
शक्तिमुद्रेति विख्याता मुष्टिं कृत्वा तु दक्षिणम् ॥ ३० ॥
तर्जनिप्रसृतौ दीर्घौ दण्डेयं परिकीर्तिता ।
पताकादक्षिणं कृत्वा बाह्योच्चचलनं तथा ॥ ३१ ॥
खड्गमुद्रेतिविख्याता पूजादौ तु प्रदर्शयेत् ।
उत्तानौ तु करौ कृत्वा मुष्टिं बध्वा विशेषतः ॥ ३२ ॥
प्रसार्य चाङ्गुष्ठतर्जन्यावथश्चोर्ध्वं प्रयोजयेत् ।
उत्तराङ्गुष्ठतर्जन्यामुत्तराङ्गुष्ठयोगतः ॥ ३३ ॥
पाशमुद्रा भवेदेषा पाशच्छेदनहेतुका ।
उत्तनौ तु करौ कृत्वा कुञ्चिता वामतर्जनी ॥ ३४ ॥
प्रसार्य तर्जनी सव्या न्यस्त्वा मुष्टि यथाङ्कुशा ।
उत्तानौ तु करौ कृत्वा मध्यमा प्रसृतौ युतौ ॥ ३५ ॥
अन्या वक्रास्समायुक्ता गदाख्येयं प्रकीर्तिता ।
द्विहस्तांङ्गुलयश्चोर्ध्वं मध्यतर्जन्यनामिकाः ॥ ३६ ॥
कनिष्ठाङ्गुष्ठकालग्नौ मुद्रेयं शूलसंज्ञिकम् ।
उत्तानौ तु करौ कृत्वा वेणीबन्धं तु कारयेत् ॥ ३७ ॥
मध्यमे कुञ्चिताङ्गुष्ठौ शेषाः प्रविरळास्तथा ।
पद्ममुद्रा भवेदेषा तलोपरि तलान्न्यसेत् ॥ ३८ ॥
कनिष्ठाङ्गुष्ठसुव्यक्तौ चक्रमुद्रा प्रकीर्तिता ।
उत्तानौ तु करौ कृत्वा मणिबन्धं तु कारयेत् ॥ ३९ ॥
प्रसार्य मध्यमायुक्तौ तर्जनीकुञ्चितावुभौ ।
टङ्कमुद्रा भवेदेषा सर्वशतृविनाशिनी ॥ ४० ॥
हस्ताभ्यां संस्पृशेद्धीमान् कादिपादान्तकं यथा ।
एषा मुद्रा महामुद्रा करसंस्कारकर्मणि ॥ ४१ ॥

उत्तानौ तु करौ कृत्वा वेणिबन्धं तु कारयेत् ।
प्रसार्य मध्यमौ द्वौ तु शेषा मुष्टिस्तु कुण्डलौ ।। ४२ ।।
घण्टामुद्रा भवेदेषा भूतपैशाचनाशिनी ।
उत्तानौ तु करौ कृत्वा हस्तयोस्तत्परस्परम् ।। ४३ ।।
अङ्गुष्ठतर्जनीभ्यां तु स्फोटनं चास्त्रमुद्रिका ।
उत्तानौ तु करौ कृत्वा सव्यमूर्ध्वे तु दक्षिणम् ।। ४४ ।।
प्रसार्य मध्यमौ द्वौ च त्वधश्चोर्ध्वं विचक्षणः ।
शरमुद्रा भवेदेषा सर्वायुधजिता भवेत् ।। ४५ ।।
उत्तानौ तु करौ कृत्वा मुष्टिबन्धद्विहस्तयोः ।
दक्षिणं कर्णमूले वा कर्षयेद्वामहस्तकम् ।। ४६ ।।
धनुर्मुद्रा भवेदेषा सर्वशतृविनाशनी ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे मुद्रालक्षणपटलः अष्टाविंशतिः समाप्तः

अथ स्नानविधिपटलप्रारम्भः

अथ स्नानविधिं वक्ष्ये शौचाचमनपूर्वकम् ।
हिताय देशिकादीनां शिवस्य यजनाय च ॥ १ ॥
प्राणिनां नित्यकर्मत्वादावश्यकरणात्पुरा ।
ब्राह्मे मुहूर्ते चोत्थाय सञ्चिन्त्य गुरुपादुकाम् ॥ २ ॥
शिवसंस्मरणं चैव स्तोत्रं बहुविधं वदेत् ।
गुरूपदिष्टमार्गेण शिवं सञ्चिन्तयेद्धृदि ॥ ३ ॥
ब्राह्मेमुहूर्ते यो विप्रश्शयनं भार्यया सह ।
कुरुते यदि मूढात्मा स वै कर्मबहिष्कृतः ॥ ४ ॥
ब्राह्मेमुहूर्ते दम्पत्यौ शयाते यत्र मन्दिरे ।
तद्गृहं पापभूयिष्ठं स देशः प्रेतमेदिनी ॥ ५ ॥
अतो ध्यानं प्रकर्तव्यं निद्रां हित्वा समाहितः ।
उत्थाय च बहिर्ग्रामात् छन्नमूर्धा च दण्डधृत् ॥ ६ ॥
वामयज्ञोपवीतश्चाप्येकाकी वाग्यमस्सुधीः ।
पूर्वापराह्णयोर्भानोर्मण्डलं दक्षिणं यथा ॥ ७ ॥
दक्षिणाभिमुखो रात्रौ तृणमादाय भूतले ।
मूत्रीकृत्वा तु तस्योर्ध्वे न शीघ्रं विसृजेन्मलम् ॥ ८ ॥
अनावृत्य शिरो मोहाद्यो विप्रो मलमूत्रयोः ।
उत्सर्गं कुरुते पापी स तु वै ब्रह्महा भवेत् ॥ ९ ॥
गोवासे जलतीरे वा नद्यास्तीरे श्मशानके ।
कूपे चैव द्रुमच्छायां चत्वरे च समुद्रगे ॥ १० ॥
शैत्यवृक्षे च वल्मीके हलाकृष्टस्थलेऽपि वा ।
देवागारे भूधरे च दृषदादौ च शाद्वले ॥ ११ ॥
स्त्रीणां गोविप्रलिङ्गानां सम्मुखश्चन्द्रसूर्ययोः ।
विण्मूत्रौ च न कर्तव्यौ गृहे वावश्यकक्रियाम् ॥ १२ ॥
स्नानमाचमनं चैव सन्ध्योपासनमेव च ।
सर्वमन्त्रात्मकत्वाच्च कूपस्नानं न दोषभाक् ॥ १३ ॥

तृणलोड्योपलेनाथ मृत्पिण्डेनैव वा गुदम् ।
प्रमृजेद्वामहस्तेन शेफं सङ्गृह्य बुद्धिमान् ।। १४ ।।
दक्षिणेन मृदं ग्राह्य सम्प्रविश्य जलाशयम् ।
तीरं प्रक्ष्याल्य तद्देशे मृदं क्षिप्त्वाऽथ शर्कराम् ।। १५ ।।
तृणमूल्यादिकान् त्यक्त्वा जलेनार्द्रीकृतां तु ताम् ।
आमलीफलमात्रेण सव्येनादाय वामके ।। १६ ।।
निक्षिप्य वामहस्तेन घर्षयेत्तु पुनःपुनः ।
जलं नीत्वा तु सव्येन सप्ताऽपाने करे नव ।। १७ ।।
मृदा शोध्य गृहस्थस्य द्विगुणं ब्रह्मचारिणाम् ।
गृहस्थत्रिगुणं ज्ञेयं यतीनां तु चतुर्गुणम् ।। १८ ।।
यावन्मात्रं मनश्शुद्धिस्तावच्छौचं विधीयते ।
वामेतराणां यज्ञं तु कृत्वा चैवोत्तराननम् ।। १९ ।।
दन्तानन्तर्बहिश्शोध्य दन्तकाष्ठैस्तु घर्षयेत् ।
करञ्जरी च बिल्वोत्थं खादिरं चार्जुनं तथा ।। २० ।।
अपामार्गं च बुत्बूरं वटप्लक्षं च केसरम् ।
आम्रैर्जम्बुपलाशैर्वा निम्बेन दन्तधावनम् ।। २१ ।।
सङ्गृह्य दन्तकाष्टं तु कनिष्टाङ्गुलिनाहकम् ।
वस्वङ्गलं तु दैर्घ्यं स्याद्दन्तधावनमाचरेत् ।। २२ ।।
प्राङ्मुखो वाऽथ पादौ च हस्तौ प्रक्षाल्य तन्मुखम् ।
वामपादं जले स्थित्वा स्थले दक्षिणपादकम् ।। २३ ।।
जानुमध्यकरो भूत्वा हस्ते गोकर्णवत्कृते ।
माषमग्नजलं ग्राह्य निर्दोषं त्रिःपिबेद्बुधः ।। २४ ।।
आस्यं द्विः प्रमृजेदस्त्रं सकृन्मृज्य मुखं शनैः ।
पादावभ्युक्ष्य मूर्धानमङ्गुष्ठाऽनामिकेन तु ।। २५ ।।
चक्षुषि संस्पृशेद्विद्वान् तर्जन्यङ्गुष्ठकेन तु ।
नासिद्वारपुटौ स्पृष्ट्वा कनिष्ठाङ्गुष्ठकेन तु ।। २६ ।।
श्रोत्रौ स्पृष्ट्वा जलोपेतं मध्याङ्गुष्ठेन बाहुकौ ।
नाभिमङ्गुष्ठकेनैव सर्वाङ्गुल्यग्रपिण्डितम् ।। २७ ।।

हृत्प्रदेशं तु संस्पृश्य सर्वाङ्गुल्यग्रमूर्धनि ।
ऋग्यजुस्सामवेदानां त्रिः पानं तृप्तिरिष्यते ॥ २८ ॥
आस्यद्विमार्जनादत्राप्यथर्वेदेतिहासयोः ।
सकृन्मार्जनाद्वक्त्रस्य गणेशस्य प्रियं भवेत् ॥ २९ ॥
पाच्छिरोभ्युक्षणेनैव ऋषीणां तु प्रियं भवेत् ।
नयनस्पर्शने नैव प्रियं स्यात् सोमसूर्ययोः ॥ ३० ॥
नासिकास्पर्शनेनैवाप्यश्विन्योस्तु प्रियं भवेत् ।
श्रोत्रसंस्पर्शनेनैव दिशाप्रीतिकरं भवेत् ॥ ३१ ॥
इन्द्रविष्णवनलानां च बाहुनाभिहृदि स्पृशात् ।
मूर्ध्नि संस्पर्शनेनैव शिवप्रीतिकरं भवेत् ॥ ३२ ॥
क्षुधे च कफजाते च सद्यश्चाचमनं कुरु ।
स्पर्शयित्वा ततश्श्रोत्रमङ्गुष्ठेनास्यकं मृजेत् ॥ ३३ ॥
आचम्येवं विधानेन स्नानार्थाय मृदं पुनः ।
शुद्धिं सङ्गाह्य तीरे तु त्रिधा कृत्वा तु शोधिताम् ॥ ३४ ॥
प्राक्पिण्डं मूलमन्त्रेण याम्यपिण्डं हृदा तथा ।
अघोरेणैवमन्त्रेणाऽप्युत्तरं चाभिमन्त्रयेत् ॥ ३५ ॥
अस्त्रेण प्रक्षिपेद्दिक्षु दशस्वपि यथाक्रमम् ।
याम्यपिण्डं समादाय स्वाङ्गमालिप्य मन्त्रवित् ॥ ३६ ॥
मूर्धानं वक्त्रहृदये गुह्यं पादौ तु भागशः ।
हृदयेणास्त्रमन्त्रेण सर्वाङ्गानि स्पृशेत्क्रमात् ॥ ३७ ॥
सौम्यपिण्डं क्षिपेदप्सु बाहुभ्रमणकान्तरे ।
अवगाह्य जले तत्र मूलमन्त्रमनुस्मरन् ॥ ३८ ॥
स्नायाद्राजोपचारैस्तु रजन्यामलकादिभिः ।
स्वसूत्रोदितमार्गेण सन्ध्योपस्थानमाचरेत् ॥ ३९ ॥
जप्त्वा ब्रह्मषडङ्गानि तीर्थं सङ्गाह्य चात्मनि ।
जलादुत्तीर्य तद्वस्त्रमात्रं त्यक्त्वा समाहितः ॥ ४० ॥
देवान् ऋषीन् पितृंश्चैव वामाऽघोरक सद्यकैः ।
कनिष्ठाङ्गुष्ठमूलाभ्यां देवांस्तर्प्योदपुष्पयुक् ॥ ४१ ॥

अङ्गुल्यग्रेण हस्ताभ्यां मुनीन् तर्प्य कुशैस्तथा ।
कनिष्ठाङ्गुलिमूलाभ्यां मनुष्याणां तथैव च ॥ ४२ ॥
यज्ञं कृत्वाऽपसव्यं तु जलैस्तु तिलमिश्रकैः ।
दक्षिणाङ्गुष्ठतर्जन्योर्मूलेनैव पितॄनपि ॥ ४३ ॥
प्रत्येकमेकविंशद्भिः सङ्ख्याभिस्तर्पयेद्गुरुम् ।
आचम्य पुनराचम्य पुष्पहस्तो विशेद्गृहम् ॥ ४४ ॥
वारुणं स्नानमाख्यातं भस्मस्नानाच्च स्थितम् ।
श्रीकरं च पवित्रं च हारमाभरणं तथा ॥ ४५ ॥
लोकवश्यकरं पुण्यं भस्मस्नानं दिने दिने ।
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ॥ ४६ ॥
तत्फलं कोटिगुणितं भस्मस्नानं दिनेदिने ।
ज्वरापस्मारपैशाचब्रह्मराक्षसनाशकृत् ॥ ४७ ॥
भुक्तिदं मुक्तिदं दिव्यं साक्षात्कैवल्यदायकम् ।
गङ्गास्नानसहस्रं तु मन्त्रस्नानं सदक्षिणम् ॥ ४८ ॥
विभूतेरणुमात्रेण सर्वस्नानफलं भवेत् ।
निष्कद्वयं तथानिष्कं निष्कार्धकमथापि वा ॥ ४९ ॥
भस्मस्नानार्थमुद्दिष्टं पापनिर्हरणक्षमम् ।
भस्मदेवाकृतिं वक्ष्ये विशेषेण महेश्वरम् ॥ ५० ॥
त्रिनेत्रं त्रिशिरं रौद्रं त्रिहस्तं गुणवक्त्रम् ।
त्रिपादं वह्निनयनं भस्मकुण्ठितविग्रहम् ॥ ५१ ॥
ताण्डवाडम्बरं भीमं रक्तपुष्पोपशोभितम् ।
रक्षामन्त्रेश्वरं देवं ध्यात्वा शान्तिं लभेन्नरः ॥ ५२ ॥
कपिलागोमयं ग्राह्यमथवा सितगोमयम् ।
भूमौ वा पतितं तेन पिण्डमूलेन कारयेत् ॥ ५३ ॥
संशोध्य सद्यमन्त्रेण वामदेवेन पाचयेत् ।
अघोरेणैव मन्त्रेणाऽप्यग्निहोत्रेऽथवा पुनः ॥ ५४ ॥
मृत्पात्रेऽलाबुपात्रे वा नीत्वा तु बहुरूपिणा ।
प्रक्षाल्य पाणिपादौ चाप्याचम्यपुनराचमेत् ॥ ५५ ॥

सकृत्जप्त्वातु मन्त्राणि भस्मोद्धूळनकं कुरु ।
उद्धूळने त्वशक्तश्चेत्त्रिपुण्ड्रं सर्वसन्धिषु ॥ ५६ ॥
त्रिपुण्ड्रं भस्मना कृत्वा सार्द्रेण धवळेन च ।
यथागङ्गाजलं शुद्धं तथा भस्माऽपि पावनम् ॥ ५७ ॥
भासयत्यखिलं ज्ञानं नित्यं भासयते च यत् ।
भक्षणात्सर्वपापघ्नं भस्मेति परिगीयते ॥ ५८ ॥
भस्मस्नानविहीने तु शिवपूजां न कारयेत् ।
भस्मस्नानं पुरा कृत्वा शिवपूजां समाचरेत् ॥ ५९ ॥
विप्राणां क्षत्रियाणां च मूलादिचरणान्तकम् ।
विशां तु शूद्रजातीनां नाभ्यन्तं परिकीर्तितम् ॥ ६० ॥
अन्येषां सर्वजातीनां भस्मस्नानं विना चरेत् ।
उद्धूळने त्वशक्तश्चेत् त्रिपुण्ड्रादीनि धारयेत् ॥ ६१ ॥
षडङ्गुलप्रमाणेन ब्राह्मणानां त्रिपुण्ड्रकम् ।
नृपाणां चतुरङ्गुळ्यं वैश्यानां तु त्र्यङ्गुलम् ॥ ६२ ॥
शूद्राणां द्व्यङ्गुलं प्रोक्तं स्त्रीणामेकाङ्गुलं भवेत् ।
अनुलोमादिसर्वेषां त्रिपुण्ड्रं पितृवत् भवेत् ॥ ६३ ॥
त्रिपुण्ड्रं चैव विप्राणां वर्तुलं नृपवैश्ययोः ।
अर्धचन्द्रं तु शूद्राणामन्येषामूर्ध्वपुण्ड्रकम् ॥ ६४ ॥
भस्म वामकरे स्थाप्य दक्षिणेनाभिमन्त्रयेत् ।
मध्याङ्गुलि जलैर्युक्तमपरे जलवर्जितम् ॥ ६५ ॥
त्रिपुण्ड्रं विधिना धार्यं सर्वदोषनिकृन्तनम् ।
ब्रह्मा विष्णुर्महेशश्च रेखात्रयमितिस्मृताः ॥ ६६ ॥
अधो ब्रह्मा ततो विष्णुस्तदूर्ध्वे तु महेश्वरः ।
द्वात्रिंशत्सन्धिदेशेषु ह्यथवा षोडशेष्वपि ॥ ६७ ॥
अष्टसन्धिषु वा मन्त्री त्रिपुण्ड्रं विधिना कुरु ।
मूर्धा ललाटकर्णौ च चक्षुषी घ्राणकस्तथा ॥ ६८ ॥
आस्यं ग्रीवा तथाप्यंसौ बाहुकूर्परके तथा ।
मणिबन्धौ च हृन्नाभिमेढ्रं पायुस्तथैव च ॥ ६९ ॥

ऊरू च जानुकौ चैव जङ्घे स्फिज्ञौ तथैव च ।
पादद्वयं तथैव स्युः द्वात्रिंशत्सन्धयः क्रमात् ।। ७० ।।
प्रियं वै चाष्टमूर्तीनां विद्येशानां भवादिनाम् ।
दिक्पलानां वसूनां च मूर्धादि परिकल्पयेत् ।। ७१ ।।
ग्रीवा ललाटमंसौ च बाहू च कूपरी तथा ।
हृदयं जठरं चैव पार्श्वे च मणिबन्धकौ ।। ७२ ।।
नाभिपृष्ठं च विज्ञेयाः सन्धयः षोडश क्रमात् ।
शिरोललाटकर्णं च बाहू च हृदयस्तथा ।। ७३ ।।
नाभिः पृष्ठमिति ज्ञेया स्त्वष्ठौ वै सन्धयः क्रमात् ।
शिरोललाटहृन्नाभिपादानि पञ्चसन्धयः ।। ७४ ।।
शिर ईशानमन्त्रेण पुरुषेण मुखं तथा ।
हृत्प्रदेशमघोरेण गुह्यं वै वाममन्त्रतः ।। ७५ ।।
सद्योजातं न्यसेत्पादे सर्वाङ्गं प्रणवेन तु ।
शिवादिपस्य मूर्तिनां वामादीनां तथैव च ।। ७६ ।।
अश्विनोस्तु प्रियं ज्ञेयं मूर्धादि परिकल्पयेत् ।
क्रमेण ब्राह्मणानां च देवतानां प्रियं भवेत् ।। ७७ ।।
पञ्चाङ्गुलेन मूर्ध्नि स्यात् प्रासादेन तु मन्त्रतः ।
ललाटे तु त्रयङ्गल्यं शिरोमन्त्रेण देशिकः ।। ७८ ।।
सद्येन दक्षकर्णौ तु वामदेवेन वामतः ।
अघोरेण तु कर्णौ च मध्याङ्गल्येन संस्पृशेत् ।। ७९ ।।
हृदये हृदये नैवाप्यङ्गल्यैस्त्रिभिरेव च ।
विन्यस्य दक्षिणे बाहौ शिखामन्त्रेण देशिकः ।। ८० ।।
वामबाहौ न्यसेद्धीमान् कवचेन त्रयङ्गुलम् ।
संस्पृश्य नाभावीशेन कारयेत्तु विचक्षणः ।। ८१ ।।
शिरस्थाने स्वयं ब्रह्मा ललाटे स्कन्द एव च ।
कर्णे भुजङ्ग एवोक्तं बाहुयुग्मै च केशवम् ।। ८२ ।।
हृदये चैश्वरः प्रोक्तो, नाभौ चैव प्रजापतिः ।
जानुनोरश्वनीदेवौ पादाभ्यां पन्नगस्तथा ।। ८३ ।।

भस्मालेपनमात्रेण स्वस्थामध्या भवन्ति हि ।
भस्मस्नानं जलस्नानात् पुण्यं कोटिगुणाधिकम् ॥ ८४ ॥
निक्षेपेन्मूलमन्त्रेण सर्वज्ञानार्हकोभवेत् ।
भस्मस्नानं समाख्यातं; माहेन्द्रस्नानमुच्यते ॥ ८५ ॥
आदित्यरश्मिसम्बन्धं वृष्टीनां यत्र सम्भवेत् ।
पदसप्तोत्तरे गम्यं मूलमन्त्रमनुस्मरन् ॥ ८६ ॥
वर्तमानेऽर्करश्मिश्च वृष्ठौ सततमिष्यते ।
प्राङ्मुखश्चोर्ध्वबाहुश्च वामे सव्येतरे स्थिता ॥ ८७ ॥
वामपादाग्रविन्यस्य सव्यपादैकमूलके ।
मूलमन्त्रं जपित्वाऽथ यावद्वै पदसप्तकम् ॥ ८८ ॥
आदित्याभिमुखः पश्चात्तन्नमस्कृत्य बुद्धिमान् ।
एवं कृते महापापान्मुच्यते नात्र संशयः ॥ ८९ ॥
स्नानं माहेन्द्रमित्युक्तं मारुतं त्वधुना शृणु ।
पूर्वाह्णे वापराह्णे वा रजसा गोधृतेन तु ॥ ९० ॥
अभिषक्तस्तदा मन्त्री मूलमन्त्रमनुस्मरन् ।
मारुतस्नानमित्युक्तं; मन्त्रस्नानं ततः शृणु ॥ ९१ ॥
मन्त्रस्नानं तदेतेषां सर्वपापनिकृन्तनम् ।
मारुतस्नानमन्ते तु प्रक्षाळ्य जानुपादयोः ॥ ९२ ॥
प्रक्षाळ्य पादावाचाम्य पात्रे क्षिप्त्य जलं तथा ।
व्योमव्यापिपदश्चैव षडङ्गैः ब्रह्मपञ्चकैः ॥ ९३ ॥
मूलेनैव तु तत्तोयमभिमन्त्र्य सकृत्सकृत् ।
संस्पृशेत्तेन तोयेन मूलमन्त्रेण वर्मणा ॥ ९४ ॥
मूर्धादिपादपर्यन्तं त्रिधा संस्पर्शयेत्ततः ।
मन्त्रस्नानं समाख्यातं सर्वपापक्षयो भवेत् ॥ ९५ ॥
सर्वव्याधिविनिर्मुक्तिः सर्वसिद्धिकरं परम् ।
वारुणं भस्म माहेन्द्रं मारुतं मन्त्रसंज्ञकम् ॥ ९६ ॥
एवं पञ्चविधस्नानं सर्वकार्येषु पूजितम् ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे स्नानविधिपटलः एकोनत्रिंशः समाप्तः

अथ नित्यार्चनविधिपटलप्रारम्भः

वक्ष्ये नित्यार्चनं पुण्यं शुभदं पापनाशनम् ।
महापातकदोषघ्नं सर्वयज्ञफलप्रदम् ॥ १ ॥
आत्मार्थं च परार्थं च पूजा द्विविधमुच्यते ।
दत्ते च गुरुणा लिङ्गे स्थण्डिले स्वयमात्मनि ॥ २ ॥
क्षणिके मण्डले तोयेऽप्यात्मार्थयजनं स्मृतम् ।
मण्डले तु शतं पुण्यं स्थण्डिले तु सहस्रकम् ॥ ३ ॥
अयुतं कौतुके लिङ्गे कोटिकोटिगुणं भवेत् ।
शैलजं रत्नजं चैव लोहजं दारुजं तथा ॥ ४ ॥
मृन्मयं क्षणकं चैव षड्विधं लिङ्गमुच्यते ।
सिकतं तण्डुलं चान्नं नदीमृत् गोमयं तथा ॥ ५ ॥
नवनीतं च रुद्राक्षं भस्म चन्दनकूर्चकम् ।
पुष्पमाला गुडं चैव क्षणिकं द्वादशं भवेत् ॥ ६ ॥
मानसान्मण्डलं श्रेष्ठं मण्डलात् क्षणिकं परम् ।
क्षणिकात् फलमुत्कृष्टं पटश्चैव ततःपरम् ॥ ७ ॥
पटादाभासमुत्कृष्टमाभासात् बिम्बमुच्यते ।
बिम्बाद्वै लिङ्गमुत्कृष्टं लिङ्गाद्वै निष्कळं परम् ॥ ८ ॥
सर्वयज्ञतपोदानतीर्थदेशेषु यत् फलम् ।
तत्फलं कोटिगुणितं शिवलिङ्गार्चनात्फलम् ॥ ९ ॥
सर्वेषां रक्षणार्थाय ग्रामादिषु विशेषतः ।
स्थापितं विधिना लिङ्गं सुरैर्वा मुनिभिर्नरैः ॥ १० ॥
स्वयमुद्भूतलिङ्गं च प्रतिमां चेश्वरात्मकम् ।
तत्परार्थं समाख्यातं सर्वेषामात्मनः फलम् ॥ ११ ॥
सर्वेषामात्मरक्षार्थमिष्टलिङ्गार्चनं गृहे ।
आत्मर्थमिति विख्यातं; परार्थं च ततश्शृणु ॥ १२ ॥
स्वयम्भूर्दैविकं चैव दिव्यमानुषमार्षकम् ।
राक्षसं बाणलिङ्गं च सप्तैते लिङ्गमुच्यते ॥ १३ ॥

स्वयम्भूः स्वयमुत्पन्नं देव्यर्चनं तु दैविकम् ।
दिव्यं देवार्चनं चैव ऋषिपूजितमार्षकम् ।। १४ ।।
मानुषैः स्थापितं लिङ्गं मानुषं परिकीर्तितम् ।
असुरैः राक्षसैः पूज्यमासुरं राक्षसं भवेत् ।। १५ ।।
बाणनाम जलं प्रोक्तं तज्ञातं बाणलिङ्गकम् ।
बाणेन पूजितं लिङ्गं बाणलिङ्गमिहोच्यते ।। १६ ।।
विप्रक्षत्रियविट्शूद्राः दीक्षिताश्च प्रवेशकाः ।
अत्मर्थयजनं कुर्यात् न कुर्याच्च परार्थकम् ।। १७ ।।
आत्मार्थं च परार्थं च स्वादिशैवेन पूजितम् ।
आदिशैव इति प्रोक्तस्स शिवब्राह्मणो गुरुः ।। १८ ।।
शिवोद्भवं तु शैवं स्यात् शैवोद्भवः सदाशिवः ।
सदाशिवात्तु सम्भूता शिवसृष्टिरुदाहृता ।। १९ ।।
शिवेन स्थापितं शैवं शैवेन स्थापितः शिवः ।
शिवशैवविशुद्धात्मा शिवब्राह्मण इष्यते ।। २० ।।
चतुर्वेदाधिकारित्वाच्छैव सिद्धान्तपारगः ।
चातुर्वर्णाधिकारत्वादादिशैव इति स्मृतः ।। २१ ।।
आदिशैवश्शिवो रुद्रो शुद्धात्मा शुद्धशैवकः ।
तस्माच्छैवः प्रकर्तव्यं प्रतिष्ठामुत्सवान्तकम् ।। २२ ।।
उत्सवादिप्रायश्चित्तमादिशैवेन कारयेत् ।
आगमोक्तप्रकारेण प्रतिष्ठा लिङ्गपूजनम् ।। २३ ।।
आदिशैवस्य पूजा च सर्वसिद्धिकरी स्मृता ।
अन्यविप्रस्पृशेनैव स वै देवलको भवेत् ।। २४ ।।
यदि मोहेन कुर्वीत राज्ञो राष्ट्रस्य दुस्थितिः ।
कोपी मलिनधारी तु शिवं स्पृशति यो द्विजः ।। २५ ।।
स एकविंशतिकुलं सोऽक्षयं नरकं व्रजेत् ।
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ।। २६ ।।
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।
तेषां वंशेषु सञ्जाताः शिवब्राह्मणनामकाः ।। २७ ।।

विन्ध्याद्रेर्थक्षिणे देशे शैवोत्पत्तिः प्रकीर्तिता ।
कौशिकाद्याश्च ऋषयोऽप्यादिशैवाः प्रकीर्तिताः ।। २८ ।।
शुद्धैश्शिवद्विजैर्मुख्यैः सदाचारसमन्वितैः ।
क्षुद्रभद्रसमायुक्तैर्वेदवेदाङ्गपारगैः ।। २९ ।।
एतै रधिष्ठितं विन्ध्यगिरेर्थक्षिणभूमिका ।
शैवं तु द्विविधं ज्ञेयं कलाकलविभेदतः ।। ३० ।।
कलं वै शिवगर्भं स्यादकलं ऋषिगर्भकम् ।
प्रतिष्ठास्थापनं नित्यपूजनं प्रोक्षणं तथा ।। ३१ ।।
उत्सवादीनि सर्वाणि काम्यकर्माणि यानि च ।
तानि सर्वाणि कार्याणि कलेन तु विशेषतः ।। ३२ ।।
शास्त्रार्चनं क्षुद्रबिम्बपूजनं चान्यपूजनम् ।
स्वेष्टलिङ्गार्चनं ग्रामदेवताराधनं तथा ।। ३३ ।।
अकलेन प्रकर्तव्यं शैवतन्त्रानुसारिणा ।
नित्यं नैमित्तिकं काम्यं वर्जनीयं परार्थके ।। ३४ ।।
कर्षणादिप्रतिष्ठान्तमादिशैवेन कारयेत् ।
.... ।। ३५ ।।
सदाशिवाख्यस्य शिवस्य वक्त्रे ये दीक्षिताः कौशिककाश्यपाद्याः ।
तेषां मुनीनां विधिवत्क्रमेण जाताश्शिवब्राह्मणनामधेयाः ।। ३६ ।।
अनादिशैवस्सशिवस्त्वादिशैवश्शिवद्विजः ।
महाशैवं तु विप्राणाम् अनुशैवं तु भूभुजाम् ।। ३७ ।।
अवान्तरं तु शूद्राणां पञ्च शैवद्भवं क्रमात् ।
सर्वेषां भस्मधारीणाँ शैवं सर्वसमुच्चयम् ।। ३८ ।।
आदौ येन शिवेनैव नियुक्तोऽपि शिवाध्वरे ।
आदावनादिशैवेन दीक्षितस्त्वादिशैवकः ।। ३९ ।।
शिवमुत्पद्य शैवं हि शैवेनोत्पद्यते शिवः ।
शिव शैवैक्यरूपत्वाच्छिवब्राह्मण उच्यते ।। ४० ।।
इति नित्यं षडाधारं ततः पूज्यो दिवाकरः ।
विना सूर्यार्चनं कर्म ततो निष्फलतां व्रजेत् ।। ४१ ।।

सौवर्णेन कृतं लिङ्गं भुक्तिमुक्तिप्रदं भवेत् ।
ताम्रजं पुत्रदं प्रोक्तं रजतं श्रीकरं भवेत् ॥ ४२ ॥
सुखदं कांस्यमित्युक्तं पैत्तलं रोगनाशनम् ।
आयसं पुत्रनाशं तु त्रिलोहं मरणं भवेत् ॥ ४३ ॥
तस्माद्वै सर्वजातीनां बाणमेवोत्तमोत्तमम् ।
क्षुद्रं भद्रं तथा प्रोक्तं क्षुद्रमात्मार्थपूजनम् ॥ ४४ ॥
भद्रं परार्थमित्युक्तं ग्रामादौ स्थापनं हितम् ।
आत्मशुद्धिस्तु पूर्वं स्यात् स्थानशुद्धिर्द्वितीयकम् ॥ ४५ ॥
तृतीयं द्रव्यशुद्धिस्स्याच्चतुर्थं लिङ्गशोधनम् ।
पञ्चमं मन्त्रशुद्धिस्स्यादित्येताः पञ्चशुद्धयः ॥ ४६ ॥
विधिना स्नानकं कृत्वा देहशुद्धिरतःपरम् ।
पादप्रक्षाळनं कृत्वा समाचम्य विधानतः ॥ ४७ ॥
द्वाराग्रमण्टपं गत्वा पूजकस्तु सुखासनः ।
शास्त्रोक्तदहनं भस्म देशिको धारयेत्क्रमात् ॥ ४८ ॥
उद्धूळने त्वशक्तश्चेत्त्रिपुण्ड्रं सर्वसन्धिषु ।
द्वात्रिंशत्सन्धिदेशे वाऽप्यथवा षोडशेष्वपि ॥ ४९ ॥
अष्टसन्धिषु वा पञ्चस्थाने धार्यं त्रिपुण्ड्रकम् ।
सन्ध्याग्रे च निशीथे च शय्यापूर्वावसानयोः ॥ ५० ॥
हुत्वा भुक्त्वा पयः पीत्वा कृत्वा चावश्यकादिभिः ।
स्त्रीपुन्नपुंसकं शूद्रं बिडालं बकमूषिकम् ॥ ५१ ॥
स्पृष्ट्वा यथा विधावन्ते चाग्नेयस्नानमाचरेत् ।
देवाग्निगुरुविद्यानां समीपे यदि दर्शने ॥ ५२ ॥
अशुद्धभूतले मार्गे कुर्यान्नोद्धूळनं व्रती ।
भस्म वामकरे स्थाप्य दक्षिणे नाऽभिमन्त्रयेत् ॥ ५३ ॥
मध्याङ्गुल्या जलैर्युक्तमपरैर्जलवर्जितम् ।
हस्तौ संशोध्य चास्त्रेण सर्वाङ्गं धारयेत्क्रमात् ॥ ५४ ॥
मूर्ध्नि चैव ललाटे च हृदये गुह्यपादयोः ।
कर्णे चांसद्वये बाहौ कूर्परे मणिबन्धके ॥ ५५ ॥

पृष्ठे च पार्श्वयोश्चैव सर्वाङ्गं धारयेत्क्रमात् ।
पञ्चाङ्गलेन मूर्ध्नि स्यात् प्रासादेन तु मन्त्रतः ॥ ५६ ॥
ललाटे च त्रयङ्गुल्या त्वीशतत्पुरुषेण तु ।
वक्षस्यघोरमन्त्रेण वाममन्त्रेण गुह्यके ॥ ५७ ॥
सद्योजातेन पादाभ्यां हृदये हृदयं भवेत् ।
शिरोमन्त्रेण कण्ठे च शिखामन्त्रेण हस्तयोः ॥ ५८ ॥
कूपरि कवचेनैव मणिबन्धे च नेत्रतः ।
सर्वाङ्गमस्त्रमन्त्रेण धृत्वा सम्प्रोक्षयेत्ततः ॥ ५९ ॥
ब्रह्मा विष्णुर्महेशश्च त्रयो रेखा इति स्मृताः ।
अधो ब्रह्मा ततोविष्णुस्तदूर्ध्वे तु महेश्वरः ॥ ६० ॥
त्रिपुण्ड्रद्वयरन्ध्रेषु मध्ये च्छिद्रं प्रयत्नतः ।
षण्मुखश्च गणेशश्च द्विरेखा त्वधिदेवताः ॥ ६१ ॥
ललाटे हृदि बाह्वोश्च दैर्घ्यकं तु षडङ्गुलम् ।
शेषमेकाङ्गुलं प्रोक्तं त्रिपुण्ड्रं धारयेत्क्रमात् ॥ ६२ ॥
ऊर्ध्वपुण्ड्रमनायुष्यं दीर्घपुण्ड्रं तपःक्षयम् ।
नेत्रयुग्मान्तमानेन धारयेत् भसितं क्रमात् ॥ ६३ ॥
द्विकालं जलसम्मिश्रं त्रिपुण्ड्रं धारयेद्द्विजः ।
विधूय सर्वपापानि सर्वकर्मार्हको भवेत् ॥ ६४ ॥
द्विकालमेककालं वा भसितं जलमिश्रितम् ।
त्रिपुण्ड्रधारणं कुर्यात्सर्वपापच्युतो भवेत् ॥ ६५ ॥
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ।
पद्मं च स्वस्तिकं चैव गोमुखं विशदं तथा ॥ ६६ ॥
सूचितं चैकपादं तु कुक्कुटं वीरमेव च ।
भद्रासनं तथा ज्ञेयं कूर्मं विमलमेवच ॥ ६७ ॥
दण्डपिण्डं च गोकर्णं सिंहासनमतःपरम् ।
वृत्तं च घटिकं चैव गजास्य गजकर्णिकम् ॥ ६८ ॥
आसनं विंशति प्रोक्तं श्रेष्ठं स्थिरसुखासनम् ।
ऊरुजानुद्वयं चैव पादाग्रं चैव सम्पुटम् ॥ ६९ ॥

ईषन्नासाग्रदृष्टिस्तु देहदीर्घं तु तं ऋजुः ।
रुचिरासनमाख्यातं सर्वकार्येषु पूजितम् ॥ ७० ॥
गोमुखं स्वस्तिकं चैव पद्मं चैवार्थचन्द्रकम् ।
वीरं योगासनं चैव षड्विधं चासनोत्तमम् ॥ ७१ ॥
वामजानूपरि न्यस्त्वा दक्षिणं जानुमण्डलम् ।
द्वयोः पादतले चैव विन्यसेत्पार्श्वपृष्ठयोः ॥ ७२ ॥
एवं कृत्वा तु सुस्निग्धं गोमुखं विशदं स्मृतम् ।
ऊरु पार्श्वतले न्यस्त्वा जङ्घामग्रं तु स्वस्तिकम् ॥ ७३ ॥
ऊरुपार्श्वतले न्यस्त्वा पद्मासनमिहोच्यते ।
ऊरूपरितले न्यस्त्वा द्वयोः पादतलेषु च ॥ ७४ ॥
गुल्फद्वयसमं कृत्वा तलौ जङ्घेन विन्यसेत् ।
अर्धचन्द्रं समाख्यातं; वीरासनमथ शृणु ॥ ७५ ॥
लम्बितं दक्षिणं पादं वामं दक्षिणतोपरि ।
ततो वीरासनं प्रोक्तं; योगासनमथ शृणु ॥ ७६ ॥
शरीरं जानुसम्बन्धं योगपट्टिकया वृतम् ।
कूर्परे चैव विन्यस्ते योगासनमिहोच्यते ॥ ७७ ॥
दशदिक्ष्वास्त्रमन्त्रेण दिशि रेच नमारभेत् ।
कूर्मं दर्भं तथा चर्म कम्बलं पीठमेव च ॥ ७८ ॥
आविकं त्वक्जसूत्रोत्थं रुचिरं चासनं तथा ।
सर्वकर्मार्हकं प्रोक्तं पवित्रमिदमासनम् ॥ ७९ ॥
प्राणायामत्रयं कृत्वा प्रत्येकं दशमात्रकम् ।
अपाने जुह्वति प्राणं प्राणात् प्राणमयं ततः ॥ ८० ॥
प्राणापानसमायोगात् प्राणायामेति चोच्यते ।
रेचकं पूरकं चैव कुम्भकं तु तृतीयकम् ॥ ८१ ॥
रेचनात् रेचकं प्रोक्तं, पूरणात् पूरकं तथा ।
कुम्भकं तु निरोधेन प्रणवेन न्यसेत्क्रमात् ॥ ८२ ॥
रेचकं ब्रह्मदैवत्यं पूरकं विष्णुदैवतम् ।
कुम्भकं रुद्रदैवत्यमधिदेवाः प्रकीर्तिताः ॥ ८३ ॥

अकारश्च उकारश्च मकारो बिन्दुरेव च ।
संयोगं बिन्दुनादाभ्यां प्राणायाममिदं विदुः ॥ ८४ ॥
उकारं सोमरूपं तु पूरकादित्यसङ्ख्याया ।
मकारस्यार्करूपं तु कला संज्ञस्य कुम्भकम् ॥ ८५ ॥
अकारस्याग्निरूपं तु वायुसङ्ख्यस्य रेचकम् ।
प्रथमं वामनास्येन द्वितीयं सव्यनासिका ॥ ८६ ॥
पुनस्तृतीयं वामेन प्राणायामकृतं तथा ।
औदरं वायुमङ्गुल्या नासिकां पीड्य रेचयेत् ॥ ८७ ॥
दूतिवत् पूरयेत्सम्यक् जठरे बाह्यवायुना ।
पूरकं तु समाख्यातं पश्चात्कुम्भकमुच्यते ॥ ८८ ॥
अन्तर्बहिस्थितं वायुं न गृह्णाति न मुञ्चति ।
पूर्णकुम्भसमं यस्मात्तस्मात्कुम्भकमुच्यते ॥ ८९ ॥
प्राणायामात्परं पुण्यं न भूतं न भविष्यति ।
रेचकादित्रयं प्रोक्तं सर्वदोषनिकृन्तनम् ॥ ९० ॥
गुरुप्रसादात्संलभ्यमन्यथा नोपलभ्यते ।
पूरकं कर्मविच्छेदं कुम्भकं चात्मबन्धनम् ॥ ९१ ॥
रेचकं कर्मनाशं स्यात् प्राणायामकृतं तथा ।
अनामिकाकनिष्ठे द्वेऽप्यङ्गुष्ठं च तृतीयकम् ॥ ९२ ॥
नासापुटं ततो बद्ध्वा प्राणायामस्य लक्षणम् ।
गङ्गा च दक्षिणे कर्णे नासिकाग्रे हुताशनम् ॥ ९३ ॥
उभयोः स्पर्शनादेव सर्वपापैः प्रमुच्यते ।
पादादिजानुपर्यन्तं पृथिवीस्थानमुच्यते ॥ ९४ ॥
अम्भस्थानं तु नाभ्यन्तं वह्निस्थानं गळान्तकम् ।
वायुस्थानं ललाटान्तं तदूर्ध्वे द्वादशाङ्गुलम् ॥ ९५ ॥
आकाशस्थानमित्युक्तं मूर्धादिस्थानमुच्यते ।
तालमात्रं ललाटोर्ध्वे वितस्ति द्वादशाङ्गुलम् ॥ ९६ ॥
शिवस्थानमिदं गुह्यं प्रमाणं गदितं मया ।
तालमात्रादधस्तात्तु भ्रूमध्ये ज्योतिरूपकम् ॥ ९७ ॥

विशुद्धं व्योमनिलयं बिन्दुस्थानमुदाहृतम् ।
बिन्दुस्थानं समाख्यातं मूर्धादिस्थानपञ्चकम् ॥ ९८ ॥
चतुरश्रार्धचन्द्रं च त्रिकोणं च षडश्रकम् ।
सुवृत्तं च पृथिव्यादिमण्डलाकृतयः क्रमात् ॥ ९९ ॥
सुखदुःखस्य भरितं विसर्जनं च मैथुनम् ।
अन्येषु भूतवर्गस्स्यात् भूतात्मा गुणतावहम् ॥ १०० ॥
इत्थमात्मन इत्युक्तम् पूजाकालेषु दुर्लभम् ।
अकारमात्मा सम्प्रोक्तमन्तरात्मा त्विकारकम् ॥ १०१ ॥
ॐकारं परमात्मा तु तत्त्वात्मा वै ह्युकारकम् ।
एकारं सर्वभूतात्मा तेषां वर्णं प्रकीर्तितम् ॥ १०२ ॥
भूतात्मा योजयेद्विद्वान् अन्तरात्मा दहेत्पुनः ।
तत्त्वात्मा त्वमृतं पूर्य शुद्धात्माप्यानयेत्पुनः ॥ १०३ ॥
शिखाग्रे व्योमगे शुद्धे शिवतत्त्वे नियोजयेत् ।
कृत्वा कायं दहेत्पश्चात् यान्तेनैव त्रिकोणके ॥ १०४ ॥
पादाङ्गुष्ठात् समारभ्य दहेद्यावच्छिरोन्तकम् ।
ज्वालामालासमाक्रान्तं शरीरं दग्धरज्जुवत् ॥ १०५ ॥
प्रक्रियान्तस्थममृतं स्रवन्तं चिन्तयेत्सदा ।
प्रणवं श्वेतकमलं योगपीठमधोमुखम् ॥ १०६ ॥
चिन्तयेदमृतं तस्मिन् सुषुम्नाभिन्नमस्तकम् ।
आपूर्यान्तस्ततो ध्यायेदात्मानममृतेन च ॥ १०७ ॥
आत्मानमानयेद्धीमान् एषा शिवतनुः क्रमात् ।
शिखाग्रे द्वादशाङ्गुल्ये वीणादण्डस्य पार्श्वयोः ॥ १०८ ॥
सुषुम्नामध्यगः प्राण मध्येषु सुषिरं तथा ।
जीवः प्राणसमायुक्तः तेषु मध्येषु सञ्चरेत् ॥ १०९ ॥
सञ्चारे त्रिषु तत्काले आधारेषु च संस्थिताः ।
आधेयवान् प्रयुक्तं च समाधिक्लेशमाश्रितम् ॥ ११० ॥
इडा च पिङ्गळा चैव वीणादण्डस्य पार्श्वयोः ।
मूलाधारे स्मरेदग्निं चन्द्रसूर्यसमन्वितम् ॥ १११ ॥

कुण्डल्यां तु विधातारं नाभौ विष्णुरुदाहृतः ।
हृदये केवलं रुद्रं कण्ठमूले महेश्वरम् ।। ११२ ।।
जिह्वामूले च नादाख्यं नासाग्रे बिन्दुरेव च ।
नादाख्यं तु भ्रुवोर्मध्ये ललाटे शक्तिसंज्ञिकम् ।। ११३ ।।
ब्रह्मरन्ध्रे शिवं विद्यादूर्ध्वे नृत्तं विचिन्तयेत् ।
द्वादशान्तात् परो यस्मादतिसूक्ष्मस्थितो विदुः ।। ११४ ।।
आनन्दनृत्तकस्साक्षात् देवदेवो जगद्गुरुः ।
शुक्लशोणितयोर्मध्ये बिन्दुरूपं परात्परम् ।। ११५ ।।
तस्य मध्ये गतः प्राणो बिन्दुनादात्मकः शिवः ।
एवं कृत्वा विधानेनाऽप्यथवान्यक्रमं शृणु ।। ११६ ।।
गुदस्य पृष्ठभागे तु तदूर्ध्वे तु द्वयाङ्गुलम् ।
वीणादण्डस्य सम्बन्धात् कदम्बदळपद्मकम् ।। ११७ ।।
मूलाधारे स्मरेच्चैव चन्द्रसूर्यसमन्वितम् ।
तस्य मध्ये तु सम्बन्धाच्छिवाग्निं परमाणुकम् ।। ११८ ।।
रूपमध्ये स्थितो वायुर्वायुमध्ये स्थितं मनः ।
मनोमध्ये स्थितो नाम नाममध्यस्थितो ध्वनिः ।। ११९ ।।
ध्वनिमध्ये स्थितो नादो नादमध्ये स्थितश्शिवः ।
शिवमध्यगतं शान्तं शान्त्यतीतात्परात्परम् ।। १२० ।।
परात्परपरं देवमित्येषा शिवभावना ।
प्रथमं तु करन्यासमङ्गन्यासमतःपरम् ।। १२१ ।।
शोधयेदस्त्रमन्त्रेण तलिकौ हस्तपृष्ठकौ ।
अस्त्रेण हुम्फडन्तेन द्विर्वामं शोधयेत्करम् ।। १२२ ।।
तेन मन्त्रेण सव्यं तु ऊर्ध्वाधश्शोधयेत्त्रिधा ।
गन्थलिप्तकरौ कृत्वा शिवहस्तप्रकल्पनम् ।। १२३ ।।
वामहस्ते जलं स्थाप्य वह्निहस्तं तु दक्षिणम् ।
अग्निर्मलस्थशोधेन करन्यासं समाचरेत् ।। १२४ ।।
अङ्गुल्यष्टदळःपद्ममङ्गुष्ठद्वयकर्णिकम् ।
ध्यायेत्तत्रासनं मूर्तिं शम्भुं तद्द्वयाकं न्यसेत् ।। १२५ ।।

अङ्गुष्ठादिकनिष्ठान्तं सृष्टिन्यासमुदाहृतम् ।
कनिष्ठाद्यङ्गुष्ठकान्तं यत् संहारन्यासमुच्यते ।। १२६ ।।
ईशादिसद्यमन्त्रातं सृष्टिन्यासमुदाहृतम् ।
सद्यादीशानपर्यन्तं संहारन्यासमुच्यते ।। १२७ ।।
दक्षिणाङ्गुष्ठमादिस्स्यात् कनिष्ठादीतरे ततः ।
दशबीजं न्यसेद्धीमान् स्थितिन्यासमतःपरम् ।। १२८ ।।
तर्जन्यान्तं तु मध्यादि क्रमादङ्गानि विन्यसेत् ।
न्यसेद्धस्ततले नेत्रे तर्जन्यास्त्रं न्यसेत्क्रमात् ।। १२९ ।।
शिवाङ्गान्येवमेवं स्याच्छिवं पर्वणिपर्वणि ।
गृहस्थस्सृष्टिमार्गेण करन्यासं तु कारयेत् ।। १३० ।।
वानप्रस्थयतीनां तु संहारक्रममेव हि ।
अपत्नीका वनस्थाश्चेत् संहारन्यासमुच्यते ।। १३१ ।।
नैष्टिके तु स्थितिन्यासं सर्वकार्येषु पूजितम् ।
करन्यासं समाख्यातमङ्गन्यासं ततश्शृणु ।। १३२ ।।
मूर्धादिसृष्टिरित्रोक्तं पादादिस्संहृतिर्भवेत् ।
स्वमूर्ध्नि विन्यसेदीशं वक्त्रे वक्त्रं तु विन्यसेत् ।। १३३ ।।
न्यस्त्वाऽघोरं हृदि स्थाने वामं गुह्ये तु विन्यसेत् ।
सद्यमन्त्रौ न्यसेत्पादे ततस्त्वङ्गानि विन्यसेत् ।। १३४ ।।
हृदयं हृदये न्यस्य शिरश्शिरसि विन्यसेत् ।
शिखायां तु शिखां न्यस्य कवचं स्तनमध्यतः ।। १३५ ।।
लोचने तु न्यसेन्नेत्रमस्त्रम् अस्त्रपदेशके ।
अष्टत्रिंशत्कलान्यासं विधिना कारयेत्ततः ।। १३६ ।।
उत्सृज्य प्राकृतं भावं शिवोऽहमिति भावयेत् ।
एवं कृत्वा विशेषेणाऽप्यन्तर्यागं समाचरेत् ।। १३७ ।।
नाभीचक्रं समाश्रित्य कारयेद्वह्निमण्डलम् ।
हृदये धारयेत्सोमं भ्रूमध्ये रविमण्डलम् ।। १३८ ।।
हृदये यजनं कुर्याद्धोमं नाभौ प्रकल्पयेत् ।
तथेश्वरं तु भ्रूमध्ये ध्यायेत्सर्वगतं प्रभुम् ।। १३९ ।।

पञ्चावरणमार्गेण पूजयित्वा विशेषतः ।
हृत्पद्मे चार्चयेन्नित्यं त्रिकालं वा द्विकालकम् ॥ १४०. ॥
अथवाप्येककालं वा संयजेन्मानसेन तु ।
आत्मशुद्धिरिति प्रोक्ता; स्थानशुद्धिमतश्शृणु ॥ १४१ ॥
शिवाग्रे स्थण्डिलं कृत्वा हस्तमात्रं तु देशिकः ।
आवाहयेत्ततोभूमिं सर्वाभरणभूषिताम् ॥ १४२ ॥
द्विभुजां च द्विनेत्रां च करण्डमकुटान्विताम् ।
हेमयज्ञोपवीताढ्यां पीतनेत्रां सुयौवनाम् ॥ १४३ ॥
पीताभां पीतवस्त्रां च पुण्डरीकदळेक्षणाम् ।
कृताञ्जलिपुटोपेतां सनाळोत्पलधारिणीम् ॥ १४४ ॥
सुप्रसन्नां भूमिदेवीं सर्वावयवसुन्दरीम् ।
गन्धादिभिस्समभ्यर्च्य हृदयेनैव मन्त्रतः ॥ १४५ ॥
अस्त्रेणैव तु मन्त्रेण दिग्विरेचनमारभेत् ।
स्थानशुद्धिरिति प्रोक्ता; द्रव्याशुद्धिं ततश्शृणु ॥ १४६ ॥
शरावं पाद्यपात्रं च शङ्खमाचमनीयकम् ।
जलभाण्डं वर्धनीं च पुष्पपात्रार्घ्यपात्रकौ ॥ १४७ ॥
अस्त्रेण क्षाळयेद्धीमान् निरीक्ष्य हृदयेन तु ।
कवचेनाऽवकुण्ठ्याथ तेनैवोन्मीलनं कुरु ॥ १४८ ॥
वर्धनीं शङ्खकेनैव पूरयेत्तु शिवाम्भसा ।
पञ्चब्रह्मषडङ्गानि तोयमध्ये तु विन्यसेत् ॥ १४९ ॥
पिधाय दक्षहस्तेन दशबीजं न्यसेत्ततः ।
दर्शयेल्लिङ्गमुद्रां तु पद्ममुद्रां प्रदर्शयेत् ॥ १५० ॥
पात्राणि च हृदा प्रोक्ष्य शङ्खतोयेन सर्वशः ।
क्षीरं दधिघृतादींश्च गन्धं पुष्पं च धूपकम् ॥ १५१ ॥
वर्धनीतोयमादाय प्रोक्षयेत्पुरुषेण तु ।
द्रव्यशुद्धिर्भवेदेवं; लिङ्गशुद्धिं ततश्शृणु ॥ १५२ ॥
देवदेवं नमस्कृत्य द्वारदेवान् प्रपूजयेत् ।
पतङ्ग च भुजङ्ग च , ऊर्ध्वाधस्सम्प्रपूजयेत् ॥ १५३ ॥

पतङ्गोर्ध्वे गणेशं च तस्य वामे सरस्वतीम् ।
पतङ्गस्योर्ध्वमध्ये तु महालक्ष्मीं यजेत्ततः ॥ १५४ ॥
दक्षिणे तु भुजङ्गस्य गङ्गां नन्दीशमेव च ।
यमुनां च महाकाळं तस्य वामे तु पूजयेत् ॥ १५५ ॥
द्विभुजं च द्विनेत्रं च सर्वाभरणभूषितम् ।
रक्ताक्षं रक्तवर्णं च तद्वर्णाम्बरभूषितम् ॥ १५६ ॥
दक्षिणे तु शिरो न्यस्य पादमुत्तरतोद दिशि ।
हृदि विन्यस्तहस्तं च पतङ्गद्वारि पूजयेत् ॥ १५७ ॥
पीतवर्णं द्विनेत्रं च भद्रकायं भयङ्करम् ।
पीतवस्त्रदधानं च करण्डमकुटोज्वलम् ॥ १५८ ॥
कृताञ्जलिपुटोपेतं भुजङ्गं भावयेदधः ।
भुजङ्गदक्षिणे पार्श्वे गणेशं विधिना यजेत् ॥ १५९ ॥
गजाननं त्रिनेत्रं तु श्यामवर्णं चतुर्भुजम् ।
लड्डुकं परशुं वामे सव्ये दन्ताक्षमालिके ॥ १६० ॥
नागयज्ञोपवीतं च लम्बोष्ठं तु गणाधिपम् ।
पतङ्गवामपार्श्वे तु पूजयेत्तु सरस्वतीम् ॥ १६१ ॥
चतुर्भुजां द्विनेत्रां च श्वेतवर्णां सलक्षणाम् ।
अक्षमालां च सव्ये तु पुस्तकं वामहस्तके ॥ १६२ ॥
अभयं वरदोपेतामथवा वामहस्तके ।
गण्डिकां सव्यहस्ते तु पङ्कजं वापि धारयेत् ॥ १६३ ॥
सर्वलक्षणसंयुक्तां सर्वाभरणभूषिताम् ।
पतङ्गस्योर्ध्वमध्ये तु पद्ममध्ये च संस्थिताम् ॥ १६४ ॥
द्विभुजां च द्विनेत्रां च सरत्नमकुटान्विताम् ।
पीतवर्णसमायुक्तां सर्वावयवसुन्दरीम् ॥ १६५ ॥
पङ्कजं दक्षिणे हस्ते श्रीफलं वामहस्तके ।
हस्तद्वयं द्विपार्श्वे तु सोर्ध्वहस्तयुतैर्वरैः ॥ १६६ ॥
घटैस्तस्यां तु संयोज्याऽप्यभिषेकं समाचरेत् ।
दक्षिणे तु भुजङ्गस्य नन्दिनं रक्तवर्णकम् ॥ १६७ ॥

त्र्यक्ष्यं चतुर्भुजोपेतमभयं वरदान्वितम् ।
उग्रतोमरशूलं चाप्यक्षमालासमन्वितम् ।। १६८ ।।
तस्यैव वामपार्श्वे तु द्विनेत्रं द्विभुजं तथा ।
गङ्गायाश्शुक्लवर्णं तु मकरासनसंस्थितम् ।। १६९ ।।
नीलोत्पलं सव्यहस्ते पूर्णकुम्भं तु वामके ।
चित्रवस्त्रसमायुक्तं सर्वाभरणभूषितम् ।। १७० ।।
द्वारस्य दक्षिणे गङ्गां नन्दिनं पूजयेद्बुधः ।
भुजङ्गवामपार्श्वे तु महाकाळं घनद्युतिम् ।। १७१ ।।
चतुर्भुजं त्रिनेत्रं च कपालं शूलमेव च ।
दक्षिणेऽभयटङ्कं च वामे पाशसमावहम् ।। १७२ ।।
जटामकुटसंयुक्तं नागयज्ञोपवीतकम् ।
तस्यैव दक्षिणे पार्श्वे यमुनां चैव कल्पयेत् ।। १७३ ।।
द्विभुजं च द्विनेत्रं च श्यामवर्णसमन्वितम् ।
कूर्मासनसमारूढं सर्वाभरणभूषितम् ।। १७४ ।।
पूर्णकुम्भं तु वामे तु उत्पलं सव्यहस्तके ।
यमुनायास्स्वरूपं तु सर्वावयवसंयुतम् ।। १७५ ।।
विमलं च सुबाहुं च पूजयेत्तु कवाटयोः ।
पट्टिकागन्धमभ्यर्च्य वलये चन्द्रभास्करौ ।। १७६ ।।
सुषिरे नवशक्ति तु पूजयेद् देशिकोत्तमः ।
वृषभं पूजयेदग्रे गन्धपुष्पादिभिः क्रमात् ।। १७७ ।।
अन्तर्मण्डलकं चैव प्रथमं तु प्रकल्पयेत् ।
अन्तर्हारं द्वितीयं तु मध्यमर्या तृतीयकम् ।। १७८ ।।
चतुर्थमध्यमर्यादि महामर्यादि पञ्चकम् ।
पञ्चप्राकारमेवोक्तं प्राकारे बलिमाचरेत् ।। १७९ ।।
गर्भगृहस्य द्वारे वाऽप्यर्थमण्टपके तथा ।
अथवा मण्टपस्येव उत्तमं मध्यमाधमौ ।। १८० ।।
तद्द्वारे द्वारपालांस्तु आशीनो वा स्थितोऽथवा ।
डिण्डीनां सव्यपार्श्वे तु मुण्डीनां वामपार्श्वके ।। १८१ ।।

रक्तवर्णं द्विनेत्रं च नागयज्ञोपवीतकम् ।
भीमरूपं सुदंष्ट्रं च द्विभुजं चैकवक्त्रकम् ।। १८२ ।।
विस्मयाविष्टवक्त्राढ्यं दण्डायुधसमन्वितम् ।
सव्यपार्श्वे स्थितं देवं डिण्डीनां रूपमुच्यते ।। १८३ ।।
कृष्णवर्णं चतुर्हस्तमेकास्यं भीमरूपकम् ।
दंष्ट्राकराळवदनं दण्डन्यस्तैकपादकम् ।। १८४ ।।
किङ्किणीमालया भूष्यं दण्डाग्रन्यस्तपाणिनम् ।
कुन्तलालङ्कृतास्यं च डिण्डीनां तु स्वरूपकम् ।। १८५ ।।
द्वारेषु देवतास्सर्वाः परस्परनिरीक्षणाः ।
प्रत्यङ्मुखास्तथा कुर्युः पूजाकाले विशेषतः ।। १८६ ।।
पूजान्ते पूर्ववत्कृत्वा द्वारपालांस्तथैव च ।
घण्टां तु ताडयेद्धीमान् अस्त्रमन्त्रं समुच्चरन् ।। १८७ ।।
पूजाकाले तु घण्टां तु ताडनात् किम्प्रयोजनम् ।
यक्षराक्षसपैशाचदानवा ब्रह्मराक्षसाः ।। १८८ ।।
देवसान्निध्यपूजार्थं गच्छन्ति मणिशब्दतः ।
आवाहने च पूजान्ते पूजारम्भे विसर्जने ।। १८९
अर्घ्ये विलेपने स्नाने दीपे गन्धाभिषेचने ।
अभिषेके च धूपे च नैवेद्ये बलिकर्मणि ।। १९०
अन्येषु सर्वकार्येषु महाघण्टां प्रताडयेत् ।
अर्चनादिक्रियाकाले प्रच्छन्नपटमुत्तमम् ।। १९
पापो रोगी परिभ्रष्टो नास्तिकश्शिवनिन्दकः ।
वेदविक्रयकश्चैव ग्रन्थविक्रयकस्तथा ।। १९२
दुर्मुखश्च दुराचारो मूर्खश्च गुरुनिन्दकः ।
पाषण्डःप्रतिलोमश्च शिवद्रव्यापहारकः ।। १९३ ।
लिङ्गच्छेदी बृहद्बीजी सुरापायी च हेममुक् ।
मातृहा पितृहा स्तेयी गुरुद्रव्यापहारकः ।। १९४ ।।
प्रविश्य दर्शनं कृत्वा पूजाया निष्फलं भवेत् ।
प्रच्छन्नपटमाकल्प्य सर्वदोषनिकृन्तनम् ।
द्वाराधिक्यं तु विस्तारमायामद्विगुणं भवेत् ।। १९५ ।।

वस्त्रमेवं समाख्यातं प्रच्छन्नपटमुत्तमम् ।
यवनिकां परित्यज्य हृदयं मन्त्रमुच्चरन् ॥ १९६ ॥
गर्भगेहं ततः प्राप्य लिङ्गशुद्धिं समाचरेत् ।
स्वयम्भूर्दैविकं बाणं गाणवं चार्षकं तथा ॥ १९७ ॥
शिष्टलिङ्गमितिख्यातं पूजां पूर्ववदाचरेत् ।
शिष्टलिङ्गे विशेषेणाऽवाहनोद्वाहनं न हि ॥ १९८ ॥
सर्वत्र व्यापिनं देवं परमेशं सदाशिवम् ।
अभिमुखीकरणं यच्च तदावाहनमुच्यते ॥ १९९ ॥
विमुखीकरणं यच्च तदुद्वासनमुच्यते ।
पूजापरिसमाप्ते तु विमुखं तु विसर्जनम् ॥ २०० ॥
यथा कुण्डगतस्याग्नेर्वायुना ज्वलनं भवेत् ।
तथा च लिङ्गमन्त्रेण जायते भगवान् शिवः ॥ २०१ ॥
देवैश्च मुनिभिश्चैव पशुभिः पक्षिजालकैः ।
मृगादिगणपैश्चैव स्वायम्भुवप्रतिष्ठितम् ॥ २०२ ॥
यक्षरक्षोगणैश्चैव यल्लिङ्गं तु प्रतिष्ठितम् ।
तच्छिष्टलिङ्गमित्युक्तं शिवसान्निध्यकारणम् ॥ २०३ ॥
तस्मादावाहनं नास्ति न चैवोद्वासनक्रिया ।
अवाहनं कुतो देव कुतो देवासनं ततः ॥ २०४ ॥
सुराणां देवतानां च विस्मरन्ति विसर्जनम् ।
लिङ्गमावाहनं चैव लिङ्गमूर्तिरिति स्मृता ॥ २०५ ॥
आचार्यं सन्निधौ कृत्वा दर्पणश्च तथैव हि ।
दीपात् दीपसहस्राणि मूलदीपं न लिप्यर्ते ॥ २०६ ॥
यस्य देवार्चनं लिङ्गं मूललिङ्गं नयेद्बुधः ।
गो-इत्यनेकवर्णानि क्षीरमेकं समुद्भवम् ॥ २०७ ॥
मन्त्रमेकं समुत्पन्नं तन्त्रं च बहुरूपकम् ।
कुलालचक्रमृद्भिस्तु नानारूपेण दृश्यते ॥ २०८ ॥
आचार्यं मनसा ध्यात्वा दृग्छायापरमेश्वरम् ।
शिलामृद्दारुचित्रेषु देवता यत्र कल्पिता ॥ २०९ ॥

आकल्पितस्वयं ज्योतिरात्मनो देवता हि सा ।
काष्ठादग्निः, घटेचन्द्रोस्वयमावाहयेत्ततः ॥ २१० ॥
यद्देवमर्चयित्वा तु तद्देवमात्मभावनम् ।
कृत्वा हृद्गतमञ्जिलं च कुसुमं प्रासादमन्त्रं पठन्
भक्त्या निष्कलगोचरस्समरसी भावं गतस्साधकः ।
ध्यायेद्विक्रमतस्तु शक्तिभवने नादे तथा बिन्दुके
निष्क्रान्तः क्रमतस्तु शक्तिभवने स्यादेवमावाहनम् ॥ २११ ॥
पीतं शुक्लं तथा रक्तं कृष्णाभं धूम्रवर्णकम् ।
तथोर्व्यादीनि बीजानि लवरयहकारकाः ॥ २१२ ॥
पृथव्यादीनि भूतानि, ब्रह्माद्याः पञ्चमूर्तयः ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ २१३ ॥
अधिदेवास्त्विति ख्याताश्चोर्व्यादीनां यथाक्रमम् ॥
हृच्छिरश्चूलिकामन्त्रैर्वर्मणाऽस्त्रेण बुद्धिमान् ।
पृथिव्यादीनि बीजानि योजयेत्तु क्रमेण तु ॥ २१४ ॥
पञ्चोद्धातश्चतस्रश्च त्रयं च द्वयमेककम् ।
पाशुपतेन चास्त्रेण पञ्चग्रन्थिन्तु छेदयेत् ॥ २१५ ॥
पञ्चग्रन्थिं ततः कृत्वा तस्मात्प्रकृतिनिश्चयः ।
पञ्चग्रन्थिं तथाच्छेद्य प्रारभेदात्मयोजनम् ॥ २१६ ॥
जानुग्रन्थिस्तु प्रथमं नाभिग्रन्थिः द्वितीयकम् ।
गळग्रन्थिस्तृतीयं तु ललाटे तु चतुर्थकम् ॥ २१७ ॥
पञ्चमं तु शिरोग्रन्थिं छेदयेत्तु हृदा पुरा ।
मूर्तिमन्त्रेण सङ्गाह्य जीवं हुङ्कारमूर्धनि ॥ २१८ ॥
कुम्भकेन समोपेतं वायुमूर्ध्वगतं नयेत् ।
तेनैव द्वादशान्तस्थ शिवेन सह योजयेत् ॥ २१९ ॥
आत्मयोजनमेतत्स्यात्ततो भूतानि शोधयेत् ।
पृथिव्यादौ पयोवह्नी द्वौद्वौ शोध्य परस्परम् ॥ २२० ॥
आकाशं च विरोधेन यथा शोध्यं तदुच्यते ।
निवृत्यादीनि भूतानि ता....द्व........कम् ॥ २२१ ॥

व्याप्य व्यवस्थितादीनि मत्वा तानि विशोधयेत् ।
दहनं वाथ भूतानां परस्परविशोधनम् ।। २२२ ।।
मण्डलादिसमायुक्तं भूतशुद्धिरिहोदिता ।
शोध्यापरागरहितं कलामात्रव्यवस्थितम् ।। २२३ ।।
विचिन्त्य दिव्यदेहार्थमत्र चाल्पावनं नयेत् ।
ध्यात्वा कुण्डलिनीं शक्तिमत्र त्वैकस्वरूपिणीम् ।। २२४ ।।
तदुद्भूतामृतस्रावैः सिक्तां देवकलां स्मरेत् ।
भुजङ्गाकृतिमत्युग्रां प्रबोधैकस्वरूपिणीम् ।। २२५ ।।
सप्ताख्यकुण्डलाकारवलयां हेमसन्निभाम् ।
भ्रूमध्यात्तालमात्रस्थब्रह्मरन्ध्रे विचिन्तयेत् ।। २२६ ।।
तदुत्पन्नैकपीयूषैरार्द्रं शुद्धं विभावयेत् ।
ग्रन्थिपञ्चकमाच्छेद्य शुद्धात्मानं विभावयेत् ।। २२७ ।।
कृत्वा हृदासनं तस्मिन् मूर्त्यात्मानं समानयेत् ।
पुनराप्लावनं कृत्वा करन्यासं समाचरेत् ।। २२८ ।।
नाभेस्तु चतुरङ्गुल्यमधस्थादग्निमण्डलम् ।
कदम्बपुष्पस्सङ्काशमष्टपत्रं त्रिकोणकम् ।। २२९ ।।
मूलाधारमधः प्रोक्तं द्वितीयं नाभिमूलके ।
भुजङ्गवलयाकाराऽप्यष्टवर्तुलसंयुता ।। २३० ।।
कुण्डलाख्या महानाडी भानुमण्डलमुच्यते ।
आत्मानं गृह्य संहारमुद्रया विग्रहाश्रितम् ।। २३१ ।।
पञ्चात्मनविधानेन देहादीन् तत्प्रमाणतः ।
आत्मानमन्तरात्मानं परमात्मानमेव हि ।। २३२ ।।
तत्वात्मानं तथा पूतपूर्वात्मानं तु पञ्चकम् ।
आत्मा तु दण्डमध्यस्थमन्तरात्मा तदन्तरम् ।। २३३ ।।
परमात्माऽब्जमध्यस्थं तत्वात्मापार्श्वदक्षिणम् ।
भूतात्मा वामपार्श्वे तु पञ्चात्मा स्थानमुच्यते ।। २३४ ।।
इडा च पिङ्गळा चैव सुषुम्ना त्रिविधा मता ।
स्थितोद्धृता नम्रमुखाः त्रिविधास्तद्गुणा मताः ।। २३५ ।।

पश्चात्मस्थानमेवोक्तं पार्श्वमध्ये तु ऊहितम् ।
आत्मानं सात्विकं प्रोक्तमन्तरात्मा च तामसम् ॥ २३६ ॥
परमात्मा परंध्यात्वा तत्वात्मा रजसो मुखम् ।
भूतकाम क्रियाहार विकार..............च ॥ २३७ ॥
राजावर्तनिभास्सर्वे प्रागादिषु प्रकल्पयेत् ।
गुणत्रयेण सञ्छाद्य सिंहासनं प्रकल्पयेत् ॥ २३८ ॥
भूतरूपेषु कोणेषु पादाः कृतयुगादयः ।
श्वेतं रक्तं तथा कृष्णं पीतं त्रेतादिवर्णकम् ॥ २३९ ॥
अव्यक्तो नियतिः कालो कला चेति चतुष्टयम् ।
अव्यक्तः स्फटिकाभासो नियतिश्चाञ्जनद्युतिः ॥ २४० ॥
कालो दाडिमपुष्पाभः कला भिन्नाञ्जनप्रभा ।
प्रागादिष्वेळका प्रोक्ता मध्यपादस्तु केशवः ॥ २४१ ॥
एवं योगासनं प्रोक्तं पद्मासनं ततोपरि ।
मायातत्वं बृहद्ग्रन्थिश्शुद्धविद्याऽऽत्मशोभितम् ॥ २४२ ॥
विद्येश्वरदळच्छन्नं शक्तिकेसरसंयुतम् ।
विद्यातत्वमयं तत्र कर्णिकायां प्रपूजयेत् ॥ २४३ ॥
बीजं प्रवाळवर्णाभमङ्कुरं रजतप्रभम् ।
तस्य नाळं तु वैडूर्यं कर्णिका रक्तपिङ्गळम् ॥ २४४ ॥
शङ्खवर्णा दळाग्राश्च रक्ताः श्वेतदळास्स्मृताः ।
किञ्चिल्लोहितपीतानि मध्ये स्यात् केसराणि च ॥ २४५ ॥
तन्मध्ये कल्पयेद्धीमान् कर्णिकां कनकप्रभाम् ।
नवबीजानि तन्मध्ये हेमाभानि प्रकल्पयेत् ॥ २४६ ॥
वामादिशक्तयश्चाष्टौ केसरेषु प्रकल्पयेत् ।
इन्द्रादीशानपर्यन्तं न्यसेन्मध्ये मनोन्मनीम् ॥ २४७ ॥
आत्मतत्वं न्यसेत्सव्ये विद्यातत्वं तु वामके ।
मध्यमे शिवतत्वं तु कल्पयेत्कल्पवित्तमः ॥ २४८ ॥
एवं पद्मासनं प्रोक्तं तस्योर्ध्वे विमलासनम् ।
मण्डलत्रयमत्रैव कल्पयेद्विपुलासनम् ॥ २४९ ॥

सिंहासनं चतुष्कोणमनन्तं च त्रिकोणकम् ।
पद्मं च वर्तुलाकारं षट्कोणं विमलासनम् ॥ २५० ॥
योगासनं चाष्टकोणमासनं परिकल्पयेत् ।
आवाहनासनं योगे स्नाने सिंहासनं भवेत् ॥ २५१ ॥
अर्चनायां महापद्मं विमलाख्यं तु भोजने ।
स्तोत्रसङ्गीतनृत्येष्वनन्तासनमिहोच्यते ॥ २५२ ॥
चतुरश्रस्य पीठस्य स्थित्वा लिङ्गमिहोच्यते ।
सुवृत्तमासनं प्रोक्तमष्टाश्रशयनं भवेत् ॥ २५३ ॥
उपानं पादुका चैव जगती जङ्घमेव च ।
कुक्षिं तत्कुमुदं ज्ञेयं बाहुस्स्यात् कम्पमेव च ॥ २५४ ॥
कण्ठं कण्ठमिति ज्ञेयमधरेत्वधरं भवेत् ।
महापट्टि ललाटान्तं केशान्तं घृतवारिणा ॥ २५५ ॥
आसीनं वा सुनृत्तं वा स्थितं वा शयनं तु वा ।
पूजाकाले सुखासीनमन्यकालेषु पूर्ववत् ॥ २५६ ॥
आसनं मूर्तिमावाह्याऽप्येतत्त्रितयमध्वनि ।
व्याप्तिव्यापकभावेन ज्ञात्वा यजनमारभेत् ॥ २५७ ॥
आसनं शुद्धविद्यान्तमूर्तिशक्त्यन्तगोचरम् ।
आवाह्याऽस्य शिरोमूर्तिर्मूर्तिमानुपरि स्थितः ॥ २५८ ॥
देहस्थस्सकळो ज्ञेयो निष्कळो देहवर्जितः ।
आप्ते वा देशग.....................स्थितः ॥ २५९ ॥
हंसहंसेति यो ब्रूयाद्धंसो देवस्सदाशिवः ।
गुरुवक्त्रं तु लभ्येत प्रत्यक्षं सर्वतोमुखम् ॥ २६९ ॥
तिलेषु च यथा तैलं पुष्पे गन्धस्सदाश्रितम् ।
पुरुषस्य शरीरेऽस्मिन् बाह्याभ्यन्तरसंस्थितम् ॥ २७० ॥
उल्कावस्थो यथा कश्चिद्द्रव्यमलोक्यतां त्यजेत् ।
ज्ञानेन ज्ञेयमालोक्य तथाऽज्ञानं परित्जयेत् ॥ २७१ ॥
सकळं पुष्पवत्तत्र गन्धस्यैव तु निष्कळम् ।
वृक्षस्तु सकळं विद्याच्छाया तस्य तु निष्कळम् ॥ २७२ ॥

सकळं निष्कळाभावे सर्वत्रैव व्यवस्थितम् ।
लिङ्गत....संज्ञात्वा कल्पयेदासनं तथा ॥ २७३ ॥
स्वयम्भौ देविके बाणे कल्पयेदेकमासनम् ।
आर्षे च गाणपे वत्स! कल्पयेदासनत्रयम् ॥ २७४ ॥
मानुषे चैव कर्तव्यं पञ्चासनमिति स्मृतम् ।
आवाहनादि यत्कर्म पूर्ववत्परिकल्पयेत् ॥ २७५ ॥
पूर्वाह्ने सितवस्त्रं तु मध्याह्ने रक्तवस्त्रकम् ।
पीतवस्त्रं तु सायाह्ने सार्धयामे तु सर्वशः ॥ २७६ ॥
आवाहयेत्ततो देवं सद्योजातेन मन्त्रतः ।
स्थापयेद्वाममन्त्रेणाऽप्यघोरेण तु सन्निधिः ॥ २७७ ॥
पुरुषेण निरोधं चेशानेन स्वागतं भवेत् ।
आगतस्य शिवस्यात्र पादौ पाद्यं हृदा ददेत् ॥ २७८ ॥
मुखेष्वाचमनं दद्यादर्घ्यं शिरसि निक्षिपेत् ।
अष्टत्रिंशत्कलान्यासं मकुटादिक्रमेण तु ॥ २७९ ॥
पञ्चब्रह्मषडङ्गैश्च व्योमव्यापिं समुच्चरन् ।
जलेन स्नापयेत् पश्चादधिक्षीरघृतैरपि ॥ २८० ॥
नाळिकेरोदकेनैव मधुना ब्रह्मपञ्चकैः ।
हृदा वै शालिपिष्ठेन घर्षयेल्लिङ्गमादरात् ॥ २८१ ॥
शिवाम्भसा तु संस्नाप्य घर्षयेदामलेन तु ।
लेपयेद्रजनीं पश्चात् स्नापयेद्गन्धवारिणा ॥ २८२ ॥
आचमनं ददेत्पश्चात् पञ्चवक्त्रेषु बुद्धिमान् ।
वस्त्रेण लिङ्गपीठे तु कारयेल्लम्बनं बुधः ॥ २८३ ॥
हृदयेन तु मन्त्रेण पुष्पं मूर्धनि दापयेत् ।
घण्टां तु ताडयेत्तत्र क्षिपेद्यवनिकां ततः ॥ २८४ ॥
वस्त्रोपवीतगन्धं च मकुटं कुण्डलं तथा ।
हारकेयूरमालां च हृदयेन प्रदापयेत् ॥ २८५ ॥
धूपदीपं हृदा दत्वा पञ्चमावरणां न्यसेत् ।
कर्णिकायां तथैशानं पूजयेत्तु विशेषतः ॥ २८६ ॥

पर्वे तत्पुरुषं चैव अघोरं दक्षिणे यजेत् ।
पश्चिमे तु यजेद्वामं सद्योजातं तु सौम्यके ॥ २८७ ॥
ईशानं पश्चिमे पूज्य पञ्चवक्त्रे तथार्चयेत् ।
शुद्धस्फटिकमीशानं पुरुषं कुङ्कुमाकृतिम् ॥ २८८ ॥
अघोरमञ्जनाभासं रक्ताभं वामदेवकम् ।
सद्योजातं तु गोक्षीरं पञ्चवक्त्रेषु भावयेत् ॥ २८९ ॥
सद्योजातं स्थितं देवं वामदेवं सुखासनम् ।
अघोरं धनुराकारं पुरुषं वामरूपकम् ॥ २९० ॥
ईशानं नृत्तरूपं तु पञ्चमन्त्रात्मकं परम् ।
शूलं पाशं तथा सद्यं वामं परशुमङ्कुशम् ॥ २९१ ॥
अघोरं खड्गबाणं च पुरुषं वज्रनागकम् ।
अभयं वरदं चैव त्वीशानाकृतिरुच्यते ॥ २९२ ॥
हृदयं पावके पूज्य निर्ऋतौ तु शिखां यजेत् ।
कवचं वायुदेशे तु शिरो वैशानगोचरे ॥ २९३ ॥
अस्त्रं तु दक्षिणे पूज्य ईशाने नयनं भवेत् ।
शुक्लं पीतारुणं चैव रक्तं श्यामं च कृष्णकम् ॥ २९४ ॥
वर्णानि च षडङ्गानि त्रिनेत्राश्च चतुर्भुजाः ।
सव्ये शूलाभयं चैव वामे वरकपालकम् ॥ २९५ ॥
षडङ्गस्यैव वर्णं तु प्रथमावरणे यजेत् ।
गर्भावरणमेवं तु दशमूले तु संयजेत् ॥ २९६ ॥
अनन्तेशस्तथा सूक्ष्मश्शिवोत्तमश्चेकनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ॥ २९७ ॥
अष्टविद्येश्वरा ह्येते त्रिनेत्राश्च चतुर्भुजाः ।
अभयं वरदोपेतां टङ्कशूलसमन्विताम् ॥ २९८ ॥
रक्तं श्वेतं तथा नीलं पीतं कृष्णं च कुङ्कुमम् ।
शोणं भिन्नाञ्जनप्रख्यं क्रमाद्विद्येशवर्णकम् ॥ २९९ ॥
अनन्तादिशिखण्ड्यन्तान् प्राग्दळेषु प्रकल्पयेत् ।
द्वितीयावरणं प्रोक्तं तृतीयावरणं शृणु ॥ ३०० ॥

उत्तरे तु यजेद्गौरीं पूर्वेषु वृषभं यजेत् ।
गणेशं याम्यदेशे तु गुहं वै वारुणे यजेत् ।। ३०१ ।।
नन्दिनन्दिमहाकाळौ भृङ्गीशं चण्डमूर्तिनम् ।
आग्नेयादिषु कोणेषु पूजयित्वा यथाविधि ।। ३०२ ।।
द्विनेत्रा द्विभुजा श्यामा करण्डमकुटान्विता ।
किरीटमकुटोपेता केशबन्धयुता तथा ।। ३०३ ।।
सर्वाभरणसंयुक्ता पादजालसमन्विता ।
दुकूलवसनोपेता चित्रवस्त्रेण वेष्टिता ।। ३०४ ।।
सर्वावयवसम्पूर्णा सर्वलक्षणसंयुता ।
दक्षिणे कटकं वापि वामहस्तं प्रलम्बितम् ।। ३०५ ।।
आभङ्गस्य वशात्तत्र लम्बयेत्सूत्रमादरात् ।
........पुष्पेण तेनैव किम्प्रयोजनम् ।। ३०६ ।।
भक्तानां सर्वजन्तूनां लोकोपकृतिकारणम् ।
तस्माद्गौरीकरस्थश्चाप्युत्पलं ज्ञानहेतुकम् ।। ३०७ ।।
गौर्याकृतिस्समुद्दिष्टा सौम्यदेशे समर्चयेत् ।
चतुष्पादं वेदरूपमग्निरूपं तु शृङ्गकम् ।। ३०७ ।।
ब्रह्मविष्ण्वोश्च रुद्रस्य रूपं वृषभमुच्यते ।
एकवक्त्रश्चतुष्पादोऽप्युदरेण खुराकृतिः ।। ३०८ ।।
वृषभश्श्वेतवर्णस्तु तीक्ष्णशृङ्गो महाबलः ।
प्रासादस्य वृषाणीमां गोशृङ्गं मण्टपाकृतिः ।। ३१० ।।
प्राकारे नन्दिने चैव शुभानि वृषभालयम् ।
केशान्तरे मूर्धनि नेत्रमध्ये मुखान्तरे ग्रीवहृदन्तरे च ।
नाभेश्च मध्ये नळकस्य मध्ये वदन्ति सन्तो वृषभस्य सूत्रम् ।।३११।।
उक्षं च गोपतिं चैव शङ्ख(ङ्कु)कर्णं तथैव च ।
....तीक्ष्णशृङ्गं तथैव च ।। ३१२ ।।
महोदरं त्वष्टमं च गोमातरं च मध्यमे ।
स्थितं वा शयनं वापि युगपादं खुरान्वितम् ।। ३१३ ।।
सम्पुटत्रयपादं तु एकपादं बहिस्स्थितम् ।
धर्मदेवाकृतिं ध्यात्वा वामनं वृषभं तथा ।। ३१४ ।।

चणकं मुद्गमाषं च तण्डुलं तिलमेवच ।
प्रत्येकं मुष्टिमात्रं स्यान्नाळिकेरगुणान्वितम् ।। ३१५ ।।
मुष्टिव्रीहिस्तु मुख्यं वा वृषभं पूजयेत्ततः ।
एवं प्रतिदिनं कुर्यात् ग्रामशान्तिकरं शुभम् ।
वृषभस्यार्चनं कुर्यात् पूर्वे चैव विशेषतः ।। ३१६ ।।
मण्टपे दक्षिणे पार्श्वे सौम्याभिमुखमास्स्थितम् ।
रक्तवर्णसमायुक्तं रुचिरासनसंस्थितम् ।। ३१७ ।।
चतुर्भुजं त्रिनेत्रं च नागयज्ञोपवीतकम् ।
महोदरं बृहत्कायं गजकर्णं गजाननम् ।। ३१८ ।।
लम्बोष्ठं गजहस्तं स्यात् कपित्थं लाजधारिणम् ।
लड्डुकं केतकीपुष्पं सव्यपार्श्वे तु हस्तयोः ।। ३१९ ।।
आम्रदन्तं दधानं च वामपार्श्वे तथैव च ।
करण्डमकुटोपेतं पञ्चताळप्रमाणकम् ।। ३२० ।।
गणेशं पद्मपीठस्थं दक्षिणे तु समर्चयेत् ।
पश्चिमे सव्यपार्श्वे तु गुहेशं सम्यगर्चयेत् ।। ३२१ ।।
चतुर्भुजं द्विनेत्रं च द्विपादं मकुटोज्ज्वलम् ।
श्यामवर्णसमायुक्तं मयूरासनसंस्थितम् ।। ३२२ ।।
नानारत्नप्रभामौळिमुष्णीषमुत्तरीयकम् ।
कर्णयोः पत्रपिण्डं तु नक्रकुण्डलमेव वा ।। ३२३ ।।
वज्रशक्तिसमोपेतं वरदाभयहस्तकम् ।
नानादीप्ताम्बरोपेतं सर्वाभरणभूषितम् ।। ३२४ ।।
योगिनीं वामपार्श्वे तु भोगिनीं सव्यपार्श्वके ।
कुङ्कुमाभां च रक्ताभां तत्तद्वर्णाम्बरान्वितम् ।। ३२५ ।।
उत्पलं पङ्कजं कृत्वा धारयन्तीं क्रमेण तु ।
आसीनो वास्थितो वापि प्रभामण्डलसंयुतः ।। ३२६ ।।
गुहस्य लक्षणं प्रोक्तं पश्चिमे चैव पूजयेत् ।
नन्दिनं पावके पूज्य द्विनेत्रं द्विभुजं तथा ।। ३२७ ।।

श्यामवर्णसमायुक्तमुग्रतोमरशूलकम् ।
जटामकुटसंयुक्तं पूजयेत्तु विशेषतः ।। ३२८ ।।
नैर्ऋते तु महाकाळं कृष्णवर्णं द्विनेत्रकम् ।
द्विभुजं शुक्लवस्त्राढ्यं द्विपादं भीमरूपकम् ।। ३२९ ।।
पाशदण्डसमायुक्तं सर्वाभरणभूषितम् ।
वायुदेशे समभ्यर्च्य भृङ्गिणं च द्विनेत्रकम् ।। ३३० ।।
द्विपादं रक्तवस्त्रं च द्विभुजं टङ्कविस्मयम् ।
सर्वाभरणसंयुक्तं जटामकुटमण्डितम् ।। ३३१ ।।
चण्डेशमीशदेशे तु द्विनेत्रं द्विभुजान्वितम् ।
कर्णस्थपत्रपिण्डाढ्यं श्यामाभं टङ्कधारिणम् ।। ३३२ ।।
द्विपादं श्यामवसनं सर्वाभरणभूषितम् ।
स्वर्णमकुटसंयुक्तं चण्डरूपमिति स्मृतम् ।। ३३३ ।।
तृतीयावरणं प्रोक्तं; चतुर्थावरणं शृणु ।
इन्द्रादिलोकपालादीनैन्द्रदिक्षु प्रकल्पयेत् ।। ३३४ ।।
अनन्तं निर्ऋतौ पूज्य ....मीशगोचरे ।
द्विभुजा च द्विनेत्रा च श्यामवर्णसमायुता ।। ३३५ ।।
सव्यहस्ते वज्रधरा वामहस्तेऽभयं तथा ।
रक्ताम्बरसमायुक्ता सर्वाभरणभूषिता ।। ३३६ ।।
हस्तिवाहनसंयुक्ता चैन्द्रस्याऽकृतिरुच्यते ।
द्विभुजा च द्विनेत्रा च रक्तवर्णसमन्विता ।। ३३७ ।।
त्रिपादेन समा रक्ता शलाकान्तोर्ध्वकेशका ।
पीतवस्त्रसमायुक्ता सर्वपुष्पैरलङ्कृता ।। ३३८ ।।
शुक्लयज्ञोपवीता च शुक्लवस्त्रोत्तरीयका ।
.................स्रुवं सव्यकरे ।। ३३९ ।।
अजवाहनसंयुक्ता वह्नेराकृतिरुच्यते ।
कालाञ्जननिभाकारा विद्युत्सदृशदंष्ट्रका ।। ३४० ।।
द्विभुजा रक्तकेशा च कुञ्चितभ्रूसविभ्रमा ।
दण्डायुधसमायुक्ता महिषासनसंस्थिता ।। ३४१ ।।

द्विनेत्रा द्विपदा सौम्या सर्वाभरणभूषिता ।
यमस्याकृतिराख्याता भीमरूपं प्रजापते ।। ३४२ ।।
द्विभुजं च द्विनेत्रं च कृष्णवर्णसमन्वितम् ।
हेमवस्त्रपरीधानं खड्गखेटकसंयुतम् ।। ३४३ ।।
नरवाहनसंयुक्तं दंष्ट्राकराळलोचनम् ।
सर्वाभरणसंयुक्तं राक्षसं रूपमुच्यते ।। ३४४ ।।
शङ्खकुन्देन्दुधवळा द्विभुजा च द्विनेत्रका ।
सर्वाभरणसंयुक्ता कुण्डलाभ्यां विराजिता ।। ३४५ ।।
सव्ये .... ।
सर्वलक्षणसंयुक्ता वरुणाकृतिरुच्यते ।। ३४६ ।।
कृष्णवर्णं द्विनेत्रं च कुञ्चितभ्रूसविभ्रमम् ।
द्विपादं शुक्लवस्त्रं च द्विहस्तं शुक्लभूषणम् ।। ३४७ ।।
सव्येऽङ्कुशं वहन् वामे प्रलम्बकटकं महत् ।
मिश्रवर्णाम्बरधरं मृगारूढं सुयौवनम् ।। ३४८ ।।
वायुरूपमिति ख्यातं सर्वलक्षणलक्षितम् ।
द्विभुजा च द्विनेत्रा च श्वेतवर्णसमायुता ।। ३४९ ।।
शुक्लवस्त्रपरीधाना सरत्नमकुटोज्वला ।
गदां च सव्यहस्ते तु .... ।। ३५० ।।
अश्ववाहनसंयुक्ता कुबेराकृतिरुच्यते ।
चतुर्भुजा द्विनेत्रा च शुक्लवर्णा सुयौवना ।। ३५१ ।।
शुक्लयज्ञोपवीता च वृषारूढा सुशान्तका ।
शूलं चाभयहस्तं च मृगीटङ्कं तथैव च ।। ३५२ ।।
... .व्याघ्रचर्माम्बरान्विता ।
ऐशानाकृतिराख्याता द्विभुजं वापि कारयेत् ।। ३५३ ।।
ब्रह्मा चतुर्मुखोपेतश्चतुर्दोर्दण्डसंयुतः ।
स्रुक्दण्डाक्षकुशाग्रश्च किरीटी हंसवाहनः ।। ३५४ ।।
विष्णुश्चतुर्भुजो मौली शङ्खचक्रगदाब्जधृक् ।
नीलाम्बुजप्रतीकाशो गरुडासनसंस्थितः ।। ३५५ ।।

चतुर्धावरणं ह्येवं पञ्चमावरणं शृणु ।
वज्रादिपद्मपर्यन्तं पूर्वादिषु यथाक्रमम् ।। ३५६ ।।
वज्रं शक्तिं च दण्डं च खड्गं पाशाङ्कुशं तथा ।
गदात्रिशूलं चक्रं च पद्मं चैव दशायुधम् ।। ३५७ ।।
मध्ये च सप्तमं तारमाशाधिपगणेशयोः ।
(याम्ये)वामे तु वीरभद्रेण विघ्नेश्वरसमन्वितम् ।। ३५८ ।।
ब्राह्मी महेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा सप्तमातरः ।। ३५९ ।।
दक्षिणे दक्षिणे चैव वीरभद्रविनायकौ ।
ब्रह्मी तु पीतवर्णास्याद् हंसवाहनसंस्थिता ।। ३६० ।।
चतुर्भुजयुता ब्राह्मी माहेश्वरी महेश्वरः ।
कौमारी षण्मुखश्चैव वैष्णवी विष्णुरेव च ।। ३६१ ।।
वाराही च यमश्चन्द्रो माहेन्द्रीमसृजस्तथा ।
काळरात्री उमा चैव रूपवाहनचिह्नकैः ।। ३६२ ।।
वक्त्रं प्रतिविशेषेण प्रतिवक्त्रं द्विलोचनम् ।
अभयं वरदं चैवाऽप्यक्षमालां च कुण्डिकाम् ।। ३६३ ।।
सर्वाभरणसंयुक्तम् जटामकुटसंयुतम् ।
ब्राह्मीलक्षणमाख्यातं माहेश्वरीं ततश्शृणु ।। ३६४ ।।
त्र्यक्षं चतुर्भुजं शान्तं शुक्लवर्णसमायुतम् ।
जटामकुटसंयुक्ताम्, एकवक्त्रसमन्विताम् ।। ३६५ ।।
अभयं वरदोपेतां मृगटङ्कं च धारिणीम् ।
वाहनं वृषभं धन्वा माहेश्वरीं तथैव च ।। ३६६ ।।
ईश्वरीलक्षणं प्रोक्तं, कौमारीलक्षणं शृणु ।
एकवक्त्रं द्विनेत्रं च नीलवर्णस्वरूपकम् ।। ३६७ ।।
चतुर्भुजसमायुक्तम् द्विपादेन समन्वितम् ।
मयूरं वाहनं कृत्वा जटामकुटमण्डितम् ।। ३६८ ।।
अपरे वज्रशक्तिं च वराभयकरान्वितम् ।
कौमारीरूपमाख्यातं, वैष्णवीरूपमुच्यते ।। ३६९ ।।

त्रक्ष्या चतुर्भुजा शान्ता श्यामवर्णा सुयौवना ।
शङ्खचक्रधरां सौम्यां वराभीतिकरान्विताम् ।। ३७० ।।
वाहनं गरुडं कृत्वा सर्वाभरणभूषिताम् ।
वैष्णव्याकृतिराख्याता, वाराहीरूपमुच्यते ।। ३७१ ।।
द्विनेत्रा च चतुर्हस्ता मेघवर्णा सुमध्यमा ।
हलं च मुसलं चैव वरदाभयसंयुताम् ।। ३७२ ।।
वाहनं महिषं कृत्वा सर्वावयवसुन्दरीम् ।
वाराह्याकृतिराख्याता, माहेन्द्राकृतिरुच्यते ।। ३७३ ।।
चतुर्भुजा त्रिनेत्रा च तप्तकाञ्चनसन्निभा ।
वज्रशक्तिसमोपेता वरदाभयहस्तका ।। ३७४ ।।
वाहनं वारुणं कृत्वा जटामकुटमण्डिता ।
पीतांशुकसमायुक्ता सर्वाभरणभूषिता ।। ३७५ ।।
माहेन्द्राकृतिराख्याता, चामुण्डाकृतिरुच्यते ।
चतुर्भुजा त्रिनेत्रा च कालाञ्जनसमद्युतिः ।। ३७६ ।।
कटकं शूलहस्तं च ....कपालं च धरं करे ।
कालांशुकसमायुक्ता दरस्मेरमुखाम्बुजा ।। ३७७ ।।
वाहनं स्यन्दनं कृत्वा दंष्ट्राघोरमुखाम्बुजम् ।
सर्वाभरणसम्पूर्णं चामुम्डारूपमिष्यते ।। ३७८ ।।
पुष्पादिभिश्च......सुमनादेस्ततोत्तमः ।
तत्ताडयेत् पटं तत्र... .... नीय च ।। ३७९ ।।
धूपदीपसमायुक्तं दर्पण.... .... ।
नैवेद्यं दापयेत्पश्चादुपदंशसमन्वितम् ।। ३८० ।।
गुडखण्डसमायुक्तमाज्ययुक्तं दधिप्लुतम् ।
मन्त्रान्नं तु कथं देव ब्रूहि मेऽत्र पुरान्तक ।। ३८१ ।।
मन्त्रं रहस्यमित्युक्तमदनादन्नमुच्यते ।
रहस्यं त्वोदनं यत्तु मन्त्रान्नमिति कथ्यते ।। ३८२ ।।
त्रिपाद्युपरि विन्यस्य स्थालिकादिगतं हविः ।
पेयं लेह्यं च चोष्यं च युक्तियुक्तं तु विन्यसेत् ।। ३८३ ।।

सम्प्रोक्ष्य हृदयेनैव शोषयित्वा तु हेतिना ।
अमृतीकृत्य गोस्तन्या.............न्यसेत् ।। ३८४ ।।
नैवेद्यं दक्षिणे हस्ते दद्यात्पानीयमुत्तमम् ।
मिश्रतोयं च हंसानां पानं पायसमुत्तमम् ।। ३८५ ।।
देवानां भुक्तिमात्रेण नैवेद्यमपि तत्समम् ।
कपित्थस्य फलं सारं यावत्कुञ्जरभक्षणम् ।। ३८६ ।।
तथैव देवताभुक्तिर्मन्त्रेणैव निवेदयेत् ।
ईशानस्याभिषेकं तु नैवेद्यं पुरुषानने ।। ३८७ ।।
अघोरस्यार्चना प्रीतिर्वामस्य प्रार्थना प्रिया ।
सद्योजातादिभिश्चैव पञ्चवक्त्राणि चिन्तयेत् ।। ३८८ ।।
गन्धं वाममुखे चैव पुष्पमीशानगोचरे ।
धूपं तु सद्यवक्त्रे च दीपं घोरानने स्मृतम् ।। ३८९ ।।
नैवेद्यं पुरुषे चैव भावयेद्देशिकोत्तमः ।
पेयं लेह्यं च शुद्धान्नं पुरुषे गौडमोदनम् ।। ३९० ।।
अघोरे कृसरान्नं च वामे हारिद्रमोदनम् ।
मुद्गान्नं सद्यवक्त्रे तु कारयेत्तु विशेषतः ।। ३९१ ।।
बहुनाळघटं चैव जलमेकेन पूरितम् ।
समनाळं तृप्तितोयं पुरुषे च निवेदयेत् ।। ३९२ ।।
शुद्धान्नं पायसं मुद्गं गुडान्नं कृसरान्नकम् ।
हरिद्रान्नं तिलान्नं च घृतान्नं तु यवोदनम् ।। ३९३ ।।
दिनेदिने निवेद्यार्थं कल्पयेद्देशिकोत्तमः ।
नैवेद्यं पुरतो न्यस्त्वा चतुस्संस्कारसंस्कृतम् ।। ३९४ ।।
कृत्वा सुरभिमुद्रां च अन्नमुद्रां प्रदर्शयेत् ।
परिषेचनं ततः कृत्वा मेरुमुद्रां प्रदर्शयेत् ।। ३९५ ।।
दधिमुद्रां क्षीरमुद्रां घृतमुद्रां तथैव च ।
माक्षिकाख्यं च मुद्रां च मुष्टिमुद्रां प्रदर्शयेत् ।। ३९६ ।।
द्रव्याभावे तु नैवेद्ये दर्शयेद्द्रव्यमुद्रिकाम् ।
अन्नस्योष्णोपशान्त्यर्थं शङ्खमुद्रां प्रदर्शयेत् ।। ३९७ ।।

पूजाकाले तु नैवेद्यं सर्वलोकस्य शान्तये ।
दापयेद्विधिनाऽनेनाऽप्यहमस्मीति मन्त्रतः ॥ ३९८ ॥
तदाभावे च नैवेद्ये लोकस्थान् भक्षयेद्धरम् ।
तस्मात्सर्वप्रयत्नेनाप्यर्चनान्ते निवेदयेत् ॥ ३९९ ॥
पञ्चवक्त्रेषु नैवेद्यं दद्याद्वरदमुद्रया ।
अथवाऽप्यूर्ध्ववक्त्रे च नैवेद्यमपि कारयेत् ॥ ४०० ॥
हविःप्रदानकाले तु दत्वाचा चमनीयकम् ।
पाययेस्वेति पञ्चानामास्ये तर्पणमाचरेत् ॥ ४०१ ॥
तत्परं लिङ्गनैवेद्यं सप्तपञ्चत्रिवारकम् ।
अथवाऽप्येकवारं वा नैवेद्यं दापयेत्क्रमात् ॥ ४०२ ॥
आचार्यहस्तमुद्धृत्य गौरीहस्ते निवेदयेत् ।
गौरीहस्तं समुद्धृत्य शिवहस्ते निवेदयेत् ॥ ४०३ ॥
गौरीहस्तं समुद्धृत्य पुत्रोच्छिष्टं तु .... ।
तस्माच्छिवस्य नैवेद्यं भक्तानां तु निवेदयेत् ॥ ४०४ ॥
जलेनाचमनं दत्वा दिग्बन्धं च ततः कूरु।
पनराचमनं दत्वा चण्डेशाय निवेदयेत् ॥ ४०५ ॥
द्वारस्य दक्षिणे पार्श्वे नन्दिने बलिमाचरेत् ।
महाकाळाय वामे तु वृषभाय तदग्रतः ॥ ४०६ ॥
ताम्बूलं दापयेत्पश्चात् सद्येन तु विशेषतः ।
परिवारबलिं दत्वा नित्याग्निं कारयेद्बुधः ॥ ४०७ ॥
सर्वलोकहितार्थं तु नित्योत्सवमतःपरम् ।
नीराजनं ततः कुर्यात् पुष्पार्घ्ये पात्रके क्षिपेत् ॥ ४०८ ॥
तन्मध्यमे यजेदस्त्रं गन्धपुष्पादिभिर्बुधः ।
अघोरेण तथा तिस्रो भ्रामयेल्लिङ्गमूर्धनि ॥ ४०९ ॥
जलेन निक्षिपेदर्घ्यं हृदा सम्प्रोक्षयेच्छिवम् ।
दर्शयेल्लिङ्गमुद्रां तु मन्त्रेण नयनेन वा ॥ ४१० ॥
सौख्यं कुर्यात्तदन्ते तु शास्त्रदृष्टेन कर्मणा ।
अर्चना नवधा सम्यक् पूजयेत्तु विशेषतः ॥ ४११ ॥

दीपाद्यन्तं निवेद्यान्तं बल्यन्तं कन्यसत्रयम् ।
होमान्तमुत्सवान्तं तु स्तोत्रान्तं मध्यमत्रयम् ॥ ४१२ ॥
सौख्यान्तं चुळिकोदान्तं प्राणाग्निहोत्रमेव च ।
उत्तमत्रयमाख्यातं सा पूजा फलदायका ॥ ४१३ ॥
दीपान्तमर्चनं प्रोक्तं निवेद्यान्तं तु पूजनम् ।
बल्यन्तं शान्तिदं प्रोक्तं फलं वै कन्यसत्रयम् ॥ ४१४ ॥
होमान्तं विजयं प्रोक्तमुत्सवान्तं तु शान्तिकम् ।
स्तोत्रान्तं पौष्टिकं प्रोक्तं फलं वै मध्यमत्रयम् ॥ ४१५ ॥
सौख्यान्तमुत्तमं विद्धि चुळुकान्तं श्रियावहम् ।
प्राणाग्निहोत्रं सफलं त्रिविधं परिभाषते ॥ ४१६ ॥
साङ्गोपाङ्गं च प्रत्यङ्गं पूजयेत् त्रिविधं स्मृतम् ।
स्नानतोयं च पाद्यं च तथा चाचमनीयकम् ॥४१७ ॥
वस्त्रमाभरणं चैव सुगन्धं लेपनं तथा ।
अर्घ्यं च मन्त्रपुष्पं च साङ्गं चेति प्रकीर्तितम् ॥ ४१८ ॥
उपाङ्गं धूपदीपं स्यात् सायरक्षा तु भस्मना ।
छत्रचामरकं चैव दर्पणं दर्शयेत्ततः ॥ ४१९ ॥
नृत्तगेयसमायुक्तमुपाङ्गं चेति कीर्तितम् ।
नैवेद्यं बलिदानं च होमं नित्योत्सवं तथा ॥ ४२० ॥
चुळिकोदं च प्रत्यङ्गं त्रिविधं समुदाहृतम् ।
पाद्यं पादतले न्यस्त्वा आचमनं तु हस्तयोः ॥ ४२१ ॥
आर्घ्यं शिरसि विन्यस्य गन्धं कायानुलेपनम् ।
पुष्पं मूर्धनि विन्यस्य धूपं नासापुटद्वये ॥ ४२२ ॥
दीपं नेत्रेषु विन्यस्याऽप्यन्नादिं विन्यसेत्करे ।
गन्धतैलं तथाऽभ्यङ्गं गव्यपञ्चामृतं फलम् ॥ ४२३ ॥
गन्धोदकं च काषायं वस्त्रमाभरणम् तथा ।
पाद्यमाचमनं चार्घ्यं गन्धपुष्पं च धूपकम् ॥ ४२४ ॥
दीपाधारं च दीपं च हविश्चैवोपदंशकम् ।
ताम्बूलं मुखवासं च नीराजनं च दर्शनम् ॥ ४२५ ॥

चामरं तालवृन्तं च छत्रं वै पादुकं तथा ।
स्वर्णपात्रं चरुस्थालीमुदभाण्डं च वर्धनीम् ॥ ४२६ ॥
शङ्खपात्राणि पत्राणि स्नपनार्थघटं तथा ।
जलद्रोणीं च घण्टां च त्रिपादीं शोधयेद्बुदा ॥ ४२७ ॥
तत्तद्द्रव्याणि पात्राणि प्रत्यहं शोधयेद्बुधः ।
आवाहनं तु प्रथमं स्थापनं तु द्वितीयकम् ॥ ४२८ ॥
तृतीयं पाद्यतोयं स्यादाचमनं चतुर्थकम् ।
पञ्चमं चार्घ्यविन्यासं षष्ठं चैवाभिषेचनम् ॥ ४२९ ॥
सप्तमं वस्त्रगन्धं चाप्यष्टमं पुष्पपूजनम् ।
नवमं धूपदीपं स्याद्दशमं तु निवेद्यकम् ॥ ४३० ॥
एकादशं बलिं कुर्यात् द्वादशं होमकर्म च ।
त्रयोदशं श्रीबलिं च गेयवाद्यं चतुर्दशम् ॥ ४३१ ॥
नृत्तं पञ्चदशं चैवाप्युद्वासनं तु षोडश ।
आवाहनं स्थापनं च गन्धपुष्पं च धूपकम् ॥ ४३२ ॥
दीपं नैवेद्यमेवं चाऽचमनं च विसर्जनम् ।
दशोपचारं विज्ञेयं सर्वकर्मार्थसाधनम् ॥ ४३३ ॥
पाद्यमाचमनं चार्घ्यं स्नानवस्त्रविलेपनम् ।
पुष्पं च धूपदीपं च नैवेद्यं च ततःपरम् ॥ ४३४ ॥
मुद्राबन्धनमस्कारं मन्त्राणां जपमेव च ।
एवं द्वादशभेदं स्यादुपचारं प्रजापते ॥ ४३५ ॥
आवाहनासनं तस्य द्वादशं मात्रमुच्यते ।
पाद्यं तु पञ्चमात्रं स्यात् त्रिमात्रमाचमनीयकम् ॥ ४३६ ॥
एकमात्रं भवेदर्घ्यं षाण्मात्रं गन्धलेपनम् ।
पुष्पं द्वादशमात्रं स्यात् धूपं पञ्चदशं भवेत् ॥ ४३७ ॥
दीपं तु दशमं मात्रं नीराजनं तु षोडशम् ।
भस्मानि दापयेत्पश्चात् सप्तमात्रं तु कारयेत् ॥ ४३८ ॥
नीराजनं त्रिमात्रं स्यात् चामरं द्वादशं भवेत् ।
छत्रं तु पञ्चमात्रं स्यात् मुनिमात्रं तु दर्पणम् ॥ ४३९ ॥

चलुकोदं त्रिमात्रं स्यात् नैवेद्यं दशपञ्चकम् ।
बलिदानं तथा कुर्यात् मात्रालक्षणमुच्यते ।। ४४० ।।
घण्टां तु वामहस्तेन देशिकस्ताडयेत्क्रमात् ।
गन्धहीने भयोत्पत्तिः पुष्पहीने तु सङ्कटम् ।। ४४१ ।।
धूपहीने ध्रुवं रोगं दीपहीने धनक्षयम् ।
नैवेद्यहीने दुर्भिक्षमग्निहीने तु सङ्कटम् ।। ४४२ ।।
बलिहीने ग्रामनाशं नृत्तहीने तु दुःखदम् ।
मन्त्रहीने तु मरणं क्रियहीने तु व्याधयः ।। ४४३ ।।
सावश्यं धूपदीपस्स्यात् सौभाग्यं हविषान्तकम् ।
बल्यन्तं शान्तिकं प्रोक्तं नृत्तान्तं पौष्टिकं तथा ।। ४४४ ।।
सावश्यं तु त्रिपादान्तं सौभाग्यं पञ्चनाडिका ।
सौख्यं धामान्तकं प्रोक्तं पादमेकादशं भवेत् ।। ४४५ ।।
शान्तिके पौष्टिके चैव नाडिकाक्रममुच्यते ।
दशोपचारदीपान्तं हविष्यान्तं तु षोडशम् ।। ४४६ ।।
बल्यन्तं पञ्चविंशच्च षट्त्रिंशत्ताण्डवान्तकम् ।
मन्त्रहीनं क्रियाहीनं द्रव्यहीनं तु यत्कृतम् ।। ४४७ ।।
तत्सर्वं कृपया देव क्षमस्व परमेश्वर ।
घटिके द्वे भवेत् स्नानं घटिकैकार्चनं भवेत् ।। ४४८ ।।
घटिकार्धं तु नैवेद्यं बलिदानं तु तत्समम् ।
नित्याग्निकार्यमर्धं तु नित्योत्सवं त्रिनाडिका ।। ४४९ ।।
स्तोत्रसङ्गीतनृत्तेषु सप्तार्धं चुळुकोदकम् ।
पश्चिमद्वारहर्म्ये तु किञ्चिद्भेदं शिवार्चने ।। ४५० ।।
उपचाराणि सर्वाणि सद्यवक्त्रे प्रदापयेत् ।
आसनावरणादीनि पूर्ववत्परिकल्पयेत् ।। ४५१ ।।
शिवमन्त्रं जपेत्पश्चाद्यथाशक्ति विशेषतः ।
प्रदक्षिणनमस्कारमात्मनोऽर्पणमेव च ।।४५२ ।।

पूजाफलं च तत्सर्वमुदकेन प्रदापयेत् ।
अञ्जलिं दक्षिणं हस्तं कुञ्चितं चतुरङ्गुलम् ॥ ४५३ ॥
पुष्पवारि ग्रहीत्वाऽथ पादमूले प्रदापयेत् ।
चुळुकोदमिति ख्यातं पूजयेत्तु प्रजापते ॥ ४५४ ॥
संहितां च ततः पूज्य गन्धपुष्पादिभिर्बुधः ।
एवं क्रमेण विधिवत् यजनं चोत्तमं भवेत् ॥ ४५५ ॥
हविष्यान्तमशक्तश्चेद्दीपान्तं वापि पूजयेत् ।
एवं यः कुरुते नित्यं स पुण्यां गतिमाप्नुयात् ॥ ४५६ ॥
पूर्वसन्ध्यार्चितं पुष्पं ईशानेन विसर्जयेत् ।
कनिष्ठानामिकामध्ये नवपुष्पविनिर्गतम् ॥ ४५७ ॥
अङ्गुष्ठतर्जनीभ्यां तु पर्युषितं विसर्जयेत् ।
विसर्जने तु तत्काले पुष्पं मूर्ध्नि निधापयेत् ॥ ४५८ ॥
पूजापर्युषितं सर्वं चण्डेशाय प्रदापयेत् ।
क्षाळयेल्लिङ्गमस्त्रेण दक्षपाणितलेन वै ॥ ४५९ ॥
पीठं पाशुपतेनैव क्षाळयेत् परितः क्रमात् ।
लिङ्गशुद्धिर्भवेदेवं; मन्त्रशुद्धिं ततश्शृणु ॥ ४६० ॥
ओङ्कारादिनमोन्ताश्च मन्त्रास्सर्वे विशेषतः ।
यजने तु प्रयोक्तव्या मन्त्रशुद्धिरुदाहृता ॥ ४६१ ॥
यो वेत्ति पञ्चशुद्धिं च स पूजां कर्तुमर्हति ।
यजनेऽर्केन्दुसञ्चारे निष्फलं च तथाऽऽप्नुयात् ॥ ४६२ ॥
चन्द्रार्कनाशयजनं सर्वसिद्धिकरं शुभम् ।
सङ्क्रान्ते विषुवे पूजा न कर्तव्या कदाचन ॥ ४६३ ॥
अग्ने वा निर्ऋतौ वापि स्थित्वा देवं प्रपूजयेत् ।
आसनं कल्पयेदत्र शास्त्रदृष्टेन कर्मणा ॥ ४६४ ॥
आधारमासनं प्रोक्तमाधेयः परमश्शिवः ।
नादं लिङ्गमिति प्रोक्तं बिन्दुपीठमिति स्मृतम् ॥ ४६५ ॥

न शिवेन विना शक्तिर्न शक्तिरहितश्शिवः ।
पुष्पेषु गन्धवत् ज्ञेया तिलेषु तैलवत्तथा ।। ४६६ ।।
देहे च प्राणवच्छक्तिं तस्माद्युक्तं प्रपूजयेत् ।
शक्तिरेवासनं प्रोक्तं पञ्चनन्दादयः क्रमात् ।। ४६७ ।।
पार्थिवाण्डमधः स्कन्द नाळं वात्यन्त मेव च ।
ततो नन्दासनं पूर्वं सिंहासनद्वितीयकम् ।। ४६८ ।।
योगासनं तृतीयं तु तुर्यं पद्मासनं भवेत् ।
पञ्चमं विमलाख्यं तु पञ्चभूतादिकास्त्विमे ।। ४६९ ।।
वृत्ताकारमनन्तं तु सूर्यकोटिप्रभावृतम् ।
अधस्तात् कल्पयेदूर्ध्वे सिंहासनं प्रकल्पयेत् ।। ४७० ।।
धर्मज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम् ।
शुक्लाभं पद्मरागं च हैमं मरकतप्रभम् ।। ४७१ ।।
धर्मादीनां तु वर्णं स्यादाग्नेयादिक्रमेण तु ।
पादाश्चतुष्ककोणेषु सिंहरूपेण कल्पयेत् ।। ४७२ ।।
दंष्ट्राकराळवदना त्रिनेत्रा भीमरूपिणी ।
कोटिसिंहैर्विशेषेण प्रत्येकं परिवारका ।। ४७३ ।।
अधर्माज्ञानवैराग्या अनैश्वर्यस्तथैशिका ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रेनित्यार्चनाविधिपटलः त्रिंशत्तमः समाप्तः

अथ अर्चनाङ्गविधिपटलप्रारम्भः

अर्चनाङ्गविधिं वक्ष्ये सन्ध्यालक्षणपूर्वकम् ।
कालश्च द्विविधो ज्ञेयः स्थूलसूक्ष्मोपलक्षितः ।। १ ।।
स्थूलश्च लौकिको ज्ञेयस्सूक्ष्मश्चाध्यात्मकस्स्मृतः ।
सर्वं स्थूलेन कर्तव्यं तत्कालं प्रोच्यतेऽधुना ।। २ ।।
स्वस्थं नराक्षिनिमिषं चतुर्भागं क्षणं स्मृतम् ।
तद्द्वयं तु लयं प्रोक्तं निमिषं तद्द्वयं भवेत् ।। ३ ।।
निमिषैश्च त्रिभिः काष्ठा तिथिकाष्ठाः कला स्मृता ।
त्रिंशत्कला मुहूर्तं च तदेव घटिकाद्वयम् ।। ४ ।।
सार्धेन नाडिकाः सप्त यामं तत्सन्धिरुच्यते ।
सन्धिरष्टौ समाख्याता त्वहोरात्रं प्रजापते ।। ५ ।।
यजनं प्रतियामं तु उत्तमं त्विति कीर्तितम् ।
उदये चैव मध्याह्ने प्रदोषे चार्धयामके ।। ६ ।।
यजनं मध्यमं मध्ये उदयेऽस्तमयेधमम् ।
परार्धेष्वेषु कालेषु पूजयेत्तु विशेषतः ।। ७ ।।
द्विकालमेककालं वा आत्मार्थयजनं स्मृतम् ।
द्वारपूजादिबल्यन्तं यावत्सन्ध्याबलिं कुरु ।। ८ ।।
ब्रह्मप्रीतिकरं पौष्टि द्विजानां प्रथमार्चनम् ।
शिवप्रीतिकरं राज्ञां द्वितीयार्चा च शान्तिदा ।। ९ ।।
रक्षाकरी च वैश्यानां तृतीयार्चा शुभप्रदा ।
शूद्राणां कामदं चैव गौरीप्रियतमं सुखम् ।। १० ।।
अर्धरात्रे विशेषेणाऽप्यर्चनं तु विधीयते ।
सन्ध्यातिक्रमणाद्दोषः कृतं चेत्तु न दोषभाक् ।। ११ ।।
पूर्वाह्णे चैव मध्याह्ने प्रदोषे बलिमाचरेत् ।
अन्यासु सर्वसन्ध्यासु नाचरेत्तु बलिक्रमम् ।। १२ ।।

अर्थयामे बलिं कुर्यात् काम्यार्थी च विधानतः ।
नित्योत्सवेन युक्तं चेत् तस्मिन् संवत्सरोत्सवम् ॥ १३ ॥
शास्त्रातिक्रमणे नैव पूजा वृद्धीर्नियच्छति ।
कारयेत्तद्विधानेनाऽप्यन्यथा च न कारयेत् ॥ १४ ॥
भास्करोदयमारभ्य यावत्तु दशनाडिका ।
प्रातःकालमिति प्रोक्तं पूर्वाह्णमिति कीर्तितम् ॥ १५ ॥
तत्कालं तु समारभ्य यावत्तु दशनाडिका ।
मध्याह्नमितिविज्ञेयं सायङ्कालमथोच्यते ॥ १६ ॥
मध्याह्नं तु समारभ्याप्याभूतदशनाडिका ।
सायङ्कालमिति प्रोक्तं प्रदोषमधुना शृणु ॥ १७ ॥
भास्करास्तमानात्पश्चात्सार्धेन सप्तनाडिका ।
प्रदोषमिति विख्यातमर्धयामं ततश्शृणु ॥ १८ ॥
प्रदोषान्तं समारभ्य त्रिपादेन त्रिनाडिका ।
अर्धयाममिति प्रोक्तं मध्यरात्रमिहोच्यते ॥ १९ ॥
अर्धयामं समारभ्य यावत्तु दशनाडिकाः ।
मध्यरात्रमिति प्रोक्तं रात्रान्तकमथोच्यते ॥ २० ॥
भास्करस्योदयात्पूर्वे त्रिपादेन त्रिनाडिका ।
रात्रान्तकमिति प्रोक्तं ज्ञात्वैवं सर्वमाचरेत् ॥ २१ ॥
जलसङ्ग्रहणं पुष्पसङ्ग्रहणं यजनं तथा ।
उदयादेव कर्तव्यं रात्रान्ते वा जलं ग्रहेत् ॥ २२ ॥
वर्णगन्धरसैर्जुष्टं क्रिमिकेशादिसंयुतम् ।
तद्वारि वर्जयेत्तत्र दूषितं पल्वलोदकम् ॥ २३ ॥
अशुचिस्थानसंयुक्तं सूर्यरश्मिविवर्जितम् ।
वर्जयेत्तु प्रयत्नेन सङ्ग्रहेत्तु मनोरमम् ॥ २४ ॥

स्वयं पतितपुष्पाणि सञ्चितान्यपि वस्त्रके ।
हेरण्डपत्रकानीतं करानीतमथापि वा ।। ७४ ।।
आशुचिस्थानकानीतं रोगार्तापहृतान्यपि ।
एकाहोषितपुष्पाणि वर्जयेत्तु विशेषतः ।। ७५ ।।
आवाहने तदाऽर्घ्येषु पाद्ये स्नानेषु धूपके ।
विलेपने च नैवेद्ये विसर्गान्ते तथैव च ।। ७६ ।।
अष्टकालेषु पुष्पं तु दापयेत्तु यथोदितम् ।
अर्कपङ्कजबिल्वं च नन्द्यावर्तं च पाटली ।। ७७ ।।
करवीरं चम्पकं च नीलोत्पलमथाष्टकम् ।
पद्मं चैवार्कपुष्पं च नन्द्यावर्तं च पाटली ।। ७८ ।।
द्रोणपुष्पं च मन्दारं करवीरमथोत्पलम् ।
अष्टपुष्पमिति ख्यातं सर्वदेवात्मकं विदुः ।। ७९ ।।
करवीरद्वयं चैव नन्द्यावर्तं तथैव च ।
महाद्रोणं तथार्कश्च मल्लिका चम्पकं तथा ।। ८० ।।
नीलोत्पलं तथा श्रेष्ठमष्टपुष्पं सुयोजयेत् ।
मकुटे मूर्ध्नि कर्णे च हृदये नाभिगुह्यके ।। ८१ ।।
जानुपादद्वये चैव अष्टपुष्पं सुयोजयेत् ।
अर्कपुष्पं च बिल्वं चापामार्गकरवीरकम् ।। ८२ ।।
पङ्कजं नागनन्दी च नन्द्यावर्तं च मल्लिका ।
अष्टपुष्पं तथा वत्स! प्रातस्सन्ध्यासु पुष्पकम् ।। ८३ ।।
द्रोणपुष्पं तथा चैव मन्दारं शङ्खपुष्पकम् ।
श्वेतं पलाशधुत्तूरं व्याख्यातं व्याघ्रपुष्पकम् ।। ८४ ।।
शमी चैव तु मध्याह्नेऽप्यष्टपुष्पं सुयोजयेत् ।
अपराह्णार्चनापुष्पं भूमूलं चम्पकं तथा ।। ८५ ।।
वकुळं कृष्णवल्ली च मल्लिकाद्वयमेव च ।
जाती च छान्दसं युक्तं सायं चैवार्धयामके ।। ८६ ।।

पुष्पाऽभावे तु पत्रैश्च पत्राऽभावे तथैव च ।
सर्वबीजाङ्कुरैः पत्रैरर्चयेत्तु महादरात् ॥ ८७ ॥
पत्रच्छेदेन सम्पूज्य राक्षसानां तु नाशनम् ।
पुष्पच्छेदो न कर्तव्यः सर्वसम्पत्समृद्धये ॥ ८८ ॥
पुष्पलक्षणमाख्यातं श्रुणुधूपस्य लक्षणम् ।
चन्दनं चैव निर्यासं कुन्दुरूक्षं च कुङ्कुमम् ॥ ८९ ॥
मेघं च कृष्णलोहं च कर्पूरं च क्रमेण तु ।
सप्तषट्भूतवेदांश्च अग्न्यश्वन्यम्बरांशकान् ॥ ९० ॥
आहृत्य चूर्णयित्वा तु मधुना च परिप्लुतम् ।
एतच्छीतारिधूपं तु शिवप्रीतिकरं शुभम् ॥ ९१ ॥
कृष्णलोहं च निर्यासं चन्दनं च क्रमेण तु ।
व्योमपक्षाश्विनीभागमीषत्कर्पूरमिश्रितम् ॥ ९२ ॥
उत्तमं धूपमाख्यातं मधुना च परिप्लुतम् ।
चन्दनोशीरसंयुक्तं लघुयुक्तं मधुप्लुतम् ॥ ९३ ॥
भागं तु पूर्ववत्प्रोक्तं मध्यमं धूपमुच्यते ।
गग्गुलुं घृतसंयुक्तम्, अधमं धूपमुच्यते ॥ ९४ ॥
दीप्ताङ्गारकसंयुक्तं; घण्टां वामकरेण तु ।
धूपपात्रं समादाय दापयेद्विधिवद्बुधः ॥ ९५ ॥
कपिलाऽऽज्येन दीपं स्यात् सितरक्तासितासु वा ।
अजाघृतमलाभे तु शुद्धतैलेन वा पुनः ॥ ९६ ॥
कपिलाया घृतं श्रेष्ठम् अन्यासां मध्यमं भवेत् ।
अधमं स्यादजासर्पिः शुद्धतैलं तु कन्यसम् ॥ ९७ ॥
सात्विकं राजसं चैव तामसं च क्रमेण तु ।
कर्पूरावर्तितं दीपं दापयेत्सर्वसिद्धिदम् ॥ ९८ ॥
श्रेष्ठं युगाङ्गुलज्वाला मध्यमं तु गुणाङ्गुलम् ।
अधमं द्व्यङ्गुलज्ज्वाला दीपमेवं प्रकीर्तितम् ॥ ९९ ॥

वृक्षबीजोद्भवैः स्नेहै शिवदीपं तु वर्जयेत् ।
माहिष्येन घृतेनैव शिवदीपं न कारयेत् ।। १०० ।।
हीनवित्ते तथा श्रेष्ठं निर्गन्धं वा सुगन्धयुक् ।
पूर्वसन्धिषु गान्धारं माळवं च ततःपरम् ।। १०१ ।।
मध्याह्ने तर्करागं स्यात् कौशिकं च ततःपरम् ।
सायाह्ने चैन्दळं प्रोक्तमर्धरात्रे तु पञ्चमम् ।। १०२ ।।
भरतोक्तं तथा नृत्तं सन्ध्यायां प्रतिकारयेत् ।
एलालवङ्गकर्पूरं जातितक्कोलचूर्णकम् ।। १०३ ।।
मधुषट्खण्डसम्मिश्रं मुखवासमिहोच्यते ।
पनसो नारिकेळं च मातुलुङ्गद्वयं तथा ।। १०४ ।।
नारङ्गद्वयरम्भाम्रलिकुचं तिन्त्रिणीफलम् ।
फलोदकमिति प्रोक्तं, गन्धोदकं ततश्शृणु ।। १०५ ।।
चन्दनं चैव कुष्ठं च तक्कोलं चैव कुङ्कुमम् ।
कर्पूरं पिप्पला चैला कस्तूरी चागरुं तथा ।। १०६ ।।
लवङ्गं च तथोशीरं चम्पकं चैव मौकुळम् ।
इत्थं गन्धोदकं प्रोक्तं; पुष्पोदकविधिं शृणु ।। १०७ ।।
कुसुमं च स्वकारं च मल्लिका चैव पाटली ।
केतकी करवीरं च पुन्नागं कुन्दपुष्पकम् ।। १०८ ।।
नन्द्यावर्तं श्रियानर्तं मन्दारं करवीरकम् ।
जातिनीलोत्पलं पद्मं हरिबेरादिमिश्रितम् ।। १०९ ।।
इत्थं पुष्पोदकं प्रोक्तं पत्रोदकं ततश्शृणु ।
गोक्षुरा सहदेवी च विष्णुक्रान्ति कृताञ्जली ।। ११० ।।
शिरीषेन्दीवरं रौद्रीरेभिर्मार्जनमुच्यते ।
दूर्वाङ्कुरं च पद्मं च कुशाग्रं गौरसर्षपम् ।। १११ ।।
भद्राकृताञ्जलीयुक्तं परिमार्जनमुच्यते ।
तुलसी बिल्वपत्रं च तमालं च तपस्विनी ।। ११२ ।।

अपामार्गं शमीयुक्तं पत्रतोयमिहोच्यते ।
पलाशोदुम्बराश्वत्थमधूकं प्लक्षपाटली ।। ११३ ।।
जम्बूत्वग्भिस्समायुक्तं कषायोदकमुच्यते ।
पर्वते च नदीतीरे वल्मीके कर्कटावटे ।। ११४ ।।
वृषशृङ्गे च सुक्षेत्रे समुद्रे गजदन्तके ।
अष्टमृद्भिस्समायुक्तं मृदम्भः परिकीर्तितम् ।। ११५ ।।
यवनीवारमुद्गं च सिद्धार्थं गुडव्रीहिणी ।
सुगन्धं हैमशालिं तु बीजोदकमिदं शुभम् ।। ११६ ।।
आवाहनार्घ्यपाद्येषु स्नाने चाचमने तथा ।
नैवेद्ये च विसर्गान्ते वारि सप्तसु योजयेत् ।। ११७ ।।
माणिक्यं चेन्द्रनीलं च वैडूर्यं च प्रवाळकम् ।
मुक्तावज्रं ततः पुष्यरागं स्फटिकखण्डकम् ।। ११८ ।।
रत्नं मरतकं चैव नव तत्रादिपञ्चकम् ।
पञ्चरत्नमिति ज्ञेयमाद्याभावे द्वितीयकम् ।। ११९ ।।
रत्नोदकमिति प्रोक्तं लोहोदकमतः परम् ।
स्वर्णं रजत ताम्रं वा आयसं त्रपुसीसकम् ।। १२० ।।
आरकूटं ततः कांस्ययुक्तं लोहोदकं स्मृतम् ।
सौराष्ट्रमञ्जनं श्यामा हरितालं मनश्शिला ।। १२१ ।।
गैरिका रोचना चान्ते धातूदकमिति स्मृतम् ।
शूलं कपालहरिणी पिनाकं परशुस्तथा ।। १२२ ।।
पाशाक्षमालं हेमाश्च तैरेवास्त्रोदकं भवेत् ।
उशीरो हरिबेरं च विपरी पुष्कर स्तथा ।। १२३ ।।
श्रीकण्ठश्चेति पञ्चैतैर्युक्तं मूलोदकं स्मृतम् ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिःकुशोदकम् ।। १२४ ।।
एभिःद्रव्यैस्समायुक्तं ब्रह्मकूर्चमिति स्मृतम् ।
कुशकाशास्तथा दूर्वा व्रीहयो मौञ्जयस्तथा ।। १२५ ।।

विश्वामित्रयवाश्चैव सप्तदर्भाः प्रकीर्तिताः ।
कूर्चं कृत्वा तु सर्वेषां कुशोदकमितिस्मृतम् ॥ १२६ ॥
ओदनेनाभिषेकं तु आयुरारोग्यवर्धनम् ।
अन्नं प्राणात्मकं श्रेष्ठं सर्वजन्तुप्रतिष्ठितम् ॥ १२७ ॥
तस्मादन्नाभिषेकं तु मम प्रीतिप्रदायकम् ।
अन्नरूपं विशेषेण मम रूपं द्विधा स्मृतम् ॥ १२८ ॥
अन्नपूजा परं श्रेष्ठं न भूतं न भविष्यति ।
तस्मात्सर्वप्रयत्नेनाऽप्यन्नैरन्नाभिषेचनम् ॥ १२९ ॥
अन्नपूजाविधिः प्रोक्तमुदकादभिषेचनम् ।
पूर्ववत्संस्कृतं तोयं हेमपात्रे सुपूरितम् ॥ १३० ॥
अथवा रजते वापि ताम्रे वा यज्ञवृक्षके ।
तज्जलस्य तु मध्यस्थं स्थापयेद्दक्षिणेश्वरम् ॥ १३१ ॥
दूर्वा तिलाक्षतं पुष्पं महेशाय प्रदापयेत् ।
गन्धपुष्पं च धूपं च दीपं चैव निवेदयेत् ॥ १३२ ॥
सजलं सफलं साज्यं गुडान्नं च निवेदयेत् ।
जलपूजार्चनं नित्यं राजराष्ट्राभिवृद्धिदम् ॥ १३३ ॥
जलार्चनं जपाद्गुह्यं स्थितिकारं सुशोभनम् ।
सर्वसिद्धिकरं शुद्धं सर्वरोगविनाशनम् ॥ १३४ ॥
त्रियम्बकमुमारुद्रामापोहिष्ठेतिमन्त्रकम् ।
उमारुद्रायकद्रुद्रमीळेशञ्जुहुयोदकम् ॥ १३५ ॥
श्रीरुद्रं चमकं चैव त्र्यक्षरं पञ्चशान्तिकम् ।
हिरण्यं पुरुषसूक्तं च जातवेदं त्र्यक्षरम् ॥ १३६ ॥
पृथक् पृथक् सकृज्जप्त्वा अभिषेकं शनैश्शनैः ।
जलार्चनमिदं प्रोक्तं सर्वशान्तिकरं शुभम् ॥ १३७ ॥
चण्डरुद्रो महामेढ्रो विबुधो पिङ्गळोत्तमः ।
विश्वरूपो विशालाक्षो भूतेशश्चाखुवाहनः ॥ १३८ ॥

एतद्विमानबालांश्च पूर्वादीनि क्रमान्न्यसेत् ।
वृक्षस्य मूलसेचेन यथाशाखोपशाखिनी ।। १३९ ।।
तथा शास्त्रोक्तमार्गेण सृष्टिस्थितिविधानतः ।
आसनं पूर्वमुद्दिष्टमावाहनमनन्तरम् ।। १४० ।।
तृतीयं स्थापनं प्रोक्तं चतुर्थं सन्निधानकम् ।
पञ्चमं सन्निरोधं च षष्ठं स्यात् पाद्यमेव च ।। १४१ ।।
सप्तमं स्यादाचमनमर्घ्यमष्टममुच्यते ।
नवमं स्नानकर्म स्याद्दशमं वस्त्रवेष्टनम् ।। १४२ ।।
एकादशं तु गन्धं स्याद्द्वादशं त्वङ्गभूषणम् ।
त्रयोदशं तु पुष्पं स्याद्धूपदीपं चतुर्दशम् ।। १४३ ।।
नैवेद्यं पञ्चदशकं षोडशं बलिरेव च ।
अग्निकार्यं सप्तदशं गेयमष्टादशं भवेत् ।। १४४ ।।
एकोनविंशतिं विद्यां नित्योत्सवविधिं परम् ।
पादुकाराधनं विंशदेकविंशत् प्रदक्षिणम् ।। १४५ ।।
द्वाविंशिति नमस्कारं त्रयोविंशत् जपं भवेत् ।
चुळुकोदं चतुर्विंशदुपचाराः प्रकीर्तिताः ।। १४६ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे अर्चनाङ्गविधिपटलः एकत्रिंशत्तमःसमाप्तः

अथ सायरक्षाविधिपटलप्रारम्भः

सायरक्षाविधिं वक्ष्ये सर्वप्राणिहितावहम् ।
सर्वरोगनिवृत्यर्थं सर्वदा सस्यवर्धनम् ॥ १ ॥
लोकस्य नयनोच्छिष्टं निवृत्यर्थं प्रदोषके ।
कर्तव्या सायरक्षा तु पूजाद्रव्यसमन्वितम् ॥ २ ॥
लिङ्गे चोत्सवबेरे वा नटेशोत्सवयेत् सुधीः ।
सायङ्कालेऽर्चयेदेनं देवस्यावरणेन च ॥ ३ ॥
परिवारं न कर्तव्यमर्चयेत्तु चतुर्मुखम् ।
रवेरस्तमयात्पूर्वे सायरक्षा त्रिनाडिका ॥ ४ ॥
दीपार्चनाऽर्धनाडी च लम्बपूर्वा त्रिपादकम् ।
दीपोपचारार्धनाडी मद्दळं चैव ताळकम् ॥ ५ ॥
गीतं च शुद्धनृत्तं च एकनाडी प्रशस्यते ।
परिवेषं पदानाडी सायरक्षाविधिक्रमम् ॥ ६ ॥
महाप्रदोषे सम्प्राप्ते पूजा सर्वं त्रिनाडिका ।
त्रिपादे सायरक्षां तु दिवान्ते तु प्रजापते ॥ ७ ॥
मण्टपस्यैशदिग्भागे मण्टपं चतुरश्रकम् ।
कृत्वा तु भूतपात्राणि सङ्गृह्याऽत्रैव विन्यसेत् ॥ ८ ॥
सौवर्णं राजतं ताम्रं मृन्मयं कांस्यमेव च ।
विंशत्यङ्गुलविस्तारम् ओष्ठमेकाङ्गुलं भवेत् ॥ ९ ॥
प्रोक्षयेत्पुरुषेणैव धेनुमुद्रां प्रदर्शयेत् ।
दीपाधारं ततः कुर्यात् शालिपिष्टमयेन तु ॥ १० ॥
चतुरङ्गुलविस्तारमुत्सेधं चाङ्गुलं भवेत् ।
ओष्ठमर्धाङ्गुलं प्रोक्तं पूर्णचन्द्रवदाकृतिः ॥ ११ ॥

पञ्चदीपसमायुक्तमथवा चैकदीपकम् ।
तन्मध्ये निक्षिपेद्दीपं गोघृतेन समायुतम् ॥ १२ ॥
विन्यसेद्दीपमेकं तु तिलमेकं तु निक्षिपेत् ।
सर्षपं चैकपात्रे तु राजिकालवणं तथा ॥ १३ ॥
कार्पासबीजमेकं तु निक्षिपेद्धृदयेन तु ।
दीपं सम्पूज्य विधिवदग्निबीजेन बुद्धिमान् ॥ १४ ॥
शङ्खदुन्दुभिनिर्घोषैः ततो मङ्गळवाचकैः ।
स्तोत्रध्वनिसमायुक्तं वेदध्वनिसमन्वितम् ॥ १५ ॥
पाद्यं दद्यात्पुरास्त्रेण नेत्रेणाचमनं ददेत् ।
द्रव्याण्यथ क्रमेणैवाप्यावृत्यावृतलिङ्गके ॥ १६ ॥
दीपेनैव त्रिधा भ्राम्य शिखामन्त्रेण बुद्धिमान् ।
नीराजनं तु कर्तव्यं क्रमेण देशिकोत्तमः ॥ १७ ॥
भस्मानि दापयेच्छम्भोर्दिग्बन्धं चास्त्रमन्त्रतः ।
ललाटनयनस्योर्ध्वे रक्षया किं प्रयोजनम् ॥ १८ ॥
सर्वद्रव्यं हुतंवह्निःन दोषाय प्रकल्पयेत् ।
ललाटनयनस्योर्ध्वे उष्णीषं पट्टबन्धके ॥ १९ ॥
वर्तुलं चोर्ध्ववक्त्रे च त्रिपुण्ड्रं पूर्ववक्त्रके ।
त्रिशूलं दक्षिणे वक्त्रे पश्चिमे चतुरश्रकम् ॥ २० ॥
उत्तरे दीपमेवं तु सर्वाङ्गोद्धूळनं कुरु ।
मूर्ध्नि चैव ललाटे च कर्णे च हृदये तथा ॥ २१ ॥
बाहुद्वयौ च नाभौ च पादद्वयौ च वादयेत् ।
गङ्गाचन्द्रमपस्मारं नागकूर्मं तु दापयेत् ॥ २२ ॥
सर्वाङ्गं लेपयित्वा तु बृहत्सामेति मन्त्रतः ।
दर्पणं दर्शयेदन्ते तदन्ते छत्रदर्शनम् ॥ २३ ॥

तदंन्ते चामरं चैव तदन्ते व्यजनं तथा ।
व्यजनं चाष्टपुष्पं च स्तोत्रश्चैव निवेदयेत् ।। २४ ।।
अथवा द्रव्यवर्जं तु दीपमेकं प्रयोजयेत् ।
तद्भस्म च समादाय स्वल्पं चण्डेश्वरस्य तु ।। २५ ।।
ततो भक्तजनेभ्यश्च दद्यात् देशिकपूर्वकम् ।
रात्रौ च परिवेषे तु कर्तव्यं बिम्बकेऽग्रतः ।। २६ ।।
दीपकाले न कर्तव्यं कर्तव्यं बिम्बनाशकृत् ।
वाहयित्वा तु नारीभिः प्रात्राणि भूसुरैस्तु वा ।। २७ ।।
सर्वालङ्कारसंयुक्तं सर्वातोद्यसमन्वितम् ।
आलयं तु परिभ्रम्य परिवेषक्रमेण तु ।। २८ ।।
पीठाग्रे वा ध्वजाग्रे वा प्राकाराणां तु बाह्यके ।
निक्षिपेत्तत्र दीपं तु तिलं चैव तु सर्षपम् ।। २९ ।।
राजिकालवणं चैव कार्पासबीजसंयुतम् ।
दीपाग्निना दहेत्तत्राऽप्यग्निबीजेन बुद्धिमान् ।। ३० ।।
लोकोत्पत्तिस्थितिकरं सर्वसम्पत्करं वरम् ।
पादप्रक्षाळनं कृत्वा प्राविशेदायलं प्रति ।। ३१ ।।
नागदीपं समारभ्य घटदीपवशानकम् ।
दीपानाराधनं कुर्यात् नमस्सर्पादिमन्त्रतः ।। ३२ ।।
प्रथमे षोडशकला द्वितीये पक्षवासरः ।
रुद्रं तृतीये निर्दिष्टं चतुर्थे सप्तमातरः ।। ३३ ।।
निवृत्यादिकलापं च ततो मध्ये सरस्वती ।
प्रथमं लोकरक्षार्थं द्वितीयं ग्रामरक्षकम् ।। ३४ ।।
तृतीयं भूतरक्षार्थं त्रिवारं त्रिः प्रदक्षिणम् ।
प्रथमं दक्षिणे नेत्रे द्वितीयमपसव्यके ।। ३५ ।।

तृतीयं फा(भा)लदेशे तु गळे चैव चतुर्थकम् ।
पादादिमस्तकान्तं वा त्रिवारं भ्रामयेद्बुधः ।। ३६ ।।
मस्तके च ललाटे च कण्ठे वक्षसि पादयोः ।
प्रत्येकं प्रणवाकारं दीपं संवेदयेद्बुधः ।। ३७ ।।
नीराजनस्य पात्रे तु वृत्ते स्यात्सूर्यमण्डलम् ।
मध्ये च वह्निदैवत्यमारात्रिके तथैव च ।। ३८ ।।
नवदीपे नवशक्तिः सप्तदीपे च मातरः ।
पञ्चमे पञ्चभूतं स्यात्तत्त्वत्रयं त्रिदीपके ।। ३९ ।।
स्वाहा देव्येकदीपे च पूजयेत्तु स्वनामतः ।
पात्रेण दीपमादाय देवस्य शिरसोपरि ।। ४० ।।
परिभ्राम्य तथा मन्त्री शिखामन्त्रेण बुद्धिमान् ।
एवं यः कुरुते मर्त्यस्सोन्ते रुद्रपदं व्रजेत् ।। ४१ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे सायरक्षाविधिपटलो द्वात्रिंशत्तमः समाप्तः

अथ नैवेद्यविधानविधिपटलप्रारम्भः

शृणु वक्ष्येऽथ नैवेद्यविधानं तत्समासतः ।
आत्मनो हितमन्विच्छेत्तद्द्रव्यं प्राक्सुपक्ककम् ।। १ ।।
दापयेत्परमेशाय तद्द्रव्यं सर्वसिद्धिदम् ।
यद्भक्तं चेत्तदान्ने तु तद्द्रव्यं क्षीयते धनम् ।। २ ।।
हेमशाली महाशाली रक्तशाली तथैव च ।
सितशाली कृष्णशाली सौगन्धिकमथोत्तमम् ।। ३ ।।
वैणवं च यवं चैव ईषत्शाली च माधुरी ।
कुस्तुम्बुरी च नीवारं मध्यमं चेति कीर्तितम् ।। ४ ।।
विलाली सारिणी व्रीहिरीषत्कृष्णं च षष्टिकम् ।
तथा वै सूकरी व्रीहिः ह्रस्ववक्त्री च कन्यसः ।। ५ ।।
एतेषां तण्डुलं श्रेष्ठं नैवेद्याय शिवस्य तु ।
निधाय भूतले शुद्धे सन्तप्तं रविरश्मिना ।। ६ ।।
चातुर्वर्णोद्भवस्त्रीभिः सम्यगभ्युक्ष्य लूखले ।
प्रहत्य मुसलेनैव कणकम्बूश्च वर्जयेत् ।। ७ ।।
द्विशतैः पञ्चविंशत्या व्रीहिभिश्शुक्तिरुच्यते ।
तलं प्रकुञ्जः प्रसृतिः कुडुपं च तथाञ्जलिः ।। ८ ।।
प्रस्थं पात्राढकौ शैवं द्रोणं खारी क्रमेण तु ।
शुक्त्या च गणयेन्मन्त्री द्विगुणं तु पृथक् पृथक् ।। ९ ।।
खारित्रयं तु भारं स्यादेवं हि परिणामकम् ।
नित्यं नैमित्तिकं काम्यं नैवेद्यं त्रिविधं भवेत् ।। १० ।।
नित्यं नवविधं प्रोक्तं तथा नैमित्तिकं नव ।
यथेष्टं काम्यमित्युक्तं तेषां भेदस्तथोच्यते ।। ११ ।।
आढकेनैव नैवेद्यमधमाधममुच्यते ।
कनिष्ठमध्यमं शैवं द्रोणं स्यादधमोत्तमम् ।। १२ ।।

खारिमध्याधमं चैव सार्धार्थमथ मध्यमम् ।
मध्यमोत्तममित्युक्तं चतुर्द्रोणैः कृतं हविः ॥ १३ ॥
उत्तमाधममित्युक्तं पञ्चद्रोणैः कृतं हविः ।
षड्द्रोणैस्तण्डुलैस्सिद्धं भवेदुत्तममध्यमम् ॥ १४ ॥
उत्तमोत्तममित्युक्तमष्टद्रोणैस्तु तण्डुलैः ।
एवं विशेषतः प्रोक्तं नित्यं नवविधं तथा ॥ १५ ॥
अष्टद्रोणमदारभ्य यावद्वृद्ध्या नवोदिताः ।
यावद्द्वादशभारान्तमधमादित्रयं त्रयम् ॥ १६ ॥
नैमित्तिके तु नैवेद्यं नवधा समुदाहृतम् ।
प्रार्थितं यत्प्रमाणेन तत्प्रमाणं तु काम्यकम् ॥ १७ ॥
ततः कुडुपयुक्प्रस्थं पैशाचासनमुच्यते ।
पात्रं तु चरुरित्युक्तमाढकं हविरुच्यते ॥ १८ ॥
न कल्पयेत्तु नैवेद्यमाढकार्थं न तण्डुलैः ।
प्रागुक्तविधिना पूर्वं स्नात्वा तु परिचारकाः ॥ १९ ॥
शुक्लवस्त्रधराश्चैव शुक्लयज्ञोपवीतकाः ।
पवित्रपाणिनस्सर्वे पच्यन्ते हविषं क्रमात् ॥ २० ॥
पूरयेत् जलद्रोणीं वस्त्रपूतैर्जलैस्तथा ।
पात्रशुद्धिं हृदा कृत्वा क्षाळयेयुश्च तण्डुलान् ॥ २१ ॥
जलेनैव तु षट्कृत्वा क्षाळयेयुः पुनःपुनः ।
तण्डुलस्य प्रमाणस्याऽप्यर्धादिकसमं जलम् ॥ २२ ॥
शोधयेद्बीजमुख्यैश्च पात्रस्थजलतण्डुलान् ।
तण्डुलैरर्चयेच्छुल्लीं सद्योजातेन देशिकः ॥ २३ ॥
पात्राण्यारोप्य शिरसा वह्निमन्त्रेण निक्षिपेत् ।
विस्फुलिङ्गयुतैश्चैव पिपीलिकायुतैस्तु वा ॥ २४ ॥

कृमिजुष्टैश्च काष्ठैश्च पावकं च न दीपयेत् ।
केशकीटोपविद्धं च शर्करातुषकम्बुयुक् ।। २५ ।।
अतिपक्वमपक्वं च नैवेद्यं परिवर्जयेत् ।
भेद्यं तु वर्णगन्धाद्यैः शीतलान्नं निवेदयेत् ।। २६ ।।
केशेन मरणं विद्धि कीटेन रिपुवर्धनम् ।
शर्करा सस्यहानिस्स्यात् तुषेण ग्रामनाशनम् ।। २७ ।।
अम्बुना ज्वरपीडा च; अतिपक्वैर्दरिद्रता ।
अपक्वेन प्रजानाशं शीतलेन धनक्षयम् ।। २८ ।।
अत्युष्णेन भवेद्दुःखं भिस्सटा सर्वनाशनम् ।
अत्युष्णा नष्टहीनं यत्तदन्नं परिकल्पयेत् ।। २९ ।।
शुद्धोदनक्रमं ह्येवं पायासान्नं ततश्शृणु ।
तण्डुलात् त्रिगुणं क्षीरं क्षीरार्थं तोयमाहरेत् ।। ३० ।।
तोयार्थं मुद्गभिन्नं हि घृतयुक्पायसान्नकम् ।
तण्डुलार्थं समाख्यातं मुद्गसारं तु निर्मलम् ।। ३१ ।।
पक्वान्ते लवणोपेतं मरीचस्य तु चूर्णयुक् ।
तिलचूर्णकमिश्रं तत् कृसरान्नमिति स्मृतम् ।। ३२ ।।
तण्डुलस्य त्रिभागैकं मुद्गसारविमिश्रितम् ।
मुद्गान्नं पक्वमित्युक्तं प्रागुक्तपयसान्वितम् ।। ३३ ।।
क्षीरार्थं गुडखण्डं तु गुडार्थं घृतमिश्रकम् ।
कदलीफलमत्रैव सम्मिश्रं तद्गुडोदनम् ।। ३४ ।।
एवं पञ्चहविः प्रोक्तं नैवेद्याय प्रजापते ।
कृसरान्नं सद्यवक्त्रे वामवक्त्रे गुडोदनम् ।। ३५ ।।
पायसमघोरवक्त्रे तु शुद्धान्नं पुरुषास्यके ।
मुद्गान्नमीशवक्त्रे तु पञ्चवक्त्रे निवेदयेत् ।। ३६ ।।

यद्वक्त्रं द्वारसम्बन्धं तद्वक्त्रं तु निवेदयेत् ।
वासुकी पञ्चवक्त्रेषु चैकवक्त्रे तु भुक्तिदम् ॥ ३७ ॥
तस्मान्नैवेद्यकं दत्वा सदाशिवैकवक्त्रके ।
अग्रे विन्यस्य नैवेद्यं नेत्रेण च निरीक्ष्य च ॥ ३८ ॥
रसानाचार्यजिह्वाग्रात् भक्षयामि प्रजापते ।
यजनान्ते प्रदातव्यं नैवेद्यं सोपदंशकम् ॥ ३९ ॥
तेनैवप्रीतिमतुलां प्राप्तोऽस्मि च न संशयः ।
अन्यथा सकलान् जीवान् दहेयमविचारतः ॥ ४० ॥
मुद्गमाषकुळुत्थं च निष्पावं शिम्बमाढकम् ।
तथा वै राजमाषं च तेषां भिन्नविमिश्रितम् ॥ ४१ ॥
कूष्माण्डपनसालाबु कालिङ्गं बृहतीद्वयम् ।
त्रिपुषं कर्करी चैव सतुषं वितुषं तथा ॥ ४२ ॥
कदळी कारवी व्याघ्री आम्रमुर्वारुकं तथा ।
वल्लिमूलं तथा कन्दं मूलमन्यद्रसैर्युतम् ॥ ४३ ॥
नारिकेळाऽमृता काळी चूतकेसरकीद्वयम् ।
पलाशकारवल्ली च सिसुकन्तं च पिण्डिका ॥ ४४ ॥
पुटोलं चैव च बिम्बं च अळिकं ह्रस्वशूलिका ।
कारवल्ली च पत्रं च लाकुपत्रं च बाष्पदम् ॥ ४५ ॥
औदुम्बरस्य माषाढकण्टकार्कोटसर्वशम् ।
प्रस्थस्यैकपलं प्रोक्तं माध्वं वा पक्वमेव वा ॥ ४६ ॥
यथालाभोपदंश्चैश्च पाचयेत्तु विशेषतः ।
सर्वोपदंशकान्युक्तान् मरीचिलवणान्वितान् ॥ ४७ ॥
जीरकाम्ररसोपेतान्यथायोगं पचेत् पृथक् ।
कुलस्थचूर्णसिद्धार्थं मरीचीजीरकान्वितम् ॥ ४८ ॥

सिता च लवणं चैवऽऽआम्रं तक्रेषु योजयेत् ।
एवं पचेद्वैसूपं तु कदळीपनसे क्षिपेत् ।। ४९ ।।
गवां घृतं निवेद्यानां चतुषष्ट्यंशमुच्यते ।
गुडमाषं कलांशं स्यादष्टांशं दधि कीर्तितम् ।। ५० ।।
वस्वंशं सूपमित्युक्तमेवं सङ्कल्पयेद्बुधः ।
पक्कान्ते तु बहिस्तोयैः शुद्धिं कृत्वा विशेषतः ।। ५१ ।।
त्रिपुण्ड्रं कारयेद्धीमान् अस्त्रेणैव तु मन्त्रतः ।
परिचारकान् समाहूय मार्गानाशोध्य भूतले ।। ५२ ।।
सम्प्रोक्ष्य शुद्धतोयेन शङ्खकाहळनादयुक् ।
हुङ्कारेण तु मन्त्रेण सर्वमुत्थापयेत्ततः ।। ५३ ।।
नैवेद्योत्थापने काले लङ्घने च नरे द्विजाः ।
सस्यानां नाशनं प्रोक्तं निर्माल्यं तदुदाहृतम् ।
तद्द्रव्यं वर्जयित्वा तु मूलमन्त्रं शतं जपेत् ।। ५४ ।।
पश्चात् पक्कामृतं धीमान् शिवाय विनिवेदयेत् ।
मण्डपे दक्षिणे भागे न्यसेन्मन्त्री यथा क्रमम् ।। ५५ ।।
ओदनेषूपदंशेषु घृतेनैवाभिघारयेत् ।
सौवर्णे रजिते ताम्रे ह्यथवा कदळीदळे ।। ५६ ।।
शुद्धकांस्येन वा कुर्यात् पात्रमादाय बुद्धिमान् ।
त्रिपाद्यूर्ध्वे स्थले वाथ स्थलिकां स्थापयेत्ततः ।। ५७ ।।
दर्व्या युक्तं न वा कुर्यात् पात्रमन्नेन पूरयेत् ।
हविं कृत्वा चतुर्भागं चतुर्थांशं निवेदयेत् ।। ५८ ।।
उपदंशैस्समायुक्तं गोघृतेन समन्वितम् ।
कदळीपनसाम्राणां स्वयं पक्कफलैर्युतम् ।। ५९ ।।

सूपेन दधिसंयुक्तं तरुणाऽम्रफलैर्युतम् ।
आम्रकेण समायुक्तं हृदयेन निवेदयेत् ।। ६० ।।
एकेनैव तु भागेन परिवारबलिर्भवेत् ।
एकेन चाग्निकार्यार्थं पात्रशेषं तु शेषितम् ।। ६१ ।।
तच्छेषं परिचाराणां भोजनायेति कीर्तितः ।
ताम्रे कांस्येऽथवा शुद्धे मृद्भाण्डे पूरयेज्जलम् ।। ६२ ।।
नद्यां सरसि कूपे वा पानीयमुत्तमं स्मृतम् ।
वस्त्रपूतं सुशीतं स्यादेलादिपरिसेवितम् ।। ६३ ।।
अनेन विधिना युक्तं पानीयं दापयेत्प्रभोः ।
आचमनं ततः कृत्वा चण्डेशाय निवेदयेत् ।। ६४ ।।
ततो वै भूतबल्यर्थमन्नं गन्धादिकं तथा ।
गृहीत्वा द्वारपालानां दापयेत्तु बलिं पुनः ।। ६५ ।।
अथ नन्दिमहाकाळौ अस्त्रेणैव बलिं पुनः ।
मन्त्रोदनावसाने च बलिकर्म सुयोजयेत् ।। ६६ ।।
बकारं बलदं विद्धि, लिकारं ध्यानसम्भवम् ।
बकारलिकारसंयुक्तं बलिशब्दः प्रकीर्तितः ।। ६७ ।।
आदानध्यानसम्बन्धात् बलिशब्दं प्रकीर्तितम् ।
वृषादिबलिपीठान्तं बलिं कृत्वा विशेषतः ।। ६८ ।।
पूर्वे तु वृषभे चैव अगस्त्यं चाग्निगोचरे ।
याम्ये कात्यायनी प्रोक्ता नैर्ऋत्यां तु गणेश्वरम् ।। ६९ ।।
ब्रह्माणं पश्चिमे चैव अनिलेषु गुहं तथा ।
उत्तरे केशवश्चैव भास्करं शाङ्करे पदे ।। ७० ।।
बाह्ये पीठं प्रविश्याथ उत्तराभिमुखे स्थितम् ।
आमोदश्च प्रमोदश्च प्रमुखो दुर्मुखस्तथा ।। ७१ ।।

अविघ्नो विघ्नकर्ता च बलिपीठाधिदेवताः ।
इन्द्रादिलोकपालांश्च पीठस्थस्वस्वदिग्स्थितान् ॥ ७२ ॥
अक्षद्वयप्रमाणेन बलिरेवं प्रकीर्तितः ।
पतङ्गं च भुजङ्गं च उर्ध्वाधस्सम्प्रकल्पयेत् ॥ ७३ ॥
द्विभुजौ च द्विनेत्रौ च सर्वाभरणभूषितौ ।
रक्ताक्षो रक्तवर्णश्च तद्वर्णाम्बरभूषितौ ॥ ७४ ॥
दक्षिणे तु शिरोन्यस्त्वा पादौ चैवोत्तरे तथा ।
द्विनेत्रौ पीतवर्णौ च भद्रकायौ भयङ्करौ ॥ ७५ ॥
कृताञ्जलिपुटोपेतौ शोधयेत्तत् प्रजापते ।
प्रागुक्तलक्षणोपेतौ ध्यायेते तौ प्रजापते ॥ ७६ ॥
नित्ये दक्षिणपादे च बाह्यपादांस्तु वामतः ।
ग्रामे च द्विभुजं विद्यात् नगरादौ चतुर्भुजम् ॥ ७७ ॥
पत्तने षट्भुजं विद्यात् यथालाभं प्रकल्पयेत् ।
स्वायम्भुवे दैविके च गाणवे चार्षके तथा ॥ ७८ ॥
द्विभुजौ च त्रिनेत्रौ च एभिस्यादधिदैवतम् ।
चतुर्भुजयुतौ चैव खड्गखेटकधारिणी ॥ ७९ ॥
एवं ध्यात्वा विशेषेण पूजयेत्तु समासतः ।
नित्योपादानके चैव द्वारपार्श्वद्वये न्यसेत् ॥ ८० ॥
द्विभुजौ च द्विनेत्रौ च श्वेताभौ चोग्ररूपिणौ ।
किङ्किणीमालया भूष्यौ व्याळाभरणभूषितौ ॥ ८१ ॥
अथवाऽन्यप्रकारेण लक्षणं शृणु पद्मज ।
चतुर्भुजौ भद्रकायौ मातुलुङ्गसमप्रभौ ॥ ८२ ॥
पूजयेद्द्वारपार्श्वे तु ग्रामादिषु च पूर्ववत् ।
द्विनेत्रौ द्विभुजौ सौम्यौ नीलशोणप्रभान्वितौ ॥ ८३ ॥

दंष्ट्राकराळवदनौ किङ्किणीमालयान्वितौ ।
तद्वर्णाम्बरदीप्ताङ्गौ किरीटमकुटान्वितौ ॥ ८४ ॥
षट्भुजौ भीमकायौ वा पक्कबिम्बफलाकृती ।
दण्डन्यस्तैकपादौ च दण्डविन्यस्तकूर्परौ ॥ ८५ ॥
सव्ये वामे च तर्जन्या युक्तौ दोर्दण्डमण्डितौ ।
सव्येऽङ्कुशं तथा खड्गं वामे पाशं च खेटकम् ॥ ८६ ॥
द्वारपार्श्वे यजेद्धीमान् पत्तने च विशेषतः ।
द्वारस्य मध्यमे वापि दक्षिणे वा तथोत्तरे ॥ ८७ ॥
स्थानशुद्धिं ततः कृत्वा तस्योर्ध्वे तु प्रकल्पयेत् ।
तस्योर्ध्वे बलिदानं तु द्वारदेवादितृप्तये ॥ ८८ ॥
नाळिकेरप्रमाणं चाऽप्युत्तमस्य विधीयते ।
कपित्थफलमात्रेण मध्यमस्य प्रमाणकम् ॥ ८९ ॥
कुक्कुटाण्डप्रमाणेन कन्यसं बलिदानकम् ।
अक्षद्वयप्रमाणं वा हस्तमुष्टिप्रमाणकम् ॥ ९० ॥
शुक्तिमात्रप्रमाणं वा बलिं सर्वत्र दापयेत् ।
स्वयम्भूदैविकं चैव दिव्यं मानुषमार्षकम् ॥ ९१ ॥
राक्षसं बाणलिङ्गं च सप्तधा लिङ्गमुच्यते ।
दैविकं तु भवादीनामिन्द्रादीनां तु चार्षकम् ॥ ९२ ॥
भूतादीनां स्वयं भूतं मानुषं परिवारकम् ।
वसूनां बाणलिङ्गं च विद्येशानां तु दिव्यकम् ॥ ९३ ॥
(यक्षादीनां राक्षसं तु बलिदेवाः प्रकीर्तिताः ।)
राक्षसं यातुधानानां बलिदेवाः प्रकीर्तिताः ।
भवश्शर्वः स्तथेशानः नीलः पशुपतिस्तथा ॥ ९४ ॥
उग्रो भीमो महादेव इत्यष्टौ मूर्तयस्स्मृताः ।
पीतकुङ्कुमकृष्णं चारुणं भिन्नाञ्जनप्रभम् ॥ ९५ ॥

सुमुखः स्फटिक प्रख्यो दुर्मुखः कुङ्कुमप्रभः ।
अविघ्नो विद्रुमाभश्च विघ्नकार्ता च धूम्रयुक् ।। १२२ ।।
द्विभुजाश्च द्विनेत्राश्च टङ्कशूलसमन्विताः ।
उग्रदंष्ट्रसमायुक्ताः भीमरूपा महाबलाः ।। १२३ ।।
सर्वाभरणसंयुक्ताः नागयज्ञोपवीतकाः ।
प्रासादिभिमुखास्सर्वे तीक्ष्णदंष्ट्रोत्कटाननाः ।। १२४ ।।
पूर्वे च दक्षिणे चैव पश्चिमे चोत्तरे तथा ।
गर्भगेहस्य पञ्चांशं चतुष्कं चोत्तमोत्तमम् ।। १२५ ।।
त्रिभागं मध्यमं प्रोक्तं द्विभागमधमं भवेत् ।
द्वारोत्सेधसमं श्रेष्ठं त्रिपादं तु च मध्यमम् ।। १२६ ।।
द्वारार्धमधमं विद्धि विस्तारोत्सेधतत्समम् ।
विस्तारं संविभज्याथ भागेनैकेन विंशतिम् ।। १२७ ।।
भागेनोपानमेकेन चतुर्भिर्जगति स्तथा ।
कम्पं कृत्वा तु भागेन तदूर्ध्वे केनपट्टिका ।। १२८ ।।
कण्ठं कुर्याच्चतुर्भागैरेकेनैवात्र पट्टिका ।
महापट्टिद्वियांशेन द्वयांशाब्जदळोन्नतम् ।। १२९ ।।
कर्णिका त्वेकभागेन प्रोक्तमुत्सेधमुत्तमम् ।
बलिपीठमिति ख्यातं सर्वेषां परितृप्तये ।। १३० ।।
यक्ष राक्षस-पैशाच-भूत-गन्धर्व-किन्नराः ।
सर्वदेवऋषीणां तु बलिं सर्वत्र तृप्तये ।। १३१ ।।
आर्षकाख्यस्य लिङ्गस्य परिवारबलिं ददेत् ।
सरो ध्रुवश्च सोमश्च आपश्चैवाऽनिलोनलः ।। १३२ ।।
प्रत्यूषश्च प्रभासश्च वसवश्चाष्ट एव च ।
वाणलिङ्गं तथा योग्यं बलिं दद्यात् प्रकीर्तितम् ।। १३३ ।।
अनन्तेशस्तथा सूक्ष्मश्शिवोत्तमश्चेकनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ।। १३४ ।।

अष्ट विद्येश्वराश्चैते दिव्यलिङ्गबलिस्तथा ।
पूर्वे यक्षगणाश्चैव राक्षसा गणबाणवाः ॥ १३५ ॥
विश्वा च गणदाक्षिण्यां गान्धर्वगण नैर्ऋते ।
किन्नरोगण वारुण्यं पितृणां गण वायवे ॥ १३६ ॥
दानवानां गणे सौम्ये ऐशे नागगणा स्मृताः ।
अष्टानां गणदेवानां बलिदानं तु राक्षसे ॥ १३७ ॥
नित्यास्योपादानकस्य प्रथमद्वारि पूजनम् ।
नन्दी चैव महाकाळे द्वितीयद्वारि पूजनम् ॥ १३८ ॥
दण्डिनो मुण्डिनश्चैव तृतीयद्वारि पूजयेत् ।
आमोदस्य प्रमोदस्य चतुर्थद्वारकल्पनम् ॥ १३९ ॥
गणेशस्य गुहस्यैव पञ्चप्राकारकल्पनम् ।
द्वारदेशं समाख्यातं बलिं तेषां प्रकल्पयेत् ॥ १४० ॥
तण्डुलं प्रस्थपादं स्यात् बलिदाने प्रमाणकम् ।
नित्ये नैमित्तिके चैव बलिं कुर्याद्विशेषतः ॥ १४१ ॥
त्रिसन्ध्यायां बलिं कुर्यादन्यकाले न कारयेत् ।
अथवाऽन्यप्रकारेण काम्यार्थे च बलिं ददेत् ॥ १४२ ॥
महाहविर्निवेद्यान्ते बलिं दद्याद्विशेषतः ।
नैमित्तिकोपसन्ध्यायां हविषा च बलिं ददेत् ॥ १४३ ॥
अभावे बलिदाने च ग्रामनाशं धनक्षयः ।
अतः कार्यं प्रयत्नेन बलिं सर्वत्र कारयेत् ॥ १४४ ॥
ताम्बूलं दापयेच्छम्भोः प्रत्येकं प्रस्थसङ्ख्यया ।
फलाच्चतुर्गुणं पत्रं जिह्वाघ्राण विवर्जितम् ॥ १४५ ॥
अश्मचूर्णसमायुक्तं क्रमुकस्य फलद्वयम् ।
तत्भिन्नतैलसम्मिश्रं दापयेत्तु शिवाय च ॥ १४६ ॥
नित्यमेवं समाख्यातं काम्यं नैमित्तिकं शृणु ।
भूमिशुद्धिं ततः कृत्वा प्रोक्षयेद्धृदयेन तु ॥ १४७ ॥

व्रीहीन् सम्यक् परिस्तीर्य वस्त्रेणोपरि संस्तरेत् ।
तस्योर्ध्वे कदळीपत्रं पूर्वाग्रं चोत्तराग्रकम् ।। १४८ ।।
परिस्तरेद्विशेषेण घृतेनैवाभिघारयेत् ।
हविष्यं तु त्रिधा कृत्वा द्विभागं तु निवेदयेत् ।। १४९ ।।
एकं तु पात्रशेषं स्यादुपदंशाज्यसूपयुक् ।
दधिताम्बूलपूगं च प्रभूतं तु परिग्रहेत् ।। १५० ।।
अस्त्रं दिशासु विन्यस्य अस्त्रमुद्रां प्रदर्शयेत् ।
दापयेद्देवदेवाय हृदये न च देशिकः ।। १५१ ।।
आचमनं ततः कृत्वा ताम्बूलं तु निवेदयेत् ।
देवसङ्कल्पितं वत्स! नैवेद्यमष्टभागिकम् ।। १५२ ।।
द्विभागं देवभागं स्यादेकभागं तु शक्तिकम् ।
गणेशस्यैकभागं तु कुमारस्यैकभागकम् ।। १५३ ।।
बल्यर्थमग्निकार्यार्थमेकभागमिति स्मृतम् ।
देशिकस्येकभागं स्यात् पात्रशेषं तु शेषकम् ।। १५४ ।।
तच्छेषं परिवाराणां भोजनायेति कीर्तितम् ।
देवस्वं देवताद्रव्यं नैवेद्यं तन्निवेद्यकम् ।। १५५ ।।
चण्डद्रव्यं च निर्माल्यं षड्विधं चैव कीर्तितम् ।
ग्रामादीशस्वदेवस्वो देवद्रव्यं पटादिकम् ।। १५६ ।।
नैवेद्यं कल्पितं तस्मै देवोच्छिष्टं न संशयम् ।
चण्डद्रव्यं च तद्दत्तं निर्माल्यं प्रेरितं बहिः ।। १५७ ।।
तैलचूर्णं च भस्मानि ताम्बूलम् स्नानतोयकम् ।
वस्त्रमाभरणं चैव गन्धतैलं च पुष्पकम् ।। १५८ ।।
चन्दनं चैव शुद्ध्यर्थं निर्माल्यं न प्रकीर्तितम् ।
शिष्टलिङ्गार्चनं चेत्तु किञ्चित् पूजा विधीयते ।। १५९ ।।
स्वयम्भुर्देविकं बाणं गाणवं चार्षकं तथा ।
शिष्टलिङ्गमिति ख्यातं पूजां पूर्ववदाचरेत् ।। १६० ।।

शिष्टलिङ्गं तु वा चेत्तु विशेषं किञ्चिदस्ति हि ।
तन्निवेदितनिर्माल्यं शैवानां भोजनं हितम् ॥ १६१ ॥
शुभदं चित्तसंस्कारमायुष्यं बलवर्धनम् ।
स्फटिकं बाणलिङ्गं च स्थापितं चलमेव वा ॥ १६२ ॥
तन्निवेदितनिर्माल्यं न निर्माल्यं प्रकीर्तितम् ।
बालानां युवतीनां च भोजयेत् बलवर्धकम् ॥ १६३ ॥
आत्मार्थकस्य लिङ्गस्य न निर्माल्यं तु कथ्यते ।
लिङ्गं च द्विविधं विद्धि मानुषं शिष्टलिङ्गकम् ॥ १६४ ॥
तयोर्मानुषलिङ्गस्य निर्माल्यं भवति ध्रुवम् ।
शिष्टलिङ्गस्य निर्माल्यं न निर्माल्यमुदीरितम् ॥ १६५ ॥
गुरुपुस्तकनागानां भक्तानां हि गणस्य च ।
पार्वतीयक्षमातृणां निर्माल्यं च शिवाय च ॥ १६६ ॥
गोभूहिरण्यवस्त्रादिमणिहेमादिभूषणम् ।
विहाय शेषनिर्माल्यं चण्डेशाय निवेदयेत् ॥ १६७ ॥
निर्माल्यं निर्मलं शुद्धं निर्मलात्मा परिग्रहेत् ।
मलबन्धशरीरेऽस्मिन् निर्माल्यं तु न भोजयेत् ॥ १६८ ॥
निर्माल्यं निर्मलो भुङ्क्ते निर्मलत्वादनिन्दितम् ।
तस्माच्छिवस्य नैवेद्यं शुद्धद्रव्यमिति स्मृतम् ॥ १६९ ॥
मलबन्धशरीरस्स्यात् भोक्तुं तस्य न योग्यकम् ।
तिलार्थं शिवनिर्माल्यं नाश्नीयान्न परिग्रहेत् ॥ १७० ॥
भक्षयन्नरकं याति यावच्चन्द्रार्कमेदिनी ।
परिग्रहे च स्वीकारे पश्यन् गांश्च मनुं स्मरेत् ॥ १७१ ॥
शिवेन दीक्षितत्वाच्च शिवब्राह्मण उच्यते ।
तस्माच्छिवद्विजं विप्र! शुद्धब्राह्मणमुच्यते ॥ १७२ ॥
निर्माल्यं तस्य योग्यं तु अन्येषां तु न योग्यकम् ।
सङ्गृहीतं तथा चान्ये अतिकृच्छ्रं समाचरेत् ॥ १७३ ॥

स्पर्शने पाणिपादौ च प्रक्षाळ्याचम्य पाणिना ।
हरेत् प्रक्षाळनं हस्तं प्राणायामत्रयं कुरु ॥ १७४ ॥
प्रमादात् भोजनं कृत्वा पञ्चगव्यं कुशाग्रकम् ।
भक्षयेद्दोषशान्त्यर्थं हृन्मन्त्रं तु शतं जपेत् ॥ १७५ ॥
निर्माल्यलङ्घनं दानं भक्षणं नरकं व्रजेत् ।
तिलादन्नस्य निर्माल्यं नरकं चन्द्रदिवाकरौ ॥ १७६ ॥
जले वा पशुपूगे वा भूमौ वाग्नौ प्रदापयेत् ।
विघ्नेशस्य च नैवेद्यं विप्रादीनां तु भोजनम् ॥ १७७ ॥
उमादेव्याश्च नैवेद्यं सर्वेषां भोजनं हितम् ।
शुद्धं विष्णोश्च नैवेद्यं ब्राह्मणादिषु भोजनम् ॥ १७८ ॥
सकलादिनिवेद्यं स्यात्'सर्वेषां भोजनं मतम् ।
सुब्रह्मण्यस्य नैवेद्यं भोजनं च जयार्थिनाम् ॥ १७९ ॥
भास्करस्य तु नैवेद्यं भुक्तं व्याधिक्षयं भवेत् ।
शीतभानोश्च नैवेद्यं भुक्तं शीतज्वरापहम् ॥ १८० ॥
परिवारादिदेवानां नैवेद्यं मुक्तिहेतुकम् ।
दक्षिणं वर्षार्थं च उच्छिष्टं जलशुद्धये ॥ १८१ ॥
अग्नीनां जिह्वया शुद्धं गोपृष्ठं चैव शुद्धये ।
उच्छिष्टं शिवनिर्माल्यं वामनं प्रेतचर्मजम् ॥ १८२ ॥
काकदृष्टिसमुद्भूतं पञ्चैतानि पवित्रकम् ।
अमृतकदळीसुगन्धपैशाचं गात्रकदळी अभिषेकविशेषः ।
यातुकदळी पर्वतसिंहमिक्षुकदळी नैवेद्यविशेषः ॥ १८३ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे नैवेद्यविधानविधिपटलस्त्रयस्त्रिंशत्तमःसमाप्तः

अथ पुण्याहविधिपटलप्रारम्भः

अथाऽतस्सम्प्रवक्ष्यामि पुण्याहस्य विधिक्रमम् ।
पुकारं पापनाशं स्यात् ण्याकारं देहशुद्धिदम् ॥ १ ॥
हकारं स्थानशुद्धिस्स्यात् पुण्याहं तु विधीयते ।
सर्वपापहरं चैव सर्वसिद्धिप्रदायकम् ॥ २ ॥
सर्वमङ्गळकार्यादौ पुण्याहप्रोक्षणं शुभम् ।
सर्वेषामुपरिष्टाच्च क्रियमाणस्य कर्मणः ॥ ३ ॥
पुण्याहं पूर्वमुद्दिष्टं क्रियासाफल्यहेतवे ।
अन्यथा शिवतुल्योऽपि विघ्नैरेवाभिभूयते ॥ ४ ॥
पुण्याहजलसङ्कीर्णं यस्मिन् कर्मणि नास्ति हि ।
तत्कर्म विफलं प्राहुः भूतप्रेतैः प्रबाध्यते ॥ ५ ॥
प्रासादे मण्टपाग्रे वा मनोरम्यस्थले शुभे ।
गोमयालेपनं कृत्वा पिष्टचूर्णैरलङ्कृतम् ॥ ६ ॥
वितानदर्भमालाद्यैरलङ्कृत्य विशेषतः ।
सर्वकर्मकृतेः पूर्वं पुण्याहं तत्प्रवेशके ॥ ७ ॥
आचार्यः सुप्रसन्नात्मा शुक्लवस्त्रोत्तरीयकः ।
भस्मोद्धूळितसर्वाङ्गो रुद्राक्षमालयान्वितः ॥ ८ ॥
मन्त्रतन्त्रक्रियामुद्राभावनाध्यानगर्भितः ।
नक्रकुण्डलधृक् वाग्मी सकलीकृतविग्रहः ॥ ९ ॥
पूर्वास्योदङ्मुखो वाथ कच्छपासनसंस्थितः ।
सामान्यार्घ्यं तु सङ्कल्प्य स्थण्डिलं शालिभिः कुरु ॥ १० ॥
उत्तमं द्रोणमेवोक्तं मध्यमं तु तदर्थकम् ।
कन्यसं चाढकं विद्धित्रिविधं परिभाषते ॥ ११ ॥
तन्मध्ये पद्ममालिख्य दर्भैः पुष्पैः परिस्तरेत् ।
सौवर्णं राजतं ताम्रं कांस्यं वा मृन्मयं तु वा ॥ १२ ॥

षौडशाङ्गुलमायामं नाहं द्वाविंशादङ्गुलम् ।
ओष्ठमेकाङ्गुलं प्रोक्तं कण्ठं तु चतुरङ्गुलम् ।। १३ ।।
कुक्ष्युत्सेधं दशाङ्गुल्यं पादमेकाङ्गुलं भवेत् ।
अष्टाङ्गुलमिदं वक्त्रं तदर्थं पादविस्तृतम् ।। १४ ।।
मूलादग्रं क्रमात् क्षीणादष्टषट्चतुरङ्गुलैः ।
एतैश्च लक्षणैर्युक्तं मृन्मये बिम्बसन्निभम् ।। १५ ।।
शिवतोयेन सम्पूर्य षट्बाणप्रस्तकैस्तु वा ।
तन्तुना वेष्टयित्वा तु सहेमं कूर्चसंयुतम् ।। १६ ।।
स्थण्डिले कर्णिकामध्ये रमां सम्पूज्य देशिकः ।
तस्योर्ध्वे विन्यसेत्पात्रं पूजयेद्धृदयेन तु ।। १७ ।।
पृष्ठे प्रजापतिं चैव मध्यमे विष्णुदेवतम् ।
अग्रं वै रुद्रदैवत्यम् ओष्ठं वै स्कन्ददैवतम् ।। १८ ।।
घ्राणं विघ्नेशमित्युक्तं कण्ठं वै वसुदैवतम् ।
कुक्षौ वरुणदैवत्यं पादं भास्करदैवतम् ।। १९ ।।
वक्त्रं वै चन्द्रदैवत्यं पार्श्वयोर्नन्दिकाळकौ ।
मध्यमे सप्त तीर्थं स्यात् कलशे च यथाक्रमम् ।। २० ।।
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।। २१ ।।
हेमवस्त्रपिधानं च कारयेद्वर्जयेत्तु वा ।
स्वर्णरौप्यादिपात्रे वा तण्डुलैरुडुसन्निभैः ।। २२ ।।
द्विप्रस्थमधमं प्रोक्तं द्विगुणं मध्यमं भवेत् ।
शिवतण्डुलमित्युक्तमुत्तमं तु प्रशस्यते ।। २३ ।।
अभ्यर्च्य गन्धपुष्पाद्यैः धूपदीपं हृदा चरेत् ।
नागवल्लीदळैर्युक्तं पूगीफलसमायुतम् ।। २४ ।।

नारङ्गलिकुचं रम्भानारिकेलफलान्वितम् ।
नित्ये नैमित्तिके चैव काम्ये चैव तु कल्पयेत् ।। २५ ।।
कर्मारम्भस्य तत्काले पूर्वं सङ्कल्प्य बुद्धिमान् ।
दर्भाणां च द्वयं ग्राह्यं द्वादशाङ्गुलमायतम् ।। २६ ।।
अचार्यो दक्षिणे हस्तेऽनामिकायां सुयोज्य च ।
प्राणायामत्रयं कृत्वा कर्णं संस्पृश्य दक्षिणम् ।। २७ ।।
जानौ विन्यस्तापसव्यं करे सव्यं सुयोजयेत् ।
यावत्कर्म करिष्यामि दर्भोद्वासनमुत्तरे ।। २८ ।।
भूसुरुणां द्वयं दत्वा देशिको दर्भयुग्मयुक् ।
आपःप्रयोगमाचार्ये शिवाआपश्च ऋत्विजः ।। २९ ।।
गन्धप्रयोगमाचार्यः सुगन्धां प्रतिवाचकः ।
देशिकस्सुमनाश्चैव सौमनस्यं च ऋत्विजः ।। ३० ।।
अक्षतं देशिको ब्रूयादन्ये क्षतमरिष्टकम् ।
अन्वाहार्यस्तथा ब्रूयात् सुमन्वाहार्य इत्यपि ।। ३१ ।।
देशिको दक्षिणा स्वस्ति दक्षिणाः प्रतिवाचकः ।
बहुदेयमस्त्वाचार्यो वदेयुर्भूसुरास्तथा ।। ३२ ।।
देशिकस्तु जपं कृत्वा भूसुरेण समन्वितम् ।
कुम्भमुद्धृत्य सहसा सापिधानं सकूर्चकम् ।। ३३ ।।
उत्थाय समपादस्तु देशिकश्शान्तिसंयुतः ।
स्वस्ति मध्ये तु यत्कर्म तत्कर्म स्वस्तिवाचकम् ।। ३४ ।।
पदान्ते स्रावयोत्तोयं राक्षसानां तु तृप्तये ।
पश्चादासीन एवासु प्रजपेत् ब्राह्मणैस्सह ।। ३५ ।।
दधिक्राविण्णेति मन्त्रं च हिरण्यं पवमानकम् ।
शान्तिमन्त्रं जपेद्धीमान् दर्भैस्स्पृष्ट्वा विधानवित् ।। ३६ ।।

एवं क्रमेण पुण्हाहं कारयेत् भूसुरोत्तमैः ।
आचार्य मनसस्तृप्तिः देवसान्निध्यकारणम् ।। ३७ ।।
निष्कादिदशनिष्कान्तमाचार्यस्य तु दक्षिणा ।
द्रव्यशुद्धिनिमित्ताय शुद्धिपुण्याहमाचरेत् ।। ३८ ।।
पञ्चब्रह्मं रुद्रसूक्तं श्रीरुद्रं चमकं तथा ।
पुंसूक्तं त्रिसुपर्णं च श्रीसूक्तं शान्तिपञ्चकम् ।। ३९ ।।
जप्त्वा संस्नाप्य देवेशं पूजयेत्तु विचक्षणः ।
अघोरं दक्षिणामूर्तिं शिवास्त्रं क्षुरिकास्त्रकम् ।। ४० ।।
रुद्रास्त्रं तु समुच्चार्य पूजयेत्तु शनैश्शनैः ।
पूर्वाह्णे चाभिषेकं तु ब्रह्मवर्गविवर्धनम् ।। ४१ ।।
मध्याह्ने चाभिषेकं तु क्षत्रवर्गविवर्धनम् ।
सायाह्ने साभिषेकं तु वैश्यवर्गविवर्धनम् ।। ४२ ।।
अर्धरात्रे तथा प्रोक्तं शूद्रवर्गविवर्धनम् ।
सर्वपापहरं पुण्यं सर्वसस्यादिवर्धनम् ।। ४३ ।।
पुत्रपौत्राभिवृद्ध्यर्थं धनधान्यसुखप्रदम् ।
पुण्याहप्रोक्षणं यस्यां क्रियायां न करोति हि ।। ४४ ।।
सा क्रिया विफला प्रोक्ता क्रव्यादैः परिभूयते ।
तस्माद्विध्युक्तमार्गेण पुण्याहप्रोक्षणं हितम् ।। ४५ ।।
पुण्याहप्रोक्षणं हित्वाऽप्यन्यकर्म करोति यः ।
वृथा परिश्रमं तस्य सान्निध्यं नापि तत्र वै ।। ४६ ।।
तस्मात्पाशुपतं घोरं अष्टोत्तरशतं पृथक् ।
जप्त्वा पुनश्च पुण्याहं कर्मवैकल्यशुद्धये ।। ४७ ।।
एवं यः करुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे पुण्याहविधिपटलचतुर्स्त्रिंशत्तमःसमासः

अथ पञ्चगव्य-पञ्चामृतविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण पञ्चगव्यविधिं शृणु ।
शिवाग्रे भूतले रम्ये गोमयालेपनं कुरु ॥ १ ॥
तन्मध्यतः परिस्तीर्य ताराभैर्द्रोणतण्डुलैः ।
प्राक्सूत्रं युगसूत्रं स्यादुदक्सूत्रं तथैव च ॥ २ ॥
सूत्रात्सूत्रान्तरं तालं नवकोष्टं तु लेखयेत् ।
लाजैर्दर्भैरक्षतैश्च तिलः पुष्पैः परिस्तरेत् ॥ ३ ॥
दिक्दशं च चतुर्वेदं विदिक्दलं कृतादयः ।
पुण्याहप्रोक्षणं कृत्वा शोधयेन्नवकोष्ठकम् ॥ ४ ॥
मध्यमे शिवतत्वं तु पूर्वे तत्वं सदाशिवम् ।
विद्यातत्वं दक्षिणतस्सौम्ये पुरुषतत्वकम् ॥ ५ ॥
पश्चिमे कालतत्वं तु वह्नौ नियति तत्वकम् ।
अप्पत्त्वं राक्षसेदेशे मायातत्त्वं तथाऽनिले ॥ ६ ॥
ईशे प्रकृतितत्त्वं तु कोष्ठपूजा विधीयते ।
तन्मध्ये सुप्रतिष्ठं च पूर्वपात्रे सुशान्तकम् ॥ ७ ॥
तेंजोरूपं दक्षिणतो रत्नोदकं तथोत्तरे ।
अमृतोदं प्रतीच्यां तु सुव्यक्तमीशकोणके ॥ ८ ॥
पूर्वादीशानपर्यन्तं ज्योतिरूपं तु पात्रकम् ।
एवमेव क्रमेणैव पात्रपूजा विधीयते ॥ ९ ॥
आप्यायस्वेति मन्त्रेण मध्ये क्षीरं तु विन्यसेत् ।
दधिक्राविण्णेति मन्त्रेण तत्पूर्वे विन्यसेद्दधि ॥ १० ॥
शुक्रमसीति मन्त्रेण दक्षिणे विन्यसेत् घृतम् ।
गोमूत्रमुत्तरे देशे गायत्र्या विन्यसेत्क्रमात् ॥ ११ ॥
गन्धद्वारेति मन्त्रेण गोमयं पश्चिमे न्यसेत् ।
देवस्य त्वेति मन्त्रेण कुशोदं शाङ्करे न्यसेत् ॥ १२ ॥

पावके विन्यसेत्पिष्टं कपित्थफलमात्रकम् ।
कदलीफलमात्रेण रजनीं राक्षसे न्यसेत् ॥ १३ ॥
.... ।
न्यसेदामलकं वायौ ....॥ १४ ॥
शिखासि कवचैर्मन्त्रैर्विदिक्षु विन्यसेत्क्रमात् ।
ईशानेन तु दुग्धं स्यात् बाणसङ्ख्याभिमन्त्रितम् ॥ १५ ॥
पुरुषेण तु मन्त्रेण दधि वै वसुसङ्ख्यया ।
अघोरेण घृतं धातुसङ्ख्यया चाभिमन्त्रयेत् ॥ १६ ॥
वामदेवेन गोमूत्रं वसुसङ्ख्याभिमन्त्रितम् ।
सद्येन गोमयं रत्नसङ्ख्यया चाभिमन्त्रयेत् ॥ १७ ॥
पावके पिष्टमेवोक्तं व्याहृत्या चैव षट् जपेत् ।
हृदयेनामलकं सप्तवारैश्चैवाभिमन्त्रयेत् ॥ १८ ॥
शिरोमन्त्रेण रजनीं वसुसङ्ख्याभिमन्त्रितम् ।
अस्त्रमन्त्रं जपेद्धीमान् दोषनिर्हरणार्थकम् ॥ १९ ॥
एवं सम्पूज्य विधिवत् धूपदीपं हृदा ददेत् ।
क्षीरं वै रुद्रदैवत्यं दधि वै सोमदैवतम् ॥ २० ॥
घृतमीश्वरदैवत्यं गोमूत्रं वायुदैवतम् ।
गोमयं वह्निदैवत्यं कुशोदं ब्रह्मदैवतम् ॥ २१ ॥
पिष्टं वै विष्णुदैवत्यं रजनी चन्द्रदैवतम् ।
श्रियमामलके विद्यादधिदेवाः प्रकीर्तिताः ॥ २२ ॥
उत्तमं त्रिचतुःप्रस्थं मध्यमं तु तदर्धकम् ।
कन्यसं तु चतुःप्रस्थं त्रिविधं परिकीर्तितम् ॥ २३ ॥
प्रस्थमाज्यं समाख्यातं दधि द्विप्रस्थमुच्यते ।
त्रिप्रस्थं चैव गोक्षीरं चतुःप्रस्थं तु गोमयम् ॥ २४ ॥
षट्प्रस्थं चैव गोमूत्रं पलमात्रं कुशोदकम् ।
द्विपादं घृतसंयुक्तं दधि प्रस्थमिहोच्यते ॥ २५ ॥

प्रस्थार्धं क्षीरसंयुक्तं द्विप्रस्थं गोमयं भवेत् ।
त्रिप्रस्थं चैव गोमूत्रं पञ्चगव्यं तु मध्यमम् ।। २६ ।।
एकपादं घृतं चैव दधि पादद्वयं भवेत् ।
त्रिपादं क्षीरमित्युक्तं चतुष्पादं तु गोमयम् ।। २७ ।।
षट्पादं चैव गोमूत्रं पलमात्रं कुशोदकम् ।
एवमेव क्रमेणैव त्रिविधं पञ्चगव्यकम् ।। २८ ।।
उत्तमं स्वर्णपात्रं स्यात् मध्यमं कांस्यपात्रकम् ।
अधमं मृन्मयश्चैव पात्रमेवमुदाहृतम् ।। २९ ।।
काशं भिन्नं च सुषिरं कृष्णं छेदं तु वर्जयेत् ।
धर्माङ्गुलोन्नतं चैव मात्राङ्गुलं तु कल्पयेत् ।। ३० ।।
त्रिंशद्देवाङ्गुलं चैव नाहं स्यात् परिमाणकम् ।
कण्ठं त्रियङ्गुलोपेतमोष्ठमेकाङ्गुलं भवेत् ।। ३१ ।।
उत्तमं पात्रमित्युक्तं मध्यमं तु प्रजापते ।
पञ्चाङ्गुलोन्नतं चैव नाहं सप्तदशाङ्गुलम् ।। ३२ ।।
दलं तु द्व्यङ्गुलं प्रोक्तमोष्ठमेकाङ्गुलं भवेत् ।
मध्यमं पात्रमित्युक्तं कन्यसं पात्रमुच्यते ।। ३३ ।।
देवाङ्गुलं तथैवोच्चं नाहं प्रोक्तं नवाङ्गुलम् ।
कण्ठं च त्र्यङ्गुलोपेतं युगाङ्गुलसुविस्तरम् ।। ३४ ।।
एवमेव क्रमेणैव त्रिविधं पात्रमुच्यते ।
गोमयं कृष्णवर्णायां नीलायां गोजलं स्मृतम् ।। ३५ ।।
कपिलायां घृतं विद्धि शुक्लायां दधि चेष्यते ।
पयश्च रक्तवर्णायां गवांवर्णं प्रकीर्तितम् ।। ३६ ।।
अलाभे कपिलायास्तु सर्वं सङ्ग्राहयेद्बुधः ।
गोमूत्रं श्रीप्रदं विद्धि गोमयं रोगनाशनम् ।। ३७ ।।
पयश्शत्रुविनाशं स्यात् दधि पुत्रविवर्धनम् ।
घृतं मोक्षप्रदं चैव पञ्चगव्यफलं क्रमात् ।। ३८ ।।

पं कारम्पापनाशं स्यात् चकारमात्मशुद्धिदम् ।
गकारं जन्मनाशं स्यात् व्यकारं मोक्षहेतुकम् ।। ३९ ।।
पञ्चगव्यस्य शब्दस्य प्रोक्तं निर्वचनाक्षरम् ।
नित्ये नैमित्तिके काम्ये दुष्टदोषे महाभये ।। ४० ।।
ज्वररोगादिपीडायां परराष्ट्रभयेऽपि वा ।
दुर्निमित्ते दिशां दाहे महामारिप्रकोपने ।। ४१ ।।
क्षामक्षोभसमुत्पन्ने महावातप्रभेदने ।
भूमिकम्पेऽप्यनावृष्टौ सङ्क्रान्तिग्रहणादिके ।। ४२ ।।
अन्यत्पुण्यदिने वापि संस्थाप्य पञ्चगव्यकम् ।
अभिषेकं प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ।। ४३ ।।
समानशिखया युक्ताः कुशाश्चाष्टादश स्मृताः ।
वेण्या वेष्टिकया वापि तालमात्रं तु दैर्घ्यकम् ।। ४४ ।।
प्रोक्षणीकूर्चमुद्दिष्टं शान्तिकर्मसु सर्वदा ।
प्रातःकालेऽभिषेकं तु ब्रह्मवर्गस्य वर्धनम् ।। ४५ ।।
मध्याह्ने त्वभिषेकं तु नृपवर्गस्य वर्धनम् ।
सायङ्कालेभिषेकं तु वैश्यवर्गविवर्धनम् ।। ४६ ।।
सार्धयामेऽभिषेकं तु शूद्रवर्गविवर्धनम् ।
उषःकाले विशेषेण सर्वसिद्धिकरं भवेत् ।। ४७ ।।
मातृहा पितृहा चैव गोघ्नश्चैव कृतघ्नकः ।
भ्रूणहा च गुरुद्रोही पातको गुरुत्पलगः ।। ४८ ।।
मुच्यते तत्क्षणेनैव पञ्चगव्याभिषेचनात् ।
पञ्चगव्यविहीनं च पूजनं क्रियते यदि ।। ४९ ।।
न देवतायास्सान्निध्यमित्थं तत्र प्रजापते ।
एवं क्रमेण विधिवत् पञ्चगव्यपुरस्सरम् ।। ५० ।।
अभिषेकं प्रकर्तव्यं यथाविभवविस्तरम् ।
इहैव धनवान् श्रीमान् सोऽन्ते रुद्रपदं लभेत् ।।

अन्यथा पञ्चगव्यविधिः :-

अतःपरं प्रवक्ष्यामि पञ्चगव्यविधिक्रमम् ।
शिवाग्रे स्थण्डिलं कृत्वा आढकेनैव शालिभिः ॥ १ ॥
पादे तु शिवसाविद्या कलाश्च मणिबन्धनम् ।
पुरुषं कलशस्यान्ते तेजश्शान्तिप्रतिष्ठितौ ॥ २ ॥
करणमणिबन्धस्चार्थंकृतचित्रकोष्ठम् ।
शुचिकरसुरभिबन्धाग्निक्रमेण कुर्यात् ॥ ३ ॥
नवपात्रं तु सङ्गृह्य क्षाळयेत् गन्धवारिणा ।
प्रोक्षयेत्पुरुषेणैव कवचेनावकुण्ठयेत् ॥ ४ ॥
षट्गव्यं पञ्चगव्यं च षडङ्गं पञ्चामृतं तथा ।
षट्गव्यो पञ्चगव्यो वा प्रथमं जुहुमेव च ॥ ५ ॥
षडङ्गं चामृते चैव साये चैवर्थयामके ।
गोमूत्रं गोमयं क्षीरं दधिसर्पिश्च रोचना ॥ ६ ॥
षड्गव्यमिति विज्ञेयं षडङ्गेनाऽभिषेचयेत् ।
क्षीरं दधि घृतं चैव गोमूत्रं गोमयं तथा ॥ ७ ॥
पञ्चगव्यमिति प्रोक्तं पूजयेत् ब्रह्मपञ्चकैः ।
गोमूत्रं गोमयं क्षीरं दधि सर्पि कुशोदकम ॥ ८ ॥
एतत्षडङ्गमाख्यातं पूजयेत्प्रणवेन तु ।
क्षीरं दधि घृतं चैव मधुशर्करसंयुतम् ॥ ९ ॥
पञ्चामृतमिदं ब्रह्मा पूजयेत्सूक्तमन्त्रतः ।
पूर्वाग्रं तु चतुस्सूत्रमुत्तराग्रं तथैव च ॥ १० ॥
तालमात्रप्रमाणेन कारयेद्देशिकोत्तमः ।
तिललाजैरलङ्कृत्य दर्भानुपरि संस्तरेत् ॥ ११ ॥
एवं तु पदसङ्कल्प्य पूजयेत्पूर्ववद्बुधः ।
गव्यं पापविनाशार्थं सर्वारिष्टविनाशनम् ॥ १२ ॥

मधुवातेति मन्त्रेण मधु चैवाभिमन्त्रयेत् ।
अन्यत्पूर्वोक्तवत् स्थाप्य देशिकेन विचक्षणः ॥ ३७ ॥
यथा संस्थापितास्सर्वे तथाचोत्तरणं गुरुः ।
अभिषेकं प्रकुर्वीत लिङ्गे वा कौतुकेऽपि वा ॥ ३८ ॥
प्रविश्य तु महादेवं गृहं गृहपतिर्यथा ।
ग्रहणे विषुवे चैव अयने युद्धसङ्कुले ॥ ३९ ॥
नृपाभिषेककाले तु माङ्गल्ये मन्त्रसाधने ।
कन्यादाने विवाहान्ते अतिवृष्टाववृष्टिके ॥ ४० ॥
दुर्भिक्षे दुर्निमित्ते च शत्रूणां च प्रमर्दने ।
भूमिकम्पे दिशादाहे दुस्वप्ने दर्शने तथा ॥ ४१ ॥
प्रतिसूर्यप्रदृष्टे तु दुर्दिने शलभप्लवे ।
महामारिप्रकोपे च शिरोरोगादिसम्भवे ॥ ४२ ॥
अक्षिरोगसमुत्पन्ने ज्वरव्याधिस्तु जायते ।
एतद्दोषनिवृत्यर्थं स्थापयेत्पञ्चगव्यकैः ॥ ४३ ॥
इहैव धनवान् श्रीमान् सोऽन्ते सायुज्यमाप्नुयात् ।

पञ्चामृतविधिपटलप्रारम्भः :-

पञ्चामृतमथो वक्ष्ये सर्वसम्पत्करं नृणाम् ।
देवस्य पूर्वदिग्भागे स्थण्डिलं शालिना कुरु ॥ १ ॥
द्वात्रिंशत्प्रस्थसम्पूर्णान् व्रीहीनास्तीर्य देशिकः ।
प्रागग्रं च चतुस्सूत्रमुदक्सूत्रं तथैव च ॥ २ ॥
सूत्रात्सूत्रान्तरं तालं नवकोष्ठमिति स्मृतम् ।
धर्मादिकं च दिक्पत्रमधर्माद्यं विदिक्षु च ॥ ३ ॥
अक्षतैः तिललाजैर्वा पुष्पैः काशैः परिस्तरेत् ।
कोष्ठपूजादिकं सर्वं प्रागुक्तवत् प्रकल्पयेत् ॥ ४ ॥
क्षीरं दधि घृतं क्षौद्रं सितं चैव तु पञ्चमम् ।
पञ्चामृतमिति ख्यातम् प्रतिदिक्स्थं पृथक् न्यसेत् ॥ ५ ॥
उत्तमं प्रस्थसम्पूर्णं मध्यमं तु तदर्धकम् ।
तदर्थमधमं ज्ञेयं त्रिविधं परिकल्पयेत् ॥ ६ ॥
दुग्धं तु मध्यमे स्थाप्यं पूर्वस्यां स्थापयेद्दधि ।
घृतं दक्षिणतो न्यस्य पश्चिमे क्षौद्रमुच्यते ॥ ७ ॥
सितमुत्तरिदिग्देशे गन्धोदं शाङ्करे न्यसेत् ।
रम्भापनसचूतानाम् अग्निनैर्ऋतिवायुषु ॥ ८ ॥
संस्थाप्याऽभ्यर्चयेदीशमघोरवामसद्यकैः ।
एकद्वित्रिचतुःपञ्चवारमेवाभिमन्त्र्य च ॥ ९ ॥
हृदयं च शिरश्चैव शिखामिश्रं तु विन्यसेत् ।
कवचेनावकुण्ठ्याथ धेनुमुद्रां प्रदर्शयेत् ॥ १० ॥
खण्डाऽभावे तु सङ्ग्राह्यमभावे इक्षुरसं तथा ।
खण्डं चाप्यभिषेके तु जलेन लोळितं भवेत् ॥ ११ ॥

अभिषेकं पृथक प्रोक्तं तोयस्नानान्तरान्तकम् ।
मध्येमध्ये च धूपं च दीपं चैव प्रदापयेत् ।। १२ ।।
पयसा सर्वसौभाग्यं दधि पुत्रसमृद्धिदम् ।
घृतं रोगहरं प्रोक्तं क्षौद्रमायुष्करं भवेत् ।। १३ ।।
सितं ज्ञानप्रदं विद्धि पञ्चामृतफलं भवेत् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।। १४ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे पञ्चगव्य-
पञ्चामृतविधिपटलपञ्चत्रिंशत्तमः समाप्तः

अथ पञ्चविंशतिस्नपनविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण स्नपनं पञ्चविंशतिम् ।
सर्वसिद्धिकरं पुण्यं सर्वपापनिकृन्तनम् ।। १ ।।
आलयस्याग्रतः कुर्यात् मण्टपं चाष्टहस्तकम् ।
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भसंयुतम् ।। २ ।।
स्थलोच्चं चतुरङ्गुल्यं चतुरश्रसमं शुभम् ।
युगद्वारसमायुक्तं चतुस्तोरणभूषितम् ।। ३ ।।
मङ्गळाङ्कुरसंयुक्तं पूर्णकुम्भैरलङ्कृतम् ।
मुक्तास्रग्दामविविधैः ध्वजैश्चित्रैश्च शोभितम् ।। ४ ।।
वितानदर्भमालाभ्यां दीपैश्च विविधैर्युतम् ।
गोमयालेपनं कृत्वा प्रोक्षयेद्धृदयेन तु ।। ५ ।।
प्राक्सूत्रं वसुभिः कुर्यादुदक्सूत्रं तथैव च ।
सूत्रात्सूत्रान्तरं तालं मध्ये नवपदं ग्रहेत् ।। ६ ।।
अभितस्तस्य बाह्ये तु पदमेकं परित्यजेत् ।
वसुद्वारसमायुक्तं त्यजेद्गोमयवारिणा ।। ७ ।।
शालिभिस्थण्डिलं कृत्वा प्रोक्षयेद्धृदयेन तु ।
तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् ।। ८ ।।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ।
लाजपुष्पैश्च दर्भैश्च विकरेत्तु विशेषतः ।। ९ ।।
पुण्याहं वाचयित्वा तु पश्चात् स्थापनमारभेत् ।
मण्टपस्योत्तरे भागे कलशान् स्थापयेत्ततः ।। १० ।।
तन्तुना वेष्टयेत् कुम्भान् गवाक्षसदृशान्तरम् ।
प्रक्षाळ्य सद्यमन्त्रेण कुम्भान् सर्वानधोमुखान् ।। ११ ।।

दर्भोपरि न्यसेत्तत्र प्रोक्षयेत्पुरुषेण तु ।
शिवाख्यं कलशं मध्ये स्थापयेत् तण्डुलोपरि ।। १२ ।।
वर्धनीं चोत्तरे तस्य स्थापयेत्तु विचक्षणः ।
शिवाख्यं पञ्चरत्नाम्बु वर्धनीहेमसंयुता ।। १३ ।।
सकूर्चौ सापिधानौ च वस्त्रयुग्मेन वेष्टितौ ।
सदाशिवं यजेत्कुम्भे वर्धन्यां तु मनोन्मनीम् ।। १४ ।।
पूजयित्वा विशेषेण गन्धपुष्पादिभिः क्रमात् ।
पाद्यं तु पूर्वतस्स्थाप्याचमनं दक्षिणे न्यसेत् ।। १५ ।।
अर्घ्यं तु पश्चिमे स्थाप्य पञ्चगव्यं तथोत्तरे ।
आग्नेयादिषु कोणेषु गन्धोदकं न्यसेत्ततः ।। १६ ।।
वस्त्रेण वेष्टयेत्सर्वान् सकूर्चान् सापिधानकान् ।
वामादिशक्तयश्चाष्टौ शक्रादिषु क्रमान्न्यसेत् ।। १७ ।।
मधुकुष्ठं गळं चैव क्षीरं च सर्षपं तथा ।
लवङ्गं चैव तक्कोलं दधिमेघं तिलं तथा ।। १८ ।।
उशीरं च घृतं चैव शकृच्चूर्णं तु सक्तुकम् ।
नाळिकेरं च हारिद्रं पूर्वादिषु क्रमान्न्यसेत् ।। १९ ।।
सकूर्चं सापिधानं च प्रत्येकं वस्त्रवेष्टितम् ।
लोकपालांस्तथा दिक्षु विद्येशानष्टदिक्षु वै ।। २० ।।
पूजयेद्गन्धपुष्पाद्यैः स्वनाम्ना देशिकोत्तमः ।
गर्भगेहं ततः प्राप्य निर्माल्यं तु विसर्जयेत् ।। २१ ।।
लिङ्गशुद्ध्यादिकं सर्वमर्चनोक्तं समाचरेत् ।
शिवकुम्भं ततोद्धृत्य स्नापयेत्परमेश्वरम् ।। २२ ।।

वर्धनीं तु ततोद्धृत्य पिण्डिकामभिषेचयेत् ।
व्योमव्यापि समुच्चार्य पञ्चब्रह्म षडङ्गकैः ॥ २३ ॥
संस्नाप्य कलशाद्भिस्तु पूजयेत्तु सदाशिवम् ।
प्रभूतं हविषं दत्वा निर्माल्यं तु विसर्जयेत् ॥ २४ ॥
निवेदयेत्तु ताम्बूलं मुखवाससमन्वितम् ।
देशिकं पूजयेत्तत्र वस्त्रहेमाङ्गुळीयकैः ॥ २५ ॥
भक्तानां परिचाराणां यथाशक्त्या सदक्षिणाः

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

पञ्चविंशतिस्नपनविधिपटलः षट्त्रिंशत्तमःसमाप्तः

अथ एकोनपञ्चाशत्स्नपनविधिपटलप्रारम्भः

वक्ष्ये ह्येकोनपञ्चाशत्स्नपनस्य विधिक्रमम् ।
मन्दिरस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ १ ॥
नवहस्तमष्टहस्तं वा सप्तहस्तमथापि वा ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ २ ॥
वितानदर्भमालाभ्यां मुक्तादामविभूषितम् ।
अष्टमङ्गळसंयुक्तं मङ्गळाङ्कुरशोभितम् ॥ ३ ॥
गोमयालेपनं कृत्वा निम्नोन्नतविवर्जितम् ।
सद्येन प्रोक्ष्य तन्मध्ये सूत्रपातं तु कारयेत् ॥ ४ ॥
प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च ।
मध्ये नवपदं ग्राह्य लेपयेत् परितः पदम् ॥ ५ ॥
द्वाराष्टकसमायुक्तं तालमात्रपदं भवेत् ।
स्थण्डिलं शालिभिः कुर्यात्तन्मध्येऽब्जं समालिखेत् ॥ ६ ॥
लाजपुष्पतिलैर्दर्भैः विकिरेत्तु विशेषतः ।
कलशान् लक्षणोपेतान् चतुःप्रस्थेन पूरितान् ॥ ७ ॥
सूत्रेण वेष्टयेत्सर्वान् गवाक्षसदृशान्तरान् ।
कलशान् क्षाळयेत्पश्चात् तन्मन्त्रेण सुवृत्ततः ॥ ८ ॥
पुण्याहं वाचयेद्धीमान् स्थापनं तु समारभेत् ।
मध्यमे शिवकुम्भं तु गन्धतोयेन पूरितम् ॥ ९ ॥
पञ्चरत्नसमायुक्तं सकूर्चं सापिधानकम् ।
वस्त्रयुग्मेन संवेष्ट्य पूजयेत्तु सदाशिवम् ॥ १० ॥
वर्धनीं चोत्तरे स्थाप्य स्थण्डिलोपरि विन्यसेत् ।
सकूर्चां सापिधानां च वस्त्रहेमाम्बुपूरिताम् ॥ ११ ॥
मनोन्मनीं यजेत्तत्र गन्धपुष्पादिभिः क्रमात् ।
स्थापयेत्कलशान् पश्चात् द्रव्येण समपूरयेत् ॥ १२ ॥

पाद्यमाचमनं चार्घ्यं गव्यं पूर्वादिदिक्षु वै ।
क्षीरं दधि घृतं चैव मध्वन्नादि विदिक्षु च ॥ २३ ॥
तक्कोलं भस्मनिर्यासं गिरिबेरं च मञ्जरीम् ।
नाळिकेरं च बिल्वं च जम्बूकच्चोलमेव च ॥ २४ ॥
पाटली चैव पुन्नागं शङ्खपुष्पं तथैव च ।
लक्ष्मी व्याघ्री नखी सिंही धुतूरं चैव षोडश ॥ २५ ॥
द्रव्याण्येतानि सर्वाणि द्वितीयावरणे न्यसेत् ।
दूर्वा च सर्षपं त्वाम्रं नारङ्गं पनसं तथा ॥ २६ ॥
कदळी शतपत्रं च धातकी श्वेतपद्मकम् ।
इक्षुसारं च लाजं च चम्पकं गन्धतैलकम् ॥ २७ ॥
नीवारं कुङ्कुमं चैव तिलमाञ्जिमुरं तथा ।
सक्तु वै मातुलुङ्गं च चन्दनं चागुरुं तथा ॥ २८ ॥
उशीरं च निशाचूर्णं तृतीयावरणस्य तु ।
इन्द्राद्यानष्टविद्येशान् प्रथमावरणे न्यसेत् ॥ २९ ॥
तत्तत्स्वनाममन्त्रैश्च गन्धपुष्पादिभिर्यजेत् ।
लोकपालान् वसूंश्चैव द्वितीयावरणे न्यसेत् ॥ ३० ॥
विघ्नेशं द्वादशादित्यान् तथैकादशरुद्रकान् ।
पूर्वादिषु क्रमेणैव तृतीयावरणे न्यसेत् ॥ ३१ ॥
तत्तत्स्वनाममन्त्रैश्च गन्धपुष्पादिभिः क्रमात् ।
पूजयेत्तु विशेषेण पदं प्रति पदं प्रति ॥ ३२ ॥
प्रविश्य गर्भगेहं तु लिङ्गपीठस्थलं क्रमात् ।
शुद्धिं कृत्वा विशेषेण पश्चात् स्नपनमारभेत् ॥ ३३ ॥
शिवकुम्भं ततोद्धृत्य लिङ्गमध्ये शिवं यजेत् ।
तत्कुम्भस्योदकैरेव स्नापयेत्परमेश्वरम् ॥ ३४ ॥

वर्धनीं च ततोद्धृत्य पिण्डिकायां मनोन्मनीम् ।
विन्यस्य स्नापयेत्तस्यां कलशैश्च शिवं तथा ।। ३५ ।।
शिवकुम्भाम्भसा लिङ्गं पिण्डिकायां मनोन्मनीम् ।
विद्येशकलशाद्भिस्तु स्नापयेदभितः क्रमात् ।। ३६ ।।
स्नापयेत् पूजयेद्धीमानर्चनोक्तं विशेषतः ।
प्रभूतहविषं दत्वा ताम्बूलं तु निवेदयेत् ।। ३७ ।।
आचार्यं पूजयेदन्ते वस्त्रहेमाङ्गुळीयकैः ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।। ३८ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

एकोनपञ्चाशत्स्नपनविधिपटलः सप्तत्रिंशत्तमः समाप्तः

अथ अष्टोत्तरशतस्नपनविधिपटलप्रारम्भः

अष्टोत्तरशतं वक्ष्ये स्नपनं भुक्तिमुक्तिदम् ।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ॥ १ ॥
प्रोक्षणान्ते प्रतिष्ठान्ते चोत्सवान्ते विशेषतः ।
सङ्क्रान्तौ वाऽप्यमावास्यां षडशीतिमुखेऽपि वा ॥ २ ॥
सिनीवाल्यां कुहौ चैव ह्याद्रायां तु विशेषतः ।
राजाभिषेकसमये तस्य जन्मदिनेऽपि च ॥ ३ ॥
अन्यस्मिन् मङ्गळे कार्ये प्रायश्चित्ते विशेषतः ।
स्नपनं कारयेद्धीमान् सर्वपापनिकृन्तनम् ॥ ४ ॥
भवनस्याग्रतः कुर्यात् मण्टपं चतुरश्रकम् ।
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकौ ॥ ५ ॥
विप्रादीनां क्रमाद्ग्राह्यं षोडशस्तम्भसंयुतम् ।
पङ्क्तित्रयसमायुक्तं पङ्क्तिमानमधोच्छ्रयम् ॥ ६ ॥
तलोत्सेधं युगाङ्गुल्यं दर्पणोदरसन्निभम् ।
युगद्वारसमायुक्तं वेदतोरणभूषितम् ॥ ७ ॥
वितानदर्भमालाभिः स्नपनैर्विविधैर्युतम् ।
वितानध्वजसंयुक्तं मुक्तादामविराजितम् ॥ ८ ॥
अष्टमङ्गळसंयुक्तं मङ्गलाङ्कुरशोभितम् ।
गोमयालेपितं कृत्वा तरङ्गेणैव वेष्टयेत् ॥ ९ ॥
शिवाम्भसा तु सम्प्रोक्ष्य सूत्रपातं तु कारयेत् ।
पूर्वाग्रं तु कलासूत्रं शालिपिष्टोक्तरज्जुना ॥ १० ॥
उदगग्रं तथैव स्याद्रन्ध्रतालप्रमाणतः ।
पञ्चपञ्चपदं मध्ये परितोऽपि पदं त्यजेत् ॥ ११ ॥
एकविंशतिकोणेषु द्वारा याम्यानि वर्ज्ययेत् ।
मध्यमे तु शिवव्यूहम् आग्नेयादिविदिक्षु च ॥ १२ ॥

व्यूहं चैव तु चत्वारो धर्मज्ञानादयः क्रमात् ।
तन्मध्ये शालिभिश्चैव स्थण्डिलं कारयेत्ततः ॥ १३ ॥
शालीनामाढकं श्रेष्ठं त्रिप्रस्थं मध्यमं भवेत् ।
द्विप्रस्थमधमं प्रोक्तं कलशानां पृथक् पृथक् ॥ १४ ॥
शिवं वै शिवकुम्भस्य षट्प्रस्थं वर्धनी स्मृतम् ।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ॥ १५ ॥
लाजपुष्पतिलैर्दर्भैः विकिरेत्तु विशेषतः ।
प्रागग्रं चोत्तराग्रैश्च व्यूहेषु च परिस्तरेत् ॥ १६ ॥
पुण्याहं वाचयेत्तत्र स्थापयेत् कलशान् स्थितान् ।
काळं भिन्नं च सुषिरं छेदं भेदं च लीनकम् ॥ १७ ॥
दुर्गन्धं च पुराणं च वर्जयेद्देशिकोत्तमः ।
काळं च कलहं विद्यात् भिन्नं चैव कुलक्षयम् ॥ १८ ॥
महावातप्रकोपं च सुषिरं च विशेषतः ।
छेदं विच्छेदनं कुर्यात् भेदं बाधाय वै तथा ॥ १९ ॥
लीनं व्याधिकरं चैव दुर्गन्धं बालनाशनम् ।
स्त्रीनाशं स्यात्पुराणं तु सङ्गहेत् बिम्बसन्निभम् ॥ २० ॥
तस्मात्सर्वप्रयत्नेन दोषयुक्तं विवर्जयेत् ।
कलशान् वेष्टयेद्विद्वान् एकद्वित्रिकतन्तुभिः ॥ २१ ॥
एकद्वित्रियवान्तं स्याच्छिवकुम्भं च वर्धनीम् ।
अन्यांश्च कलशांश्चैव गवाक्षसदृशान्तरान् ॥ २२ ॥
मण्टपस्योत्तरे विद्वान् दर्भैश्चैव परिस्तरेत् ।
क्षाळयेत्कलशांस्तत्र प्रोक्षयेत्पुरुषेण तु ॥ २३ ॥
अधोमुखांश्च कलशान् स्थापयेत्तु कुशोपरि ।
कलशानां स्वरूपाणां पादपृष्ठे मुखोद्भवम् ॥ २४ ॥
दन्तोष्ठरसजिह्वानि अस्थिमांसरुधिरस्तथा ।
स्त्रीपुन्नपुंसकं दायजातिच्छन्दविकल्पनम् ॥ २५ ॥

ब्राह्म्यं दैविकमानुष्यं पैशाचं कलशं स्मृतम् ।
अत्यन्तरक्तवर्णानि कांस्यध्वनिसमन्वितम् ।। २६ ।।
एवं लक्षणसंयुक्तं दैविकं कलशं स्मृतम् ।
श्वेतं रक्तं तथा मिश्रं भिन्नं कांस्यध्वनिर्युतम् ।। २७ ।।
पूर्वशब्दसमायुक्तं ब्राह्मिकं कलशं स्मृतम् ।
कृष्णरक्तं तथा श्वेतं धूम्रवर्णसमन्वितम् ।। २८ ।।
दिशोदिशे शब्दभिन्नं मानुष्यं कलशं स्मृतम् ।
सर्ववर्णसमायुक्तमेकवर्णेन भूषितम् ।। २९ ।।
मृत्तिकाशब्दसंयुक्तं पैशाचं कलशं स्मृतम् ।
स्त्रीणां ब्रह्मादरं चैव पुंलिङ्गं वाग्भवं बृहत् ।। ३० ।।
आमूलाग्रसमं चैव नपुंसकघटानि च ।
भार्गवं मुखमित्याहुरोष्ठान्तं ग्रीवमुच्यते ।। ३१ ।।
स्वरूपं रूपमित्याहुः स्थण्डिलं पादमेव च ।
भूयस्था पृष्ठमेवोक्तं पुष्पमाला च बाहुकौ ।। ३२ ।।
सूत्रमाभरणं यच्च कूर्चं जिह्वा विशेषतः ।
दन्तच्छिन्नं च पुष्पाणि जलेन प्राणमेव च ।। ३३ ।।
अस्थिरादधरे प्रोक्तं चर्मालङ्कृतवस्त्रकम् ।
शोणितं रक्तमृत्तेन शब्दं वै जलशब्दवत् ।। ३४ ।।
प्रोक्षयेद्धृदयेनैव कलशोन्मीलनं कुरु ।
जलद्रोण्या जलं चैव वस्त्रेणैव तु शोधयेत् ।। ३५ ।।
मध्यमे शिवकुम्भं तु पञ्चरत्नाम्बुसंयुतम् ।
मध्यव्यूहस्य सौम्ये तु वर्धनीं स्थापयेद्धृदा ।। ३६ ।।
हेमतोयसमायुक्तं कल्पयेत्कल्पवित्तमः ।
स्थापयेत्कलशान् सर्वान् पश्चाद्द्रव्याणि विन्यसेत् ।। ३७ ।।
पाद्यमाचमनं चार्घ्यं गव्यं पूर्वादिदिक्षु च ।
दधिसर्पिमधुक्षीरम् आग्नेयादिविदिक्षु वै ।। ३८ ।।

तिलं च बिल्वपत्रं च चन्दनं मेघमेव च ।
चणकं हरिबेरं च सर्षपं नागकेसरम् ॥ ३९ ॥
तक्कोलं च फलं कुष्ठं कच्चोलं चैव लोहकम् ।
लवङ्गं पत्रकर्पूरं विन्यसेत्तु क्रमेण तु ॥ ४० ॥
द्रव्याणि षोडशैतानि पूर्वदिक्षु क्रमान्न्यसेत् ।
तृतीयावरणे सक्तूनाग्नेयादिषु पञ्चसु ॥ ४१ ॥
नैर्ऋत्यां विन्यसेद्भस्म हारिद्रं वायवे न्यसेत् ।
ऐशान्यां तु शकृच्चूर्णं क्रमेणैव तु विन्यसेत् ॥ ४२ ॥
धात्रीमग्नौ न्यसेत्तत्र नैर्ऋत्यां पदसप्तसु ।
नाळिकेरं न्यसेत्तत्र वायव्ये लिंकुचं न्यसेत् ॥ ४३ ॥
मातुलुङ्गं न्यसेदीशे कलशेषु च सप्तसु ।
पञ्चमावरणे लक्ष्मीं कलशेषु नवस्वपि ॥ ४४ ॥
कलशेषु च नैर्ऋत्यां सह देवीं च विन्यसेत् ।
विष्णुक्रान्तं न्यसेद्वायौ कलशेषु यथाक्रमम् ॥ ४५ ॥
रुद्रपर्णीं न्यसेदैशे कलशेषु नवस्वपि ।
उत्तमं नवकाशैस्तु सप्तकाशैस्तु मध्यमम् ॥ ४६ ॥
अधमं पञ्चकाशैस्तु रुद्रधर्मग्रहायुतम् ।
ग्रन्थिरेकाङ्गुलं प्रोक्तमग्रं तु चतुरङ्गुलम् ॥ ४७ ॥
ग्रन्थिं तद्दक्षिणावर्तं कूर्चानां लक्षणं त्विदम् ।
उर्ध्वाग्रं पुष्टिदं प्रोक्तमधोग्रं शान्तिकं भवेत् ॥ ४८ ॥
सुसितं सूक्ष्मसुश्लक्ष्णमहतं सदशं भवेत् ।
उत्तमं सप्तहस्तं स्यात् षड्ढस्तं मध्यमं भवेत् ॥ ४९ ॥
अधमं पञ्चहस्तं स्यात् वस्त्रलक्षणमुच्यते ।
असितं स्थाननाशं स्यादसूक्ष्मं निधनं भवेत् ॥ ५० ॥
अश्लक्ष्णं ग्रामनाशं स्यात् राष्ट्रनाशमलक्षणम् ।
सदाशिवं यजेत्कुम्भे वर्धन्यां तु मनोन्मनीम् ॥ ५१ ॥

सकूर्चौ सापिधानौ च वस्त्रयुग्मसमावृतौ ।
पूजयेत्तु विशेषेण गन्धपुष्पादिभिः क्रमात् ।। ५२ ।।
प्रथमावरणे यद्वा वामादिनवशक्तयः ।
द्वितीयावरणे चाष्टलोकपालांश्च दिक्षु वै ।। ५३ ।।
अन्तराळे तथाचाष्ट विद्येशांश्च प्रपूजयेत् ।
तृतीयावरणे चैव विघ्नेशं चैव पञ्चसु ।। ५४ ।।
निर्ऋतौ च तथा स्कन्दं वायौ नन्दीशमेव च ।
तथैशेऽपि महाकाळं पूजयेत्तु विशेषतः ।। ५५ ।।
चतुर्थावरणे चाग्नौ गङ्गां सप्तपदेषु च ।
निर्ऋतौ च तथा लक्ष्मीं वायौ सरस्वतीं तथा ।। ५६ ।।
दुर्गामीशानदिग्भागे पदेष्वेव सुसप्तसु ।
पञ्चमावरणे चाग्नौ सूर्यरन्ध्रपदेषु च ।। ५७ ।।
निर्ऋतौ चैव भृङ्गीशं पदेषु च नवस्वपि ।
वायौ नवपदेष्वेव तथैशे तु पदेषु च ।। ५८ ।।
यथा क्रमेण गन्धाद्यैः अश्विनीं सम्प्रपूजयेत् ।
सकूर्चान् सापिधानांश्च सवस्त्रान् कलशांस्तथा ।। ५९ ।।
ईशस्याभिमुखान् देवान् सर्वान् कलशहस्तकान् ।
सम्पूज्य गन्धपुष्पाद्यैः पदं प्रति पदं प्रति ।। ६० ।।
द्वारपूजां ततः कृत्वा पुर्वोक्तविधिना सह ।
गर्भगेहं प्रविश्याथ निर्माल्यं तु विसर्जयेत् ।। ६१ ।।
घण्टां तु ताडयेत्तत्र यवनीमपनीय च ।
लिङ्गशुद्ध्यादिकं सर्वं प्रागुक्तविधिना ततः ।। ६२ ।।
हृदयेन तु मन्त्रेण शिवकुम्भं तथोद्धरेत् ।
शिवमन्त्रं न्यसेल्लिङ्गे तत्तोयेना भिषेचयेत् ।। ६३ ।।
वर्धनीं तु ततोद्धृत्य न्यसेच्छक्तिं तु पिण्डिके ।
वर्धनीसलिलेनैव पिण्डिकामभिषेचयेत् ।। ६४ ।।

यथा संस्थापितास्सर्वे तथा चोद्धारणं कुरु ।
पञ्चब्रह्मषडङ्गैश्च व्योमव्यापिपदैस्तथा ।। ६५ ।।
क्षुरिकाबीजमुख्याभ्यां स्नापयेदादिशैवकः ।
अर्चनोक्तं समारभ्य प्रभूतहविषं ददेत् ।। ६६ ।।
सव्यापसव्यमार्गेण त्रिःकृत्वा तु प्रदक्षिणम् ।
प्रणम्य परिवाराणि क्षमस्वेति वदेद्गुरुः ।। ६७ ।।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुळीयकैः ।
सुवर्णं शालिवस्त्राणि चान्योपकरणानि च ।। ६८ ।।
देशिकाय प्रदातव्यं भक्तांश्च परिचारकान् ।
दीनाननाथान् तत्काले पूजयेत्तु विशेषतः ।। ६९ ।।
महेशस्नपनं चेत्तु विशेषं किञ्चिदस्ति हि ।
कुम्भे यजेन्महेशं तु वर्धन्यां तु गणाम्बिकाम् ।। ७० ।।
अन्येषां सर्वकर्माणामविशेषं प्रजापते ।
नैमित्तिके तथा यागे वर्तमाने च बुद्धिमान् ।। ७१ ।।
काले च त्वयने प्राप्ते तत्कर्मेण सहैव तु ।
विशेषस्नपनं चैव कारयेत्तु विशेषतः ।। ७२ ।।
नित्यकर्माणि सर्वाणि प्रकुर्वीत विशेषतः ।
एवं यः कुरुते मर्त्यः स्नपनं विधिपूर्वकम् ।। ७३ ।।
इहैव धनवान् श्रीमान् सोऽन्ते सायुज्यमाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

अष्टोत्तरशतस्नपनविधिपटलः अष्टत्रिंशत्तमः समाप्तः

अथ महास्नपनविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण महास्नपनमुत्तमम् ।
सर्वविघ्नविनाशार्थं सर्वशान्तिकरं परम् ।। १ ।।
प्रासादस्याग्रके वापि मण्डपं कारयेत्ततः ।
दक्षिणे चोत्तरे वापि सकुधां मन्त्रवित्तमः ।। २ ।।
क्षेत्रं परिग्रहेत्पूर्वमस्त्रमन्त्रेण मन्त्रवित् ।
विंशद्धस्तप्रमाणेन कल्पयेच्चतुरश्रकम् ।। ३ ।।
षट्त्रिंशद्गात्रसंयुक्तं मध्ये वेदाङ्घ्रिकां न्यसेत् ।
श्रुतिद्वारसमायुक्तं चतुस्तोरण संयुतम् ।। ४ ।।
वितानेनोर्ध्वमाच्छाद्य गात्रं वस्त्रेण वेष्टयेत् ।
दर्भमाला समायुक्तं दिग्ध्वजैश्च प्रलम्बितम् ।। ५ ।।
मुक्तास्रग्दामविविधैस्तरङ्गेणावृतं बहिः ।
प्रथमं शोधयेद्भूमिमालेपनद्वितीयकम् ।। ६ ।।
तृतीयं सूत्रविन्यासं चतुर्थं स्थण्डिलं भवेत् ।
पञ्चमं कलशन्यासं कूर्चन्यासं तु षष्ठकम् ।। ७ ।।
सप्तमं द्रव्यविन्यासं देवतान्यासमष्टमम् ।
शरावं नवमं चैव दशमं सूत्रवेष्टनम् ।। ८ ।।
एकादशं गन्धपुष्पं द्वादशं धूपदीपकम् ।
मुद्रा त्रयोदशं प्रोक्तं प्रोक्षणं तु चतुर्दशम् ।। ९
पञ्चदश्यां घटोद्धारं षोडशं स्नपनं भवेत् ।
अस्त्रेण शोधयेद्भूमिं वामदेवेन लेपयेत् ।। १०
सूत्रन्यासमघोरेण स्थण्डिलं पुरुषेण तु ।
हृदयेन न्यसेत्कुम्भमीशानेन न्यसेत्कुशान् ।। ११ ।।
मूलेन विन्यसेद्द्रव्यं सद्येन देवतां न्यसेत् ।
शरावं बीजमुख्येन वस्त्राणि हृदयेन तु ।। १२ ।।

ईशानेनैव गन्धादीन् धूपादीन् कवचेन तु ।
अघोरेणास्त्रमुद्रां तु वाचयेत्पवमानकम् ॥ १३ ॥
प्रोक्षयेत्तु विशेषेण पुण्याहं तु यथार्हकम् ।
प्रणवेन घटोद्धारं महाव्योमेति मन्त्रतः ॥ १४ ॥
पञ्चब्रह्मषड्गैश्च पूजयेत्परमेश्वरम् ।
मण्डपस्य तु तन्मध्ये हस्तसूत्रान्तरं ततः ॥ १५ ॥
पूर्वापरेण मार्गेण युग्मसूत्रं तु कारयेत् ।
दक्षिणोत्तरमार्गेण सूत्रपातं तथा चरेत् ॥ १६ ॥
तस्य मध्ये न्यसेत्शङ्कुं समन्त्रान् भ्रामयेद्बुधः ।
एकविंशतिसूत्राणि वृत्तवत्कारयेद्बुधः ॥
तालं सूत्रान्तरं प्रोक्तं विंशत्यावरणे क्रमात् ॥ १७ ॥
द्वारार्धकं महाशासु भ्रमन् सूत्राणि सन्त्यजेत् ।
स्थन्डिलं कारयेन्मध्येऽप्यष्टद्रोणैश्च शालिभिः ।
तन्मध्ये विलिखेत्पद्मं साष्टपत्रं सकर्णिकम् ॥ १८ ॥
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ।
लाजपुष्पकुशैस्तीर्य पूजयेद्धृदयेन तु ॥ १९ ॥
स्थण्डिलं शालिभिश्चैव कारयेत्कलशं प्रति ।
लाजपुष्पतिलैर्दर्भैर्विकिरेत् समलङ्कृतम् ॥ २० ॥
मण्टपस्योत्तरे देशे दर्भोपरि विशेषतः ।
तन्तुना चित्रितान् कुम्भान् साधयेद्विधिपूर्वकम् ॥ २१ ॥
जलधारीं समादाय शुद्धिं कृत्वा तु विन्यसेत् ।
वस्त्रेणाच्छाद्य वक्त्रञ्चाप्युदकं तत्र पूरयेत् ॥ २२ ॥
शिवकुम्भं न्यसेन्मध्ये गन्धोदकं प्रपूजयेत् ।
सकूर्चं सापिधानं च वस्त्रयुग्मेन वेष्टयेत् ॥ २३ ॥

पद्ममुद्रां प्रदर्श्याथाप्यर्चयेत्तु सदाशिवम् ।
तस्योत्तरे तु विन्यस्य वर्धनीं हेमतोयकाम् ॥ २४ ॥
सकूर्चां सापिधानां च वस्त्रयुग्मेन वेष्टिताम् ।
गन्धपुष्पादिभिश्चैव पूजयेत्तु मनोन्मनीम् ॥ २५ ॥
प्रथमावरणेऽष्टासु कलशेषु विशेषतः ।
आग्नेयादिषु कोणेषु नवरत्नानि विन्यसेत् ॥ २६ ॥
द्वितीयावरणे चैव षोडशान् कलशान् न्यसेत् ।
चतुर्विंशतिकं प्रोक्तं तृतीयावरणे तथा ॥ २७ ॥
द्वात्रिंशत्कलशान् सम्यक् चतुर्थावरणे न्यसेत् ।
पञ्चमावरणे चैव षट्पञ्चाशद्विधीयते ॥ २८ ॥
षष्ठ आवरणे चैव चतुष्षष्टिघटान् न्यसेत् ।
सप्तमावरणे चैव द्विसप्ततिः क्रमेण तु ॥ २९ ॥
चतुरशीतिकलशानष्टमावरणे न्यसेत् ।
घटान् षण्णवतीन् चैव नवमावरणे तथा ॥ ३० ॥
दशमावरणे चैव शतमेवं प्रकीर्तितम् ।
रुद्रावरणके चैव कलशांश्च चतुश्शतम् ॥ ३१ ॥
द्वादशावरणे तत्राऽप्यष्टोत्तरशतं भवेत् ।
त्रयोदशाऽवरणे तु षट्भिर्दशशतं क्रमात् ॥ ३२ ॥
बाह्यकावरणे चैव न्यसेद्विंशच्छतं तथा ।
प्रदक्षिणक्रमेणैव यजेदावरणं प्रति ॥ ३३ ॥
द्व्यन्तरे द्व्यन्तरे चैव वीधिषट्कं प्रकल्पयेत् ।
पाद्याधिभिस्सहस्रं तु स्थापयेदीशमन्त्रतः ॥ ३४ ॥
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ।
क्षीरं दधि घृतं चैव प्रथमावरणे न्यसेत् ॥ ३५ ॥

द्वितीयावरणे चैव सुवर्णं प्रक्षिपेत्ततः ।
तृतीयावरणे न्यस्त्वा नाळिकेरफलं क्रमात् ॥ ३६ ॥
चतुर्थावरणे चैव न्यसेदिक्षुरसं तथा ।
पञ्चमावरणे चैव मधु विन्यस्य देशिकः ॥ ३७ ॥
नानाकुसुमसंयुक्तं षष्ठे तु विन्यसेत्क्रमात् ।
सप्तमावरणे चैव सर्वबीजानि विन्यसेत् ॥ ३८ ॥
अष्टमावरणे चैव विन्यसेत्कदळीफलम् ।
गोमयं शोषयित्वा तु शुद्धदेशे दहेत्पुनः ॥ ३९ ॥
तद्भस्मना ततोद्धृत्य निक्षिपेन्नवमं क्रमात् ।
पञ्चगव्येन संयुक्तं दशमावरणे क्रमात् ॥ ४० ॥
एकादशे विशेषेण कषायं तत्र विन्यसेत् ।
द्वादशावरणे सम्यक् धातुलोहानि विन्यसेत् ॥ ४१ ॥
विन्यसेत्तु क्रमेणैव अक्षतं तु त्रयोदश ।
वल्मीकादिमृदं ग्राह्य बाह्यकावरणे न्यसेत् ॥ ४२ ॥
सर्वगन्धं समाहृत्य सर्वकुम्भेषु निक्षिपेत् ।
पूजिता कलशा ह्येतैः यथालाभमथापि वा ॥ ४३ ॥
कलशेषु जलैः पूर्य यथालाभं तु निक्षिपेत् ।
एतेषामप्यलाभे तु यद्द्रव्यं तु स्मरेद्बुधः ॥ ४४ ॥
तद्द्रव्यं तं च सङ्कल्प्य पुष्पैर्वापि विनिक्षिपेत् ।
विधिना वस्त्रकूर्चाभ्यां प्रत्येकं कलशान् क्रमात् ॥ ४५ ॥
अनन्तादि शिखण्ड्यन्ता प्रथमावरणे यजेत् ।
द्वितीये चैव चण्डेशं नन्दीशं च तृतीयके ॥ ४६ ॥
महाकाळं चतुर्थे तु विघ्नेशं पञ्चमे यजेत् ।
षष्ठे तु वृषभं पूज्य भृङ्गीशं सप्तमे यजेत् ॥ ४७ ॥

अष्टमावरणे स्कन्दमनन्तं नवमे यजेत् ।
पिनाकपाणिं दशमे बाह्ये तु जयभद्रकम् ॥ ४८ ॥
द्वादशावरणे चैव विरूपाक्षं प्रपूजयेत् ।
त्रयोदशे यजेत्सूक्ष्मं तद्बाह्ये पिङ्गलेक्षणम् ॥ ४९ ॥
गन्धपुष्पादिभिश्चैव स्वनामाद्यैर्विशेषतः ।
घटं प्रति यजेदेतान् तत्तदावरणेषु च ॥ ५० ॥
वालुकैश्च महाशासु स्थण्डिलं तु प्रकल्पयेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ५१ ॥
समिदाज्यचरुं चैव सद्यवामास्त्रमन्त्रकैः ।
प्रत्येकं तु शतं हुत्वा द्रव्यान्ते व्याहृतिं हुनेत् ॥ ५२ ॥
पञ्चब्रह्मषडङ्गैश्च मूलेनैव दशाक्षरैः ।
प्रत्येकं जुहुयाद्धीमान् पञ्चविंशतिसङ्ख्यया ॥ ५३ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं तु शिरसा यदस्येति तदन्तके ॥ ५४ ॥
उक्तानुक्तं तु यत्किञ्चित्तत्सर्वं हृदयेन तु ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुळीयकैः ॥ ५५ ॥
कन्यसं पञ्च निष्कं तु द्विगुणं मध्यमं भवेत् ।
त्रिगुणं चोत्तमं प्रोक्तं देशिकस्य तु दक्षिणा ॥ ५६ ॥
दक्षिणां दापयित्वा तु मूर्तिपानथ पूजयेत् ।
द्वारपूजादिकं सर्वमर्चनोक्तं तु कारयेत् ॥ ५७ ॥
शिवकुम्भं ततोद्धृत्य मन्त्रलिङ्गे तु विन्यसेत् ।
तत्कुम्भस्थजलेनैव स्नापयेत्परमेश्वरम् ॥ ५८ ॥
वर्धन्यां बीजमादाय न्यसेल्लिङ्गस्य वामके ।
पिण्डिकायां जलैश्चैव स्नापयेत्तु विशेषतः ॥ ५९ ॥

यथा संस्थापितान् कुम्भान् तथा चोद्धारणं कुरु ।
संस्नाप्य देवदेवेशमर्चनोक्तं समाचरेत् ॥ ६० ॥
प्रभूतहविषं दत्वा ताम्बूलं तु निवेदयेत् ।
भक्तांश्च परिचारांश्च दीनानन्धान् प्रपूजयेत् ॥ ६१ ॥
स्नपनाङ्गानि वस्त्राणि देशिकाय प्रदापयेत् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ ६२ ॥
स्नकारं सर्वसिद्धिस्स्यात् पकारं स्थितिरुच्यते ।
नकारं पापनाशं स्यात् तस्मात्स्नपनमुच्यते ॥ ६३ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

महास्नपनविधिपटलः एकोनचत्वारिंशत्तमः समाप्तः

अथ चण्डितविधानविधिपटलप्रारम्भः

सप्तसप्तपदकोष्ठमध्यमे नन्दकोष्ठसहितं तु तद्बहिः ।
वीधिरेकपदमावृतं त्यजेद्दिग्विदिक्षु गुणचन्द्रकोष्ठकम् ।।
इति पञ्चविंशतिस्नपनम् ।। १ ।।
नवनवेषु नवेषु च मध्यमे नव तु पङ्कजमध्यमभूतले ।
तद्बहिःपदके तु विवर्जिते दिक्षुविदिक्षु रसवेदपदं क्रमात् ।। २ ।।
इति एकोनपञ्चाशत्स्नपनम् ।।
भुवनसूत्रनिबद्धितभूतले भवतु पञ्चकपञ्चकमध्यमे ।
वीधिरेकपदमावृतं त्यजेत्, भानुदिक्षुविदिक्षुनवग्रहान् ।। ३ ।।
इति अष्टोत्तरशतस्नपनम् ।।
अथ वक्ष्ये विशेषेण चण्डितस्य विधिक्रमम् ।
एकविंशतिसूत्राणि वृत्तवत्कारयेद्बुधः ।। ४ ।।
तालं सूत्रान्तरं प्रोक्तं विंशत्यावरणं क्रमात् ।
द्वारार्थं च महाशासु भ्रमन् सूत्राणि संन्यसेत् ।। ५ ।।
सकळं पदमेकं स्यात् पैशाचं तु चतुष्पदम् ।
चत्वारिंशद्रसरन्ध्यैश्च सार्धपञ्चशतैर्युतम् ।। ६ ।।
एतद्विशालमाख्यातं; विप्रगर्भमथ शृणु ।
पीठं नवपदं प्रोक्तं महापीठं तु षोडश ।। ७ ।।
पञ्चपञ्चपदैस्सार्धमुपपीठमिति स्मृतम् ।
षट्षट्पदसमायुक्तमुग्रपीठमिति स्मृतम् ।। ८ ।।
स्थण्डिले एकोनपञ्चाशन्मण्डूकं चाष्टचाष्टकम् ।
एकाशीतिपदैर्युक्तमिन्द्रकान्तं तु चण्डितम् ।। ९ ।।
शतकोष्ठसमायुक्तमासनं तस्य नामकम् ।
शताष्टपदकैस्सार्धं परमशायिपदं स्मृतम् ।। १० ।।
सप्तद्वयगुणैर्वेदसार्धं स्थानीय नायकम् ।
शतोर्ध्वेष्टाष्टरन्ध्रैश्च पदैर्दशधमुच्यते ।। ११ ।।

ऊर्ध्वे षण्णवतीसार्धं पदं भद्रमिति स्मृतम् ।
शतद्वयमनोपेतं महास्नपनमुच्यते ।। १२ ।।
द्विशतोत्तरभूतेष्टपद्मगर्भपदैर्युतम् ।
पञ्चाशद्द्विशतोपेतं नियुतं तस्य चण्डितम् ।। १३ ।।
आशीतिद्विशतोपेतं वृत्तं भोगमिति स्मृतम् ।
त्रिशताष्टद्वयोपेतं कर्णाष्टकमिदं परम् ।। १४ ।।
षड्विंशत्त्रिशतोपेतं गणिकापदमेव च ।
चतुर्भूतपदं सूर्यं विशालं तस्य चण्डितम् ।। १५ ।।
सुसंहितपदं चैव चत्वारिंशच्चतुर्दश ।
शतदिक्षु शिवारीति पदैस्सुप्रतिकान्तकम् ।। १६ ।।
चत्वारिंशद्रसण्डैश्च सार्धपञ्चाशतैर्युतम् ।
एतद्विशालमाख्यातं विप्रगर्भमथ शृणु ।। १७ ।।
शतैः पञ्चपदोर्ध्वे तु षट्सप्ततिसमायुतम् ।
विप्रगर्भमिदं नाम षडुक्तं पञ्चसंयुतम् ।। १८ ।।
विश्वेशाख्यमिदं नाम विपुलं भोगदं शृणु ।
षड्भिर्युतपदोर्ध्वे तु षट्सप्ततिसमायुतम् ।। १९ ।।
विपुलं भोगदं नाम विप्रतीकान्तमुच्यते ।
नवविंशतिकं सप्तशतं विप्रतिकान्तकम् ।। २० ।।
सप्तशतपदोर्ध्वे तु चतुर शीति संयुतम् ।
विशालाक्षमिदं नाम चण्डितं सर्वसिद्धिदम् ।। २१ ।।
अष्टाशतसुपञ्चाशत्पदं विप्र! सुभक्तिकम् ।
विश्वेशसारमाख्यातं पदं नन्दशतैर्युतम् ।। २२ ।।
शिवषष्ठ्याधिकानन्दशतं चैश्वरकान्तकम् ।
सहस्रैर्वेदषट्कोष्ठमिन्द्रकान्तं तु चण्डितम् ।। २३ ।।
एतत् सुचण्डितं वेद सर्वकर्मानुसाधयेत् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे चण्डितविधानविधिपटलः चत्वारिंशत्तमःसमाप्तः

अथ महाभिषेकविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि महदप्यभिषेचनम् ।
धर्मार्थकाममोक्षार्थं शान्तिकं पौष्टिकं तथा ॥ १ ॥
आयुश्श्रीकीर्तिजयदं व्याधिनाशं रिपुक्षयम् ।
ग्रामवृद्धिकरं पुण्यं सर्वोपहतिनाशनम् ॥ २ ॥
नवाऽहे वाऽथसप्ताऽहे पश्चाऽहे वा त्र्याहके ।
त्रिदिने तद्दिनात्पूर्वरात्रे वाऽङ्कुरमाचरेत् ॥ ३ ॥
यद्वा सद्याङ्कुरं कुर्यादादिशैवः प्रशस्यते ।
रोहिण्यनिलसंयुक्तं पुष्यं वैष्णवमुच्यते ॥ ४ ॥
आदित्यंहस्तमित्युकम् अष्टमी च चतुर्दशी ।
दशमी पूर्णमासी च मासान्तं वा विशेषतः ॥ ५ ॥
कर्तुर्मरणऋक्षं वा ग्रामऋक्षान्तमेव वा ।
नृपजन्मावसानर्क्षं प्रतिष्ठानान्तऋक्षकम् ॥ ६ ॥
नवाऽहं सौख्यदं प्रोक्तं सप्ताहं देविकं परम् ।
पश्चाहं शान्तिकं प्रोक्तं त्र्याहं तु शिवप्रियम् ॥ ७ ॥
एकाहं रोगशान्त्यर्थं तस्मात्सम्पूजयेच्छिवम् ।
पूर्वरात्रौ तु कर्तव्यं निर्वाणदीपमाचरेत् ॥ ८ ॥
क्षीराभिषेचनं कृत्वा कौतुकं बन्धयेत्ततः ।
शिवप्रस्थं तु नैवेद्यं पायसं हविषं ददेत् ॥ ९ ॥
प्रातस्स्नात्वा शुचिर्भूत्वा देशिकश्शिष्यसंयुतः ।
गोमयालेपनं कृत्वा पुण्याहप्रोक्षणं ततः ॥ १० ॥
जलभाण्डं वर्धनीं च कलशं पुष्पपात्रकम् ।
पाटलीसदृशाकारं सर्वलक्षणसंयुतम् ॥ ११ ॥
सर्वपात्रं ततः कृत्वा क्षाळयेत्तत्वमन्त्रतः ।
दर्भासनोपरि स्थाप्य कवचेनावकुण्ठनम् ॥ १२ ॥

निरीक्षणं हृदा चैव प्रोक्षणं पुरुषेण तु ।
ताडनं हुम्फडन्तेन स्पर्शनं सद्यमन्त्रतः ।। १३ ।।
मीलनं नेत्रमन्त्रेण मण्डपस्योत्तरे स्थितम् ।
वस्त्रपूतं हि सलिलं जलभाण्डे परिग्रहेत् ।। १४ ।।
उदयादेव कर्तव्यं रात्रान्ते वा जलं ग्रहेत् ।
वर्णगन्धरसैर्हीनं कृमिशैवालकेशकम् ।। १५ ।।
फेनबुद्बुदजुष्टं च तज्जलं परिवर्जयेत् ।
विवर्णं रोगदं पुंसां गन्धहीने रिपोर्भयम् ।। १६ ।।
रसहीने तु दारिद्र्यं कृमियुक्तं भयावहम् ।
शैवलं शोकसन्तापं केशयुग्बालनाशनम् ।। १७ ।।
सर्षपं स्त्रीप्रजानाशं बुद्बुदं सस्यनाशनम् ।
वस्त्रपूतविहीने च मरणं भूभुजां ध्रुवम् ।। १८ ।।
तस्मात्सनिर्मलं तोयं निर्दोषं च परिग्रहेत् ।
एलालवङ्गकर्पूरमगरुं चन्दनं लघु ।। १९ ।।
अम्बुजं चैव तक्कोलं कच्चोलं हरिबेरकम् ।
उशीरं चम्पकं कोष्ठं स्नानद्रव्यमिति स्मृतम् ।। २० ।।
जलभाण्डे विनिक्षिप्य तदम्बु वासितं क्रियात् ।
पश्चाङ्गभूषणैर्युक्तो देशिको मूर्तिपैस्सह ।। २१ ।।
अङ्गन्यासकरन्यासमष्टत्रिंशत्कलां न्यसेत् ।
प्राणप्रकृतियोगेन ज्ञात्वा पूजां समाचरेत् ।। २२ ।।
प्राणो मन्त्र इति प्रोक्तः प्रकृतिः स्थापकं स्मृतम् ।
कुम्भं च वर्धनीं चैव घटं त्रिद्व्येकतन्तुभिः ।। २३ ।।
वेदयित्वाऽथ तद्रन्ध्रं यवमात्रं तु देशिकः ।
स्नपनं पश्चगव्यं च पश्चामृतं प्रकल्पयेत् ।। २४ ।।

स्नानमण्डपमध्ये तु शालिभिः स्थण्डिलं कुरु ।
प्राक्सूत्रं वसुसूत्रं स्यादुदक्सूत्रं तथैव च ।। २५ ।।
सूत्रात्सूत्रान्तरं तालं मध्ये नवपदं ग्रहेत् ।
अभितस्तस्य बाह्ये तु पदमेकं परित्यजेत् ।। २६ ।।
वसुद्वारसमायुक्तं त्यजेद्गोमयवारिणा ।
द्विद्रोणशालिभिः कुर्यात्तिलतण्डुललाजकैः ।। २७ ।।
शालिभिस्तण्डुलैस्त्वर्थैः तस्यार्थैस्तु तिलैस्तथा ।
सूत्रपातं प्रकल्प्याथ दर्भैः पुष्पैः परिस्तरेत् ।। २८ ।।
नवर्षीभूतवेदाग्निशक्तिदर्भैः परिस्तरेत् ।
पूर्वाग्रैश्चोत्तराग्रैश्च पदंप्रति पदम्प्रति ।। २९ ।।
मध्ये तु शिवकुम्भं तु वीधिमध्ये तु वर्धनीम् ।
पाद्यमाचमनं चार्घ्यं कस्तूरी गन्धतैलकम् ।। ३० ।।
नीवारं कुङ्कुमं चैव मुरं माञ्जीतिलं तथा ।
प्रथमावरणेचैव कलशानष्टदिक्षु च ।। ३१ ।।
द्वितीयावरणे चैव पूर्वादिषु प्रकल्पयेत् ।
मधुकुष्ठं गुडश्चैव ह्रीबेरं चन्दनं तथा ।। ३२ ।।
तक्कोलं जातिकल्हारं शतपत्रं च मालती ।
द्रोणं च नाळिकेरं च वेणुसर्षपमेव च ।। ३३ ।।
गोरोचनं च बिल्वं च द्रव्याण्येतानि षोडश ।
ब्रह्मविष्णुमहेशांश्च हृषीकेशश्च भास्करः ।। ३४ ।।
कलानाथं महासेनं शर्वरुद्रेश्वराधिपम् ।
प्रथमावरणे न्यस्य देवपाणितले न्यसेत् ।। ३५ ।।
द्वितीयावरणे देवान् यष्ट्वा चैवं पितामहः ।
इन्द्रादिलोकपालांश्च सोमाङ्गिरबृहस्पती ।। ३६ ।।

पिङ्गळं मन्मथं चैव ब्रह्माणं ब्रह्मर्षिं तथा ।
वसिष्ठं श्रीधरं चैव क्रमात् षोडशकान् न्यसेत् ।। ३७ ।।
हस्तपाणितले न्यस्य स्नपनं कल्पयेद्बुधः ।
दर्भैरेकादशैः कुम्भे देशिकः कूर्चमाचरेत् ।। ३८ ।।
अग्रं वेदाङ्गुलं चैव ग्रन्थिं व्योमाङ्गुलं नयेत् ।
वर्धन्या नवभिः काशैः विस्तारं तालमात्रकम् ।। ३९ ।।
पञ्चभिर्द्वादशाङ्गुल्यं कलशानां तु कूर्चकम् ।
गन्धपुष्पैः समभ्यर्च्य पूजयेत्स्वस्वनामभिः ।। ४० ।।
प्रत्येकं नववस्त्रेण स्नपनं चैव दापयेत् ।
तस्य पश्चिमदिग्भागे पञ्चगव्यं निधाय च ।। ४१ ।।
स्थण्डिलं शालिभिः कुर्यात् नवकोष्ठसमन्वितम् ।
पादेषु पञ्चकोष्ठानि मध्यपूर्वे तु दक्षिणे ।। ४२ ।।
उत्तरे पश्चिमे चैव परिस्तरणपूर्वकम् ।
लाजपुष्पतिलैश्चैव रन्ध्रकोष्ठेषु योजयेत् ।। ४३ ।।
कलशं क्षाळयित्वा तु त्रिपादूर्ध्वे तथैव च ।
क्षीरं तु मध्यमे स्थाप्य गोमूत्रं पूर्वकोष्ठके ।। ४४ ।।
गोमयं दक्षिणे स्थाप्य पश्चिमे दधि विन्यसेत् ।
उत्तरे तु घृतं स्थाप्य पावके मधु विन्यसेत् ।। ४५ ।।
नैर्ऋते फलसारं च वायव्ये गुडसारकम् ।
ऐशान्ये नाळिकेरं च पूर्वादीनि क्रमान्न्यसेत् ।। ४६ ।।
क्षीरं तत् प्रस्थसंयुक्तं गोमूत्रं कुडुपद्वयम् ।
गोमयं कुडुपं चैव दधि तत् कुडुपत्रयम् ।। ४७ ।।
आज्यं कुडुपमित्युक्तं पयश्च कुडुपत्रयम् ।
कुडुपं तु मधु प्रोक्तं फलसारं च तद्द्वयम् ।। ४८ ।।

गुडसारं ततः प्रस्थं नाळिकेरं तथा भवेत् ।
नवद्रव्यस्य सङ्ख्यातमधिदेवान् ततश्शृणु ।। ४९ ।।
आगस्त्यं च पुलस्त्यं च विश्वामित्रं च भार्गवम् ।
गार्ग्यं च तुम्बुरुं चैव भारतीनां च मुद्गलम् ।। ५० ।।
ऋषिं ब्रह्मपदं चैव कलशं पाणिसंस्थितम् ।
पुष्पैः कूर्चैस्समभ्यर्च्य स्वस्वमन्त्रेण देशिकः ।। ५१ ।।
धूपदीपन्ततः कृत्वा लिङ्गं सुरभिमुद्रया ।
तत्वमन्त्रेण सम्पूज्य दशमुद्रां प्रदर्शयेत् ।। ५२ ।।
प्रधानकलशो मध्ये सर्वं संयोजयेद्बुधः ।
सापिधानं च सर्वत्र शस्त्रमन्त्रेणबुद्धिमान् ।। ५३ ।।
शिवस्य यजनार्थाय द्रव्यजातान् समाहरेत् ।
महाभिषेके द्रव्यस्य जलस्य हविषस्तथा ।। ५४ ।।
गन्थस्यापि विशेषेण न प्रमाणं प्रजापते ।
मनोभिलषितं यच्च तत्सर्वं परिकल्पयेत् ।। ५५ ।।
अथवान्यप्रकारेण तेषां मानं वदामि ते ।
चतुश्शतं च कदळी लिकुचं शतमेव च ।। ५६ ।।
नारङ्गं चैव पञ्चाशत् तद्द्वयं चूतमेव च ।
नाळिकेरं शतं प्रोक्तं पनसं तु द्वयं भवेत् ।। ५७ ।।
त्रिंशत्पलं शर्करा च घृतं द्विप्रस्थमेव च ।
तद्द्वयं माक्षिकं प्रोक्तं तच्चतुष्कं तु तैलकम् ।। ५८ ।।
तत्त्रयं क्षीरमित्युक्तं तदर्धमीरितं दधि ।
चतुर्विंशत्पलं गन्धं जलद्रव्यं पलं स्मृतम् ।। ५९ ।।
तदर्थं घनसारादि रजन्यामलसकुंकुमम् ।
षट्पलं चेति विख्यातं खारी स्यादन्नपूजनम् ।। ६० ।।

द्रव्याण्यपि तधान्यानि चतुःप्रस्थेन कारयेत् ।
एवं द्रव्यस्य सङ्ख्यातमुपर्युपरि कल्पयेत् ॥ ६१ ॥
सर्वद्रव्याणि सङ्गृह्य प्रक्षाळ्य प्रोक्षयेद्धृदा ।
शोधयित्वा तु सद्येन द्वारपूजां समाचरेत् ॥ ६२ ॥
द्वारमस्त्राम्बुना प्रोक्ष्य द्वारपालान् प्रपूजयेत् ।
गर्भगेहं प्रविश्याथ देशिकश्चोत्तराननः ॥ ६३ ॥
प्राणप्रकृतियोगेन ज्ञात्वा कर्म समाचरेत् ।
सम्पुज्य मूललिङ्गं तु शुद्धिं शिवास्त्रतो भवेत् ॥ ६४ ॥
तुलसीबिल्वपत्रेण लिङ्गपीठं तु घर्षयेत् ।
लेपयेन्मूलमन्त्रेण प्राणयोगं समाचरेत् ॥ ६५ ॥
अष्टत्रिंशत्कलान्यासं मकुटादिक्रमान्न्यसेत् ।
न्यस्त्वा कुम्भस्थमीशानं लिङ्गस्थं तु सदाशिवम् ॥ ६६ ॥
प्राकृतं भावमुत्सृज्य पूजयेदेकचित्ततः ।
स्नपनं पञ्चगव्यं चाप्यर्चनोक्तं विधीयते ॥ ६७ ॥
मूलब्रह्मषडङ्गैश्च गन्धतोयं प्रपूजयेत् ।
ऊर्ध्वश्वासमधश्श्वासं सन्निरुध्य परीक्षयेत् ॥ ६८ ॥
मौनं चन्द्रार्कनाशश्च सर्वपूजानिमित्तकम् ।
वेदाद्यध्ययनं कुर्यादग्रमण्डपमध्यमे ॥ ६९ ॥
चमकं नमकं चैव पुंसूक्तं पवमानकम् ।
श्रीसूक्तं पञ्चशान्तिं च कलास्तूकं हिरण्यकम् ॥ ७० ॥
विप्रो वाऽथ चतुर्वेदी महाशैवोऽथ दीक्षितः ।
अदीक्षितो भक्तिहीनो मन्त्रहीनो न संस्पृशेत् ॥ ७१ ॥
लिङ्गार्चामपि तत्तुल्यैस्समयाम(य)विशेषतः ।
वेदाध्ययनयुक्तस्सन् गन्धवारि प्रपूजयेत् ॥ ७२ ॥

गव्यं पञ्चामृतं चैव व्योमव्यापिं समुच्चरन् ।
दशाक्षरत्रयोमन्त्रैः पूजयेत्परमेश्वरम् ॥ ७३ ॥
लम्बकूर्चं लम्बमालां मूलब्रह्मषडङ्गकैः ।
पिष्टामलकहारिद्रगन्धतोयैश्च पूजयेत् ॥ ७४ ॥
अष्टपुष्पैर्वस्त्रगन्धैः सप्तसङ्ख्या निवेदनम् ।
नृत्तगीतसमायुक्तं स्तोत्रमङ्गळवाचकैः ॥ ७५ ॥
नानादीपैरलङ्कृत्य धूपदीपं प्रदापयेत् ।
पञ्चाननिवेद्यं च पुनराचमनं ततः ॥ ७६ ॥
ताम्बूलमुखवासं च दर्पणं दर्शयेत्ततः ।
शैवाग्निं सम्प्रकल्प्याथ वह्निकार्योक्तमार्गतः ॥ ७७ ॥
ब्रह्मवृक्षसमिद्भिस्तु समिदाज्य चरून् हुनेत् ।
होमद्रव्याणि सर्वाणि सद्योजातादिभिस्सह ॥ ७८ ॥
जयादिरभ्याधानं च राष्ट्रभृच्चक्रमाद्धुनेत् ।
शेषाहुतिं च कूश्माण्डं स्विष्टकृत् जुहुयात्ततः ॥ ७९ ॥
पुनस्त्वादित्येति मन्त्रेण पूर्णाहुतिं समाचरेत् ।
सर्वरोगनिवृत्यर्थं सर्वयागफलप्रदम् ॥ ८० ॥
सर्वसम्पत्करं नृणां पुत्रपौत्राभिवर्धनम् ।
अचार्यं पूजयेत्पश्चात् दैवज्ञमृत्विजं तथा ॥ ८१ ॥
एवं यः पूजनं कुर्यात् सर्वशान्तिमवाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
महाभिषेकविधिपटलः एकचत्वारिंशत्तमः समा

अथ एकादशरुद्राभिषेकविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि रुद्रमन्त्राभिषेचनम् ।
सर्वविघ्नविनाशार्थमपमृत्युविनाशनम् ॥ १ ॥
सर्वरोगविनाशार्थं राष्ट्रदुर्भिक्षनाशनम् ।
वर्षार्थं च जयार्थं च विशेषात् ज्वरनाशनम् ॥ २ ॥
ग्रहपीडाविनाशार्थं सर्वोपद्रवनाशनम् ।
सर्वसिद्धिकरं पुण्यं मासर्क्षे जन्मनि त्रये ॥ ३ ॥
रविवारे सोमवारे जन्मर्क्षे विषुवायने ।
सङ्क्रान्तौ ग्रहणे चैव कल्पयेत्तु विशेषतः ॥ ४ ॥
शिवाग्रे स्थण्डिलं कृत्वा पुण्याहं पञ्चगव्यकम् ।
पञ्चामृतं तु सङ्कल्प्य कुम्भसंस्थापनं ततः ॥ ५ ॥
मध्यकुम्भे शिवं पूज्य वर्धनीं तस्य वामके ।
अष्ट विद्येश्वरान् स्थाप्य विधिवत्पूजयेद्गुरुः ॥ ६ ॥
अग्निकार्योक्तमार्गेण होमङ्कुर्याद्विशेषतः ।
द्वारपूजां ततः कृत्वा लिङ्गशुद्धिमथाचरेत् ॥ ७ ॥
आत्मार्थं च परार्थं च शुद्धशैवो जपेत्क्रमात् ।
अथवा ब्राह्मणान् विप्रान् शिवकुम्भसमन्वितान् ॥ ८ ॥
रुद्रसङ्ख्यान् समाहुय अर्धमण्टपसंस्थितान् ।
जपेत्सङ्कल्पपूजां च एकादशपरायणम् ॥ ९ ॥
तैलाद्यन्नपूजान्तम् अभिषेकमथाऽचरेत् ।
ओदनं नाळिकेरं च गुडताम्बूलसंयुतम् ॥ १० ॥
रुद्रपारायणं चैव पुनः पुनर्निवेदयेत् ।
एकादशजपान्ते तु गन्धतोयाभिषेचनम् ॥ ११ ॥
मन्त्रान्नं च निवेद्याथ ततः कुम्भाभिषेचनम् ।
वस्त्रमाल्यैरलङ्कृत्य महानैवेद्यमाचरेत् ॥ १२ ॥

धूपदीपोपचारादीन् पूर्वोक्तविधिना चरेत् ।
त्रिपक्षं वा द्विपक्षं वा पक्षमेकमथापि वा ।। १३ ।।
एकादशदिने पूज्य यथावित्तानुसारतः ।
ब्राह्मणान् भोजयेन्नित्यं यथाविभवविस्तरम् ।। १४ ।।
यथावित्तानुसारेण दक्षिणां दापयेत्क्रमात् ।
एवमेव प्रकारेण कारयेद्देशिकोत्तमः ।। १५ ।।
विपरीतं न कर्तव्यं कर्तव्यं कर्तृनाशनम् ।
एवं सम्पूज्य विधिवत् एकाहे वा समाचरेत् ।। १६ ।।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
एकादशरुद्राभिषेकविधिपटलद्विचत्वारिंशत्तमःसमाप्तः

अथ तैलाभ्यङ्गविधिपटलप्रारम्भः

अथातस्सम्प्रवक्ष्यामि तैलाभ्यञ्जनमुत्तमम् ।
तिलतैलेन कृत्वा तु सुगन्धं कुसुमैर्युतम् ॥ १ ॥
गृहीत्वा नवकुम्भेन वर्मणाऽवकुण्ठनं कुरु ।
लिङ्गं वा प्रतिमां वापि मृन्मये भित्तिचित्रके ॥ २ ॥
लिङ्गं च प्रतिमां शैलं लेपनं मर्दनेन तु ।
मृन्मये भित्तिचित्रे वा दर्पणस्य तु बुद्धिमान् ॥ ३ ॥
रत्नजे लोहजे चैव कूर्चेन प्रोक्षयेद्बुधः ।
वस्त्राणि सन्त्यजेदेव तत्पुरुषेण पूजयेत् ॥ ४ ॥
धूपदीपं हृदा दत्वा दन्तकाष्ठं ददेद्बुधः ।
दर्पणं दर्शयेद्धीमान् ताम्बूलं दापयेद् हृदा ॥ ५ ॥
तैलमस्त्रेण सम्प्रोक्ष्य कवचेनावकुण्ठयेत् ।
अस्त्रमन्त्रेण संरक्ष्य तैलं हृदयबीजकम् ॥ ६ ॥
मर्दयेन्मस्तकं लिङ्गं लेपनं देशिकोत्तमः ।
पीठेन मार्जनं वामम् अघोरं मूलकेन तु ॥ ७ ॥
हरिद्रां सद्यमन्त्रेण स्नापयेत्तु विशेषतः ।
अशुभान् निरसत्कृत्वा शुभानां दापयेत्कृतिः ॥ ८ ॥
गन्धोदकेन सम्पूज्य वस्त्रेणैव तु मार्जनम् ।
गन्धपुष्पं च धूपं च दीपं चैव तु योजयेत् ॥ ९ ॥
निवेदनं च कर्तव्यम् उपदंशसमन्वितम् ।
ताम्बूलं दापयेत्पश्चात् स्वस्थानं पादमूलतः ॥ १० ॥
नित्यनैमित्तिके वापि वारे पर्वद्वयेन तु ।
उत्सवादीनि काम्यं तु तीर्थमन्त्ये तु कारयेत् ॥ ११ ॥
परिवेषं ततः कृत्वा गेयनृत्तसमाकुलम् ।
चूर्णं तु कुट्टयेद्धीमान् महाव्योमेति मन्त्रतः ॥ १२ ॥

लूखलं पृथिवी चैव मुसलं मेरु कल्पयेत् ।
तन्मध्ये रजनीं तस्य सशुष्केण समन्वितम् ॥ १३ ॥
स्तोत्रस्तुत्यसमायुक्तं सर्वालङ्कारसंयुतम् ।
ततो भक्तजनैस्सार्धं दापयेत्तैलकं विदुः ॥ १४ ॥
ताम्बूलं दापयेत्पूर्वे सर्वत्र परिसेवितम् ।
यान्यान् कामयते देवं तांस्तान् सर्वस्य सिद्धितः ॥ १५ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

तैलाभ्यङ्गविधिपटलस्त्रिश्चत्वारिंशत्तमः समाप्तः

अथ शीतकुम्भविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण शीतकुम्भविधिक्रमम् ।
सर्वलोकहितं पुण्यं सर्वदा सस्यवर्धनम् ॥ १ ॥
अनावृष्टौ ज्वरोत्पत्तौ महामारीप्रकोपने ।
प्रवर्तितेऽग्निदिग्दाहे ग्रामेऽपि नगरेऽपि वा ॥ २ ॥
वाहनानां तु रोगार्तौ शीतकुम्भं तु कारयेत् ।
प्रासादाग्रे तु कर्तव्ये मण्डपे स्थण्डिलं कुरु ॥ ३ ॥
शालिभिश्च वसुद्रोणैः तस्यार्धैस्थण्डिलैरपि ।
हस्तद्वयप्रविस्तारं तन्मध्येऽब्जं समालिखेत् ॥ ४ ॥
स्थण्डिलं गन्धपुष्पाद्यैः पूजयेद्धृदयेन तु ।
पक्वबिम्बफलोपेतं निष्कळङ्कं सुनिर्मलम् ॥ ५ ॥
द्रोणत्रयजलैः पूर्णं कृतं सत्कुम्भमुत्तमम् ।
मध्यमं खारिसम्पूर्णं शिवत्रयजलावहम् ॥ ६ ॥
कन्यसं जातिविख्यातं सूत्रेणैव तु वेष्टयेत् ।
कुम्भं सद्येन सङ्गाह्य क्षाळयेत्कवचेन तु ॥ ७ ॥
प्रोक्षयेत्पुरुषेणैव स्थापयेत्स्थण्डिलोपरि ।
मधुनाऽऽज्येन वा दध्ना क्षीरेणेक्षुरसेन वा ॥ ८ ॥
गन्धादिभिर्वा सम्पूर्य कूर्चं तत्रैव निक्षिपेत् ।
चन्द्रकान्तं न्यसेत्तस्मिन्नथवा हेमपङ्कजम् ॥ ९ ॥
चतुर्थस्य द्वितीयेन प्रथमस्वरसंयुतम् ।
वारिबीजसमायुक्तं बिन्दुनादसमन्वितम् ॥ १० ॥
दशार्णैरेवसंवेष्ट्य परितश्च दळे न्यसेत् ।
वस्त्रैश्च सितवर्णैश्च चन्द्रं गन्धादिभिर्यजेत् ॥ ११ ॥
दर्शयेत्सुरभिमुद्रां विधानेन विधाय च ।
वस्त्रयुग्मेन संवेष्ट्य पायसान्नं निवेदयेत् ॥ १२ ॥

याज्ञिकैः स्तरुभिः कुर्यात् त्रिपादीलक्षणान्वितम् ।
रत्निमात्राधिकं लिङ्गं मूर्ध्नि चोपरि कल्पयेत् ॥ १३ ॥
त्रिपाददैर्घ्यमेवं तु कल्पयेत्कल्पवित्तमः ।
युगाश्रं वा सुवृत्तं वा द्वादशाङ्गुलनाहकम् ॥ १४ ॥
पक्षतालप्रमाणेन तदूर्ध्वे फलकां कुरु ।
अब्ध्यङ्गुलेन सुषिरं वृत्तमध्ये प्रकल्पयेत् ॥ १५ ॥
क्षाळयेत्पञ्चगव्यैश्च शिवतोयेन सेचयेत् ।
अधिवासनकाले तु पादानभ्यर्च्य देशिकः ॥ १६ ॥
गुणत्रयेण पादेषु गन्धपुष्पादिभिर्यजेत् ।
वस्त्रेण वेष्टयेत्पादान् प्रोक्षयेत्पुरुषेण तु ॥ १७ ॥
ब्रह्माणं दक्षिणे पूज्य विष्णुं वामे तु पूजयेत् ।
वृषभं पश्चिमे पूज्य त्रिपादेषु च देवताम् ॥ १८ ॥
महामायां न्यसेदूर्ध्वे फलकायाः स्वमन्त्रतः ।
देशिको मूर्तिपैस्सार्धं होमकर्म समारभेत् ॥ १९ ॥
पञ्चाग्निर्वा नवाग्निर्वाऽप्येकाग्निर्वा तु कारयेत् ।
ऐशान्यां तु प्रधानं तु महाशासु चतुर्ष्वपि ॥ २० ॥
विदिक्षु चतुरश्राणि प्रधानं वृत्तमेव च ।
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा ॥ २१ ॥
त्रयाग्न्यायतनं वापि एकाग्न्यायतनं तु वा ।
एकाग्न्यायतनं चेत्तु ईशान्यां सम्प्रकल्पयेत् ॥ २२ ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमार्गतः ।
समिधाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान् ॥ २३ ॥
समिधं सद्यमन्त्रेण शेषांश्चान्यैः हुनेत् क्रमात् ।
पलाशखदिराश्वत्थप्लक्षोदुम्बरमेव च ॥ २४ ॥

शमी च बिल्वपत्रं चाप्यपामार्गवटं तथा ।
पलाशं तु प्रधाने स्यात् समिच्चक्रादिषु क्रमात् ।। २५ ।।
प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत् ।
पञ्चब्रह्मषडङ्गैश्च मूलेनैव हुनेत्पृथक् ।। २६ ।।
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं तु शिरसा स्त्विष्टमग्नेति होमयेत् ।। २७ ।।
स्तोत्रैश्च नृत्तगेयाद्यैः रात्रिशेषं व्यपोह्य च ।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः ।। २८ ।।
प्रातस्सन्ध्यावसाने तु कुम्भारोहणमारभेत् ।
गव्यैस्संस्नापयेद्देवं पञ्चब्रह्ममुदाहरन् ।। २९ ।।
आसनं कल्पयित्वा तु यथविधिपुरस्सरम् ।
गन्धपुष्पैश्च धूपैश्च नैवेद्यैर्विविधैर्यजेत् ।। ३० ।।
त्रिपादीन् स्थापयेद्धीमान् सूत्राग्नेः परिवर्जितम् ।
आचार्यं पूजयेत्पश्चात् वस्त्रहेमाङ्गुळीयकैः ।। ३१ ।।
निष्कत्रयाऽधमा ज्ञेया द्विगुणा मध्यमा स्मृता ।
त्रिगुणा चोत्तमा प्रोक्ता देशिकस्य तु दक्षिणा ।। ३२ ।।
आदावन्ते गुरोरेव दक्षिणां दापयेद्बुधः ।
मूर्तिपान् पूजयेत्पश्चात् प्रागुक्तविधिना सह ।। ३३ ।।
सर्वलक्षणसंयुक्तं सर्वातोद्यसमायुतम् ।
कुम्भमुद्धृत्य शिरसा बाह्यधामप्रदक्षिणम् ।। ३४ ।।
त्रिपादूर्ध्वे न्यसेत्कुम्भं व्योमव्यापिं समुच्चरन् ।
सुषिरं कुम्भपृष्ठे तु कारयेत्तु विचक्षणः ।। ३५ ।।
माषमात्रं सुवर्णेन चतुरङ्गुलमानतः ।
नाळं तत्र प्रकर्तव्यं यवार्धसुषिरं कुरु ।। ३६ ।।

तन्नाळात् सततं तोयं स्रावयेल्लिङ्गमूर्धनि ।
तद्द्रव्येण समापूर्य स्थण्डिलेऽप्युपकुम्भकम् ।। ३७ ।।
स्थापयित्वा विशेषेण मन्त्रन्यासादिवर्जितम् ।
मध्वादिशोषणात्पूर्वमुपकुम्भं तु पूरयेत् ।। ३८ ।।
मासं वाप्यर्धमासं वा अथवा दिनसप्तकम् ।
पञ्चाहं वा त्र्यहं वापि दिनमेकमथापि वा ।। ३९ ।।
यावन्निश्चित्य दिवसान् तावदेवं समाचरेत् ।
ब्रह्मणान् भोजयेन्नित्यं यथावित्तानुसारतः ।। ४० ।।
कुम्भादेव स्रवे कुर्यान्नित्यनैमित्तिकं तथा ।
पूर्वे निश्चित्य काले तु मध्याह्ने त्ववरोहणम् ।। ४१ ।।
कृत्वा सम्पूजयेद्देवं स्नपनं कारयेत्ततः ।
शान्तिहोमं ततः कृत्वा पूजयेत्तु विशेषतः ।। ४२ ।।
एवं यः कुरुते मर्त्यस्सोन्ते मोक्षमवाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

शीतकुम्भविधिपटलःचतुश्चत्वारिंशत्तमःसमाप्तः

अथ जलधाराविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि जलधाराविधिक्रमम् ।
महामारीविनाशार्थं अपमृत्युविनाशनम् ।। १ ।।
सर्वरोगविनाशार्थं राष्ट्रदुर्भिक्षनाशनम् ।
वर्षार्थं च जयार्थं च विशेषज्वरनाशनम् ।। २ ।।
ग्रहपीडाविनाशार्थमारोग्यार्थं विशेषतः ।
सर्वसिद्धिकरं पुण्यं मासर्क्षे तु त्रिजन्मनि ।। ३ ।।
रविवारे सोमवारे जन्मर्क्षे कल्पयेद्बुधः ।
सङ्क्रान्तौ ग्रहणे चैव षडशीतिमुखेऽपि वा ।। ४ ।।
विष्णुपद्यां पितृलये कुर्वन् दर्शे विशेषतः ।
शुद्धिं कृत्वा लयं चैव गोमयेनानुलेपयेत् ।। ५ ।।
नित्यसन्ध्यावसाने तु जलधारां समाचरेत् ।
शिवाग्रे स्थण्डिलं कृत्वा स्थापयेत्पञ्चगव्यकम् ।। ६ ।।
पञ्चामृतं तु सङ्कल्प्य फलसारं तथैव च ।
तैलं सङ्कल्प्य विधिवच्छालिपिष्टं तथैव च ।। ७ ।।
आमलीरजनीकल्प्य नाळिकेरस्य तोयकम् ।
गन्धतोयं तथा कृत्वा शिवाग्रे स्थापयेद्बुधः ।। ८ ।।
पुण्याहं वाचयित्वा तु प्रोक्षयेदस्त्रमन्त्रतः ।
नवभाण्डानि सङ्गृह्य स्नानार्थमुदकं ग्रहेत् ।। ९ ।।
वस्त्रपूरिततोयेन सुगन्धं द्रव्यवासितैः ।
स्वच्छमर्कांशुसन्तप्तैर्जलद्रोणीं च पूरयेत् ।। १० ।।
द्वारपूजां ततः कृत्वा लिङ्गशुद्धिं समाचरेत् ।
वस्त्रेणोद्वर्तनं कुर्यादस्त्रमन्त्रेण देशिकः ।। ११ ।।
सङ्गृहे स्थापितान् द्रव्यान् तैलादीनभिषेचयेत् ।
पिष्टामलकचूर्णांश्च रजनीं घर्षयेत्पुनः ।। १२ ।।

पञ्चगव्येन संस्नाप्य पञ्चामृतं तदन्तके ।
तदन्ते फलसारं च गन्धोदकं तदन्तके ॥ १३ ॥
नाळिकेरोदकेनैव स्नापयेत्परमेश्वरम् ।
शीतलं तज्जलं कृत्वा यधेष्टमभिषेचयेत् ॥ १४ ॥
वस्त्रेण वेष्टितं लिङ्गं गन्धमाल्यैश्च भूषयेत् ।
पाद्यमाचमनं चार्घ्यं हृदयेन प्रदापयेत् ॥ १५ ॥
धूपदीपं हृदा दत्वा पायसान्नं निवेदयेत् ।
पानीयाचमनं दत्वा ताम्बूलं तु निवेदयेत् ॥ १६ ॥
सौवर्णं राजतं ताम्रं अथवा मृन्मयं भवेत् ।
द्रोणत्रयेण सम्पूर्णं जलपात्रं तु सङ्गहेत् ॥ १७ ॥
कनिष्ठाग्रप्रमाणेन तत्पृष्ठे सुषिरं कुरु ।
वस्त्रयुग्मेन संवेष्ट्य गन्धपुष्पादिनाऽर्चयेत् ॥ १८ ॥
मूलब्रह्मषडङ्गैश्च गन्धोदपरिपूरितम् ।
शिवगायत्रिमन्त्रेण कूर्चं तन्मध्यमे न्यसेत् ॥ १९ ॥
शङ्खध्वनिसमायुक्तं पणवध्वनिसंयुतम् ।
यन्त्रिकोपरि पात्रं तु विन्यसेल्लिङ्गमूर्धनि ॥ २० ॥
स्रावयेदभिषेकेनाविच्छिन्नाग्रधारया ।
श्रीरुद्रं रुद्रसङ्ख्यं च चमकं च पृथक् पृथक् ॥ २१ ॥
जपेयुर्ब्राह्मणास्सर्वे ननुसूत्रादिकं क्रमात् ।
पञ्चब्रह्मषडङ्गानि देशिकस्तु जपेद्बुधः ॥ २२ ॥
तदन्ते स्नापयेद्देवं शिवगायत्रि मन्त्रतः ।
शिवमन्त्रमनुस्मृत्य पुष्पं मूर्धनि दापयेत् ॥ २३ ॥
वस्त्रेणालम्बनं कृत्वा लिङ्गपीठविशेषतः ।
कर्पूरागरुसम्मिश्रं चन्दनेन विलेपयेत् ॥ २४ ॥

पुष्पैर्नानाविधैरन्यैरलङ्कृत्य विशेषतः ।
पाद्यमाचमनं चार्घ्यं हृदयेन प्रदापयेत् ।। २५ ।।
धूपदीपं हृदा दत्वा प्रभूतहविषं ददेत् ।
पानीयाचमनं दत्वा ताम्बूलं तु निवेदयेत् ।। २६ ।।
शान्तिहोमं ततः कृत्वा शिवाग्निं कल्पयेद्बुधः ।
ब्राह्मणान् भोजयेन्नित्यं शैवान् वेदादिपारगान् ।। २७ ।।
एकाहं वा त्र्याहं वा पञ्चाहं वा विधीयते ।
सप्ताहं तु नवाहं वा रुद्राहं तु विशेषतः ।। २८ ।।
अथवा द्वादशाहं वा एकमासमथापि वा ।
जपहोमार्चनं कार्यं ब्राह्मणाराधनादिकम् ।। २९ ।।
विशेषयजनं चैव नित्यनैमित्तिकं तु वा ।
एतत्सर्वं प्रकर्तव्यं विशेषफलसिद्धये ।। ३० ।।
राज्यार्थी लभते राज्यं जयार्थी लभते जयम् ।
पुत्रार्थी लभते पुत्रं सुखार्थी लभते सुखम् ।। ३१ ।।
एवं यः कुरुते मर्त्यस्सपुण्यां गतिमाप्नुयात् ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

धाराभिषेकविधिपटलः पञ्चचत्वारिंशत्तमः समाप्तः

अथ उष्णोदकविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेणाऽप्युष्णोदकविधिक्रमम् ।
सर्वशत्रुक्षयकरं सर्वोपद्रवनाशनम् ॥ १ ॥
वृश्चिके मासि पक्षे च धनुर्मासे समाचरेत् ।
मकरे कुम्भमासे च उत्तमो विधिरीरितम् ॥ २ ॥
जलधाराविधिप्रोक्तमुष्णोदकमथाऽचरेत् ।
तत्काले पूजनं कुर्यात्सर्वसम्पत्सुखावहम् ॥ ३ ॥
यामं प्रतिविशेषेणाऽप्युष्णोदकमथाऽचरेत् ।
उपसन्ध्यो विशेषेण उष्णोदकं समाचरेत् ॥ ४ ॥
यामं प्रतिविशेषेण अभिषेकं तु कारयेत् ।
स्त्रीवश्यं पुरुषवश्यं वा राजवश्यं तथैव च ॥ ५ ॥
शत्रुनाशकरं नित्यमायुरारोग्यवर्धनम् ।
उष्णोदकं तथाऽत्युष्णं सधूममतिशीतलम् ॥ ६ ॥
अतप्तं वर्जयेत्तोयमुष्णानुच्चं तु सङ्ग्रहेत् ।
अत्युष्णे तु प्रजानाशं सधूमे द्रव्यनाशनम् ॥ ७ ॥
अतिशीते तु सन्तापमतप्ते सस्यनाशनम् ।
तस्मात्तदोष्णानुष्णेन सलिलेनाभिषेचयेत् ॥ ८ ॥
उष्णोदं मलवर्ज्यं स्यात्तस्मात्पूजाफलं भवेत् ।
पूर्ववत्पूजनं कुर्याद्वस्त्रकाञ्चनभूषणैः ॥ ९ ॥
गन्धपुष्पैश्च धूपैश्च दीपैरर्चैश्च पूजयेत् ।
नैवेद्यं दापयेत्तस्मै सव्यञ्जनसपूपकम् ॥ १० ॥
नृत्तगीतादिकं सर्वं बलिहोमं समाचरेत् ।
एवं यः कुरुते मर्त्यस्सपुण्यां गतिमाप्नुयात् ॥ ११ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे उष्णोदकविधिपटलः षट्चत्वारिंशत्तमः समाप्तः

अथ सहस्रधाराभिषेकविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण सहस्रधाराभिषेचनम् ।
अनावृष्टौ ज्वरोत्पन्ने सर्वव्याधिनिवारणम् ।। १ ।।
सर्वदोषहरं पुण्यं सर्वतीर्थं तथैव च ।
सर्वपापहरं चैव सहस्रधाराभिषेचनम् ।। २ ।।
सौवर्णमुत्तमं विद्धि मध्यमं रजतं भवेत् ।
अधमं ताम्रमित्युक्तं पूर्णचन्द्रवदाकृतिः ।। ३ ।।
तन्मध्ये पद्मपत्रं च दळानामष्टसंयुतम् ।
सुषिरं सहस्रसंयुक्तं कल्पयेत्तु विचक्षणः ।। ४ ।।
देवा सहस्रधारायां सहस्रनयनस्य च ।
नामयेवादिवृत्तेतुनहोदेति प्रकीर्तिता ।। ५ ।।
अकाशङ्गमनेगङ्गाधारया चाभिषेचनम् ।
सहस्रशीर्षमन्त्राणि जपं कृत्वा विशेषतः ।। ६ ।।
सहस्रधारामुद्धृत्य लिङ्गस्योर्ध्वे तु कल्पयेत् ।
चतुरङ्गुलमेवं तु लिङ्गमग्रे तु कल्पयेत् ।। ७ ।।
ईशसङ्ख्या तु मन्त्रेण जपित्वा धारयेद्बुधः ।
तज्जलैरभिषेकं स्यात् सर्वदोषनिकृन्तनम् ।। ८ ।।
पूजान्ते सहस्रधाराभिषेचं तु शनैश्शनैः ।
सर्वारिष्टविनाशं स्यात् सर्वतीर्थफलप्रदम् ।। ९ ।।
सहस्रमुखगङ्गायां धारयेदभिषेचनम् ।
श्रीकरं विजयं पुण्यमायुरारोग्यवर्धनम् ।। १० ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

सहस्रधाराविधिपटलस्सप्तचत्वारिंशत्तमःसमाप्तः

अथ अष्टकलशचतुष्कलशस्नपनविधिपटलप्रारम्भः

अष्टभिः कलशैर्वक्ष्ये स्नपनं तत्र मण्टपे ।
चतुर्द्रोणयवैः कृत्वा स्थण्डिलं तु सुवृत्तकम् ।। १ ।।
कर्णिकाऽष्टदळोपेतं तत्र पद्मं समालिखेत् ।
कूटाक्षरं लिखेन्मध्ये दळेष्वष्टसु च क्रमात् ।। २ ।।
यकारादिवकारान्तं शकारार्धान्तमेव च ।
दिग्विदिक्ष्वक्षराण्यष्ट लिखेत्पूर्वादि तत्सुधीः ।। ३ ।।
शिवयोः कुम्भयोर्मध्ये पूर्ववत् स्थाप्य तद्बहिः ।
दळाग्रेषु क्रमात् स्थाप्य पाद्यादीनां तथाष्टकम् ।। ४ ।।
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं कुशोदकम् ।
क्षीरं दधि घृतं चैव दळाग्रेषु च विन्यसेत् ।। ५ ।।
एवमष्टाभिरुद्दिष्टं चतुर्भिः कलशोच्यते ।
पूर्ववत् स्थण्डिलं कृत्वा ततः पद्मं चतुर्दळम् ।। ६ ।।
आलिख्य कर्णिकामध्ये त्वपोक्षरमथाऽऽलिखेत् ।
पृथिव्यादीनि वर्णानि पूर्वादि क्रमशो भवेत् ।। ७ ।।
पूर्ववत्शिवकुम्भं तु वर्धन्या सह देशिकः ।
विन्यस्याथ घृतं क्षीरं दधिक्षौद्राणि च क्रमात् ।। ८ ।।
पूर्वादिषु दळेष्वेतान् विन्यसेदथवा बुधः ।
पूरितो वा न्यसेन्मन्त्री ततो यजनमारभेत् ।। ९ ।।
शिवयोः कुम्भयोश्चैव पूर्ववत्सम्यगाचरेत् ।
धर्मादींश्च चतुर्ष्वेषु अर्चयेत्तु विधानतः ।। १० ।।
एवमभ्यर्च्य तान् पश्चात्तैः कुर्यात् स्नपनं परम् ।
इति यः कारयेन्मर्त्यः स्नपनं विधिपूर्वकम् ।। ११ ।।

सर्वयज्ञफलं प्राप्य शिवेन सह मोदते ।
वेदाग्निनयनप्रस्थैः सम्पूर्णा स्याद्यथाक्रमम् ।। १२ ।।
श्रेष्ठमध्यकनिष्ठं तु कलशस्नापनोचिताः ।
सर्वेषां कलशानां तु शिवकुम्भं चतुर्गुणम् ।। १३ ।।
शक्तिकुम्भं च कलशाद्विगुणं स्यात् प्रमाणतः ।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

अष्टकलश चतुष्कलशस्नपन विधिपटलः अष्टचत्वारिंशत्तमः समाप्तः

अथ पुण्याभिषेकविधिपटलप्रारम्भः

अथ वक्ष्ये विशेषेण पुण्याभिषेकमुत्तमम् ।
धन्यं यशस्करं पुत्रपौत्रवृद्धिप्रदायकम् ॥ १ ॥
सर्वपापहरं पुण्यं सर्वयज्ञफलप्रदम् ।
राजा राष्ट्राभिवृध्यर्धं सर्वसम्पत्समृद्धिदम् ॥ २ ॥
कालस्तु द्विविधो ज्ञेयः स्थूलसूक्ष्मोपलक्षितः ।
पुण्यकालं प्रवक्ष्यामि विशेषेण प्रजापते ॥ ३ ॥
माघादिज्येष्ठपर्यन्तं लौकिकं कालमुत्तमम् ।
षाण्मासमपि विज्ञेयमुत्तरायनसञ्ज्ञिकम् ॥ ४ ॥
आषाढं च समारभ्य पुष्यपर्यन्तमुत्तमम् ।
लौकिकं कालमुद्दिष्टं दक्षिणायनसञ्ज्ञिकम् ॥ ५ ॥
चैत्रादिमासौ द्वौद्वौ च षट् संज्ञा ऋतवस्तथा ।
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः ॥ ६ ॥
क्रमेण भाषितौ चैव सर्वे च भास्कराश्रयाः ।
वसन्तशिशिरश्चैव ग्रीष्मस्स्यादुत्तरायनम् ॥ ७ ॥
शरद्वर्षश्च हेमन्तो दक्षिणायनसञ्ज्ञिकम् ।
ऋतवोऽपि वसन्ताद्याश्चान्द्रसौरा द्विधा मताः ॥ ८ ॥
दर्शाद्या वा झषाद्या वा मेषाद्या तपनाश्रयाः ।
भाविन्यऽप्ययने याम्ये व्यतीते चोत्तरायणे ॥ १० ॥
विषुवद्विषुवे मध्ये प्रशस्तं यजनादिकम् ।
यामं यामार्धकं वापि घटिकैका तु वाथवा ॥ ११ ॥
दानं प्रदक्षिणं होमं तीर्थसङ्गमनादिकम् ।
यजनं चैव तत्काले कार्यं [illegible] ॥ १२ ॥
कुलीरमकरौ ख्यातावयनौ दक्षिणोत्तरौ ।
तौलिमेषौ च विषुवद्विषुवे च प्रकीर्तितौ ॥ १३ ॥

अथस्तात् विंशतिः कर्क्यां मकरेऽपि परे तथा ।
विषुवद्विषुवे त्रिंशं नाड्यस्तु पुण्यदायकाः ॥ १४ ॥
घटे च वृश्चिके सिंहे वृषे सौरे समागते ।
आद्यन्तयोः कलानाड्यः स्मृता विष्णुपदेषु च ॥ १५ ॥
कन्यायां कार्मुके मीने मिथुने वा गते रवौ ।
द्वात्रिंशन्नाडिकाः पूर्वे पश्चाच्च षडशीतिषु ॥ १६ ॥
कर्क्यां रात्र्यन्तके त्वर्धरात्रे सङ्क्रमते रविः ।
पूर्वेऽहनि प्रकर्तव्यं ज्येष्ठनाडिस्समीपगा ॥ १७ ॥
उपविष्टे मृगं सूर्ये निशीधे वा तमीमुखे ।
परस्मिन् दिवसे कार्यमिह शास्त्रे सुनिश्चितम् ॥ १८ ॥
प्रविष्टेर्के निशीधे वा पूर्वापरदिनद्वयम् ।
रात्रौ द्वियामात् पूर्वे च सङ्क्रमेद्यदि भास्करः ॥ १९ ॥
तद्दिनस्य तु मध्याह्नादूर्ध्वङ्कुर्याद्विशेषतः ।
द्वियामात् परतो रात्रौ परेऽह्न्यावर्तनादधः ॥ २० ॥
पुण्यकालस्समुद्दिष्टो ज्ञात्वा यजनमारभेत् ।
यजनं द्विविधं प्रोक्तमात्मार्थं च परार्थकम् ॥ २१ ॥
आत्मार्थं चरमित्युक्तं परार्थं स्थिरलिङ्गकम् ।
स्वगृहे च शिवक्षेत्रे स्वेष्टदेशे मनोरमे ॥ २२ ॥
संस्थाप्य विधिना लिङ्गं स्वात्मनो हितकाङ्क्षया ।
यावज्जीवं स्वहस्तेन पूजितं स्वेष्टलिङ्गकम् ॥ २३ ॥
आत्मार्थमिति विज्ञेयं साक्षात्कैवल्यदायकम् ।
ग्रामे वा नगरे वापि पत्तने राजधानिके ॥ २४ ॥
कुब्जखेटपुरादौ वा पुण्यक्षेत्रे विशेषतः ।
प्रतिष्ठाप्य विधानज्ञः श्शैवसिद्धान्तमार्गतः ॥ २५ ॥

पूजितं लिङ्गबेरं च परार्थमिति कीर्तितम् ।
द्विविधं यजनं सर्वमादिशैवेन कारयेत् ॥ २६ ॥
तस्य योग्यं भवत्यत्र नान्येषां तु प्रजापते ।
द्विजादयश्चतुर्वर्णाः योग्याः स्युः स्वस्वकर्मणि ॥ २७ ॥
विप्रादीनां तु दीक्षायामुत्सवे स्थापने तथा ।
प्रोक्षणे स्नपने चैव प्रायश्चित्ते च पूजने ॥ २८ ॥
सर्वदेवार्चने स्वार्थे परार्थे वाऽन्यकर्मणि ।
आदिशैवः प्रशस्तः तद्व्यतिरिक्तैर्ध्विजादिभिः ॥ २९ ॥
कृते परार्थे यजने सर्वदोषः प्रवर्तते ।
संहिताहोममुद्दिष्टमेकसन्ध्यार्चने कृते ॥ ३० ॥
त्रिसन्ध्यार्चा कृते तत्र स्नपनं शान्तिहोमकम् ।
पक्षोर्ध्वे मूर्तिहोमं स्यात्पञ्चाशत् स्नपनं चरेत् ॥ ३१ ॥
मासोर्ध्वे संहिताहोमं स्नपनं पञ्चविंशतिः ।
द्विमासे तु दिशाहोमं स्नपनं तु तथा भवेत् ॥ ३२ ॥
त्रिमासे शान्तिरित्युक्ता स्नपनं पञ्चगव्यकम् ।
चातुर्मास्ये दिशाहोममष्टोत्तरशतं घटम् ॥ ३३ ॥
पञ्चमे मासि शान्तिस्स्यादष्टोत्तरशतैर्यजेत् ।
षाण्मासे मूर्तिहोमं स्यात् सहस्रकलशैर्यजेत् ॥ ३४ ॥
षाण्मासोर्ध्वे शान्तिहोमं जलसम्प्रोक्षणं कुरु ।
सहस्रकलश्यैर्यष्ट्वास्नापयेत्परमेश्वरम् ॥ ३५ ॥
ततोऽर्चनं प्रकर्तव्यमादिशैवेन धीमता ।
अदीक्षितस्तु यो विप्रः कुर्याल्लिङ्गस्य पूजनम् ॥ ३६ ॥
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ।
ब्राह्मणादिचतुर्वर्णैः शिवदीक्षाविवर्जितैः ॥ ३७ ॥

स्वेष्टलिङ्गे यदा दृष्टे प्रायश्चित्तं समाचरेत् ।
अनुलोमैर्विलोमैर्वा प्रतिलोमैर्विशेषतः ।। ३८ ।।
आत्मार्धयजनं कार्यं न कर्तव्यं परार्धकम् ।
चातुर्वर्ण्योद्भवस्त्रीणामात्मार्थमर्चनं हितम् ।। ३९ ।।
आत्मार्थे वा परार्थे वा यजनार्थभृतिं ग्रहेत् ।
स वै देवलको नाम सर्वकर्मबहिष्कृतः ।। ४० ।।
अथ देवलकान् वक्ष्ये श्रुणुष्व कमलासन ।
कर्मदेवलकाः केचित् कल्पदेवलकाः परे ।। ४१ ।।
शुद्धदेवलकाः केचित् हीनदेवलकाः परे ।
स्विष्टदेवलकास्त्वन्ये पञ्चधा देवलाःस्मृताः ।। ४२ ।।
अन्यसूत्रोक्तमार्गेण ये संवत्सरपूजकाः ।
अदीक्षितास्वयं तत्र कर्मदेवलकास्मृताः ।। ४३ ।।
अनेनैव प्रकारेण वत्सरत्रयपूजकाः ।
कल्पदेवलकाः प्रोक्ताः स्वकर्मनिरतास्तथा ।। ४४ ।।
आचारमन्यसूत्रोक्तमार्गेणोपदिशान्ति ये ।
शुद्धदेवलकास्स्युस्ते हीनाचारसमन्विताः ।। ४५ ।।
स्वसूत्रो ह्यन्यसूत्रोक्तमार्गं त्यक्त्वा चरन्ति ये ।
हीनदेवलकास्स्युस्ते सदाचारसमन्विताः ।। ४६ ।।
भृतिं वाञ्छति पूजायां स्विष्टदेवलकास्तु ते ।
वित्तार्थी च चतुर्वेदी दीक्षितोऽदीक्षितोऽपि वा ।। ४७ ।।
स वै देवलको नाम हव्यकव्येषु गर्हितः ।
दीक्षितश्च चतुर्वेदी वित्तार्थी वत्सरत्रयम् ।। ४८ ।।
स वै देवलको नाम स्थापनादिषु गर्हितः ।
भृत्यर्थं पूजयेद्यस्तु देवान् वा लिङ्गमेव वा ।। ४९ ।।

स वै देवलको नाम पूजाकर्मसु गर्हितः ।
प्रातः स्नात्वा विधानेन सन्ध्याकर्मं समाप्य च ॥ ५० ॥
देवालंयं प्रविश्यार्थं सकळीकृतविग्रहम् ।
स्वासनस्यार्चनं चैव भस्मन्यास क्रमं ततः ॥ ५१ ॥
करशुद्धिक्रमं चैव प्राणवायोश्च रोधनम् ।
भूतशुद्धिं ततः कृत्वा न्यासक्रमविधानतः ॥ ५२ ॥
अन्तर्यागक्रमं चैव सामान्यार्घ्यं विधानतः ।
पुण्याहवाचनं कृत्वा शुद्ध्यर्थं प्रोक्षयेत्ततः ॥ ५३ ॥
पौरपूजादिकं सर्वं पूर्ववत्परिकल्पयेत् ।
प्रासादस्येशदिग्भागे पूर्वे वा चोत्तरेऽपि वा ॥ ५४ ॥
त्रयोदशकरं कार्यं दशपञ्चकरं तु वा ।
मण्टपं कारयेत्तत्र षोडशस्तम्भसंयुतम् ॥ ५५ ॥
श्रुतिद्वारसमायुक्तं वेदतोरणभूषितम् ।
दर्भमालासमायुक्तं वितानाद्युपशोभितम् ॥ ५६ ॥
दाडिमीफलसंयुक्तं कदळीपूगदण्डयुक् ।
गात्रवेष्टनसंयुक्तं मङ्गळाङ्कुरशोभितम् ॥ ५७ ॥
तन्मध्येवेदिकाङ्कुर्याल्लक्षणेन समन्विताम् ।
द्वादशाङ्गुलमारभ्य तालमात्रविवर्धनात् ॥ ५८ ॥
सार्धचत्वारिहस्तं तु नवधा चोच्छ्रयं भवेत् ।
चतुरङ्गुलमारभ्य त्रियङ्गुलविवर्धनात् ॥ ५९ ॥
नवधा चोपवेदी स्यादङ्गुलं चाष्टविंशतिः ।
नवधा हस्तमारभ्य चतुर्हस्तान्तवेदिका ॥ ६० ॥
नवाङ्गुलेन संवृद्ध्या नवधा विस्मृता क्रमात् ।
द्वादशाङ्गुलमारभ्य षडङ्गुलविवर्थनात् ॥ ६१ ॥

(सार्धचत्वारि)हस्तान्तमुत्सेधं नवधा भवेत् ।
दर्पणोदर सङ्काशमुपवेदीं च कल्पयेत् ॥ ६२ ॥
चतुरङ्गुलमारभ्य द्वाविंशत्यङ्गुलान्तकम् ।
द्विद्व्यङ्गुलविवृद्ध्या तु नवधा विस्तृता तु सा ॥ ६३ ॥
विस्तारार्धसमोपेतां सर्वत्र समतां कुरु ।
अथवा मण्डपं त्रेधा कृत्वा मध्ये तु वेदिकाम् ॥ ६४ ॥
(अ)रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभाम् ।
अष्टाङ्गुलप्रविस्तारविस्तारार्थसमन्विताम् ॥ ६५ ॥
वेद्याः मूले तु परितश्चोपवेदीं प्रकल्पयेत् ।
चतुरङ्गुलमुत्सेधं निम्नोन्नतविवर्जितम् ॥ ६६ ॥
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः ।
शालिभिः स्थण्डिलं कुर्यादष्टद्रोणविनिर्मितैः ॥ ६७ ॥
तन्मध्ये नलिनं कुर्यादष्टपत्रं सकर्णिकम् ।
यथोक्तमासनं कल्प्य स्थण्डिलेऽभ्यर्चयेत्क्रमात् ॥ ६८ ॥
शक्तिमुद्रां पद्ममुद्रां मुकुळीं च प्रदर्शयेत् ।
चन्दनोशीरकाश्मीरकुपूरैलासुवासितैः ॥ ६९ ॥
वस्त्रपूतैःजलैःपूर्य शिवकुम्भं च वर्थनीम् ।
कलशांस्तु तथा पूर्व कृत्वालङ्कारसंयुतान् ॥ ७० ॥
शिवाख्यं कलशं मध्ये स्थापयेदम्बुजोपरि ।
वर्थनीं चोत्तरे तस्य परितश्चाष्टकुम्भकान् ॥ ७१ ॥
शिवाख्ये पञ्चरत्नाम्बु वर्धनीं हेमसंयुताम् ।
सकूर्चौ सापिधानौ च फलपल्लवशोभिताम् ॥ ७२ ॥
नाळिकेरफलोपेतौ वस्त्रयुग्मेन वेष्टितौ ।
कलशांस्तु तथा कृत्वा मध्यकुम्भे शिवं यजेत् ॥ ७३ ॥

मनोन्मनीं तु वर्धन्यां विद्येशानष्टदिक्षु च ।
पूजयित्वा विशेषेण गन्धपुष्पादिभिर्यजेत् ॥ ७४ ॥
गन्धपुष्पादिभिश्चैव पूजयेत्तु विशेषतः ।
ततो होमं प्रकुर्वीत पञ्चसंस्कारपूर्वकम् ॥ ७५ ॥
समिधाज्यचरूं लाजसक्तुबिल्वतिलांस्तथा ।
सर्षपं च यवव्रीहिकदळीफलमेव च ॥ ७६ ॥
हृदाऽदीशानपर्यन्तैः प्रत्येकं तु शताहुतिः ।
व्याहृतिं च ततो हुत्वा बीजमुख्येन होमयेत् ॥ ७७ ॥
क्षुरिकेण ततो हुत्वा द्रव्यान्ते पञ्चविंशतिः ।
पूर्णाहुतिः प्रकर्तव्या पुनस्त्वादित्यमन्त्रतः ॥ ७८ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
कूष्माण्डाऽहुतिकं हुत्वा प्रायश्चित्तार्थकं हुनेत् ॥ ७९ ॥
परिषिच्य ततो वह्निं मन्त्रपूतेन वारिणा ।
परिधिस्थान् विष्टरस्थान् देवानुद्वासयेत्सुधीः ॥ ८० ॥
स्नपनं पञ्चगव्यं च पञ्चामृतं तथैव च ।
पूर्ववत् स्थापनं कृत्वा पुण्याह – प्रोक्षणैर्युतम् ॥ ८१ ॥
द्वारपूजादिकं सर्वं प्रागुक्तविधिना चरेत् ।
पुष्पं मूर्धनि विन्यस्य शुद्धाभिरभिषेचयेत् ॥ ८२ ॥
नमकं चमकं चैव पञ्चशान्तित्रियम्बकम् ।
हिरण्यं पवमानं च घृतसूक्तत्रयाक्षरम् ॥ ८३ ॥
शनैश्शनैर्जपित्वाऽथ युगाङ्गुलप्रमाणतः ।
अभिषेकं प्रकर्तव्यं यथाविभवविस्तरम् ॥ ८४ ॥
पञ्चामृतैः पञ्चगव्यैः फलपञ्चामृतैरपि ।
दधिक्षीरघृतान्नैस्तु शर्करातैलमाक्षिकैः ॥ ८५ ॥

नारिकेळोदकैश्चेक्षुरसैरर्घ्योदकैरपि ।
गन्धोदकैश्च बिल्वोदैः सहस्रधारयापि वा ॥ ८६ ॥
अभिषेकः प्रकर्तव्यं मध्ये शुद्धाम्बुमिश्रितम् ।
पञ्चब्रह्मषडङ्गेन पूर्वाह्णे चाभिषेचयेत् ॥ ८७ ॥
पञ्चाक्षरं समुच्चार्य मध्याह्ने चाभिषेचयेत् ।
व्योमव्यापिं समुच्चार्य सायङ्कालेऽभिषेचयेत् ॥ ८८ ॥
अर्धयामे द्विजश्रेष्ठो मूलमन्त्रेण पूजयेत् ।
अन्यसन्ध्योपसन्ध्यासु संहिता मनुना यजेत् ॥ ८९ ॥
मनोभिलषितं यच्च द्रव्यं विध्युक्तमार्गतः ।
अभिषेकं कृतं यत्नात् सत्फलं प्रतिपद्यते ॥ ९० ॥
धूपदीपं ततः कृत्वा पुष्पं मूर्धनि विन्यसेत् ।
गन्धैः पुष्पैः समभ्यर्च्य मूलमन्त्रमनुस्मरन् ॥ ९१ ॥
धर्मज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम् ।
सिंहपादं तु तत्रैवाप्यधर्मादीळिका न्यसेत् ॥ ९२ ॥
अनन्तारभ्य योगान्तं विष्टरे परिकल्पयेत् ।
तदूर्ध्वे स्थापयेल्लिङ्गं सद्येनैव तु मन्त्रतः ॥ ९३ ॥
स्थापितान् वेदिकायां तु कुम्भानानीय देशिकः ।
लिङ्गाग्रे स्थापयेत् प्राग्वत् गन्धपुष्पादिभिर्यजेत् ॥ ९४ ॥
कुम्भाद्देवं समानीय मूलमन्त्रमनुस्मरन् ।
योजयेल्लिङ्गमध्ये तु हृदयेन समन्वितः ॥ ९५ ॥
वर्धन्यां गौरीमादाय पिण्डिकायां तु वामके ।
अनन्तादिशिखण्ड्यन्तान् प्रागाद्यावरणे न्यसेत् ॥ ९६ ॥
पञ्चब्रह्मशिवाङ्गैश्च कुम्भाद्भिरभिषेचयेत् ।
गौरीगायत्रिमन्त्रेण गौरीं पीठेऽभिषेचयेत् ॥ ९७ ॥

अनन्तादिशिखण्ड्यन्तान् तन्मन्त्रेणाभिषेचयेत् ।
अर्चनोक्तं समभ्यर्च्य परिवारगणैस्सह ॥ ९८ ॥
पञ्चवर्णहविर्दद्यात् शिवाय परमात्मने ।
ताम्बूलं दापयेत्पश्चात् मुखवाससमन्वितम् ॥ ९९ ॥
उपचारादिकं सर्वं प्राग्वत्परिकल्पयेत् ।
अष्टपुष्पं ततो दत्वा मन्त्रपुष्पं निदापयेत् ॥ १०० ॥
आचार्यं भूषयेत्पश्चात् वस्त्रहेमाङ्गुळीयकैः ।
मूर्तिपान् परिचारांश्च दैवज्ञान् जापकानपि ॥ १०१ ॥
दीनान्धकृपणादीनां पूजयेत्तु यथातथा ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ १०२ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
पुण्याभिषेकविधिपटलःएकोनपञ्चाशत्तमः समाप्तः

अथ पूजाद्रव्यविधिपटलप्रारम्भः

अथ वक्ष्ये शृणु ब्रह्मन् पूजाद्रव्यक्रमं तथा ।
जलेनैव तु संक्षाळ्य निर्माल्यं तु विवर्जयेत् ।। १ ।।
कूर्चेन वर्षयेल्लिङ्गं चक्षुस्तृणनिरञ्जनम् ।
कण्डू येन गवांस्तेन प्रीयतां परमेश्वरः ।। २ ।।
प्रस्थतैलप्रमाणस्य कदळी पञ्चविंशतिः ।
पिष्टं प्रस्थार्धकं चैव तथा चामलकं भवेत् ।। ३ ।।
रजनीं च रसद्रव्यं तत्प्रमाणं विधीयते ।
कुडुपं घृतसंयुक्तं तदर्थं क्षौद्रमुच्यते ।। ४ ।।
दुग्धं तु शिवसङ्ख्या च दधि चाढकमेव च ।
दशपलं तु शर्करा आढकम् इक्षुसारकम् ।। ५ ।।
लिकुचं दशसङ्ख्या च नारङ्गं द्वयमेव च ।
चूतं पञ्चदशं ज्ञेयं दाडिमीत्रयमेव च ।। ६ ।।
मातुलुङ्गानि च त्रीणि कुळञ्जी रससङ्ख्यया ।
तमरं त्रयमेवोक्तं एकं पनसमेव च ।। ७ ।।
देवताम्रफलं त्रीणि दशकं नाळिकेरकम् ।
अन्नाभिषेकमन्त्रान्नं द्वित्रिप्रस्थं च कारयेत् ।। ८ ।।
गन्धतोयं चार्धपलं गन्धमेकपलं भवेत् ।
ततोकुम्भाभिषेकं च नद्यां स्नानं ततः परम् ।। ९ ।।
ततो सहस्रधारा च सामान्यार्घ्याभिषेचयेत् ।
विशेषतनिरोधार्घ्ये स्वागतार्घ्यं ततः परम् ।। १० ।।
पाद्यादित्रितयं चैव अभिषेकं तु कारयेत् ।
बिल्वोदकं ततो दद्यात् शृङ्गशङ्खाभिषेचयेत् ।। ११ ।।
त्रिप्रस्थं चैव शुद्धान्नं महानैवेद्यखारिका ।
प्रतिप्रस्थं विशेषेण व्यञ्जनं फलमेव हि ।। १२ ।।

क्रमुकं पञ्चकं विद्यात् नागवल्ली तु विंशतिः ।
एलाचूर्णसमं मिश्रं पानीयं प्रस्थमेव च ॥ १३ ॥
धूपमर्धपलं प्रोक्तं धारणाचूडकं भवेत् ।
घृतदीपाञ्जलिः प्रोक्तं द्रव्यसङ्ख्या प्रकीर्तिताः ॥ २४ ॥
उक्तेषु वस्तुकादीषु ऊने वाऽप्यधिकेऽपि वा ।
यथासम्भवैस्सम्पूज्य श्रुणुष्व कमलोद्भव ॥ २५ ॥
आवाहनावसाने तु मधुपर्कं निवेदयेत् ।
गन्धतोयावसाने तु मन्त्रान्नं तु निवेदयेत् ॥ २६ ॥
मार्जनान्ते तु शुद्धान्नमलङ्कारे महाहविः ।
मन्त्रान्नं तु कथं देव ब्रूहि मे त्रिपुरान्तक ॥ २७ ॥
मन्त्रं रहस्यमित्युक्तमदनादन्नमुच्यते ।
रहस्येत्वदनं यत्तत् मन्त्रान्नमिति कथ्यते ॥ २८ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे पूजाद्रव्यविधिपटलःपञ्चाशत्तमः समाप्तः

अथ आधाराधेयविधिपटलप्रारम्भः

आधारपटलं वक्ष्ये श्रूयतां तत्प्रजापते ।
आधारमासनं प्रोक्तमाधेयः परमश्शिवः ।। १ ।।
शिवस्तु निष्कळः प्रोक्तस्त्वाधारः सकळो भवेत् ।
त्याज्ये निष्कळमेवोक्तं सकळं सन्निधिस्थितम् ।। २ ।।
उपानं पादकमलं जगती जङ्घमेव च ।
कुमुदं कुक्षिमित्याहुः कम्पबाहुमुरस्तथा ।। ३ ।।
कण्ठकर्णमिति प्राहुरधःकम्पं ललाटकम् ।
तदूर्ध्वं मूर्ध्नि विन्यासं केशान्तं घृतवारिणी ।। ४ ।।
एषा चैव क्रियाशक्तिः; ज्ञानशक्तिं ततश्शृणु ।
गोमुखी दक्षिणे पार्श्वे त्वीशानदिशमाश्रिता ।। ५ ।।
दक्षिणावसदं पादं वामपादं प्रलम्बितम् ।
तयोरग्रस्थितं लिङ्गं किञ्चिदीशानमाश्रितम् ।। ६ ।।
लिङ्गमेवोक्ततिर्यग्वा.... वायनिर्गतम् ।
ज्ञानशक्तिसमायुक्तं लिङ्गमेतत्प्रकीर्तितम् ।। ७ ।।
ध्यायेद्दुग्धाम्बुधौ वा सा सर्वावयवसुन्दरी ।
नितम्बतटविस्तीर्णा मध्ये क्षामा स्तनोन्नता ।। ८ ।।
वर्धन्योन्तर्गता शक्तिर्लिङ्गं वा विन्यसेद्बुधः ।
पिण्डिकायां क्रियाशक्तिः ध्यानं तत्पूर्वमेव च ।। ९ ।।
प्रतिष्ठादिक्रियाणां तु ज्ञानशक्तिं मनोन्मनीम् ।
ब्रह्मादिस्तम्भपर्यन्तं शक्तिबृन्दाद्विनिष्कृता ।। १० ।।
शक्तिर्मनोन्मनी माता शिव एव पिता गुरुः ।
मनोन्मनी शक्तिरूपा पुंरूपः स्याच्छिवार्धकम् ।। ११ ।।
पुष्पेषु गन्धवत् ज्ञेयं तिलेषु तैलवत्तथा ।
स्थावरं जङ्गमं चैव जगद्योनिं चराचरम् ।। १२ ।।

लिङ्गस्थापनकाले तु चिन्तयेत्तु सदाशिवम् ।
किञ्चित्भेदं विशेषोऽस्ति मनोन्मन्यास्तु वाचिकम् ॥ १३ ॥
चतुर्भुजं त्रिनेत्रं च द्विपादं पीठसंस्थितम् ।
वरदाभयहस्तं च लिङ्गालिङ्गं तु सम्मुखम् ॥ १४ ॥
पूजाभिषेककालेऽस्मिन् एकरूपं तु निर्जितम् ।
द्वयोर्भेदं न कर्तव्यं कर्तव्यमन्यकालके ॥ १५ ॥
संयोगं ज्ञानशक्तिस्तु क्रियाशक्तिस्सुभाषितम् ।
आधाराधेयकं ज्ञात्वा स्थापयेत्तु प्रजापते ॥ १६ ॥
अज्ञानात् स्थापितं लिङ्गं शिवादेवस्यसन्निधौ ।
विचार्य शास्त्रजालानि सम्यक् ज्ञात्वा पुनःपुनः ॥ १७ ॥
कर्षणादिप्रतिष्ठान्तं कर्तव्यं देशिकेन तु ।
अन्यधा कुरुते यस्तु ग्रामक्षोभकरं भवेत् ॥ १८ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

आधाराधेय विधिपटलः एकपञ्चाशत्तमः समाप्तः

अथ चटकबलिविधिप्रारम्भः

चण्डयागमिति ख्यातं चटकस्य विधिं शृणु ।
त्रिशूलमन्त्रलिङ्गं च वक्ष्येऽहं पूजसंयुतम् ।। १ ।।
शुद्धान्नं घृतसम्मिश्रं क्षौद्रं दधि च लड्डुकम् ।
रक्तपुष्पेण सम्पूज्य पूर्वस्यां निक्षिपेद्बलिम् ।। २ ।।
अर्धयामावसाने वा मध्यरात्रेऽथवा क्रियाम् ।
मौनव्रतधरास्तत्र सन्धिदेवान् समर्चयेत् ।। ३ ।।
उद्वासनं तु तत्काले दिनेशार्थं तु वर्जयेत् ।
चटकस्य बलिं दद्यात् स्वनामाद्येन पूर्ववत् ।। ४ ।।
तद्रूपमधुना वक्ष्ये; कृष्णवर्णो महाबलः ।
ऋजुपादसमायुक्तः क्रूरदृष्टिः भयानकः ।। ५ ।।
दंष्ट्राकराळवदनो मञ्जीरचरणाम्बुजः ।
पद्मासनसमासीनः फणिबद्धकराम्बुजः ।। ६ ।।
किङ्कणीमालया युक्तो विद्युत्पिङ्गजटान्वितः ।
घोरदाससुवृत्ताक्षः शूलाभयकरान्वितः ।। ७ ।।
सर्वावयवसंयुक्तो ग्रामपालनतत्परः ।
ग्रामबाह्ये तु परितः पैशाचस्यपदे स्थितः ।। ८ ।।
पायसान्नं तु चटकबलिं कुर्यात्तु तस्य वै ।
अष्टदिक्षु यथान्यायं पूर्वदिक्षु यथाक्रमम् ।। ९ ।।
दीपवाद्यं च तत्काले भैरवस्वरसंयुतम् ।
तत्तत्काले प्रयोक्तव्यं शङ्खकाहळताळकम् ।। १० ।।
शब्दीकृत्वा बलिं दद्यात् पश्चाद्ग्रामप्रवेशनम् ।
चटकस्य बलिः ख्यातं ग्रामसम्पत्करं शुभम् ।। ११ ।।

गौरीयागमहं वक्ष्ये पूर्वरात्रात्रेऽधिवासयेत् ।
सायेचोत्सवमारोप्याऽप्युमास्कन्देश्वरं तथा ॥ १२ ॥
ग्रामप्रदक्षिणं कुर्यात् भक्तोत्सव मथाऽचरेत् ।
सर्वलोकहितं पुण्यं सर्वराष्ट्रविवर्थनम् ॥ १३ ॥
सर्वदारिद्र्यशमनं राज्ञां विजयवर्थनम् ।
भोगमोक्षप्रदं पुंसाम् उत्सवं कथितं क्रमात् ॥ १४ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे

चटकबलिविधिपटलो द्विपञ्चाशत्तमः समाप्तः

अथ शास्तार्चनविधिपटलप्रारम्भः

वक्ष्ये शास्तार्चनं पुण्यं शुभदं पापनाशनम् ।
सर्वलोकहितं पुण्यं सर्वोपद्रवनाशनम् ॥ १ ॥
आत्मार्थं च परार्थं च द्विविधं परिकीर्तितम् ।
दत्वा भक्त्या तु गुरुणा बिम्बं पद्मासनं तु वा ॥ २ ॥
पटे वा भित्तिचित्रे वा आत्मार्थयजनं शुभम् ।
ग्रामादीनां हितार्थय नृपाणामभिवृद्धये ॥ ३ ॥
स्थापितं पूजितं बिम्बं परार्थमिति कीर्तितम् ।
विप्रक्षत्रियविट्छूद्रा दीक्षिताश्च प्रवेशकाः ॥ ४ ॥
आत्मार्थमर्चनं योग्यमितरेषामयोग्यकम् ।
आत्मार्थं च परार्थं च यजनं हि विशेषतः ॥ ५ ॥
योग्यं शिवद्विजानां तु तेषामेवं सुनिश्चितम् ।
पूर्वं कृत्वाऽऽत्मशुद्धिस्तु स्थानशुद्धिर्द्वितीयकम् ॥ ६ ॥
तृतीयं द्रव्यशुद्धिस्तु चतुर्थं बिम्बशोधनम् ।
पञ्चमं मन्त्रशुद्धिस्स्यादुच्यन्ते पञ्चशुद्धयः ॥ ७ ॥
शौचमाचमनं स्नानं तर्पणं विधिपूर्वकम् ।
साविव्याऽष्टशतं जप्त्वा प्रविश्य भवनं ततः ॥ ८ ॥
प्रदक्षिणत्रयं कृत्वा ब्रह्मजज्ञानमन्त्रतः ।
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः ॥ ९ ॥
सन्धार्य विधिना पूर्वं पवित्रं लक्षणान्वितम् ।
अङ्गन्यासं करन्यासं पूर्वोक्तविधिना कुरु ॥ १० ॥
द्वारपूजां ततः कृत्वा ऊर्ध्वाङ्गं भैरवं तथा ।
गजं पूर्वे तु सम्पूज्य गन्धपुष्पदिना पुरा ॥ ११ ॥
प्रविश्य भवनं तत्र स्थानशुद्धिं तथाऽऽचरेत् ।
आसनं कल्पयेत्तत्र पद्मासनं पुरोक्तवत् ॥ १२ ॥

अर्चयेद्गन्धतोयेन अघोरायेति मन्त्रतः ।
त्र्यम्बकमिदं विष्णु ब्रह्मजज्ञानमन्त्रकैः ॥ १३ ॥
शनैश्शनैस्सुसम्पूज्य गन्धपुष्पं सधूपकम् ।
दीपं हृदयमन्त्रेण नैवेद्यान्नं समाचरेत् ॥ १४ ॥
देवस्यत्वेति मन्त्रेण नैवेद्यं कारयेद्बुधः ।
द्वारादिबलिपीठान्तं बलिं दद्याद्यथाक्रमम् ॥ १५ ॥
मदनो भीषणो रौद्रो उन्मत्तश्चोग्रभाषकः ।
आश्चर्यस्सुन्दरो वीर्या शास्ताष्टपरिवारकाः ॥ १६ ॥
गन्धपुष्पादिभिश्चैव स्वनाम्ना च बलिं ददेत् ।
अन्त्यजे स्पर्शने बिम्बं गर्भगेहं प्रवेशयेत् ॥ १७ ॥
स्नपनं कारयेद्देवं शान्तिहोमं तु कारयेत् ।
प्रभूतहविषं दत्वा यथा पूर्ववदाचरेत् ॥ १८ ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे शास्तार्चन
विधिपटलःत्रिपञ्चाशत्तमःसमाप्तः

अथ आत्मार्थपूजाविधिपटलप्रारम्भः

आत्मार्थयजनं कुर्यात् चललिङ्गे विशेषतः ।
काम्यार्थं तु विशेषेण हर्म्यं कुर्याद्विचक्षणः ॥ १ ॥
शिलाभिश्चेष्टकाभिर्वा दारुभिर्वा सलक्षणम् ।
ग्रामे वा नगरे वापि पत्तने राजधानिके ॥ २ ॥
कुब्जके खेटके चैव स्थापयेत्तु विचक्षणः ।
वास्त्वङ्गदेवतास्थाने वीध्यग्रे चैव मध्यमे ॥ ३ ॥
कर्णसूत्रादितत्सूत्रेमध्यवीध्यास्तु दक्षिणे ।
एतेषां स्थापनं चोक्तम् उक्तस्थाने प्रकल्पयेत् ॥ ४ ॥
चललिङ्गं समानीय वास्त्वङ्गे स्थापयेन्न च ।
पूर्वं प्रतिष्ठितं पूज्य तत्पश्चाद्यजनं न हि ॥ ५ ॥
जलोषितं वा दुस्थाने कश्चिदाराध्यलिङ्गकम् ।
प्रयत्नेन ग्रहीत्वा तु पुनस्स्थापनमारभेत् ॥ ६ ॥
मासपक्षर्क्षवारादीनविचारेण स्थापयेत् ।
परिवारादिभिर्युक्तमेकदेशे विमानयुक् ॥ ७ ॥
विश्वदेशे च देशे वा यथेष्टम्पूजयेत्बुधः ।
अपत्नीको गृहस्थो वा ब्रह्मचारी च नैष्ठिकः ॥ ८ ॥
भौतिको वा वनस्थश्च चातुर्वर्णास्ततो नरः ।
आत्मार्थं पूजयेन्नित्यं यथाशास्त्रमतन्द्रितः ॥ ९ ॥
मोक्षार्थी लभते मोक्षं पुत्रार्थी लभते सुतम् ।
अर्थार्थी चार्थमाप्नोति ज्ञानार्थी ज्ञानमाप्नुयात् ॥ १० ॥

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
आत्मार्थपूजाविधिपटलःचतुःपञ्चाशत्तमः समाप्तः

अथ सौरार्चनविधिपटलप्रारम्भः

अतःपरं प्रवक्ष्यामि सौरार्चनविधिक्रमम् ।
नित्यं तदुदयात्पूर्वं चातुर्वर्णं समाचरेत् ॥ १ ॥
वृत्तं त्र्यश्रं पुनर्वृत्तं षडश्रं वृत्तयुग्मकम् ।
अष्टाश्रं च कलाश्रं च सौरचक्रं प्रकीर्तितम् ॥ २ ॥
वृत्तस्य मध्ये प्रणवं त्रिकोणेऽङ्गारकं न्यसेत् ।
पुनर्वृत्ते लिखेत्पञ्च बहिरष्टाक्षरं न्यसेत् ॥ ३ ॥
सुदर्शनं तु षट्कोणे षडङ्गं तस्य सन्धिषु ।
वृत्तयुग्मे महासौरं गायत्रीं शिरसा सह ॥ ४ ॥
अष्टस्वष्टाक्षरं न्यस्य चक्रदिग्देवतां न्यसेत् ।
कलाश्रं च सर्वं प्रोक्तं कलाश्रेष्ठकला न्यसेत् ॥ ५ ॥
कादिसान्तं च रन्ध्रेषु श्रीं क्लीं ह्रीं च समन्ततः ।
महामण्टपमध्यस्थं सौरचक्रं प्रकीर्तितम् ॥ ६ ॥
वाय्वग्निशक्रवरुणेश्वरराक्षसेन्दुधर्मप्रदेशलिखितैरथ यादिवर्णैः ।
....॥ ७ ॥

चतुर्वेदागमाद्युक्तं सर्वपापहरं परम् ।
विप्राणामर्चनं कुर्यात्; क्षत्रियाणां विधिं शृणु ॥ ८ ॥
वृत्तं च वृत्तपद्मं च षडश्रं वृत्तपद्मकम् ।
अष्टाश्रं चतुरश्रं च न्यसेत् प्रणवमध्ययोः ॥ ९ ॥
सूर्यमन्त्रं दळे न्यस्य श्रीं ह्रीं च विलिखेत् शुभम् ।
क्षत्राणामर्चनं ह्येवं; वैश्यानामर्चनं शृणु ॥ १० ॥
वृत्तपद्मं तथा पद्मं षट्कोणं वृत्तमश्रकम् ।
प्रणवं मध्यपत्रे च सूर्य नाम लिखेद्दळे ॥ ११ ॥
ह्रीङ्कारमश्रसंयुक्तं श्रीं ह्रीं च दळे लिखेत् ।
वैश्यानामर्चनं ह्येवं; शूद्राणामर्चनाक्रमम् ॥ १२ ॥

वृत्तं षडश्रकं चैव वृत्तं पङ्कजमश्रकम् ।
मध्ये वेदादिकं प्रोक्तं सूर्यमन्त्रं दळे लिखेत् ।। १३ ।।
श्रीं ह्रीं चैव तु षट्कोणे त्वश्रं ह्रीङ्कारकं पुनः ।
अन्यादन्यां तु सङ्कल्प्य कर्ता भर्ता विनश्यति ।। १४ ।।
यावत्कर्त्रे समारभ्य सर्वपापहरं भवेत् ।
अङ्गन्यासकरन्यासं भूतशुद्धिं विशेषतः ।। १५ ।।
अन्तर्यजनमाश्रित्याऽप्यर्घ्यस्थापनमारभेत् ।
निर्ऋतौ दण्डिनं पूज्य पिङ्गळं वायुकोणके ।। १६ ।।
गणेशमीशदेशे तु पावके गुरुपूजनम् ।
मध्ये प्रभूतिकं स्थाप्य पत्रपुष्पाणि योजयेत् ।। १७ ।।
विमलं सारमाराध्य तथा परमकोणयोः ।
मध्ये पद्मासनं तत्र सूर्यं सम्पूजयेत्ततः ।। १८ ।।
उषां च प्रत्युषां पूज्य तयोश्च स्वस्वनामतः ।
दीप्ता च सूक्ष्मका चैव भद्रा च विजया तथा ।। १९ ।।
अमोघा विमला चैव विभूता विद्युदन्तका ।
सर्वतो नाममन्त्रं च दळमध्ये तु विन्यसेत् ।। २० ।।
पूर्वे सोमस्वरूपं च दक्षिणे बुधपूजनम् ।
गुरुं वै पश्चिमे पूज्य सोमे शुक्रं समर्चयेत् ।। २१ ।।
अग्नावङ्गारकं पूज्य निर्ऋतौ च शनैश्चरम् ।
राहुं च वायुदेशे तु केतुमीशानगोचरे ।। २२ ।।
सर्वोपचारसंयुक्तं तेजश्चण्डेशमर्चयेत् ।
यथाशक्ति नमस्कारं स्तोत्रं भुक्तिप्रदं नृणाम् ।। २३ ।।
रक्षार्थं भयनाशार्थं अस्त्रशस्त्रनिवारणम् ।
एकाहमर्चनं कुर्यात् सर्वसौभाग्यदायकम् ।। २४ ।।

चण्डमारुतसौभाग्यमायुरारोग्यवर्धनम् ।
अपस्मारं क्षयं कुष्ठं त्वक्दोषं सर्वनाशनम् ॥ २५ ॥
सर्वज्वरप्रशमनमक्षिरोगविनाशनम् ।
दुस्वप्नसर्वदुःखानां दुर्निमित्तविनाशनम् ॥ २६ ॥
द्विकालमर्चनं कुर्यात् सर्वसम्पत्समृद्धिदम् ।
षाण्मासात्सर्वकार्याणि; मुक्तिदं वत्सरान्तकम् ॥ २७ ॥
सर्वसिद्धिकरं नृणां प्रणतार्तिविनाशनम् ।
पुत्रप्रदमपुत्राणां सूर्यलोकं भजन्ति ते ॥ २८ ॥
अथातस्सम्प्रवक्ष्यामि सौरदेवार्चनं शृणु ।
पूर्वस्याभिमुखं चैव पद्मासनं सुसंस्कृतम् ॥ २९ ॥
पाद्यादि त्रीणि पात्राणि अस्त्रमन्त्रेण शोधयेत् ।
शुद्धोदकेन पूरित्वा सौरं न्यासक्रमं शृणु ॥ ३० ॥
अस्त्रायेति च मन्त्रे तु दक्षिणं हस्तमध्यमे ।
उत्तरं हस्तमध्यं तु हस्तौ स्पर्शनमेव च ॥ ३१ ॥
मूलमन्त्रषडङ्गं च क्रमाद्वक्ष्ये ऋषीश्वराः ।
प्रणवं मन्त्रमुच्चार्य शङ्करं चान्तमुच्चरन् ॥ ३२ ॥
विसर्गान्तं तु यन्मन्त्रं सूर्यमन्त्रं समृद्धिकम् ।
सान्तं बीजसमायुक्तं हृदये तु न्यसेत्ततः ॥ ३३ ॥
अर्काय शिरसे न्यस्त्वा भूर्भुवस्पर्शिकां न्यसेत् ।
हुङ्कारं कवचं न्यस्त्वा त्रिवेदी तु त्रिमन्त्रकम् ॥ ३४ ॥
अग्निबीजं विसर्गान्तं सौरं त्रिदशदिक्षु च ।
बिन्दुनादसमायुक्तं तन्मन्त्रम् उच्चरन् द्वयम् ॥ ३५ ॥
अबिन्दुरेखामुच्चार्य वह्निं सूर्यान्तमुच्चरन् ।
इदं मन्त्रं समुच्चार्य गन्धपुष्पं प्रदापयेत् ॥ ३६ ॥

कुशाक्षततिलं चैव रक्तचन्दनकुङ्कुमैः ।
अर्घ्यपात्रं प्रतिष्ठाप्य सौरध्यानक्रमं शृणु ।। ३७ ।।
द्विभुजं चैकवक्त्रं तु द्विनेत्रं पद्मधृक्करम् ।
वर्तुलं देवबिम्बस्य मध्यस्थं रक्तवाससम् ।। ३८ ।।
रक्तवर्णं महात्मानं ममरूपं महेश्वरम् ।
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।। ३९ ।।
अष्टबाहुं चतुर्वक्त्रं ध्यायेद्दिवसनायकम् ।
त्रिनेत्रं चतुर्भुजं ध्यात्वा कृतघ्नघ्नं दिवाकरम् ।। ४० ।।
सप्ताश्वं रथमध्ये तु स्थापयेत्तु प्रभाकरम् ।
उषावरुणसंयुक्तं प्रभासन्ध्यासमन्वितम् ।। ४१ ।।
मेधया प्रज्ञया युक्तं सोमादिग्रहसंयुतम् ।
सोमाङ्गारबुधांश्चैव जीवशुक्रशनैश्चरान् ।। ४२ ।।
राहुकेतुसमायुक्तमपमृत्युविनाशनम् ।
क्षीरवर्णं तु सोमे तु अङ्गारं रक्तमेव च ।। ४३ ।।
बुधानां श्यामवर्णाभं बृहस्पत्यग्निवर्णकम् ।
शुक्रं कुन्देन्दुवर्णं तु कृष्णवर्णं शनैश्चरम् ।। ४४ ।।
नीलजीमूतसङ्काशं राहुवर्णं प्रकीर्तितम् ।
केतूनां धूम्रवर्णं तु सर्वे पद्मासने स्थिताः ।। ४५ ।।
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
सोमं च उत्तरे स्थाप्य शुक्रं पूर्वे तु पूजयेत् ।। ४६ ।।
दक्षिणेऽङ्गारकं चैव पश्चिमे तु बृहस्पतिम् ।
ईशान्यां तु शनिं स्थाप्य आग्नेय्यां राहुं विन्यसेत् ।। ४७ ।।
नैर्ऋत्यां केतुं विन्यस्य वायव्यां तु बुधं न्यसेत् ।
पुरस्ताद्रथमश्वं च अरुणं पूर्वतो न्यसेत् ।। ४८ ।।

प्रभामुषां च सन्ध्यां च प्रज्ञां चैव तु विन्यसेत् ।
मेधां च सूर्यचण्डेशौ ईशान्यां दिशि पूजयेत् ।। ४९ ।।
आदित्यलोकपालादीन् तत्तत्स्थानेषु पूजयेत् ।
गन्धपुष्पं च धूपं च स्वनामाद्येन पूजयेत् ।। ५० ।।
षडङ्गन्यासमन्त्रं च अर्घ्यं चैव प्रदापयेत् ।
सूर्यार्चनक्रमं चैव इत्येते लक्षणं तथा ।। ५१ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
सौरार्चनविधिपटलः पञ्चपञ्चाशत्तमः समाप्तः

अथ वास्तुहोमविधिपटलप्रारम्भः


अथ वक्ष्ये विशेषेण वास्तुहोमविधिक्रमम् ।
बालस्थाने सभास्थाने सत्रे वै यागमण्डपे ॥ १ ॥
आद्योपलेष्टिकाधाने लिङ्गसंस्थापने तथा ।
प्रोक्षणे गर्भविन्यासे सकलस्थापनेऽपि च ॥ २ ॥
मण्डपस्थापने चैव नृत्तरङ्गे विशेषतः ।
देवतावाहने चान्यस्थापने च समारभेत् ॥ ३ ॥
वास्तुहोमं प्रकर्तव्यं सर्वसंहारसंयुतम् ।
दीक्षाभिषेकसम्पन्नस्त्वादिशैवो दृढव्रतः ॥ ४ ॥
सर्वलक्षणसंयुक्तस्सर्वतन्त्रविशारदः ।
मन्त्रतन्त्रक्रियामुद्राभावनाभावगर्भितः ॥ ५ ॥
पञ्चाग्ङभूषणोपेतः सर्वलक्षणलक्षितः ।
शुद्धात्मा वास्तुविधिना वास्तुहोमं तु कारयेत् ॥ ६ ॥
वास्तुं सम्पूजयेत्पूर्वम् एकाशीतिपदेषु च ।
जलावर्तं न्यसेदैन्द्रे शालिमध्ये विशेषतः ॥ ७ ॥
सम्पूर्य गन्धतोयेन हेमं तत्रैव निक्षिपेत् ।
दूर्वा पलाशकाशौ च तन्मध्ये तु न्यसेत्ततः ॥ ८ ॥
वस्त्रेणैव तु संवेष्ट्य कूर्चं तत्रैव निक्षिपेत् ।
ब्राह्मणान् पूजयेत्तत्र गन्धपुष्पादिभिः क्रमात् ॥ ९ ॥
स्थण्डिलं वालुकैः कुर्यादनार्द्रैः श्लक्ष्णवत्तरैः ।
पूर्वोदि तेन मार्गेण पदे वै समरीयके ॥ १० ॥
त्रितालमात्रविस्तारमुत्सेधं चतुरङ्गुलम् ।
षडङ्गुलप्रमाणेन सव्ये तुर्याश्रकं कुरु ॥ ११ ॥
ब्रह्मस्थानं तदित्युक्तं स्थण्डिलस्योत्तरे ततः ।
षडङ्गुलप्रमाणेन वृत्तं कुर्यात् क्रमेण तु ॥ १२ ॥

प्रणीतास्थानमित्युक्तं तन्मध्ये नळिनं लिखेत् ।
चतुरश्रं चतुर्वृत्तं योन्याद्यङ्गुलस्थण्डिले ॥ १३ ॥
रेखात्रयं तु पूर्वाग्रे मध्ये याम्ये तथोत्तरे ।
रेखात्रयं तु सौम्याग्रे मध्ये पश्चिमपूर्वयोः ॥ १४ ॥
रुद्रो वैवस्वतस्सोमः प्रागग्राणां तु देवताः ।
उत्तराग्राश्च रेखाश्च वारुणानलभास्कराः ॥ १५ ॥
सद्येनैव तु संलिख्य प्रोक्षयेद्धृदयेन तु ।
सूर्यकान्तोद्भवं श्रेष्ठं अरण्युद्भवमध्यमम् ॥ १६ ॥
श्रोत्रियागारजं हीनमानयेत्पावकं ततः ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमार्गतः ॥ १७ ॥
होमं कुर्याद्विशेषेण वास्तुदेवस्वनामभिः ।
ईशश्चैव तु पर्जन्यो जयन्तश्च महेन्द्रकः ॥ १८ ॥
आदित्यस्सत्यकभ्रंशावन्तरिक्षस्तथैव च ।
अग्निःपूषा च वितधो ग्रहक्षतयमस्तथा ॥ १९ ॥
रुद्रो रुद्रजयश्चैव समरीयस्तथैव च ।
विवस्वांश्चैव मित्रश्च उर्वीधरजयस्तथा ॥ २० ॥
गन्धर्वो भृङ्गराजश्च मृगश्च निर्ऋतिस्तथा ।
दौवारिकश्च सुग्रीवः पुष्पदन्तस्तथैव च ॥ २१ ॥
वरुणो सुरशोषश्च पापयक्षस्तथैव च ।
रोगो नागस्तथा मुख्यो भल्लाटस्सोम एव च ॥ २२ ॥
रुगोदित्यदितिश्चैव आपश्चैवापवत्सकः ।
सविता सावित्रकश्चैव सेन्द्रस्त्विन्द्रजयस्तथा ॥ २३ ॥
चरकी च विदारी च पूतना पापराक्षसी ।
वास्तुदेवान्यथाऽऽख्याता स्वस्वनामैश्च मन्त्रकैः ॥ २४ ॥

प्रणवाद्यैश्चतुर्थ्यन्तैः स्वनामपदमध्यगैः ।
स्वाहान्तैश्चैव मन्त्रैश्च होमयेत्तु विशेषतः ।। २५ ।।
पलाशसमिधा हुत्वा चत्वारिंशन्नवाधिकम् ।
तत्सङ्ख्या तु घृतं हुत्वा चरुं तत्सङ्ख्यया तथा ।। २६ ।।
तिलतण्डुलमिश्रेण हुत्वा पूर्वोक्तसङ्ख्यया ।
वास्त्वभ्यन्तरबाह्यस्थदेवानां स्वस्वनामभिः ।। २७ ।।
समिधादिक्रमेणैव प्रत्येकं जुहुयात्ततः ।
द्रव्यान्ते व्याहृतिं हुत्वा मूलेनाज्यं तु होमयेत् ।। २८ ।।
पञ्चब्रह्मषडङ्गैश्च प्रत्येकं तु शताहुतिम् ।
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।। २९ ।।
स्विष्टमग्नेति मन्त्रेण हुनेत्पूर्णाहुतिं पुनः ।
पलाशोदुम्बराश्वत्थपत्रशुष्कान् सदर्भकैः ।। ३० ।।
बध्वाऽऽज्येन सदा सिक्त्वा तिलसिद्धार्थ दर्भयुक् ।
सम्प्रोक्ष्य हृदयेनैव सम्प्रज्वाल्य तदग्निना ।। ३१ ।।
प्राकाराभ्यन्तरं सर्वं भवनं यागमण्टपम् ।
पर्यग्निकरणं कृत्वा वर्धन्या स्रावतोययुक् ।। ३२ ।।
उल्कान्यक्त्वा तु तद्बाह्ये स्नानं कुर्याद्विधानतः ।
जलभाण्डस्थतोयेन सर्वत्र प्रोक्षयेद्बुदा ।। ३३ ।।
वास्तुहोमं समाख्यातं सर्वदोषनिकृन्तनम् ।
होतारम् पूजयेत्तत्र क्रियां प्रति क्रियाम्प्रति ।। ३४ ।।
पर्यङ्कं पादुकाद्यैश्च यथाशास्त्रविधानतः ।
धनधान्यसुखैः पट्टैरन्यैराभरणादिभिः ।। ३५ ।।

इति पूर्वकारणागमे प्रतिष्ठातन्त्रे
वास्तुहोमविधिपटलः षट्पञ्चाशत्तमःसमाप्तः


इति श्रीकारणागमे पूर्वभागे प्रतिष्ठातन्त्रे
प्रथमसम्पुटम् समाप्तम्













Students Offset, Tirupati